# अलङ्कारप्रस्थान - विमर्शः

डॉ० लक्ष्मीनारायण सिंह

विश्वविद्यालय प्रकाशन, वाराणसी

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sai 477 Alankara Prasthana Vimarsah

LaSi Laksminarayan Sinha

1.

*But thought nor word can seize eternal truth*

PRESENTED BY
AND SOCI

# अलङ्कारप्रस्थान-विमर्शः

# ALANKARPRASTHAN-VIMARSHAH

*by*

Dr. Lakshminarayan Singh
M. A., Ph. D., Sahityacharya.

*Dept. of Sanskrit*
GORAKHPUR UNIVERSITY

**VISHWAVIDYALAYA PRAKASHAN**
**VARANASI.**

# अलङ्कारप्रस्थान-विमर्शः

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

लेखक

**डॉ० लक्ष्मीनारायण सिंह**

एम० ए०, पी-एच० डी०, साहित्याचार्य

प्रवक्ता, संस्कृत-विभाग

गोरखपुर विश्वविद्यालय

विश्वविद्यालय प्रकाशन, वाराणसी

Sai 72-058

First Edition 1971
Rs. 10·00

प्रकाशक
विश्वविद्यालय प्रकाशन
चौक, वाराणसी

मूल्य
दस रुपये

मुद्रक
ज्योतिष प्रकाश प्रेस
कालभैरव मार्ग,
वाराणसी

## Extract from the Examiner's Report :

Dr, Singh has dealt with his subject in a very competent manner. His command of the Sanskrit language is excellent. He has made a deep and critical study of the whole field of Alankarasastra. He has a very good grasp of the distinctions between the different principles which have formed the basis of the development of alankarasastra. He has amply proved his main thesis that there are three main principles ( dhara ) in the treatment of alankaras in the sastra. In doing so, he has displayed a keen critical faculty and originality. The thesis represents a fresh contribution to knowledge.

*Dr. K. A. S. Iyer,*

Retired Professor of Sanskrit
Lucknow University

The author has ably treated the subject of the critical examination of the Schools of Alankaras. He has shown much critical insight in discussing the different views of rhetoricians, The author has a good command over Sanskrit.

The author has made an exhaustive study of the subject and has evinced critical insight in dealing with the available material. He has made a good addition to the existing literature on Alankarasastra.

*V. V. Mirashi,*

Retired Professor of Sanskrit &
formerly Head of the Department
of Sanskrit, Nagpur University.

# अनुक्रम

प्रास्ताविकम् ... क–ङ

## प्रथमो भागः

प्रथमः अध्यायः

काव्यस्य उपयोगित्वम् ... ... १–२६

द्वितीयः अध्यायः

प्रस्थान-मीमांसा ... ... २७–६८

## द्वितीयो भागः

प्रथमः अध्यायः

अलङ्कारस्य अवान्तरधाराः, प्रस्थानत्वञ्च ... ६९–७०

द्वितीयः अध्यायः

स्वभावोक्ति-धारा ... ... ७१–१४४

तृतीयः अध्यायः

वक्रोक्ति-धारा ... ... १४५–१८३

चतुर्थः अध्यायः

रसोक्ति-धारा ... ... १८४–२१८

## तृतीयो भागः

प्रथमः अध्यायः

अलङ्कारस्य-नवीनानि प्रस्थानानि
तदाधारभूता भित्तयश्च ... ... २१९–२२६

द्वितीयः अध्यायः

अलङ्कारे प्रस्थान-त्रैविध्यस्थापनम् ... ... २२७–२३१

# प्रास्ताविकम्

मन्निबद्धस्य शोधप्रबन्धस्य ( Thesis ) विषयो वर्तते अलङ्कारप्रस्थान-विमर्शः। विषयोऽयमापाततोऽतीव व्यापक आभाति, सर्वेषामेव रसाऽलङ्कार-रीति-ध्वनि-वक्रोक्त्यौचित्यानां काव्यतत्त्वानामलङ्कारत्वेन व्यपदिश्यमानत्वात्। अत एव समस्तमेव संस्कृतसमीक्षाशास्त्रं ( Poetics ) अलङ्कारशास्त्रनाम्नैव प्रसिद्धम्। अलङ्काराणामेव प्राधान्यमिति प्राचामलङ्कारदृष्टिरप्यत्र हेतुः। अलङ्करणमलङ्कार इति भावप्रधाना अलङ्कारशब्दस्य व्युत्पत्तिरप्यत्रांशतो भ्रमयति। अलङ्करणत्वेन सर्वैः रस-रीति-ध्वन्यादिभिः काव्यतत्त्वैः सहालङ्कारशास्त्रस्याप्यत्र बोध्यमानत्वात्।

परमत्रालङ्कारशब्दो रस-रीति-ध्वनि-वक्रोक्त्यौचित्यप्रस्थानव्यावृत्तः केवल-मलङ्कारप्रस्थानविषयकः सङ्कुचित एव ग्राह्यः। अतः सीमितमलङ्कारप्रस्थानमेव विमर्शस्य विषयतामवतरति, न कथमपि व्यापकं प्राङ्निर्दिष्टमलङ्कारप्रस्थानम्। एवं विशिष्टेऽलङ्कारप्रस्थानेऽपि न सर्वेऽलङ्कारविशेषा उपमा-रूपकादयो विमर्श-विषयाः, अपि त्वलङ्कारस्य प्रस्थानान्येव धारा ( Schools ) वा। अतोऽत्र अलङ्कारप्रस्थानविमर्शाख्ये शोधप्रबन्धे केवलमलङ्कारस्य प्रस्थानानि धारा वा विमर्शयिष्यन्ते, नालङ्कारविशेषनिबन्धनानि लक्षणादीनि येषां प्राचुर्यमुपलभ्यते प्रायः सर्वेष्वलङ्कारग्रन्थेषु।

आवश्यकतायामवसरतश्चान्यानि प्रसिद्धानि रस-रीति-ध्वन्यादीनि प्रस्थाना-न्यपि सूक्ष्मं परीक्ष्यन्ते, अलङ्कारविशेषाणां लक्षणादीनि तन्मूला भेदोपभेदाश्च यथावसरं विस्तरेण विवेच्यन्ते। किन्त्वेतत् सर्वमुपात्तस्य अलङ्कारप्रस्थान-विमर्शस्य उपबृंहणार्थमेव। कथमात्तो विषय उपबृंहेत बृंहयेच्चालङ्काराणामन्त-र्निगूढानि निःशेषाणि प्राचीन-नवीनप्रस्थानानीति निर्णयं धावन्ती धीर्निरन्तरं नितान्तं मम मानसं ममाथ। सहैव च भावनापीयं पदमकरोद् यत् कथं ममाऽल्पविषया मतिरगाधमलङ्कारार्णवं प्रमथितुं प्रभवेत्। किन्तु शनैः शनै-र्मननतरिणा अपारमलङ्कारसागरं तितीर्षुरहं परितः प्रेरणां प्राप्नुवन्नलङ्कार-प्रस्थानमीक्षणं प्रारभम्।

प्रारम्भे विषयोऽयमकरणीयो ( unworkable ) दुरूहोऽसमाधेयश्चेति मम मनस्यभूत्। किन्तु क्रमेण ग्रन्थानामध्ययन-मननादिभिः समये समये च निर्देशकानां मननतरितीर्णालङ्कारार्णवानां गुरूणां प्रकाशात्मकेन मम स्वान्त-ध्वान्तं तिरयता सामयिकेनोत्साहप्रदेन निर्देशेन प्रगल्भपदा भ्रान्तिरपससार।

परमात्मनः कृपया च निर्विघ्नं कार्यं प्रावर्तत। बहुकालमनन्तमलङ्क्रियाणां विस्तरमलङ्कारप्रस्थानावाप्तिकामनयाऽऽलोडयम्। अलब्धमार्गोऽपि नात्यजं प्रस्थानविमर्शं यतः शनैः शनैरलङ्कारप्रस्थानानि समुन्मीलितुं प्रारेभिरे। क्रमशः स्फुटतामुपेयुश्चेति।

विषयस्योपस्थापनायामादौ लिङ्गं बभूव प्राधान्येन वक्रोक्तिजीवितकारस्य स्वभावोक्ति-रसोक्त्योरलङ्कारतायाः खण्डनपुरस्सरं वक्रोक्तेः प्रकर्षकाष्ठाधिकरोहिण्या[1] मण्डनम्। यथा—

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवशिष्यते।
अलङ्कारो न रसवत् परस्याप्रतिभासनात्॥[2]

अनेन निषेधमुखेनेदं स्पष्टं निर्दिष्टं यदलङ्कारे त्रिभिरेव अवान्तरप्रस्थानैर्भवितव्यम्। येषामेकमेव वक्रोक्त्याख्यमभिमतं कुन्तकस्य। भोजराजेन त्रिविधानामलङ्काररूपाणां स्वभावोक्ति-वक्रोक्ति-रसोक्तीनां स्वीकृतिरप्यलङ्कारस्यावान्तरप्रस्थानत्रैविध्यं द्रढीचक्रे। यथा—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥[3]

दण्डि-भामहयोः हेतुसूक्ष्माद्यलङ्कारविषयको विवादस्तु दृष्टिमेव ददौ। यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः।
हेतुश्च[5] सूक्ष्मलेशौ च वाचामुत्तमभूषणम्॥[4]

एतेषामलङ्काराणामलङ्कारत्वाऽनलङ्कारत्वरूपो विवादः अलङ्कारप्रस्थानबोधं विना न कथमपि विज्ञेयः।

सर्वतोऽधिकां प्राणप्रदां स्फूर्तिमत्र प्रददुरमीषामग्रे निर्दिश्यमाणानामालङ्कारिकाणां विचाराः डा० राघवेन्द्रमहोदयानां श्रृङ्गारप्रकाशस्योपरि शोधप्रबन्धस्य "उक्तीनां विमर्शः" "सम कन्सेप्ट आफ अलंकाराज्" इति ग्रन्थस्य "स्वभावोक्ति-विचारः" काणे-महोदयानाञ्च "नोट्स आन साहित्यदर्पण" इत्यत्र कृतः परिवृत्त्यलङ्कारस्य सूक्ष्मो विमर्शश्च यत्र धाराया (schools) विद्यते स्पष्टो निर्देशः। एस० के० डे महोदयस्य वक्रोक्तिजीवितस्य भूमिकायां

१. व० जी०, पृ० १९५। २. व० जी० १. ११; ३.१०। ३. स० क० २। ४. भामह ३.८६। ५. दण्डी २.२३५।

Sai 72-058

वक्रोक्तेर्विमर्शो बलदेवोपाध्यायानां 'भारतीय-साहित्यशास्त्र'स्य द्वितीयभागस्य वक्रोक्तेर्विचारश्चेति । एतेषां मध्ये सर्वापेक्षया स्पष्टा दृष्टिस्तु काणे-महोदयानां परिवृत्त्यलङ्कारविमर्शात् प्राप्ता ।

अत्र प्रस्थानस्य धाराया वा कल्पनायां ध्वन्यालोककारस्य कथनं दृष्टिमावर्जयति । यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥[१]

ध्वनिकारस्य कथनमिदं सङ्केतयति यदत्रालङ्काराणामुक्तिषु सन्ति मतयो मतानि प्रस्थानानि वा । एवमेव प्रतीपालङ्कारस्य प्रतीपं प्रतिकूलं गच्छन्ति इति व्युत्पत्तिरपि अलङ्काराणां धारां निर्दिशति । अनेन रूपेणानेकैस्तर्कितैस्तत्र तत्रालङ्कारग्रन्थेषु अलङ्कारविशेषाणां विमर्शेषु वाऽधिगतैरुपायैर्विषयोऽयं महतायासेन क्रमेण स्फुटतामुपनीतः ।

प्रस्थानदृष्टेरवगमस्तु जातो लोचनकारस्य प्रस्थानशब्दस्य व्युत्पत्तेः "प्रतिष्ठन्ते[२] परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्" इति । अस्य साहाय्येन चालङ्काराणां त्रीणि त्रीणि प्राचीनानि नवीनानि चालङ्कारस्यावान्तरप्रस्थानानि धारा वा तिस्रः कल्पिताः । एताश्च सन्ति स्वभावोक्ति-वक्रोक्ति-रसोक्तिरूपा यत आभिरेव तिसृभिरलङ्कारधाराभिः परम्परया व्यवहृतानि काव्यान्यभ्युपगम्यन्ते । आसु एव तिसृषु धारासु निक्षिप्तो निःशेष एवालङ्कारप्रपञ्चः ।

अलङ्काराणामादिकाले धारा भवन्ति स्पष्टाः, किन्तु क्रमशो विकासं व्रजत्सु अलङ्कारेषु एता विच्छिद्यन्ते, वर्धते च ऐच्छिको विभागो वर्गीकरणं वा । अत एव वर्गीकरणे दृश्यते विपुलो भेदः । अस्यां स्थितावलङ्काराणां धारात्मको विभागो नातीव सरलः, कृतोऽपि कियान् स्तुत्यः सङ्गतो वेत्यत्रापि सन्दिह्यति चेतः । किन्तु सर्वेषां वर्गीकरणानां सन्दर्भे धारात्मकोऽपि विभागः संस्थापितो धियाऽनया यदयमलङ्काराणां वर्गीकरणे मनोवैज्ञानिकतामांशिकीमानयेत् मार्गप्रदर्शनं च विदध्यात् चित्तवृत्तिरूपाणामलङ्काराणां वास्तविके मनोवैज्ञानिके विमर्शे वर्गीकरणे च, यस्याभावः संस्कृतसमीक्षाध्येतॄणां सचेतसां समीक्षकाणां चेतांसि सततं खेदयति ।

इयमेका विचित्रा स्थितिर्यदशेषासु समीक्षासु दार्शनिकताया एव प्रभावो राजते । संस्कृतसमीक्षायां तु अयमतीवाधिकः । अलङ्काराणां विचारे त्वस्य प्राधान्यमेव । अत एव वयमुपमादीनां विचारे काव्यप्रकाशे साहित्यदर्पणादौ च व्याकरणदृष्ट्यापि कृतान् बहून् भेदानुपलभामहे । अप्पयदीक्षितादिभिः

---

१. ध्वन्या० २.५ । २. लोचन, पृ० २२ ( सटी० लोचनोपेत ध्व० ) ।

कतिपयैरालङ्कारिकैरस्य विरोधोऽपि कृतः । व्याकरणदृष्ट्या कृता भेदा अपि न तैः स्वीकृताः । किन्तु कस्तान् शृणोति ? प्रभावस्तु तथैवासीदस्ति स्थास्यति च । अनेन काव्यस्य वास्तविकी समीक्षा न भवति । यतः कविदृष्टेर्वाहकाः प्राधान्येन भवन्ति अलङ्काराः । एतेषां साहाय्येनैव कविरलौकिकान् भावान् विभावयति, तांश्च सरसान् समाकर्षकांश्च विधत्ते । अत एवालङ्कारोपेता कविवागेव काव्य-पदवीं प्राप्नोति । अत एव वामन-कुन्तक-जयदेवादीनां मतानि सङ्गच्छन्ते, निराक्रियन्ते चाभिमतानि मम्मटभट्टादीनाम् । यथा—

काव्यं ग्राह्यमलङ्कारात् ।[1] सालङ्कारस्य काव्यता ।[2]
अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ॥[3]
तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।[4]

काव्यसमीक्षा कविदृष्ट्या कार्या । यतः काव्यं तु सृष्टिरस्ति कवेः । अतः कविदृष्टिरेव ग्राह्या प्राधान्येनालोचनायाम् । इयं च कविदृष्टिरस्ति सौन्दर्य-रूपा । सौन्दर्यञ्चालङ्कारः । अतोऽलङ्काराणां माध्यमेन कृता समीक्षैव वास्तविकी । अस्यामेव मनोवैज्ञानिकता अलङ्काराणां चित्तवृत्तिरूपत्वात् ।

अलङ्कारेणैव कविरात्मस्थानिनो रसध्वनिवक्रोक्त्यौचित्याख्यान् अभिव्यनक्ति सम्प्रदायान् । न केऽप्यलङ्कारं विना काव्यात्मत्वभाजो भवन्ति । यथा—

गुणालङ्कारौचित्य-सुन्दरशब्दार्थशरीरस्य सति
ध्वननाख्यात्मनि काव्यरूपताव्यवहारः ।[5]

एषैव सरणिरन्यत्रापि अवसेया ।

अतोऽलङ्काराणां महत्ता काव्यशास्त्रेऽक्षुण्णा । तत्र ( अलङ्कारे ) चावान्तर-प्रस्थानानाम् । यत एभिः विना न वास्तविकी विवृतिरलङ्काराणाम् ।

निबद्धेऽस्मिन् शोधप्रबन्धे मया यथाशक्ति यथाशास्त्रञ्च सुदृढाभिः सोप-पत्तिकाभिर्युक्तिभिः अलङ्कारस्यावान्तरप्रस्थानविमर्शो विहितः । प्रस्तुतः प्रबन्धः सचेतसां सहृदयानां समालोचकानां पुर आस्ते । अत्र कियती नवता समुपादेयता वा, प्रतिज्ञातस्य भावस्य पूर्तिश्चेत्यत्र सचेतसः समीक्षकाः प्रमाणम् । मया त्वत्र प्रबन्धेऽलङ्कारस्यावान्तरप्रस्थानविषयकाः प्रायः सर्वेऽपि सन्देहा यथासम्भवं निःशेषं निराकृताः, साधितानि चालङ्कारस्यावान्तरप्रस्थानानि । सम्प्रति सर्वथा निर्दोषोऽयमिति कथयितुं नोत्सहे । यत 'आत्मनः प्रियतया तनुभाजां नात्मनः कृतिषु दूषणदृष्टिरि'ति न्यायात् मत्सदृशरागाणां स्वप्रस्तुतप्रबन्धे नैव दोषदृष्टि-

१. का० सू० १.१.१ । २. व० जी० १.६ । ३. चन्द्रालो० १.८ ।
४. का० प्र० १.१ । ५. लोचन, पृ० ५९ ( सटी० लोच० ध्वन्या० ) ।

र्जायेत । अतोऽस्य सदोषादोषविषये निष्पक्षन्यायभाजः सहृदया विद्वद्वरेण्या एव प्रमाणम् ।

अन्यच्च—

मर्त्यैरसर्वविदुरैर्विहिते क्व नाम ग्रन्थेऽस्ति
दोषविरहः सुचिरन्तनेऽपि

इति न्यायात् प्रमादस्य स्वाभाविकत्वाद् यत्किमप्यत्राज्ञातं
स्खलनं सञ्जातं स्यात् तत् क्षमासारैः
समीक्षकैः सस्नेहं परिष्करणीयमिति
सप्रश्रयं विनिवेदयते ।

विदुषां विधेयः—
लक्ष्मीनारायण सिंहः

# प्रथमो भागः

१. काव्यस्य उपयोगित्वम् ।
२. प्रस्थान-मीमांसा ।

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

प्रथमोऽध्यायः

# काव्यस्य उपयोगित्वम्

## प्रयोजनम्

कवेः कर्म काव्यम्। शब्दार्थौ चास्य (काव्यस्य) शरीरं रसादिश्चात्मा। अत्राङ्गिनो रसादेरभिव्यक्त्यै कवयोऽङ्गरूपिणोः शब्दार्थयोरलङ्करणार्थमशेषाणि गुणरीतिवक्रोक्त्यलङ्कारादीनि उपकरणान्युपाददते। अतः काव्यमलौकिकं भवति। इदं न केवलं साधारणाल्लौकिकात् कर्मविशेषाद् अपितु ब्रह्मणो व्यापकात् सर्गादपि भिद्यते। अस्य सूक्ष्मविवरणमालङ्कारिकैस्तासु तासु कृतिषु विस्तरेण विहितम्। यथा—

नियतिकृतिनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥[1]

अपूर्वं यद्वस्तु प्रथयति विना कारणकलाम्,
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च।
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्,
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥[2]

सरस्वती स्वादु तदर्थवस्तु निःस्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥[3]

यानेव शब्दान्वयमालपामो यानेव चार्थान्वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः संमोहयन्ते कवयो जगन्ति॥[4]

किन्त्वस्ति काचिदपरैव पदानुपूर्वी
यस्यां न किञ्चिदपि किञ्चिदिवावभाति।
आनन्दयत्यथ च कर्णपथं प्रयाता
चेतः सतामममृतवृष्टिरिव प्रविष्टा॥[5]

अत्रेदमलोकसामान्यं कार्यकारणपरम्पराविरहितं कर्म कथं परस्मै प्रत्याय्यते संवेद्यते वा कथं सहृदयैः, कार्य-कारणादिविधिव्यवस्थितस्य वस्तुतस्तेनैव विधिना

१. का० प्र० १.१। २. ध्व० लो० मङ्गलश्लोक, पृ० १।
३. ध्वन्या० १.६। ४. शिवलीलार्णव १.१२।
५. का० सू० वृ० १.२.२१।

बोधस्य दृष्टचरत्वादिति न शङ्क्यम् ; साधारणीकरणरूपस्य काव्यशास्त्रविधेस्तत्राभ्युपगतत्वात्, अन्येषां चाशेषाणामलङ्कारशास्त्रव्यवहितानां केवलं सहृदयैकवेद्यानां नियमानां तत्रापि सत्त्वात् तैरेव काव्यभावानां प्रतीतेश्चेति सुवचत्वात् ।

एतादृशमलौकिकं ह्लादैकमयं कविकर्म न स्यात् पृथक् प्रयोजनात्, न वाऽपेतमुपयोगित्वात्, न च विरहितं फलाद्वा। अन्यथा 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात्—

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत् केन गृह्यते ॥[1]

इति सिद्धान्तितत्वाच्च काव्यस्यैवानुत्पत्तेः, उत्पत्तावपि प्रमत्तप्रलापवदुपेक्षणीयं स्यात्, अव्यवस्था-ऽशान्ति-वासना-विरोध-विप्लवादिदोषजनकत्वाच्च जनैर्विशेषतश्च सहृदयैस्त्याज्यं च स्यात् । अतो न कथमपि काव्यं विहातुं सहते उपयोगिता परिहातुं वा प्रयोजनानि । यत उपयोगिता एव काव्यमुत्पादयन्ति प्रयोजनपरम्परा वा तत् प्रसारयन्ति च । अतः काव्यमाहात्म्यमुपयोगित्वेऽवस्थितम् । उपयोगित्वमेव काव्यस्य चिरायुष्यं श्रद्धाभाजनत्वं जनरुचेरेकसमाराधनत्वं वा अर्पयति ।

आदिकवेर्वाल्मीकिरामायणं विशालबुद्धेर्व्यासस्य महाभारतं चात्र मानम् । तत्र क्रौञ्चयुगलादेकं व्याधेन वध्यमानं वीक्ष्य सहचरीनाशाच्च करुणं क्रन्दतः क्रौञ्चस्य आर्तीराकलयति करुणाक्रान्तहृदये प्रक्रान्तदृष्टौ आदिकवौ वाल्मीकिमहर्षौ वासनारूपेण स्थितः शोक एव सहसा श्लोकत्वमागतः । यथा—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥[2]

अत एव रघुवंशे कालिदास इमामेव घटनां निर्दिश्य विशेषणवक्रताव्याजेन वाल्मीकेः कारुण्यपरतां प्रदर्शितवान् । यथा—

तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय जातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥[3]

इयमेव पूर्वमभिव्यक्ता कालिदासेनापि कृतसमर्थना कवेः करुणापरता विशालं रामचरितं प्रणिनाय। यत्र व्याधरूपस्य रावणस्य रामकृतं वधमावध्य कविः कृतकृत्यतामापेदे, 'रामवद् वर्तितव्यं न रावणवदि'ति शाश्वतं सफलमुपदेशरूपमुपयोगित्वं च ध्वनित्वेन प्रदर्शयति ।

---

१. श्लो० वा० ११२ ।
२. रघुवं० १४.७० ( मल्ली० टी० ) । ३. र० व० १४.७० ।

आदिकविना काव्ये प्रवाहितेयं करुणाधारा निमित्तभेदाद् विविधान् रसविवर्तानाप्नुवाना समस्तानि काव्यान्याप्लाव्य रससिद्धानां कवीनां कीर्तिं सहृदयानाञ्च प्रीतिं विन्दति।

एवमेवाविश्रामं युद्धस्य रणरणकेनाकुलस्य व्यापकविनाशविभीषिकया वेपमानस्य विक्षुब्धस्य विश्वस्य त्राणार्थं शाश्वतां शान्तिधारां विस्तारयन् व्यासोऽपि शान्तिरेव श्रेयसे, न कथमपि प्रलयङ्करी क्रान्तिरिति शान्तमुपदेशं ददानो महाभारतस्योपयोगित्वं व्यनक्ति। अतः प्रत्येकमपि काव्यं किमप्युपयोगित्वमन्तर्गूहन्निसर्गतः सर्गं धत्ते। अस्यैव अन्तर्गूढस्य शान्तादिभावस्याभिव्यक्त्यै प्रयुक्तो विभावानुभावसञ्चारियोगोऽलङ्क्रियते कविभी रसादिनिष्पत्तिं समाकर्षितुम्।

एतच्चाऽलङ्करणं रसादिदशां विचार्य त्रिधा—स्वभावोक्ति-वक्रोक्ति-रसोक्तिभेदात्। यत्र च रसादिरभिव्यक्त्यर्थमपेक्षन्ते स्वभावसुन्दराः पदार्थाः भावा वा, तत्र स्वभावोक्ति-रसोक्ती साहाय्यं कुरुतः। अन्यत्र च वक्रोक्तिः। यत्रापि नास्ति स्फुटो रसादिः, तत्राप्येतास्तिस्रः स्वभावोक्ति-वक्रोक्ति-रसोक्तिरूपा अलङ्कृतयो वैचित्र्यमात्रव्यवसायिन्यः सहृदयानां चेतांसि चमत्कुर्वन्त्यः काव्यालङ्करणत्वं प्रपद्यन्ते।

अत्र रसभावादीनामभावेऽपि नोपयोगित्वमपैति काव्यस्य, नदी-नगरादीनां वर्णनस्यापि व्युत्पत्त्यर्थमुपयोगित्वकोटौ प्रविष्टत्वात्। अथवा नास्त्येव तत्काव्यं यत्र परम्परयाऽपि विभावादिपर्यवसानं न भवतीति काश्मीरिकाः। अत उपयोगित्वं काव्यप्रतिष्ठार्थमनिवार्यम्। किन्त्वेतत् काव्येषु व्यञ्जनया सरसं लघु मृदु च प्रतिपाद्यते। अस्मादेव हेतोः काव्यं शास्त्रेभ्यो वेदेतिहासादिभ्यश्च व्यतिरिच्यते। काव्यस्य सरलः सरसो वोपदेशो न केवलं शास्त्राण्येव व्यावर्तयति, अपि तु कान्तासम्मिततया उपदेशदानात् प्रभुसम्मितोपदेशदातृभ्यो वेदेभ्यः सुहृत्सम्मितोपदेशं वितरद्भ्य इतिहासादिभ्यश्चात्मानं व्यावर्तयति। एवमुपयोगित्वं न केवलं काव्यमुत्पादयति, अपि तु व्यावर्तयत्यपि। अतः काव्योपयोगित्वज्ञानं काव्यदृष्टिविवेचनार्थं नितरामावश्यकम्, विशेषतया चालङ्कारप्रस्थाननिरूपणार्थम्, विभावनार्थञ्च। अत उपयोगित्वरूपार्थस्य कृते प्रयुज्यन्तेऽलङ्काराः, **सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते**[1] इति भामहवचनात्।

सम्प्रति काव्योपयोगित्वं (प्रयोजनम्) संक्षेपेण प्रदर्श्यते—इदमियत्तया निर्धारयितुमशक्यम्। कविभावानामनन्तत्वात् तदुद्भावकानामुपयोगित्वानामप्यानन्त्यमेव। तथापि तासु तासु कृतिषु आलङ्कारिकैः निर्दिष्टा उपयोगिताः संक्षिप्यात्र निरूप्यन्ते। अलङ्कार्यरूपाया उपयोगिताया निर्देशाभावे तदुपस्काराणामलङ्काराणां विमर्शस्याकिञ्चित्करत्वात्। अतोऽलङ्कारप्रस्थानविमर्शेऽस्मिन्नुपयोगितानां निर्देशोऽनिवार्य एवेति संक्षेपेण निरूप्यन्त उपयोगिताः।

---

१. भामह २.८५।

आदौ भरतेन काव्यस्योपयोगिता विशदं दर्शिताः—

क्रीडनीयकमिच्छामो दृश्यं श्रव्यञ्च यद् भवेत् ।
धर्म्यमर्थ्यं यशस्यञ्च सोपदेशं ससङ्ग्रहम् ॥
भविष्यतश्च लोकस्य सर्वकामार्थदर्शकम् ।
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ॥
विश्रामजननं लोके नाट्यमेतद् भविष्यति ।
विनोदजननं काले नाट्यमेतद् भविष्यति ।
श्रुति - स्मृति - सदाचार - परिशेषार्थ - कल्पनम् ॥[1]

अत्र भरतेन काव्योपयोगिताः पराकाष्ठां प्रापिताः । पश्चाद्भवैरालङ्कारिकैः प्राय एतदुपबृंहणमेव कृतम्, किन्तु सर्वत्र सदुपदेशपूर्विका प्रीतिरेव प्रधानम् । क्रीडनीयक-विनोदजनन-लोकोपदेशजननप्रभृतीनि नाट्यविशेषणान्यत्रैव सङ्केतयन्ति ।

अभिनवगुप्त-मम्मटभट्टादयः परिवर्तिन आलङ्कारिका अप्येतत् समर्थयन्ति—
तथापि प्रीतिरेव प्रधानम्, प्राधान्येनाऽऽनन्द एवोक्तः ।[2]
प्रीत्या च रसस्तदेव नाट्यं नाट्य एव वेद इत्यस्मदुपाध्यायः ।[3]
सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलित-वेद्यान्तरमानन्दम् ।[4]

भरतादनन्तरं प्रायः सर्वैरेवालङ्कारिकैरेतयोरेव प्रीत्युपदेशयोर्विस्तारभूता अनेकाः काव्योपयोगिताः प्रदर्शिताः । यत्र कतिपययः कविदृष्ट्या निर्दिष्टाः । यथा—कीर्तिधनप्रीत्यनिष्टनिवारणाद्याः । अपराश्च सहृदयलाभबुद्ध्या । यथा—चतुर्वर्ग-फलप्राप्ति-व्यवहारज्ञाना-ऽन्तश्चमत्कारादिरूपाः । किन्तु क्रमशः कविलाभदृष्टिः क्षीयते, सहृदये वाऽन्तर्धीयते, सहृदयदृष्ट्यैव उपयोगितानां प्राधान्येन प्रदर्शनात् । यथा—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥[5]

दण्डी—

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥[6]

---

१. भरत १.११, १४, १११, ११७ । २. लोचन, पृ० १२ ।
३. लोचन, पृ० १४९ । ४. ना० का० प्र०, पृ० ४ ।
५. भामह १.२ । ६. दण्डी १.५ ।

रुद्रटः —

ननु काव्येन क्रियते सरसामवगमश्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्यस्ते त्रस्यन्ति शास्त्रेभ्यः ॥[1]

कुन्तकः—

धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ॥

व्यवहारपरिस्पन्द - सौन्दर्यव्यवहारिभिः ।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ॥

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥

कटुकौषधवच्छास्त्र - मविद्या - व्याधिनाशनम् ।
आह्लाद्यमृतवत् काव्यमविवेकगदापहम् ॥[2]

वामनः—

काव्यं सद् दृष्टादृष्टार्थप्रीतिकीर्तिहेतुत्वात् ।[3]

मम्मटः—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥[4]

विश्वनाथः—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।[5]

रसगङ्गाधरः—

कीर्ति-परमाह्लादराजदेवता-प्रसादाद्यनेकप्रयोजनकस्य काव्यस्य ।[6]

एतैः पूर्वदत्तैरालङ्कारिकाणामुद्धरणैः प्रयोजनानामुपयोगितानां वा अनेकत्वं सिद्धयति । तत्रापि कीर्ति-परमाह्लाद-चतुर्वर्गफलप्राप्ति-व्यवहारौचित्यपरिज्ञानानां गणना तु प्रायः सर्वैरेव साक्षात्परम्परया वा ऐकमत्येन क्रियते । मानवस्य लोकयात्रार्थमुपयोगित्वान्यनिवार्याणि । एतेषामेकस्याप्यभावे सा वैकल्यमापद्येत । अतो लोकयात्राप्रवर्तनाय प्रवृत्तस्य काव्यस्येमानि उपयोगित्वानि नितान्तमपेक्षितानीत्यत्र किं वक्तव्यम् ।

१. रुद्रट, काव्या० ७१२.१ । २. व० जी० १.३—५ ।
३. वामन का० सू० १.१.५ । ४. मम्मट १.२ ।
५. सा० द० १.२ । ६. र० गा०, पृ० १ ।

काव्यस्य पूर्वोक्तानामेषां फलानां मानवमात्रस्योपयोगित्वम्। एतेषां विरहे मानवो न केवलं चतुर्वर्गव्यवहारौचित्यपरिज्ञानपरमाह्लादादिभ्यो वञ्च्यते, अपि त्वननुशासितः सन् विश्वस्य शान्ति-विकासव्यवस्थां बाधते। अनुशासनं वेदेतिहासशास्त्रादिभिः शक्यमिति न शङ्क्यम्, अल्पधियामसंयमशालिनां वासनाक्रान्तान्तःकरणानामभिजातानां राजामात्यादीनाञ्च तत्राप्रवृत्तेः, सद्बुद्धीनां सद्वृत्तानाञ्च तत्राधिकाराच्च। अतः सर्वेषां सुखं, सरसं लघु च शिक्षणं शासनञ्च विदधत् काव्यं सफलप्रयोजनमुपदेष्टव्यम्। अन्यथा अविवेकिनो राजामात्यादयः प्रभुत्वविभवयौवनसम्पन्नाः सन्तः प्रजाः पीडयेयुः, कालेन सम्प्रवर्धितां राज्यपरम्परामुन्मूलयेयुश्च। यतो यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता—एतेषामेकैकमप्यनर्थाय भवति, यत्र पुनः चतुष्टयमेषां तत्र किमुत ? अतः सर्वेषां विवेकितार्थपूर्वोक्तोपयोगितोपेतः काव्यावतरः परमकारुणिकैः प्रक्रान्तदृष्टिभिः ऋषिभिः कृतो विजृम्भते।

न च शास्त्रादिवच्छब्दार्थप्रकाशने शरीरं काव्यमपि कथं प्रभवेत् प्रकाशने पूर्वोद्दिष्टानामलङ्कार्यरूपाणामुपयोगितानामिति वाच्यम्; अलङ्कारादेव तेषामभिव्यक्तेः। अत एव 'काव्यं ग्राह्यमलङ्कारात्'[1] 'सालङ्कारस्य काव्यता'[2] इत्यादीनि वामन-कुन्तकयोर्मतान्यपि सङ्गच्छन्ते। अनेन **अनलङ्कृती पुनः क्वापि**[3] इति मम्मटमतमप्यपाक्रियते, समर्थ्यते च—

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥**[4]

इति मम्मटविरोधि जयदेवमतमिति।

काव्यस्येमा उपयोगिता अविभावयन्तो बहवः प्राच्यप्रतीच्यविचारकाः काव्यस्याग्राह्यतां शंसन्ति। यथा—

असत्यार्थाभिधायित्वान्नोपदेष्टव्यं काव्यमिति। असदुपदेशकत्वान्नोपदेष्टव्यं काव्यम्, इत्यपरे। असभ्यार्थाभिधायित्वान्नोपदेष्टव्यं काव्यमिति केचित्।[5]

**काव्यालापाँश्च वर्जयेत्, काव्येन हन्यते शास्त्रम्।**

All poetical imitations are ruins, the tragic poets are imitators and therefore like all other imitators, he is thrice removed from the truth. All these poetical individuals are only imitators,

---

१. का० सू० १.१.१। २. व० जी० पृ० १.६।
३. का० प्र० ना०, पृ० ७। ४. चन्द्रा० १.८।
५. का० मी०, पृ० ६६।

they copy image of all virtue and the like, but the truth they never reach. The imitators are the makers of the image, know nothing of true existence, he knows appearence only. The imitating poet who aims at being popular is not by nature made, nor is his art, intends to please or affect the rational principle is the soul, but he will prefer the passionate fitful temper which is easily imitated. And now we may fairly take him and place him by the side of the painter, for which he is like him in two ways, first in as much as his creations have an inferior degree of truth-in this I say, he is like him, and he is also like him in being concerned with inferior part of the soul, and therefore we shall be right in refusing to admit him in well-ordered state, because he awakens and nourishes and straightens the feelings and impairs the reasonings.[१]

As civilisation advances poetry necessarily declines.[२]

किन्त्वेतदज्ञानविजृम्भितम् ; अलङ्कारेण काव्ये ग्राह्यताया पूर्वं समर्थितत्वात् । स्वभावोक्ति-वक्रोक्ति-रसोक्तिभिरनुप्राणितया अलङ्कारप्रस्थानदृष्ट्या समर्थिताया-मलङ्कारदृष्टौ न कोऽप्याक्षेपः काव्ये सम्भवेत् । स्वभावोक्तौ वर्तमानायां कथमसत्यार्थाभिधायित्वं तिष्ठेत् ? अवसरे च लोकशास्त्रवद् अर्थवादरूपतयैवास्य स्थितिः । पूर्वोक्तेषु सदुपदेशेषु सत्सु काव्यस्य असदुपदेशनिबन्धनो विरोधो व्यर्थं एव । यतो यो ह्यसदुपदेशो लभ्यते काव्ये स निषेधमुखेन, न कथमपि विधिमुखेन । काव्यमीमांसायामेव पूर्वपक्षत्वेनोत्थापितानामेषामाक्षेपाणामुत्तरमपि वर्तते । यथा—

**अस्त्ययमुपदेशः, किन्तु निषेध्यत्वेन, न विधेयत्वेन इति यायावरीयः**[३]

य एवंविधा विधयः परस्त्रीषु पुंसां सम्भवन्ति, तानवबुध्येतेति कवीनां भावः । किञ्च कविवचनायत्ता लोकयात्रा, सा च निःश्रेयसो मूलमिति महर्षयः । यदाहुः—

काव्यमय्यो गिरो यावच्चरन्ति विशदा भुवि ।
तावत्सारस्वतं स्थानं कविरासाद्य मोदते ॥

एवमसभ्यार्थाभिधायित्वमपि काव्ये निषेधमुखेन भवति, न विधिमुखेन ।

एवमेव पाश्चात्त्यैः प्लेटो-मेकाले-प्रभृतिभिरालोचकैः पूर्वदर्शिता काव्यदोषा-अप्यपाक्रियन्ते । तत्र प्लेटो-महोदयः काव्यमनुकृतिं भावात्मकं भीत्यादिभावो-त्पादकञ्च मन्वानस्तत्र पुनरुक्तता तर्कशून्यता असत्यता भीत्यादिभावविवर्धनता-ख्याननेकान् दोषान् पश्यति । किन्तु व्याख्यातृभिः अरिस्टाटिलादिभिरेते

---

१. Platos Republic, Book X, V. Jowetts english translation.

२. Macaulay ( quoted ).

३. का० मीमां०, पृ० ६६ ।

पूर्वोक्ता दोषा निराकृताः। तथा हि—काव्ये नानुकृतित्वं, कविप्रतिभया स्वतन्त्र-तया वस्तूनामुपस्थापितत्वात्। न च केवला तर्कविरहिता भावाभिव्यक्तिः; प्रज्ञा-प्रतिभयोरुभयोरपि तत्र दृष्टचरत्वात्। एवञ्च भयानकरसप्रधानेन काव्ये-नापि न भीत्यादिभावानां विवृद्धिः, अपि तु भावाख्येन व्यापारेण तेषां भोगो विरेचनं वेति।

अनेनैव क्रमेण सभ्यतया सह काव्यस्य ह्रासं स्वीकुर्वता मेकाले-महोदयेन प्रकारान्तरेण असभ्यार्थाभिधायित्वरूपो दोष एव स्वीकृतः। अस्य प्रत्याख्यानं पूर्वमेव विहितम्।

एवं काव्योपयोगिताया विरोधिनः सर्वेऽपि असदुपदेशकत्वाऽसत्याऽसभ्या-र्थाभिधायित्वादयो दोषाः प्रत्याख्याताः।

वस्तुतोऽलङ्कारप्रस्थानविमर्शे कृते स्वत एवैते दोषा निराक्रियन्ते। तत्र स्वभावोक्त्या असत्यानुकृतिदोषो निवर्तते। कविप्रतिभया स्वतन्त्रत्वेन सत्यार्थस्य वर्णनात्। पाश्चात्त्यैरपि कीट्स्-टेनिसन-प्रभृतिभिः एतस्यार्थस्य समर्थनाच्च। यथा—

Poetry is truer than fact.[१]

What the imagination sings as beauty must be truth whether it exists or not.[२]

एवमेव रसोक्त्या असदुपदेशकत्वाऽसभ्यार्थादयो निराक्रियन्ते **अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम्**[३] इति ध्वनिकारवचनेन रसभङ्गकारित्वात्तादृशार्थानां काव्येऽसङ्ग्रहात्। शिष्टांश्च दोषान् वक्रोक्तिर्निवर्तयति। एवं स्वभावोक्ति-वक्रोक्ति-रसोक्त्यनुप्राणिता अलङ्कारदृष्टिरशेषान् काव्यदोषान् निहन्ति। अतः काव्यो-पयोगितानामभिव्यक्त्यर्थं तद्विरोधिनाञ्च विधूननाय नितान्तमपेक्ष्यतेऽलङ्कार-प्रस्थान-विमर्श इति।

## काव्यलक्षण-विचारः

सम्प्रति प्रस्थानपरिज्ञानार्थं काव्यलक्षणानि परीक्ष्यन्ते। एतान्यालङ्कारिकाणां दर्शनविशेषं मतं वा प्रकाशयन्ति। अनेन सहैव अन्येषां दर्शनानामपि भवत्यत्र परम्परया स्पष्टमस्पष्टं वा सङ्केतः। लक्षणानामेषां लाक्षणिकैः कृतः पारस्परिकः खण्डन-मण्डनविधिस्तु प्रस्थानप्रक्रियां समधिकां स्पष्टां विधत्ते। एतेषां वादो न केवलं प्रसिद्धानां प्रस्थानानां तत्त्वानि प्रकाशयति बोधयति वा, अपि तु नव्यान्यपि निर्दिशति यान्यनुन्मिषितानि तिष्ठन्ति प्रसिद्धप्रस्थानैः पराभूतानि।

---

१. Tennyson. २. Keats.

३. ध्वन्या० ३.३२।

काव्य-लक्षणानि—"समानासमानजातीयव्यवच्छेदो लक्षणार्थः"[१] इति सिद्धान्तात् लक्षणानि न केवलं विजातीयेभ्यो वेद-शास्त्रेतिहासादिभ्य एव काव्यं व्यावर्तयन्ति, अपि तु काव्येष्वपि एकं विशिष्टं काव्यमितरस्माद् विशिष्टकाव्याद् व्यावर्तयन्ति। एष एव सजातीयेभ्यो व्यावर्तनविधिः प्रस्थानरूपतां प्रतिपद्यते। किन्तु सामान्यतया लक्षणानि विजातीयव्यावर्तकान्येव ज्ञायन्ते। अत एवाऽलङ्कारिका वाङ्मयं काव्य-शास्त्रभेदेन द्विधा विभज्य काव्यं वाङ्मयं शास्त्रभयाद् वाङ्मयलक्षणैर्व्यावर्तयन्ति। यथा—

"वाङ्मयं द्विधा—काव्यं शास्त्रञ्चेति। पञ्चमी साहित्यविद्येति यायावरीयः। सा हि चतसृणामपि विद्यानां निष्यन्दः।"[२]

अत्र काव्यात्मको भेदः शास्त्रापेक्षया अतीव व्यापकः सरसः सरलः सार्वजनीनश्चेत्यधिकं प्रससार। समयतश्चायमशेषतो हितसाधकेन तत्त्वेन सहितः साहित्यमाख्यामपि भेजे। एवं हितयुक्तस्य शब्दार्थस्य कालादि-लोकादिसहितस्य च भावं निर्दिदेशः साहित्यशब्दः सहितशब्दात् भावे ष्यञि कृते निष्पद्यते। एवमिदं शास्त्रं समयतः प्राप्तप्रसारं समालोचनविचक्षणैः समालोचितमभवत्। अलङ्कारग्रन्थेषु कृता प्रारम्भिक्यो वन्दनाः, प्रयोजननिर्देशाः, काव्यलक्षणानि च प्रायः साक्षात् परम्परया वा काव्यं शास्त्रेतिहासादिभ्यो व्यावर्तयन्ति। यथा—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥[३]
शरदिन्दु-सुन्दररुचिश्चेतसि सा मे गिरां देवी।
अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु॥
चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥[४]
धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥[५]
काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥[६]

श्लोकेष्वेतेषु आपाततो वाग्देव्याः स्तुतिर्ग्रन्थस्य च प्रयोजनानि वा प्रतीयन्ते; तथापि परमार्थतो व्यावर्तकत्वमेव एतेषां काव्यस्यान्येभ्यो वेदशास्त्रे-

१. सांख्यतत्त्वकौ०, का० ५ (वृत्तिः)। २. का० मी०।
३. का० प्र० १. १। ४. सा० द० १.१,२।
५. भामह १. २। ६. का० प्र० १. २।

तिहासादिभ्य इति। अत एवैतेषां श्लोकानां वृत्तौ काव्यस्य व्यावर्तका निर्देशा दृश्यन्ते। यथा—

"एतद्विलक्षणा कविवाङ्निर्मितिः", "प्रभुसम्मित-शब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मिताऽर्थतात्पर्यवत्-पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूत-व्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म।"[1]

"चतुर्वर्गफलप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि काव्यादेव।"[2] सत्यप्येवं वास्तविकं व्यावर्तनन्तु काव्यलक्षणैरेव जायत इति लक्षणान्येव सम्प्रति मीमांस्यन्ते।

कवेः कर्म भावो वा काव्यम्। एष शब्दः कविशब्दात् ष्यञ् प्रत्यये कृते सिद्ध्यति। कविशब्दोऽपि 'कुङ् शब्दे', 'कवृ वर्णने' वेति धातोः 'कौति, कवयति' वेति व्युत्पत्त्या निष्पद्यते। अनेनेदमायातं यत् काव्यं कवेर्गानं वर्णनं वा भवति। तच्च शब्दसाहाय्यमपेक्षते। शब्दाश्च अर्थं विना न प्रवर्तन्ते, सार्थानां शब्दानामेव काव्ये स्वीकारात्। किन्तु शब्दार्थौ स्वीकुर्वन्तोऽपि लाक्षणिकाः काव्ये तयोः प्राधान्ये विवदन्ते। केचन शब्दस्य, अपरे अर्थस्य, अन्ये च शब्दार्थयोरेव प्राधान्यं शंसन्ति। अत एव काव्यलक्षणेषु शब्दस्य अर्थस्य शब्दार्थयोश्च प्राधान्यं प्राप्यते।

काव्यलक्षणानां तिसृष्वासु धारासु प्रायो द्वयोर्धारयोः शब्दस्य शब्दार्थयोश्च प्राप्यते विवेचनबाहुल्यम्। काव्ये केवलमर्थस्यैव प्राधान्यं स्वीकुर्वतामाचार्याणां चर्चा स्पष्टतो न क्वापि लभ्यते। केवलं वक्रोक्तिकारः कुन्तक एव शब्दार्थयोः साहित्यविचारे दर्शयति एतन्मतमपि। यथा—

केषाञ्चिद् वाच्यमेव रचनावैचित्र्य-चमत्कारकारि काव्यमिति।[3]

अतो द्वयोरेवानयोर्मतयोः शब्दस्यैव शब्दार्थयोर्वा प्राधान्यमित्यस्य अतिसंक्षिप्तो विचारः प्रस्तूयते।

प्रथमं शब्दार्थौ काव्यमिति मतमेव विमृश्यते। 'शब्दार्थौ काव्यमि'ति मतस्य समर्थकानां द्विविधो वर्गोऽधिगम्यते काव्यलक्षणानामध्ययनतः—एको वर्गस्तु शब्दार्थयोः काव्यत्वं मन्यमानः काव्यस्य केवलमुत्कर्षाधायकमेव लक्षणं विधत्ते। अपरश्च तस्य स्वरूपाधायकं लक्षणम्। एवमिदं 'शब्दार्थौ काव्यम्'

१. का० प्र० कारि० १. २ (वृत्तिः)।

२. सा० द० कारि० २ (वृत्तिः)।

३. व० जी०, का, ७।

'शब्दः काव्यम्' इति मतद्वयमपि उत्कर्षाधायक-स्वरूपाधायकलक्षणभेदेन द्विधा विभज्यते। तत्र शब्दार्थौ काव्यमित्यस्य तत्रोत्कर्षाधायकस्य च वर्गस्य प्रवर्तको नाट्यकारो भरत एव प्रतीयते। अतो नाट्यशास्त्रे काव्यस्य लक्षणं यथा—

मृदुललितपदाढ्यं गूढशब्दार्थहीनं
जनपदसुखबोध्यं युक्तिमन्नृत्ययोज्यम्।
बहुकृत-रसमार्गं सन्धिसन्धानयुक्तं
भवति हि शुभकाव्यं नाटकप्रेक्षकाणाम्॥[1]

अत्र प्रथमचरणे शब्दार्थ इति पदस्योल्लेखः, तेन प्रतीयते यदयं शब्दार्थौ काव्यमिति मतं मनुते। सहैव एतत् लक्षणं स्फुटं शुभकाव्यस्यैव दृश्यते, न काव्यसामान्यस्य। यद्यपि लक्षणे विशेषणपदानि न केवलमुत्कर्षाधायकान्येव, स्वरूपाधायकान्यपि; तथापि उत्कर्षाधायकानामेवात्र प्राधान्यम्। 'शुभकाव्यम्' इति पदमत्र साहाय्यं विधत्ते। अत इदं स्पष्टं यत् भरत एव आदिमः प्रेरकस्तस्य वर्गस्य, यो हि शब्दार्थौ काव्यमिति उत्कर्षाधायकं लक्षणं निर्मिमीते।

'शब्दार्थौ काव्यम्' इत्यस्य पक्षस्य स्वरूपाधायक-लक्षणप्रणेता भामहः। तस्य काव्यलक्षणं यथा—'शब्दार्थौ सहितौ काव्यम्' इति। लक्षणमेतत् सामान्यजातीयं स्वरूपाधायकमेव केवलम्, न कथमपि उत्कर्षाधायकम्। यद्यपि साधारणतया समीक्षकोऽत्र स्वरूपाधायकमपि लक्षणं न स्पृशति, यतो हि सहितौ शब्दार्थौ तु शास्त्रात्मके वाङ्मयेऽपि भवतः। किन्तु सूक्ष्मेक्षिकया सुस्पष्टं यत् काव्यगतशब्दार्थयोः साहित्यं व्यापारप्राधान्याद् वैशिष्ट्याद्वा भिन्नमेव शास्त्र-वाङ्मयगत-शब्दार्थसाहित्यात्। एतत् समर्थयन्ति भामह-परवर्तिन आलङ्कारिका अपि। यथा—

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः।
अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः।
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्॥[2]

शास्त्रेतिहासवैलक्षण्यन्तु काव्यस्य शब्दार्थवैशिष्ट्यादेव।[3]

वाग्धेनुर्दुग्ध एकं हि रसं यद्बालतृष्णया।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः॥[4]

अतो भामह एव आदिप्रवर्तकः 'शब्दार्थौ काव्यमि'त्यस्य स्वरूपाधायकस्य लक्षणस्येति सुस्पष्टमेव। एवं शब्दार्थौ काव्यमिति मते द्विविधोऽयं वर्गोऽतीव

---

१. भरतः १६. ११८। २. भट्टनायकः, ध्वन्यालोके, पृ० ८७।
३. व्य० वि० व्या०, पृ० १८। ४. सटीक-लोच० ध्वन्या०, पृ० ९१।

संक्षेपेण समुपन्यस्तः। अग्रे दर्शयिष्यमाणेषु काव्यलक्षणेषु द्विविधोऽप्येष वर्गः स्फुटं द्रष्टुं शक्यते।

सम्प्रति भरतेन प्रचालितताया उत्कर्षकाव्य-धारायाः समर्थकानामन्येषामपि परवर्तिनामाचार्याणां लक्षणानि प्रदर्श्य अस्या धाराया वैशिष्ट्यबोधकानि तत्त्वान्यपि परिचाय्यन्ते। सहैव चेदमपि प्रदर्श्यते यत् कथमेषा धारा कालेन परिपाकं प्राप्य वैशिष्ट्याधायकानामनेकेषां तत्त्वानामाधारं प्रास्तौत्। इयमेव धारा विचारदृष्ट्याऽपि अधिकं सम्मानिताऽभवत्। किन्तु भरतादनन्तरं बहुकालपर्यन्तमेष वर्गो 'विशिष्टौ शब्दार्थौ काव्यमि'त्यस्य मतस्य समर्थकोऽन्धकाराच्छन्नस्तिष्ठति। किन्तु वामनस्य (अष्टमशतेरुत्तरार्धे) आविर्भावेन सह तिरोहित एष वर्गः सहसा उद्यन्नवलोक्यते। यतो हि वामनाचार्यः स्वकीये काव्यालङ्कारसूत्रे **काव्यं ग्राह्यमलङ्कारात्** इति लक्षणं समुपन्यस्य, अस्य सूत्रस्य व्याख्यानं कुर्वाणो वा स्वयमेव सूत्रवृत्ताविदं स्फुटं स्वीकुरुते—

**काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।**
**भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते।**[1]

तेनेदमायातं यत्तदेव काव्यं यद् गुणालङ्काराभ्यामलङ्कृतमिति। यत्र केवलं शब्दार्थयोः कृते प्रयुज्यते काव्यशब्दस्तत्र भक्तिः उपचारो वा बोध्यः। एवमत्र वैशिष्ट्यस्य बोधके गुणालङ्काररूपे द्वे तत्त्व एव आयातः। उत्कर्षाधायकं लक्षणमेतद् इदमपि बोधयति यत् काव्ये काव्यत्वप्रयोजकानि तत्त्वानि गुणालङ्काररूपाणि, येषामग्रे भवति सूक्ष्मो विचारोऽलङ्कारशास्त्रे।

वामनादनन्तरमस्य उत्कर्षाधायकलक्षणस्य समर्थकः पोषकश्च मम्मटभट्टः (१०५० ईशाब्दे) एवाभूत्। अयं स्वग्रन्थे काव्यप्रकाशे काव्यलक्षणमुपन्यस्यति— **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि**[2] इति। एतदपि लक्षणं विविधैः उत्कर्षाधायकैर्विशेषणैर्विशिष्टमस्त्येवास्मिन् उत्कर्षाधायकवर्ग इति स्पष्टमेव। अनेन सहैव काव्यस्य कृते गुणेन सह नालङ्कारो नियतमावश्यकः, अपितु अनलङ्कारमपि सरसं काव्यं ग्राह्यमिति सर्वथा नवीनतैव आयाति काव्यतत्त्वे। सहैव 'काव्यं ग्राह्यमलङ्कारादि'ति वामनमतस्य विरोधोऽपि। अत्र लक्षणे अदोषतत्त्वमपि पूर्वापेक्षया सर्वथा नूतनम्।

एवं क्रमशः काव्यतत्त्वेषु भवति विकासः परिवर्तनं वा, यस्य वास्तविकं समाधानमपेक्षत एव, विश्लेषणं तुलनात्मकमध्ययनं वा एषां सर्वेषां तत्त्वानां काव्यसन्दर्भे विशेषतश्च अलङ्कारप्रस्थानस्य विमर्शप्रसङ्गे, यस्याङ्के पाल्यन्त एतानि परस्परविरुद्धानि बहूनि काव्यतत्त्वानि। सम्प्रति काव्यलक्षणानां क्रियते

---

१. वामन १. १. १ (वृत्तिः)। २. का० प्र० १.४।

विचारो यत्र भवति अनिवार्यता एवैतेषां तत्त्वानाम्। यतो हि काव्यसन्दर्भे एवैतेषां तत्त्वानां विचारः सङ्गच्छेत। अत एतेषां खण्डन-मण्डनात्मिका चर्चा काव्यलक्षणपुरस्सरैव सङ्गतेति तथैव प्रयत्यते।

अत एव मम्मटस्यैषां काव्यलक्षणघटकतत्त्वानां विरोधो नैकदृष्ट्या कृतो विविधैः पश्चाद्वैरालङ्कारिकैः। एतेषु प्रसङ्गतस्तेऽपि चर्चाविषयतामागच्छन्ति ये न सन्ति उत्कर्षाधायके शब्दार्थवर्गेऽस्मिन्। यथा महापात्रो विश्वनाथः, पण्डितराजो जगन्नाथश्च। किन्तु काव्यलक्षणविचारदृष्ट्या एतेऽप्यत्रानीयन्ते। अत्र विश्वनाथ[1]-पण्डितराज[2]दृष्ट्या मम्मटलक्षणघटकानां विशेष्यविशेषण-दलानां विमर्शो विधायते। एतौ न केवलं विशेषणानि विधुनुतः, अपितु विशेष्यांशं शब्दार्थावित्यपि, ताभ्यां शब्दस्यैव काव्यत्वाभ्युपगमात्। तत्र पण्डित-राजो **रमणीयार्थप्रतिपादकः शब्दः काव्यम्**[3] इति लक्षणकरणेन शब्दस्य काव्यत्वं साक्षात् समर्थयते। विश्वनाथस्तु **रसात्मकं वाक्यं काव्यम्** इति स्वीकारेण परम्परया। एवमिमौ शब्दस्य काव्यतायाः पोषकावप्यत्र शब्दार्थौ काव्यमिति विमर्शप्रसङ्गे केवलं खण्डनदृष्ट्या विषयतां भजतः।

एतच्च खण्डनं विवेचनं वा त्रिधा विभक्तुं शक्यते—शास्त्रीय-लोकव्यव-हार-व्युत्पत्तिभेदात्। प्रथमस्य शास्त्रीयविभागस्यायमभिप्रायः—यथा वेदादिषु शब्दस्यैव प्राधान्यमनादिकालतः स्वीकृतं तथैव शब्दमये काव्येऽपि शब्दानामेव प्राधान्यमङ्गीकर्तव्यम्। अन्यथा अविच्छिन्नायाः परम्परायाः उच्छेदसम्भवात्। अत एव पण्डितराजः स्वीकरोति—**एषैव च वेदपुराणादिष्वपि गतिः**।[4]

लोकव्यवहारस्य अयमाशयः—लोक-व्यवहारोऽपि शब्दविशेषस्यैव काव्यत्वं साधयति, न कथमपि शब्दार्थयोः। यतो हि 'काव्यमुच्चैः पठ्यते, काव्यदर्थो-ऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः' इत्यादयश्च विविधा विश्वजनीना व्यवहाराः प्राप्यन्ते। नैते कथमपि शब्दार्थयोः काव्यत्वं समर्थयन्ति। व्यवहारस्य समर्थनं लक्षणयैव शब्दमात्रे साधनीयमिति न शङ्क्यम्; शब्दार्थयुगले काव्यशक्तेः साधकस्य कस्यापि दृढतरस्य प्रमाणस्याभावात्। एवं व्यवहाराधारेऽपि शब्द-विशेषस्यैव सिद्ध्यति काव्यत्वम्, न शब्दार्थयुगलस्य।

काव्यशब्दव्युत्पत्तिरपि शब्दविशेषस्यैव काव्यत्वं समर्थयते। 'कवेः कर्म काव्यमि'ति व्युत्पत्तेः शब्द एव चरितार्थत्वम्, नार्थे; यतो हि कवयः शब्द-योजनारूपं कर्म कुर्वन्ति, न कदाप्यर्थानां योजनाम्, तेषां तु स्वतःसिद्धत्वात्।

---

१. सा० द०, पृ० ८–१४ (लक्ष्मी टी०)।
२. रसगं०, पृ० ६-७। ३. तत्रैव, पृ० ४।
४. तत्रैव, पृ० ६।

इत्थं दर्शितदिशा शास्त्र-लोकव्यवहार-व्युत्पत्तिरूपया शब्दविशेषस्यैव काव्यत्वं सिद्धयति, न कथमपि शब्दार्थयुगलस्येति ।

किन्त्वेतन्मतं निराकृत्य शब्दार्थयोः काव्यत्वं समर्थयन्ति नागेशभट्टास्तत्रैव रसगङ्गाधरस्य गुरुमर्मप्रकाशिकाख्यायां टीकायाम् ।

एते त्रिविधमप्युपर्युक्तं पृष्ठाधारं शब्दविशेषस्यैव काव्यत्वापादकं खण्डयन्ति, साधयन्ति च शब्दार्थयुगल एव प्रसिद्धां काव्यत्वपरम्पराम् । यतो हि—वेद-पुराणादिषु या शब्दप्राधान्यस्यैव परम्परोद्भाविता सा नोचिता, तत्राप्यर्थस्यानिवार्यतया स्वीकृतत्वात्, वेद-पुराणादिष्वपि पठनेन सहैव अर्थज्ञानस्यापि अभिमतत्वात् । अत एव सङ्गच्छते पाणिनेः सूत्रम्—**तदधीते तद्वेद**[1] इति, तदधिकृत्य पातञ्जलमहाभाष्यं च—'यथा वेदस्याध्ययनं तथैव मननमपि ।'

लोकव्यवहारेऽपि 'काव्यं बुद्धमि'ति विश्वजनीना प्रसिद्धिः, बोधश्च अर्थस्यैव । एवं व्युत्पत्तिरपि न शब्दार्थौ काव्यमित्यस्य विरोधिनी, प्रयोजिका च 'शब्दः काव्यमि'त्यस्य, काव्ये शब्दयोजनावत् कविप्रौढोक्तिमात्रनिष्पन्नस्यापि अर्थस्य योजनायाः स्वीकारात् । यथा—

**प्रौढोक्तिमात्रनिष्पन्नशरीरः संभवी स्वतः ।**
**अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपकः ॥**[2]

एतच्च खण्डनं लक्षणस्य पूर्वं विश्वनाथः करोति, तदनन्तरञ्च पण्डितराजो जगन्नाथः । एतेषु खण्डनेषु आभासिकी सत्यता अवश्यमेव स्यात्, किन्तु पारमार्थिकी न कथमपि । यतो हि खण्डन-मण्डनप्रकाराभ्यां केवलमस्थायी भवति पोषः स्वपक्षस्य, न निर्णीतस्य सत्यस्य । किन्तु एतेन खण्डनमण्डनात्मकेन विधिना विविधानां काव्यघटकानां तत्त्वानां तारतम्यसाधको जायते परिचयः, येषां विवेचनमेव समीक्षायाः उद्देश्यं तदङ्गभूतस्याऽस्माकं निबन्धस्यापि तथा ।

सम्प्रति लक्षणघटकानां विशेषणांशानापि चतुर्णां खण्डनं प्रदर्श्यते, येन स्यात् पूर्णविवेचनं लक्षणस्य । न केवलमिदमेव, अपितु अग्रेऽपि प्रदर्श्यमाणानि विविधानि आलङ्कारिकाणां लक्षणानि अनयैव दिशा आलोचितानि स्युः ।

लक्षणे चतुर्णामपि विशेषणदलानां निवेशो नोचितः प्रतिभाति, तथात्वे लक्षणे अव्याप्त्यसंभवदोषयोः सम्भवात् ।

सर्वतः पूर्वं लक्षणे 'अदोषौ' इति विशेषणमेव चिन्त्यम्; सर्वथा निर्दोषस्य काव्यस्य एकान्तमसम्भवात् । एवं च काव्यस्य प्रविरलविषयत्वं निर्विषयत्वं वा

---

१. र० ग० ( गुरुमर्मप्रका० ), पृ० ६ । २. ध्वन्या० २.२४ ।

स्यात्। यदि चात्र ईषदर्थे नञः प्रयोग इत्युच्यते, तदाऽपि न तवार्थसिद्धिः; तथा सति 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः शब्दार्थयोः काव्यत्वं न स्यात्। 'सति संभवे ईषद्दोषौ' इति स्वीकारोऽपि न साधकः; रत्नादिलक्षणे कीटानुविद्धपरिहारवत् 'अदोषौ' इति पदस्य लक्षणे अनुपयोगित्वात्। अत्र बहु वक्तव्यमासीत्, किन्तु गौरवभिया अप्रकृततया वा संक्षेपत एव खण्डनमत्र प्रदर्श्यते।

एवमेव शब्दार्थयोः सगुणत्वविशेषणमपि अनुपपन्नमेव; गुणानां रसैकधर्मत्वात्, **ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः** इति तेनैव काव्यप्रकाशकृता स्वीकृतत्वात्। तथा च गुणानां रसमात्रवृत्तित्वात्तैर्विशिष्टौ शब्दार्थौ न सम्भवतः। नहि ह्यन्यमात्रवृत्तिधर्ममादाय अन्यस्मिन् घटते वैशिष्ट्यव्यवहारः। नहि कदापि भवति घटत्वविशिष्टः पटः। अतः सगुणत्वविशेषणस्यानुपपन्नता स्पष्टैव। रसाभिव्यञ्जकत्वेनापि नार्हा उपपत्तिः; रसाभावे तस्य व्यर्थत्वात्, रससत्त्वे च 'सगुणावि'त्यपेक्षया 'सरसावि'ति विशेषणस्यैवौचित्यात्। एवमत्र विस्तरभिया नाधिको विचारः क्रियते।

आलङ्कारिकास्तु गुणालङ्कारादीनां काव्ये उत्कर्षाधायकतामेवाऽङ्गीकुर्वन्ति, न कथमपि स्वरूपाधायकताम्। यथा—'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणादिवत्, रीतयः अवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्' इति। एतेनापि काव्यलक्षणे गुणानां निवेशो नोचितः, अन्यथा सिद्धस्य काव्यत्वस्य स्वरूपसाधने एतेषामसमर्थत्वात्, केवलमुत्कर्षाधायकत्वाच्च।

एवं 'सालङ्कारावि'ति विशेषणमपि नोपपद्येत लक्षणे; तस्यापि उत्कर्षाधायकत्वेन गुणवत् अन्यथा सिद्धस्य काव्यत्वस्य स्वरूपाधायकत्वासम्भवात्। अनयैव दिशा 'अनलङ्कृती पुनः क्वापि' इति विशेषणनिवेशोऽपि नौचित्यं धत्ते; तस्यापि स्वरूपाधानेऽसमर्थत्वात्, यथाकथञ्चिद् उत्कर्षमात्रबोधन एव तात्पर्यात्।

एवमेव लक्षणघटकं 'शब्दार्थौ' इति विशेषदलमपि खण्डितं भवति। तथा हि—काव्यत्वसामान्यस्य किं संयोगादिवत् व्यासज्यवृत्तित्वं गोत्वादिवत् प्रत्येकवृत्तित्वं वा ? नाद्यः पक्षः सङ्गतिं भजते; काव्यस्य सामान्यत्वादेव। न चापि द्वितीयः; शब्दार्थयोः प्रत्येकस्य काव्यत्वप्रसङ्गात्।

इत्थम् उत्कर्षमात्राधायकानि सर्वाण्येव काव्यलक्षणानि खण्डितानि स्युः। यतो हि नास्ति तेषां सामर्थ्यं काव्यस्य स्वरूपाधायकतायाम्। सत्येव काव्यस्वरूपे तस्योत्कर्षस्य संभवात्। अत एव **रीतिरात्मा काव्यस्य**[1] इति

---

१. वामन १.२.६।

वामनलक्षणमपि निरस्तं भवति; रीतेः अवयवसंस्थानरूपत्वात्। **वक्रोक्तिः काव्यजीवितम्** इति वक्रोक्तेरपि अलङ्काररूपत्वेन उत्कर्षमात्राधायकत्वात्।

एतच्च खण्डनं प्रधानतो विश्वनाथमतेनैव कृतम्, विशेषतश्च रीतेर्वक्रोक्तेश्च। यतो हि साहित्यदर्पणे प्राप्तमप्येतयोः खण्डनं न मिलति परवर्तिनि रसगङ्गाधरे। यद्यपि स्वपूर्ववर्तिनं मम्मटमेव पूर्वं खण्डयति पण्डितराजः, किन्तु तेनैव सह विश्वनाथस्यापि 'रसात्मकं वाक्यं काव्यमि'ति लक्षणस्य खण्डनं विदधाति, न ध्वनिकारस्य 'काव्यस्याऽऽत्मा ध्वनिरि'त्यस्यापि, यथा विदधाति विश्वनाथो दर्पणे। अत्रास्ति विस्तरेण विचारणीयम्। किन्त्वत्र पूर्वं लक्षणविचारप्रसङ्गतो लक्षणानां खण्डन-मण्डनपरम्परा सञ्चालिता। अतस्तस्या एव सञ्चालनं लक्षणविचारसमाप्तिपर्यन्तं कर्तुमीहे। तदनन्तरमन्ते कथमेष विचारः प्रकृतं विषयमस्माकं पोषयति साक्षात् परम्परया वा, इत्यस्यापि चर्चा आरच्यते संक्षेपतः प्रसङ्गात्। अत्र तु पुनः आनन्दवर्धनस्य 'काव्यस्यात्मा ध्वनिरि'त्यस्य खण्डनं विश्वनाथमतेन विधीयते—

**काव्यस्यात्मा ध्वनिः**[1] इति लक्षणं ध्वनिकारस्य। अत्रेदं पृच्छयते—यदत्र त्रिविधेषु ध्वनिषु वस्त्वलङ्कार-रसरूपेषु क आत्मा काव्यस्य ? वस्तुरूप एव इति न वाच्यम्; प्रहेलिकादावपि तथात्वात् काव्यत्वापत्तेः। अलङ्काररूपो ध्वनिरपि न तथा; अलङ्कार्यस्य रसरूपाद्यर्थस्याभावे तस्याभावात् **कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति**[2] इति नियमेन रसार्थमेव तस्य स्वीकारात्। रसादिरूपोऽर्थो ध्वनिरेव काव्यात्मेति स्वीक्रियते चेद्, अभिमतमेवास्माकम्। तर्हि आद्ययोर्द्वयोः त्यागं कृत्वा केवलं रस एव काव्यात्मेति मन्तव्यम्। 'अत्ता[3] अत्र निमज्जति' इत्यादौ कथं वस्तुरूपं ध्वनिकृतं काव्यत्वमिति तु न शङ्क्यम्; रसाभासतयैव तत्रापि स्वीकारात्। अन्यथा 'देवदत्तो ग्रामं याती'त्यत्रापि काव्यत्वमङ्गीकर्तव्यं भवेत्, देवदत्तभृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेः। अस्त्विति चेत्, न; रसवत एव काव्यत्वस्वीकारात्।

अत्रैव प्राचीनानामपि सम्मतिमुपन्यस्यति विश्वनाथः—'रामादिवद् वर्तितव्यं न रावणादिवदि'ति कृत्याकृत्य-सदुपदेशद्वारा काव्यं वेदशास्त्रविमुखान् विनेयान् राजपुत्रादीन् रसास्वादमुखपिण्डदानद्वारा विधत्ते विनीतान्। एवं 'रस एव काव्यजीवितमि'त्यत्र अग्निपुराणमपि प्रमाणम्—

**वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्।** इति।

इत्थं विश्वनाथः सर्वेषामेव पूर्ववर्तिनां काव्यलक्षणानि विधूय भरतादनन्तरं

---

१. ध्वन्या० १. १। २. दण्डी, काव्या० १. ६२।

३. ध्वन्या० ( सटी० लो० ) पृ० ७१।

महता कालेन अलङ्कारप्राधान्येन उपेक्षायाः सीमानमाप्नुवानां रसपरम्परा-मुज्जीवयामास। अत्र अभिनवगुप्तकृतं ध्वन्यालोक-लोचनमपि महत् साहाय्यं करोति, यतस्तत्र रसध्वनेरेव स्वीकृतं प्राधान्यम्। एवं क्रमशो वर्धमानां रसप्रतिष्ठामसहमानः पण्डितराजः पुनरपि विश्वनाथस्य खण्डयति लक्षणम्। तद्यथा—'रसात्मकं वाक्यं काव्यमि'ति विश्वनाथमतमपि काव्यत्वेन अभिमताना-मनेकेषां वस्त्वलङ्कारप्रधानानां काव्यानां विरोधं करोति, स्वीकुरुते च केवलं काव्यत्वं रसप्राधान्ये। इदं नोचितम्; महाकविसम्प्रदाय-समर्थितानां बहूनां वस्त्वलङ्कारप्रधानानां काव्यानामकाव्यत्वापत्तेः। इष्टापत्तिरेवेति न वाच्यम्; अनादिकालतः कविभिर्वर्णितानां जलप्रवाहवेग-निपतनोत्पतन-भ्रमणानां कपि-बालादिविलसितानाञ्च काव्यपरम्परया पुष्टानां व्यर्थत्वापत्तेः। न चात्रापि यथाकथञ्चित् परम्परा रस-सत्ता अस्त्येवेति समर्थनीयम्; एवंविधाया रससत्तायाः 'गौश्चलति, मृगा धावति' इत्यादावपि अतिव्याप्ततयाऽप्रयोजकत्वात्। अन्ततः सर्व एवार्थो भवत्येव अन्यतमो विभावानुभावव्यभिचारिष्विति आलङ्कारिकैः स्फुटं स्वीकारात्।

अतो न कोऽपि सचेताः सहृदयः केवलं रसात्मकमेव काव्यं मनुते, विजहाति च कविपरम्परासमर्थितां वस्त्वलङ्कारप्रधानानां काव्यानां काव्यताम्। तथात्वे भविष्यत्येव व्याकुलता अनादिकालतः प्रवहमाने काव्यवर्त्मनि तन्नियामके चालङ्कारशास्त्रे। एवं पण्डितराजो विश्वनाथेन समुद्धृतामलङ्कार-प्रवाहे शताब्दीतो त्रुडितां रसपरम्परां पुनरपि तथैवासादयत्। अत्रोत्कर्षाधायक-काव्यलक्षणप्रस्तावे आभासतः प्रासङ्गिकमपि विश्वनाथ-पण्डितराजाभ्यां कृतं मम्मटभट्टानां काव्यलक्षणस्य विस्तृतं खण्डनं समुपन्यस्तम्। अनेनेदं स्पष्टं यदालङ्कारिकाः परलक्षण-खण्डनपुरस्सरम् आत्मलक्षणविन्यासव्याजेन प्रस्थान-विशेषं प्रति आत्मनः आग्रहं प्रकाशयन्ति। प्रकाशितश्चैष आग्रहो लक्षणकृतां हृदि वर्तमानं प्रस्थानं प्रति प्राधान्याप्राधान्यकृतं भावमपि व्यनक्ति। एवं काव्यलक्षणानां खण्डनमण्डनविधिना विहितो विचारो महदुपकरोति अलङ्कार-प्रस्थानविमर्शम्।

विश्वनाथस्य काव्यलक्षणमिदं तं रससम्प्रदाय-समर्थकं बोधयति। वामनस्य रीतेः, वक्रोक्तिजीवितकारस्य वक्रोक्तेः ध्वनिकारस्य च केवलं वस्त्वलङ्काररूपस्य ध्वनेः एतत्कृतं खण्डनमस्य रससम्प्रदायपक्षपातं पुष्णात्यधिकम्। अत एवायं ध्वनिकारस्य वस्त्वलङ्कारयोः प्रधानव्यङ्ग्यत्वे स्वीकृतं काव्यात्मत्वं न सहते।

निर्गलितोऽर्थोऽयं यद् विश्वनाथो न कथमपि अलङ्काराणामात्मरूपत्व-मङ्गीकुरुते। किन्त्वेतद् विपरीतं पण्डितराजो न करोति वामन-कुन्तकयोः खण्डनं यौ किलाऽलङ्काराणां रीति-वक्रोक्ति-व्याजेनाऽऽत्मत्वं स्वीकुरुतः। ध्वनेरपि

नायं कुरुते खण्डनं यत्र व्यङ्ग्यप्राधान्येऽलङ्कारा अपि काव्यात्मत्वमाप्नुवन्ति। एवं काव्यलक्षणानामालोचना तां प्रस्थान-दृष्टिं परिष्करोति या रसालङ्कारयोः शरीर-शरीरिणोर्वा विवादे नात्मानं स्फुटं प्रकाशयति। अलङ्कारप्रस्थाने त्वेष विवादोऽधिकं व्याकुलयति। अस्य तथ्यस्य सत्यता प्रस्थानानामालोचनेन जायते। भरतेन समुद्भावितो रस-सम्प्रदायो भरतानन्तरं बहुशताब्दिपर्यन्त-मलङ्कारप्राधान्यमङ्गीकृत्य यथाकथञ्चित् अलङ्कारेष्वेव आत्मानमन्तर्भाव्य कालं क्षपयति स्म।

आनन्दवर्धनसमये चायं (रससम्प्रदायः) ध्वनिव्याजेन पुनरपि आत्मानः स्वातन्त्र्यं अलङ्कारापेक्षया प्राधान्यञ्च समुद्घोषयितुं यतते। अभिनवगुप्तेन ध्वनावपि रसप्राधान्ये निर्णीते निःसंशयं रस आप्नोति स्वकीयमपहृतं प्राधान्यम्। फलतश्च **कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति, अनलङ्कृती पुनः क्वापि** इत्यादीनि वचनानि सङ्गतिं भजन्ते। फलतश्च विश्वनाथसमये 'रसात्मकं वाक्यं काव्यमि'ति लक्षणेन पुना रस एव काव्यस्य आत्मा भवति। अनेन सहैव अलङ्कार-प्राधान्यस्य पोषकं मतमपि विविधेन नूतन-प्रस्थानव्याजेन आत्मानमग्रे प्रसारयति। परिणामतो वक्रोक्तिरूपोऽलङ्कारविशेषोऽपि समस्तमेव ध्वनिप्रपञ्चमात्मसात्कर्तुं प्रस्थानतामानीयते कुन्तकेन। येन भवति पोषः पुनरपि अलङ्काराणाम्, रसश्चात्र पुनरपि अङ्गतां भजते वक्रताया अपूर्वालङ्कार-रूपिण्याः। यद्यपि भामहस्य वक्रोक्तिरागच्छति रसप्रभावे अभिनवगुप्तेन पोषिते, किन्तु कुन्तकमासाद्य पुनरपि प्राधान्यमाप्नुते। अनेनैव क्रमेण रसालङ्कारयोः प्राधा-न्याप्राधान्यपोषको विवादोऽलङ्कारशास्त्रस्य आदित आन्तं प्रवहति मूर्तामूर्तरूपेण।

अनेन सन्दर्भेणेदं दर्शितं यत् प्रायः आलङ्कारिकाणां काव्य-लक्षणे द्वैविध्यमेव मिलति उत्कर्षाधायक-स्वरूपाधायकभेदात्। अत्र कानिचित् लक्षणानि उत्कर्ष-मात्रबोधकानि, कानिचिच्च स्वरूपाधायकानि। अत्रापि प्रायो द्विविधो वर्गो दर्शितः—एकः शब्दस्यैव काव्यत्वमङ्गीकरोति, अपरश्च शब्दार्थयोः। अत्रैव प्रसङ्गतः शब्दार्थौ काव्यमिति मतपोषकस्य मम्मटस्य लक्षणमपि खण्डितं प्रदर्शितं विश्वनाथ-पण्डितराजमतानुसारम्। द्वावपि इमौ आलङ्कारिकौ शब्दः काव्य-मित्यस्यैव मतस्य समर्थकौ—पण्डितराजः साक्षात्, विश्वनाथश्च परम्परया। सम्प्रति इमामेव दृष्टिं बोधयितुं परम्परानुसारमालङ्कारिकाणां लक्षणानि दीयन्ते।

तत्र शब्दस्यैव काव्यत्वमिति वादिनां लक्षणानि यथा—

**इष्टार्थव्यवच्छिन्ना पदावलिः काव्यम्।[1]**
**काव्यं रसादिमद् वाक्यं श्रुतं सुखविशेषकृत्।[2]**

१. दण्डी १.१०।     २. अ० शे०, पृ० २।

निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् ।
रसात्मकं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति ॥[१]
निर्दोषा लक्षणवती सरीतिर्गुणगुम्फिता ।
साऽलङ्काररसाऽनेकवृत्तिर्वाक् काव्यनामभाक् ॥[२]
वाक्यं रसात्मकं काव्यम् ।[३]
रमणीयार्थप्रतिपादकः शब्दः काव्यम् ।[४]

शब्दार्थौ काव्यमिति वर्गस्य पोषकानि लक्षणानि यथा—

मृदुललितपदाढ्यं गूढशब्दार्थहीनम्[५], इत्यादि ।
शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद्द्विधा ।[६]

उद्भट-रुद्रटाऽऽनन्दवर्धनाचार्यादयोऽपि शब्दार्थौ सहितं काव्यमित्येव मन्यन्ते । यथा—

काव्यशब्दो गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते ।[७]
शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्ये तद्विदाह्लादकारिणि ॥[८]
साधुशब्दार्थ - सन्दर्भ - गुणालङ्कार - भूषितम् ।
स्फुटरीति-रसोपेतं काव्यं कुर्वीत कीर्तये ॥[९]
शब्दार्थौ वपुरस्य शब्दार्थवपुस्तावत् काव्यम् ।[१०]
गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयं काव्यं काव्यतत्त्वविदो विदुः ॥[११]
तत्र निर्दोषशब्दार्थ-गुणवत्त्वे सति स्फुटम् ।
गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम् ॥[१२]
काव्यं विशिष्टशब्दार्थसाहित्यं सदलङ्कृति ।[१३]

---

१. स० क० १. २ । २. चन्द्रा० १. ७ ।
३. सा० द०, पृ० २० । ४. र० ग०, पृ० ४ ।
५. भरत ना० शा० १६. ११८ । ६. भामह–१. १६ ।
७. वामन काव्या० १. १ । ८. कुन्तक, व० जी० १. ७ ।
९. वाग्भट, काव्या० ( ल० टी० ) पृ० २१ ।
१०. विद्याधर, एका० ( ल० टी० ) पृ० २१ ।
११. विद्यानाथ, प्र० रु० ( ल० टी० ) पृ० २१ ।
१२. अच्युतराय, सा० सार ( ल० टी० ) पृ० २१ ।
१३. क्षेमेन्द्र क० क० ( ल० टी० ) पृ० २१ ।

गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ ।
नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते ॥[१]
तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।[२]
अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम् ।[३]
कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यमुच्यते ।[४]
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा ।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥[५]

इत्थं 'शब्दः काव्यम्, शब्दार्थौ वा काव्यम्' इत्युभयत्र उत्कर्षाधायकस्वरूपाधायकभेदाभ्यां विविधः प्राधान्येन प्रदर्शितो भेद आलङ्कारिकेषु यैः काव्यलक्षणव्याजेन दर्शिता स्वालङ्कारदृष्टिः। अत्रापि इमानि काव्यलक्षणान्यधीत्य चत्वारि प्रस्थानानि काव्यशास्त्रे सन्तीति प्रतीयते। तानि च शब्दप्राधान्यप्रस्थानं शब्दार्थसाहित्य-प्रस्थानं रसप्रस्थानं ध्वनिविरोध-प्रस्थानञ्चेति भिद्यन्ते।

तत्र शब्दप्राधान्यप्रस्थानस्य प्रवर्तको दण्डी एव प्रतिभाति। तस्य पोषकाः सन्ति भोज-जयदेव-विश्वनाथ-पण्डितराजादयः। शब्दार्थसाहित्यप्राधान्यप्रस्थानस्य चादिप्रवर्तको भरतः, तत्समर्थकाश्च भामह-रुद्रटाऽऽनन्दवर्धन-मम्मटादयः।

रस-प्रस्थानस्यापि प्रवर्तको भरत एव। तत्समर्थकाश्च महिमभट्ट-विश्वनाथादयः।

ध्वनि-प्रस्थानस्य पूर्वैरालङ्कारिकैः समाम्नातस्यापि प्रधानः प्रवर्तक आनन्दवर्धन एव। तदनुयायिनश्च अभिनवगुप्त-मम्मट-पण्डितराजादयः।

एवं ध्वनिविरोधिप्रस्थानस्य समर्थकाः सन्ति—भट्टनायक-महिमभट्ट-कुन्तक-धनिकादयो ये नाङ्गीकुर्वन्ति व्यञ्जनाम्। एतेषु भट्टनायको भावकत्व-भोजकत्वव्यापाराभ्यां व्यञ्जनां गतार्थयते, महिमभट्टोऽनुमाने तामन्तर्भावयति, कुन्तकश्च वक्रोक्तौ। एतैः स्वालङ्कारग्रन्थेषु विस्तरेण ध्वनिविरोधं कृत्वा स्थापितानि स्वाभिमतानि मतानि। किन्तु स्वयं ध्वनिकारेण तत्परवर्तिभिः सफलानुयायिभिः मम्मटादिभिश्च प्रत्याख्यातानि इमानि न मान्यतां प्रापुरलङ्कारशास्त्रे। प्रत्युत विरोधेनैषां ध्वनिरधिकमेव दार्ढ्यमवाप। परमेतेषां प्रत्याख्यानं प्रस्थानपरम्परां स्फुटतां प्रापयत्। अत एवैषामपि महन्महत्त्वं काव्यशास्त्रे।

---

१. आ० चि० वि० ३, ८। २. का० प्र०, पृ० ७।
३. हेम० का० १, पृ० १९। ४. व्य० वि० १, पृ० ९५।
५. क्षेमेन्द्र, औचि० ५।

भट्टनायकस्य 'हृदयदर्पणं' नोपलभ्यते, किन्तु तन्मतं प्रायो मान्येषु सर्वेषु ध्वन्यालोकादिग्रन्थेषु प्राप्यते। अयञ्च नव्येन भावकत्वव्यापारेण भोजकत्व-व्यापारेण च प्रतिपादयति क्रमशो रसस्य साधारणीकरणतामास्वाद्यत्वञ्च विनापि व्यञ्जनाम्। परमियं भावना भुक्तिश्च व्यञ्जनाव्यापारान्नातिवर्तते। अत एव रसगङ्गाधरे पण्डितराजोऽपीदं स्वीकरोति—

"एवञ्च त्रयोंऽशाः काव्यस्य—'अभिधा, भावना चैव तद्भोगीकृतिरेव च' इत्याहुः। मतस्यैतस्य पूर्वस्मान्मताद् भावकत्व-व्यापारान्तरस्वीकार एव विशेषः। भोगस्तु व्यक्तिः। भोगकृत्त्वञ्च व्यञ्जनादविशिष्टम्। अन्या तु सैव सरणिरिति।"[1]

महिमभट्टोऽभिधाव्यापारमेवैकं मन्यते, तदतिरिक्तस्य व्यापारस्य अनुमानेन गतार्थत्वात्। अत एवायं व्यक्तिविवेके स्वीकरोति—

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥[2]

अन्यच्च—

शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिङ्गता।
न व्यञ्जकत्वमनयोः समस्तीत्युपपादितम्॥[3]

एवं नास्य मते लक्षणा-व्यञ्जने, तयोरनुमानेऽन्तर्भावात्। अतोऽस्य मते न रसो व्यङ्ग्यः, अपि त्वनुमेय एव। अस्मादेव हेतोरयं ध्वनिलक्षणे दश दोषानुद्भावयति स्वकृतौ। यथा—

अर्थस्य विशिष्टत्वं शब्दः सविशेषणस्तदः पुंस्त्वम्।
द्विवचन-वाशब्दौ च व्यक्तिर्ध्वनिर्नाम काव्यवैशिष्ट्यम्॥
वचनं च कथनकर्तुः कथिता ध्वनिलक्ष्मणीति दश दोषाः।
ये त्वन्ये तद्भेदप्रभेदलक्षणगता न ते गणिताः॥[4]

ध्वनिलक्ष्मणि दर्शितानामेषां दशदोषाणां रुय्यको व्यक्तिविवेकटीकायां साधु समीक्षामकरोत्। किन्त्वत्राप्रकृतत्वाद् विस्तरभिया च सा नोल्लिख्यते।

वक्रोक्तिजीवितकारो वक्रोक्तिमेव काव्यजीवितं मनुते। अत एव निर्दिशति विश्वनाथोऽपि साहित्यदर्पणे। इयञ्च वक्रोक्तिः—

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।

---

१. र० ग० १, पृ० २५। २. व्य० वि० १.१, पृ० १।
३. तत्रैव, १.२७। ४. तत्रैव, १.२३.२४।

वक्रोक्तिरेव वैदग्ध्यभङ्गी भणितिरुच्यते ॥
वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाऽभिधा ।[१]

अत एवेयमभिधा द्योतक-व्यञ्जकावप्यर्थौ अन्तर्भावयति अर्थप्रतीतिकारित्व-सामान्यादुपचारात्—एवं द्योत्य-व्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद् वाच्यत्वमेव ।[२] इयं च वक्रोक्तिरशेषाण्येव स्वपूर्ववर्तीनि प्रस्थानानि रसाऽलङ्कार-रीति-ध्वन्याख्यानि वक्रोक्तावन्तर्भावयति । कुन्तकेन च स्वीकृता षोढा वक्रोक्तिः ।

यथा—

कविव्यापार-वक्रत्वप्रकाराः सम्भवन्ति षट् ।
प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः ॥
वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ॥
वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥
वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः ।
उच्यते सहजाहार्य-सौकुमार्य-मनोहरः ॥'[३]

एवमयं कुन्तक आस्वेव षट्वक्रतासु वर्णविन्यास-पदपूर्वार्ध-प्रत्यय-वाक्य-प्रकरण-प्रबन्धाख्यासु सर्वाण्येव पूर्वप्रस्थानान्यन्तर्भावयति । तत्रान्तर्भावं व्रजति रसप्रस्थानं सुकुमारमार्गे विचित्रमार्गे च । यथा—

भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः ।
रसादिपरमार्थज्ञ - मनःसंवादसुन्दरः ॥
स्वभावः सरसाकूतो भावानां यत्र बध्यते ।
केनापि कमनीयेन वैचित्र्येणोपबृंहितः ॥'[४]

एवमयं रसो वक्रोक्तेरुचिता सम्पदिति सामान्यतया स्वीकुरुते । यथा—

वाग्वल्ल्याः पदपल्लवास्पदतया या वक्रतोद्भासिनी
विच्छित्तिः सरसत्वसम्पदुचिता काप्युज्ज्वला जृम्भते ।[५]

किन्तु विशेषतया रसं प्रकरण-प्रबन्धवक्रतयोरन्तर्भावयति यत्रैष रस इतिहासभुक्तेष्वपि महाकविप्रबन्धेषु प्रकरणवक्रतां प्रबन्धवक्रतां वा समुद्भास्य कामप्युज्ज्वलामुचिताञ्च सरसत्वसम्पदं समुन्मीलयन् विच्छित्तेः कमनीयतां

---

१. व० जी० १. १० (वृत्तिश्च) । २. तत्रैव, १. ८ (वृत्तिः) ।
३. तत्रैव, १.१८–२१ । ४. तत्रैव, १.२६, ४१ ।
५. तत्रैव, २।३५ ।

तनुते। अत एव यदा कदा प्रकरणवक्रतेयमङ्गिनं रसं नाटकस्य समाप्तेः पूर्वमेव परं सीमानं प्रापयति; यथा—विक्रमोर्वशीयनाटकस्य चतुर्थेऽङ्के विप्रलम्भस्य। वक्रतादृष्ट्या भवेदौचित्यमेवंविधाया रसनिष्पत्तेः, किन्तु न रसदृष्ट्या, पञ्चमाङ्केऽपि रसनिष्पत्त्यर्थमाहितस्य वस्तुविधानस्य रसप्रवाहाभावेन शैथिल्यापत्तेः। एवमेव एकोऽपि रसो नाटके वक्रतयैव रसालङ्कारयोः संयोजनया निष्पत्तिं व्रजति। अनेनैव क्रमेण वक्रतावासितचेताः सुकविः वक्रताविच्छित्त्यर्थं वस्तुविधानस्य मूलमङ्गिनं रसं विहाय तत्र सर्वथा नूत्नं रसं युनक्ति। यथा शान्तरसो महाभारतवस्तु-विन्यासे स्वभावतया सम्पृक्तोऽपि वेणीसंहारनाटके वीररसार्थं त्यज्यते। ततश्च तदेव महाभारतीयं वस्तु नवेन वीररसेनाऽऽप्लुतं विच्छित्तिमनुभवति। एवं समस्तमपि रसप्रस्थानं वक्रोक्तावन्तर्भवद् राजते।

ध्वनिप्रस्थानमपि वक्रोक्तावेवान्तर्भावं व्रजति। अस्य समर्थनं करोति रुय्यकोऽपि स्वीयेऽलङ्कारसर्वस्वे। यथा—

"वक्रोक्तिजीवितकारः पुनर्वैदग्ध्यभङ्गी-भणिति-स्वभावां बहुविधां वक्रोक्तिमेव प्राधान्यात् काव्यजीवितमुक्तवान्। व्यापारस्य प्राधान्यञ्च काव्यस्य प्रतिपेदे। अभिधानप्रकारविशेषा एव चालङ्काराः। सत्यपि च त्रिभेदे प्रतीयमाने व्यापाररूपा भणितिरेव कविसंरम्भगोचरः। उपचारवक्रतादिभिः समस्तो ध्वनिप्रपञ्चः स्वीकृतः।"[१]

एवमेव कुन्तकोऽशेषमलङ्कारप्रस्थानमपि वर्ण-वाक्यवक्रतयोरन्तर्भावयति। यथा—

एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्।[२]

येयं वर्णविन्यास-वक्रतानाम वाचकालङ्कृतिः।[३]

वाक्यस्य वक्रभावोऽन्यो विद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥[४]

किन्तु अलङ्कार प्रस्थानसमर्थितान् सर्वानलङ्कारान् नायमङ्गीकरोति, रसोक्ति-स्वभावोक्त्योरलङ्कारत्वेन अनभ्युपगतत्वात्। अतो रसोक्ति-स्वभावोक्तिमूलका अलङ्कारा अपि प्रायोऽनेन प्रत्याख्याताः। रसोक्ति-स्वभावोक्त्योरलङ्कारताया निषेधो यथा—

अलङ्कारो न रसवत् परस्याप्रतिभासनात्।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि॥[५]

---

१. अ० स०, पृ० ९–१०। २. व० जी० १.१९ (वृत्तिः)।
३. व० जी० २.६। ४. तत्रैव, १.२०। ५. तत्रैव, ३.१०।

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः ।
अलङ्कार्यतया तेषां किमन्यदवशिष्यते ॥
स्वभावव्यतिरेकेण वक्तुमेव न युज्यते ।
वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते ॥
शरीरं चेदलङ्कारः किमलङ्कुरुते परम् ।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति ॥[1]

रीतिप्रस्थानमपि कुन्तकेन वर्णविन्यास-वक्रतायामन्तर्भावितं प्रतीयते । किन्तु वक्रोक्तिविषये भामहमनुसरन्नप्ययं रीतिविचारो तमतिवर्तते । रीतिप्रस्थानवैशिष्ट्यं स्वीकुर्वन्नपि नायं तासां देशभेदनिबन्धनत्वेन वामनकृतां वैदर्भी गौडीं पाञ्चालीं चेति त्रिविधां समाख्यां न वा उत्तमाऽधम-मध्यमवैचित्र्येण त्रैविध्यं सहते । एवमेव दण्डिना स्वीकृतं वैदर्भी-गौणीलक्षणं मार्गद्वितयमपि नायमङ्गीकरोति । यतो हि देशभेदनिबन्धत्वे रीतिभेदानां देशानामानन्त्यादसंख्येयत्वं प्रसज्येत ।

रीतिनाम् उत्तमाधममध्यमभेदेन त्रैविध्यमपि नोचितम्; सहृदयाह्लादकारि-काव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्यासम्भवान् मध्यमाधमयोरुपदेशस्य वैयर्थ्या-पत्तेः । परिहार्यत्वेनापि अनयोरुपदेशो न युक्तः; वामनेन स्वत एवास्या-स्वीकारात् काव्यकरणाय तयोरप्युपदेशस्य अभ्युपगतत्वाच्च । अतो रीतिनामुत्त-माधममध्यमत्वेन त्रैविध्यं नोचितम् । **तस्मात् कविस्वभावभेदेन काव्य-प्रस्थानभेदः समञ्जसतां गाहते ।**[2] अतः स्वभावभेदेन तन्निमित्तभूताः । सुकुमार–विचित्रयोभयात्मकभेदेन त्रिविधा मार्गाः कुन्तकस्याऽभिमताः । न चात्रापि कविस्वभावभेदनिबन्धनत्वाद् अनन्तभेदभिन्नत्वमनिवार्यम्; परि-संख्यातुमशक्यत्वात् सामान्येन भेदत्रैविध्यस्यैव स्वीकारात् ।

इत्थं कुन्तकः प्राचीनानां रीतिप्रस्थानमपि वर्णविन्यासवक्रतायामेव अन्तर्भाव्य तत्र कमनीयतामाचरति । रीतयश्च देशनिबन्धनात्मिकीराख्या विहाय नवीनेन सुकुमारविचित्रोभयनाम्ना व्यवह्रियन्ते । यथा—

वर्णच्छायानुसारेण गुणमार्गानुवर्तिनी ।
वृत्तिवैचित्र्ययुक्तेति सैव प्रोक्ता चिरन्तनैः ॥[3]
सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः ।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ॥[4]

---

१. व० जी०, १.११, १२ । २. तत्रैव, पृ०१०१ ।
३. तत्रैव, २.५ । ४. तत्रैव, १.२४ ( वृत्तिश्च ) ।

यस्माच्चिरन्तनैः वैदर्भीप्रभृतयो रीतयस्तिस्रः समाख्याताः, एवं सर्वाण्येव स्वपूर्ववर्तीनिध्वन्यलङ्कार-रस-रीत्यादीनि प्रस्थानानि कुन्तको वक्रोक्तावेव अन्तर्भावयति, अतश्चतुर्णामलङ्कार-रस-रीति-ध्वनिप्रस्थानानां समालोचनं कुन्तको वक्रोक्तिस्थापनाव्याजेन करोति। वक्रोक्तिश्च अलङ्कृतिरूपा। अतोऽलङ्कारप्रस्थानविमर्श एव सर्वेषां प्रसिद्धानामप्रसिद्धानां वा प्रस्थान-समीक्षाणां मूलम्। यतोऽलङ्कारप्रस्थानादेव प्रायः सर्वाण्येव प्रस्थानानि अलङ्काराणां विवेचनया निर्गच्छन्ति, अतः 'अलङ्कारा एव काव्यप्रधानमि'ति प्राचां मतम्।[1]

एवमेव ध्वनिकारेणापि सर्वेषां पूर्ववर्तिनां रसा-ऽलङ्कार-रीतिनामकानां प्रस्थानानां ध्वनावन्तर्भावो विहितः। तेषाञ्च समन्वयेन नूतनं ध्वनिप्रस्थानं प्रवर्तितम्। अभिनवगुप्तेन च लोचने पुनरपि युक्त्या प्रमाणेन च रस एव मुख्यः काव्यात्मेति सिद्धान्तितम्। एवं ध्वनावपि रसस्यैव काव्यात्मत्वे सिद्धेऽलङ्कारप्राधान्यकाले अङ्गतां गतो रसः पुनरपि प्राधान्यं प्राप, अलङ्काराश्च अङ्गतां गताः। इत्थं ध्वनिकारेण व्यवस्थापिता अलङ्कारसरणिः अधुनापि मान्या। अतो वस्त्वलङ्काररसा गुणीभूता एव अलङ्कारतां भजन्ते, न कथमपि व्यङ्ग्य-प्राधान्ये, तत्र तु ध्वनेरेवाभ्युपगतत्वात्। तथा चोक्तम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥[2]

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥[3]

## लक्षणघटक-प्रस्थान-विवेकः

इत्थं काव्यलक्षणानां विचारेणाभासतः शब्दप्राधान्यम्, शब्दार्थप्राधान्यम्, रसः, ध्वनिः, ध्वनिविरोधि चेति पञ्च प्रस्थानानि स्वीकृतानि। किन्तु सूक्ष्म-गवेषणया शब्दप्राधान्यप्रस्थानं शब्दार्थप्राधान्यप्रस्थानञ्चेति अलङ्कार-रीति-प्रस्थान एवाऽन्तर्धत्ते। शिष्टानि च रस-ध्वनि-ध्वनिविरोधीनि त्रीणि प्रस्थानानि समीक्षया पञ्च भवन्ति। यतो ध्वनिविरोधिनोः कुन्तक-क्षेमेन्द्रयोर्मतं वक्रोक्त्यौ-चित्यरूपमपि प्रस्थानतां प्रतिपद्यते। भट्टनायकस्य मतन्तु रसादविशिष्टम्। महिमभट्टस्य मतन्तु न प्रस्थानतामर्हति, व्यञ्जनाया अनुमानेन गतार्थत्वेन अचमत्कारित्वात्। अतः षडेव प्रस्थानानि रसा-ऽलङ्कार-रीति-ध्वनि-वक्रोक्त्यौ-चित्याख्यानि अलङ्कारशास्त्रे प्रसिद्धानि।

---

१. अ० स०, पृ० ७। २. ध्वन्या०, १.१३। ३. तत्रैव, २.५।

समुद्रबन्धोऽपि एतान्येव समर्थयति अलङ्कारसर्वस्वटीकायाम् । यथा—

"इह विशिष्टौ शब्दार्थौ काव्यम् । तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेनेति त्रयः पक्षाः । आद्येऽप्यलङ्कारतो गुणतो वेति द्वैविध्यम् । द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेनेति द्वैविध्यमिति । पञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चमश्च आनन्दवर्धनेन । व्यक्तिविवेककाराभिमतस्तु अनुमानपक्षः सिद्धान्तप्रदर्शनसमनन्तरं विचारासहत्वेन दूषितत्वात्, मङ्खुकस्य पूर्वपक्षत्वेनाप्यनभिमत इत्याहुः ।"[1]

अत्र समुद्रबन्धो नाकरोत् चर्चामौचित्यस्य, परवर्तित्वात् । रसभावादिरूपोऽयमौचित्यसम्प्रदायो ध्वनावन्तर्भाव्यः । अतः पञ्च एव प्रधानानि प्रस्थानानि काव्यलक्षणानां निमित्तभूतानि । लक्षणानां खण्डनमण्डनात्मिका मीमांसा काव्यात्मविवेचना वा प्रस्थानानां प्रथामतनोत् ।

१. अ० स०, पृ० ४ ।

## द्वितीयोऽध्यायः

# प्रस्थान-मीमांसा

## रस-प्रस्थानम्

अत्र रसा-ऽलङ्कार-रीति-ध्वनि-वक्रोक्तिनामकानि पञ्च प्रस्थानानि क्रमशो मीमांस्यन्ते।

तत्रादौ रस-प्रस्थानम्। अस्य प्रस्थानस्य प्रधानः प्रवर्तको भरत एव, नाट्य-सम्बन्धेन तेनैवाऽस्य रसस्य प्रथमं साक्षात्कृतत्वात्। भरतस्य **विभावानुभाव-सञ्चारिसंयोगाद् रसनिष्पत्तिः** इति सूत्रमेव समस्तस्य विस्तृतस्य गूढतमस्य रसविवेचनस्य मूलम्। रसप्रस्थानमिदमंशतः शारीरिकम्, अंशतश्च मनोवैज्ञानिकम्। तत्र विभावानुभावौ शारीरिकौ। आभ्याञ्चाभिव्यक्तौ स्थायि-व्यभिचारिणौ मनोवैज्ञानिकौ। एवमेतैः सर्वैः काव्यस्थो भावोऽभिव्यज्यते, स्थायीभावो वाऽभिव्यक्तो रसतामापद्यते।

इदं प्रसिद्धं सूत्रं भट्टलोल्लट-शङ्कुक-भट्टनायका-ऽभिनवगुप्तपादैश्चतुर्भिः व्याख्यातृभिः क्रमेण मीमांसा-न्याय-सांख्या-ऽलङ्काररीतिभिः चतुर्धा व्याख्यातम्। तत्र स्थायिनां विभावैः ललनादिरूपैरालम्बनकारणैः उद्यानादिरूपैरुद्दीपनकारणैः अनुभावैः कटाक्षभुजोत्क्षेपप्रभृतिभिः कार्यैः व्यभिचारिभिः निर्वेदादिरूपैः सहकारिभिश्च संयोगात् क्रमेण उत्पाद्योत्पादकरूपात् गम्यगमकभावरूपात् भोज्यभोजकभावरूपात् पोष्यपोषकभावरूपाच्च सम्बन्धाद् रसस्य निष्पत्तिः क्रमशः उत्पत्तिः, अनुमितिः, भुक्तिः, पुष्टिश्च भवतीति सूत्रार्थः।

अत्र विभावादीनां विस्तारभिया लक्षणानि भेदा वा न समुपन्यस्यन्ते। एते एकोनपञ्चाशद् भावा रसान् भावयन्ति, अत एव 'भावाः' इत्युच्यन्ते। भरतोऽपि इदमेवाऽऽह—

नानाभिनयसम्बन्धान् भावयन्ति रसानिमान्।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः॥
न भावहीनोऽस्ति रसो न भावो रसवर्जितः।
परस्परकृता सिद्धिस्तयोरभिनये भवेत्॥
व्यञ्जनौषधिसंयोगो यथाऽन्नं स्वादुतां नयेत्।
एवं भावा रसाश्चैव भावयन्ति परस्परम्॥[1]

---

१. नाट्यशा० ६. ३४, ३६, ३७।

प्रधानतोऽष्टावेव रसा नाट्ये स्वीकृताः । यथा—

श्रृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।
बीभत्साऽद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥

केचन नवमं शान्तरसमपि मन्यन्ते । यथा—

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।[१]

रुद्रटस्तु काव्यालङ्कारे[२] प्रेयांसं दशमं रसमपि स्वीकुरुते ।

रसतरङ्गिणी तु वात्सल्य-लौल्य-भक्ति-कार्पण्यादीनामपि रसत्वं वाञ्छति।

एवमेव बहवः तेषु एकमेव प्रधानं रसं मन्यन्ते । अन्यांश्च तस्य भेदभूतान् विवर्तभूतान् वा । यथा—

आम्नासिषुर्दश रसान् सुधियां वयं तु
श्रृङ्गारमेव रसनाद् रसमामनामः ।[३]
एको रसः करुण एव निमित्तभेदाद्,
भिन्नः पृथक् पृथगिवाऽऽश्रयते विवर्तान् ।[४]

रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः ।
तस्माद‌द्भुतमेवाऽऽह कृती नारायणो रसम् ॥[५]

अनेनैव क्रमेण रसस्य स्वादादिसम्बन्धेऽपि विविधानि मतानि । तान्यत्र विस्तरमिया न दर्शितानि ।

रसः काव्यात्मा इत्यत्र पश्चाद्वर्तिन आलङ्कारिकाः प्रमाणम् । यथा—

वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।[६]
रस आत्मा ।[७]
अलङ्कारस्तु शोभायै रस आत्मा परे मनः ।[८]

एवमिदमतीव संक्षेपेण रसप्रस्थानम् ।

रसप्रस्थानादनन्तरं बहवः शताब्धोऽन्धकाराच्छन्ना यान्ति, प्रस्थानान्तरस्याभावात् । कालेन रसप्राधान्यमप्यपैति । समीक्षा रसप्रस्थानं परित्यज्य अलङ्कारप्रस्थानमाश्रयते षष्ठशताब्द्याम् । अनुमीयते यदन्तः रसैराप्लाव्य बाह्यविच्छित्त्यै प्रयतते समीक्षा । इतः परमनेकाः शताब्द्यो बाह्यविच्छित्तौ व्यतियन्ति।

---

१. का० प्र० ४. २९, ३५ । २. काव्या० ७. २ ।
३. भोजराजः, श्रृङ्गार० १ । ४. उत्तरराम० ३-४७ ।
५. सा० द० ३, पृ० ५८ । ६. अ० पु० ३३६. ३३ ।
७. काव्यमी०, पृ० ६ । ८. अ० शे०, पृ० ६ ।

अस्याः प्रभावेण रसभावादयोऽप्यस्या अङ्गतामापद्यन्ते । इयं च बाह्यविच्छित्तिरलङ्कार-प्रस्थाननाम्ना व्यपदिश्यते । अस्य प्रस्थानस्य महन्महत्त्वम् । अतः सम्पूर्णमेव काव्यशास्त्रमलङ्कारशास्त्रनाम्नैव प्रथितम् । पश्चाद् उद्भाविता ध्वनिवक्रोक्त्यौचित्याख्याः सम्प्रदाया अस्यैव दायः ।

## अलङ्कार-प्रस्थानम्

अस्य प्रस्थानस्य प्रधानाः प्रतिनिधयो भाम-भट्टोद्भट-दण्डि-रुद्रट-प्रतिहारेन्दु-राजादयः । नैते अनभिज्ञा रसादीनाम् । यतो हि यथावसरमेते रसभावादीन् अलङ्कारत्वेनाऽङ्गीकुर्वन्ति । यथा—

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ।[1]
रसवद्-दर्शितस्पष्टश्रृङ्गारादिरसं यथा ।[2]

एवम् उद्भटेन रसवदलङ्कारस्य परिभाषाऽपि समुपन्यस्ता । यथा—

रसवदर्शितस्पष्ट - श्रृङ्गारादि - रसादयम् ।
स्वशब्द-स्थायि-सञ्चारि-विभावाभिनयास्पदम् ॥[3]

दण्ड्यपि रसवदलङ्कारस्य परिभाषां समुपन्यस्यति स्वीकरोति च रसम् । यथा—

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति ॥[4]

अयमष्टौ रसानपि वेत्ति । यथा—

इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ।[5]
तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम् ॥[6]

अनेन सिद्धं यदेते अलङ्कार-प्रस्थानवादिनः सर्वथा रस-प्रस्थानाभिज्ञाः । किन्त्वेते नाङ्गीकुर्वन्ति प्राधान्यं रसस्य, तस्य अङ्गतामलङ्काररूपतां वा स्वीकुर्वन्ति । अत एव दण्डी सर्वाण्येव काव्यतत्त्वानि अलङ्कारत्वेनाऽङ्गीकुरुते । यथा—

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः ॥[7]

अलङ्कारसर्वस्वकारोऽपि इदमेव समर्थयते । यथा—

---

१. भामह १.२१ । २. भामह ३.६ ।
३. उद्भट का० सं० ४ । ४. दण्डी १. ५१,६२ ।
५. दण्डी २.२९२ । ६. रुद्रट १२.२ ।
७. दण्डी २.१, ३ ।

इह तावद् भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतयाऽलङ्कारपक्षनिक्षिप्तं मन्यन्ते। उद्भटादिभिस्तु गुणालङ्काराणां प्रायः साम्यमेव सूचितम्।...तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम्।[1]

यद्यप्येते प्राच्या आलङ्कारिका ध्वनिम्, गुणीभूतव्यङ्ग्यम्, प्रतीयमानस्य काव्यात्मत्वं च न शंसन्ति, किन्तु प्रतीयमानोऽर्थस्तेषाम् अप्रस्तुतप्रशंसासमासोक्त्याक्षेपाद्यलङ्कारेषु प्रतीयत एव। यथा—

यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः।
सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया यथा॥[2]

सर्वोऽपि ध्वनिप्रपञ्च एतैः पर्यायोक्तालङ्कारकुक्षौ निक्षिप्त इति शंसन्ति रसगङ्गाधरकाराः। यथा—

अपरश्च सर्वोऽपि व्यङ्ग-प्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः। ध्वन्यादिशब्दैः परं व्यवहारो न कृतः।[3]

भामहो वक्रोक्तिमतिशयोक्तिं वा सर्वालङ्कारसामान्यां मनुते। यथा—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[4]

रुद्रटो भावनामकं स्वतन्त्रमेकमलङ्कारं परिभाषते।[5] अयं द्विधा विभज्यते। तत्रैकस्य उदाहरणं यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरी-सनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥[6]

एष एव श्लोको मम्मटेन गुणीभूतव्यङ्ग्यस्य उदाहरणत्वेन पठितः।

अनेन स्पष्टमिदं यदलङ्कारप्रस्थानपोषका आलङ्कारिका प्रतीयमानतत्त्वमलङ्कारपक्षनिक्षिप्तं मन्यन्ते स्म। अत एव सर्वेऽप्यन्यप्रस्थान-पोषका आलङ्कारिका अपि अलङ्कारान् श्रद्धया विस्तरेण च वर्णयामासुः, यथा च ध्वनिप्रस्थानपोषकेणापि मम्मटभट्टेन वर्णिता विस्तरशोऽलङ्काराः। फलतो विविधै रीतिध्वन्यौचित्यादिभिः प्रस्थानैराक्रान्तमपि अलङ्कारप्रस्थानं निरन्तरं ववृधे। विरोधापेक्षया अलङ्कारजानि प्रायः सर्वाण्येव रीति-ध्वनि-वक्रोक्त्यादीनि प्रस्थानानि वर्धयामासुरेव वपुरलङ्काराणाम्। अत एव भरतनाट्यशास्त्रे प्रोक्ताश्चत्वार एव उपमा-यमक-रूपक-दीपका अलङ्काराः क्रमशो वर्धमानाः

---

१. अ० स०, पृ० ३, ९। २. काव्याल०, भामह २.७९।
३. र० ग०, पृ० ४१४। ४. काव्याल०, भामह २.८५।
५. रुद्रट ७.३८। ६. का० प्र० १.३।

कुवलयानन्दे सशतं चतुर्विंशतिसंख्यामापुः । एतेनाऽनुमीयते यदलङ्कारोद्भवानि प्रस्थानानि आत्मधारा अलङ्कारेषु संस्थाप्यैव बहिर्निर्गत्य प्रस्थानान्तरतां गच्छन्ति । इमा एव धाराः ( Schools ) परस्परमन्तःसम्मिश्रणं भजन्त्योऽशेषानलङ्कारान् ससृजुः । एतासामेवालङ्कारधाराणां विवेचनमस्माकं प्रस्तुतस्य शोधविषयस्य उद्दिष्टम् । किन्त्वेता धारा आन्तरा या अलङ्कारेष्वन्तःस्थिता अलङ्काराणां भेदोपभेदान् सृष्ट्वाऽपि ततोऽलङ्कारात् पार्थक्यमासाद्य प्रस्थानान्तरताञ्च प्राप्य अपाजहुः अलङ्काराणां प्राधान्यमलङ्कारकालजम् । यथा रीतिप्रस्थानं गुणप्राधान्यव्याजेन अलङ्कारप्रधानतामपाचकर्ष ।

## रीति-प्रस्थानम्

वामन एवास्य रीतिसम्प्रदायस्य मूर्धन्य उद्भावकः । कामं दण्डिप्रभृतिभिरपि वर्णिता रीतयः, किन्तु अलङ्काराणामङ्गरूपेणैव, न काव्यस्याऽऽत्मरूपेण । यथा प्रस्तौति वामनः—**रीतिरात्मा काव्यस्य, विशिष्टपदरचना च रीतिः ।**[1] एतच्च पदेषु वैशिष्ट्यं गुणैरायाति ।[2] अतो वामनो विस्तरेण दशगुणान् वर्णयति, साधयति चैषां पार्थक्यमलङ्कारात्—**काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः**[3] इत्यादिनिर्देशेन । एवं वामनो रीतेरात्मत्वं स्वीकृत्य गुणान् विस्तरेण वर्णयति । शब्दार्थयोर्भेदेन मूलतो द्विविधानेव गुणान् स्वीकुरुते । ततः एतयोः प्रत्येकं दशधा भवति—**ओजः-प्रसाद-श्लेष-समता-समाधि-माधुर्य-सौकुमार्योदारता-ऽर्थव्यक्ति-कान्तयो बन्धगुणाः ।**[4] एवं द्वाविंशतिर्गुणानां भेदाः स्वीकृता वामनेन । अस्य मम्मटादिभिः विरोधः कृतः, स्वीक्रियन्ते च तैः केवलं त्रयो गुणाः—

> **केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।**
> **अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥**[5]

एतेषां शब्दार्थगतभेदोऽपि अपाक्रियते, गुणानां रसधर्मतया अङ्गीकारात् । पश्चाद्भवैरालङ्कारिकैः मम्मट-दर्शित एव एष पन्थाः प्रायोऽनुसृतः । केवलं भोजो वामनमनुसरति, किन्तु सोऽपि नाम्नैव गुणानां त्रैविध्यं स्वीकुरुते । एवं गुणालङ्कारयोः पार्थक्यं प्रतिपाद्य रीति-सम्प्रदायो महान्तमुपकारमकरोत् अलङ्कारशास्त्रस्य । यद्यपि भरतेनापि नाट्यशास्त्रे कृता दशगुणानां चर्चा, किन्तु नैवं रीति-पोषकरूपेण । तत्र तत्र गुणालङ्कारयोर्भेदोऽपि, यद्यपि स्वीकृतास्तेनापि चत्वारोऽलङ्काराः । दण्डिना कृता गुणानां चर्चा मार्गविचारे यथा—

---

१. का० सू० १.२.६,७ । २. का० सू० १.२.११,१२,१३ ।
३. का० सू० ३.१.१,२ । ४. का० सू० ३.१.४ ।
५. का० प्र० ८.७२ ।

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।
एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि ॥[१]

परं गुणालङ्कारयोः पार्थक्यविषयो न स्पष्टः । यद्यपि भरत-दण्डि-वामनादिभिर्दश गुणाः स्वीकृताः, किन्तु दृष्टिभेदात् कतिपयेषु गुणेषु दृश्यते भेदः, अन्यत्र साम्यमपि, दृष्टैरैक्यात् । यथा भरतस्य ओजः—

समासवद्भिर्विविधैर्विचित्रैश्च पदैर्युतम् ।
सा तु स्वरैरुदारैश्च तदोजः परिकीर्त्यते ॥[२]

दण्डिनो यथा—ओजः समासभूयस्त्वम् ।[३]

वामनस्य—गाढबन्धत्वमोजः ।[४]

तथैव भरतस्य समाधिः—

अभियुक्तैर्विशेषस्तु योऽर्थस्यैवोपलभ्यते ।
तेन चार्थेन सम्पन्नः समाधिः परिकीर्त्यते ॥[५]

दण्डिनः—

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा ॥[६]

वामनस्य—

आरोहावरोहक्रमः समाधिः ।[७]

वामनेन न केवलं पार्थक्यमेव गुणालङ्कारयोर्दर्शितम् अपि तु भामहादिभिरलङ्कार एव स्वीकृतो रसोऽपि दीप्तरसत्वं कान्तिः इति वचनेन कान्तिगुणस्य लक्षणं कृत्वा गुण एव अन्तर्भावितः । एवमलङ्कारापेक्षया गुणमाध्यमेन रसानामधिकं काव्योपकारकत्वं तेन स्वीकृतम् । अनेन साधितमलङ्काराणां गुणत्वम्, प्राधान्यं च गुणानाम् ।

इत्थमलङ्काराणां स्वरूपनिर्णये सम्प्रदायस्यास्य अतीव साहाय्यम् । अलङ्कारप्रस्थानापेक्षया एतत्प्रस्थानमवश्यमेव विकसितम्, रीतेः काव्यात्मतया स्वीकारात् । काव्यात्मतेयं भाक्ता, रीतेरवयवसंस्थानरूपत्वात् । अतः काव्यात्मदृष्ट्या आरम्भकरणादस्य पूर्वापेक्षया श्रेष्ठतरत्वम् । एतच्छोधप्रबन्धदृष्ट्याऽप्यस्य प्रस्थानस्य महन्महत्त्वम्, यतोऽत्र अलङ्कारा एव द्विधा विभक्ताः शोभायाः स्वाभाविकातिशयभेदात् । एष एव रीतिदृष्ट्या कृतोऽलङ्काराणां द्विविधो भेदो

१. काव्यादर्श १.४२ । २. नाट्यशा० ७.१०१ ।
३. काव्यादर्श १.८० । ४. का० सू० ३.१.५ ।
५. नाट्यशा० ७.१०३ । ६. काव्यादर्शः, १.९३ ।
७. का० सू० ३.१.१२ । ८. का० सू० ३.२.१४ ।

शोधप्रबन्धस्य अलङ्कारधारा-विमर्शस्य अग्रभूमिं प्रस्तौति। अतो दण्डिनः 'स्वभावोक्तिश्च वक्रोक्तिश्चेति वाङ्मयमि'ति कथनमपि सङ्गच्छते। इदमेव प्रस्थानमग्रे ध्वनिवक्रोक्त्योः प्रस्थानसिद्ध्यर्थं पारस्परिकं प्राधान्याप्राधान्यात्मकं विवादमपि सृजति। एवं प्रस्थानानि स्वपूर्वप्रस्थानात् बीजं गृहीत्वैव प्रवर्तन्ते, न तेषामुद्गम आकस्मिकः। अतः प्रस्थानोपसंहारे मीमांस्यैव पश्चाद्भवस्य प्रस्थानस्य पूर्वभूमिका।

## वक्रोक्ति-प्रस्थानम्

यद्यपि इतिहासक्रमेण प्राप्तावसरो ध्वनिर्मीमांस्यः, तथापि वक्रोक्तेः विशेषालङ्काररूपत्वाद् अलङ्कारप्रस्थानपरम्परायाः सामीप्यात् पूर्वं सैव मीमांस्यते।

वक्रोक्ति-प्रस्थानस्य प्रवर्तकः कुन्तकः। भामहेन पूर्वमेवाऽस्या उद्भावना अकारि। यथा—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[1]

परमस्या विस्तृत-प्रस्थानरूपताया उद्भावकः कुन्तक एव। अनेन स्वपूर्वोद्भवैः रस-रीति-ध्वनिप्रस्थानैराक्रान्तां क्रमशो गौणतां भजमानामलङ्कृतिं समुद्धर्तुं प्रयतितम्। सर्वाण्येव रसाऽलङ्कार-ध्वनि-तत्त्वानि वक्रोक्तिकुक्षौ विनिवेश्याऽयं पुनरप्यलङ्काराणां प्राधान्यं संररक्ष। यद्यपि अनुयायिनामभावादस्याः प्रस्थानताऽवरुद्धयते, किन्तु अलङ्कारेष्वस्याः प्रभावोऽक्षुण्ण एव।

**वक्रोक्तिः काव्यजीवितम्**[2] इति मतमङ्गीकृत्य कुन्तको रसस्य, रीतेः, ध्वनेश्च आत्मत्वमपाकरोत्। ध्वनिप्रस्थानवदिदमपि अतीव मौलिकं, क्रान्तिकारि च। यथा रसप्रस्थानस्य सुविचारितं सुसमृद्धं रूपं ध्वनिः, तत्र रसध्वनेरेव प्राधान्यात्, तथैव अलङ्कारस्य सुपरिष्कृतं सुन्दरं रूपं वक्रोक्तिरिति आलङ्कारिकाणां विश्वासः।

वस्तुतो ध्वनेः वर्धमानं प्रभावमसहमानोऽयमाचार्यः क्रमशः तिरस्क्रियमाणमलङ्कारप्रस्थानं पोषयितुकाम एव वक्रोक्तिमुद्भावयामास। यथा—

वक्रोक्तिरेव वैदग्ध्य-भङ्गी भणितिरुच्यते।
वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाऽभिधा।
वैदग्ध्यं कविकौशलम्, तस्य भङ्गीर्विच्छितिः।[3]

एवंविधां वक्रोक्तिं स्वीकृत्यानेन अस्यामेव सर्वेषां रसाऽलङ्कार-रीति-ध्वनीनामन्तर्भावो विहित इति लक्षणघटक-प्रस्थानविवेक-प्रकरणे एव दर्शितम्।

१. भामह, २.८५। २. सा० द० (लक्ष्मी टी०), पृ० १४।
३. व० जी०, १.१० ( वृत्तिश्च )।

एतेन स्पष्टमिदं यद् वक्रोक्तिरलङ्कृतिरेव। परमलङ्कृतिरूपापीयम् अलङ्काराणां सीमानमतिक्रम्य सर्वाण्येव काव्यतत्त्वानि व्यापकवक्रतायां निक्षिपति। अतः सिद्धमिदं यदनेन प्रस्थानेनापि वर्धत एव वपुरलङ्कारप्रस्थानस्य, येन निसंदिग्धमेवेदं प्रस्थानमुपकरिष्यति प्रस्तुतं प्रबन्धमिति। इदं वक्रोक्तिप्रस्थानमस्माकं स्वीकृतशोधप्रबन्धममुं 'अलङ्कारप्रस्थानविमर्शं' महदुपकरोति। यतोऽत्रैव स्वभावोक्ति-रसोक्त्योरलङ्कारतानिषेधपूर्वकं वक्रोक्तिधारा प्रस्थानतां प्राप्यते। अतो निषेधमुखेनेदं प्रस्थानं स्वभावोक्ति-रसोक्त्योरपि पूर्वालङ्कारिकैरलङ्कारधारास्वीकारत्वं प्रकटयति। प्राधान्येन दण्डि-भोजयोरुक्तयोऽत्र मानम्। यथा—

भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।[1]
वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥[2]

एतेन स्पष्टमिदं यदलङ्कारप्रस्थाने तिस्रो धाराः यासामेका वक्रोक्तिधारैव कुन्तकस्य मान्यतां लभते, नान्ये स्वभावोक्ति-रसोक्तिधारे, अलङ्कार्यत्वात्। परमन्यैरालङ्कारिकैः एतयोरलङ्कारतामङ्गीकृत्य अलङ्कारधारात्वं स्वीकृतम्। एतद्विषयको विस्तृतो विमर्शस्तु स्वभावोक्ति-रसोक्तिधारानिरूपणे द्रष्टव्यः। अत्र तु धाराणां दृष्टिभेदेन वक्रोक्तिरूपत्वाद् वक्रोक्तेश्च प्रकृतत्वाद् धाराणां निर्देश एवाऽलम्।

## ध्वनि-प्रस्थानम्

प्रस्थानमिदं रसस्य प्राधान्यं संरक्षितुकामेन आनन्दवर्धनाचार्येण समुद्भावितम्। ध्वनिसमुद्भावात् पूर्वमलङ्कारप्राधान्यकाले रसस्याप्यलङ्कारत्वेन प्राधान्यमपैति। भरतकालेऽपि रसस्य प्राधान्यं नाटकमात्रविषयम्, दृश्यकाव्य एव तस्य साक्षात्कृतत्वात्। कालेन श्रव्यकाव्येऽपि रसादीनां प्रयोगेऽभ्युपगते प्रवर्तते रसालङ्कारयोः प्राधान्याप्राधान्यात्मको विवादः। भामहोद्भट-प्रतिहारेन्दुराजादयो रसस्य अलङ्कारतामङ्गीकृत्य अप्राधान्यं शंसन्ति, अभिनवगुप्त-मम्मट-विश्वनाथादयश्च तस्य प्राधान्यम्। प्रथमं वामनोऽलङ्कारतो गुणानां पार्थक्यव्याजेन रसानां प्राधान्याय प्रयतते, गुणानां रसधर्मत्वात्। परं रीतिप्रस्थानेऽपि नाधिगच्छति रसः प्रधानताम्, गुणेष्वेव रसस्यान्तर्भावात्। वामनात् पूर्वं तु गुणालङ्कारयोरैक्याद् अलङ्काराणां परम्परया अङ्गता आयात्येव रसस्य। एवंविधायां स्थितौ रसालङ्कारयोर्विवादे ध्वनिकारः प्रतीयमानार्थस्य वाच्यार्थात् पृथक्तामुद्भाव्य विवादे समन्वयात्मकं समाधानमुपन्यस्यति, यथावसरमुभयोरेव रसालङ्कारयोः प्राधान्यमभ्युपगत्य। अत एव ध्वनौ रसवद् वस्त्वलङ्कारयोरपि प्राधान्यं स्वीकृतम्, किन्तु पर्यवसाने रसस्यैव प्राधान्यं समर्थितम्। परन्तु अलङ्कारदशायां रसस्याऽङ्गता

१. दण्डी, २.३६२। २. सर० क०, ५.८।

अव्याहतैव। एवमनेन ध्वनिप्रस्थानात्मकेन समन्वयेन संस्कृतसमीक्षासरणिः व्यवस्थिता। अत एव रसगङ्गाधरकारोऽपीदमेव समर्थयते। यथा—

ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात्।[1]

ध्वनिलक्षणं यथा—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥[2]

इदमेव लक्षणं मम्मटभट्टैरपि स्फुटतया स्वीकृतम्। यथा—

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।[3]

एष एव ध्वनिः काव्यस्यात्मा स्वीकृत आनन्दवर्धनाचार्यैः। यथा—

काव्यस्याऽऽत्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः।[4]

यद्यप्ययं ध्वनिः उत्तमोत्तमरूपत्वाद् असंख्येयः; तथाप्यस्य भेदा निरूप्यन्ते।

सोऽयं द्विविधो ध्वनिः—अभिधामूलो लक्षणामूलश्च। तत्राद्यस्त्रिविधः—रस-वस्त्वलङ्कार-ध्वनिभेदात्। रसध्वनिरिति अलक्ष्यक्रमोपलक्षणाद् रस-भाव-तदाभास-भावशान्ति-भावोदय-भावसन्धि-भावशबलत्वानां ग्रहणम्। द्वितीयश्च द्विविधः—अर्थान्तर-संक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्च।

तत्राद्योऽपि त्रिविधो लक्ष्याऽलक्ष्यक्रमप्रकाशनाद् द्विविधः। अत्र लक्ष्यक्रमेण प्रकाशमानौ वस्त्वलङ्कारध्वनी कदाचिद् वाच्यतासहौ। परम् अलक्ष्यक्रमतया प्रकाशमाना रस-भावादयो न कदापि वाच्यतां सहन्ते, शृङ्गारादिशब्दसत्त्वेऽपि विभावादीनामभावे तेषामप्रकाशनात्, शृङ्गारादिशब्दाभावेऽपि विभावादीनां सत्त्वे तेषां प्रतीतेः। एवमन्वयव्यतिकाभ्यां रसभावादीनां वाच्यताऽसहत्वं सिद्ध्यति। एतत्सम्बन्धी विस्तृतो विचारस्त्वाकरग्रन्थेषु द्रष्टव्यः। अत्र तु प्रस्थानमीमांसार्थं ध्वनेर्निर्देश एव कृतः।

इदं पूर्वमेवोक्तं यदस्य रसप्रस्थानस्य विस्तारार्थमेव आविर्भावो ध्वनेः। किन्त्वेष ध्वनिर्व्यङ्ग्यप्राधान्य एव भवतीति व्यञ्जनायाः स्थापनार्थं पूर्वं प्रयतते ध्वनिकारः। यथा—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥[5]

एवं वाच्यात् प्रतीयमानोऽर्थः भिन्न एवेति संसाधयितुमभूदाविर्भावो व्यञ्जनायाः। एष प्रतीयमानोऽर्थो न विषयोऽभिधा-लक्षणा-तात्पर्या-ऽनुमानादीनामिति सुस्पष्टं विशदञ्च ध्वन्यालोक-काव्यप्रकाशादिषु प्रधानेष्वाकरग्रन्थेषु

---

१. र० ग०, पृ० ४२८। २. ध्वन्या०, १.१३।
३. का० प्र०, १.४। ४. ध्वन्या०, १.१। ५. रस ग०, पृ० २१।

दर्शितमेव। वाच्यार्थापेक्षया व्यञ्जनागम्यस्यार्थस्य प्राधान्ये ध्वनित्वम्, साम्येऽनतिशायिनि वा गुणीभूतव्यङ्ग्यत्वम्, अस्फुटतायाञ्च चित्रत्वमिति।

परमेष एव प्रतीयमानोऽर्थः भामहोद्भटप्रभृतिभिश्चिरन्तनैरालङ्कारिकैः वाच्योपस्कारकतया अलङ्कारपक्षनिक्षिप्तोऽभ्युपगतः।[1] वामनेनापि सादृश्याल्लक्षणा वक्रोक्तिः[2] इति स्वीकुर्वता कश्चन ध्वनिभेदोऽलङ्कारत्वेनाङ्गीकृतः, रसोऽपि कान्त्याख्यगुणेऽन्तर्भावितः। दण्डिना अपि रसादयो रसवदाद्यलङ्कार एवाऽन्तर्भाविताः।

इत्थं समस्तोऽपि वस्त्वलङ्काररसात्मरूपो व्यञ्जनाप्रतिपाद्यः प्रतीयमानोऽर्थोऽलङ्कार एवान्तर्भूतस्तिष्ठति। अलङ्कारवादिनश्च इममर्थमभिधाप्रतिपाद्यं मन्यन्ते, अलङ्काराणाञ्च अभिधाविशेषप्रकाररूपत्वात्। अतस्त्रिविधोऽपि ध्वनिरलङ्काराक्रोडीकृतो भवति अलङ्कारप्राधान्यकाले।

ध्वनिकारोऽलङ्कारादेव प्रतीयमानमर्थं पृथक्कृत्य तत्र वाच्यार्थापेक्षया प्राधान्ये सति ध्वनिव्यवहारं करोति, वाच्यादनतिशायिनि तस्मिन् गुणीभूतत्वम्, वाच्यादस्फुटे चाव्यङ्ग्ये वाऽर्थे चित्रत्वमिति। अस्य समर्थनं ध्वन्यालोके यथा—

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।
काव्ये उभे ततोऽन्यद् यत्तच्चित्रमभिधीयते॥
चित्रं शब्दार्थभेदेन द्विविधञ्च व्यवस्थितम्।
तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम्॥[3]

एवं रसवस्त्वलङ्कारलक्षणस्त्रिविधोऽप्ययं ध्वनिरलङ्कारादेव उद्धृतः। अतोऽलङ्कारे प्रस्थानत्रैविध्यं प्रतीयते, यतो हि गृह्यतेऽयं त्रिविधः प्रतीयमानः प्रधानोऽर्थो ध्वनिव्यपदेशभाक्। गुणीभूतव्यङ्ग्यत्वरूपस्त्वयं त्रिविधो रसवस्त्वलङ्काररूपोऽलङ्कारे प्रस्थानत्रैविध्यं स्फुटं द्रढयति। गुणीभूतस्य रसस्य अलङ्कारत्वमङ्गीकरोति स्वयं ध्वनिकारः। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥[4]

शिष्टयोर्वस्त्वलङ्कारयोः गुणीभूतव्यङ्ग्ये अलङ्कारता तु निर्बाधैव। इदं समर्थयति अलङ्कारसर्वस्वकारोऽपि। यथा—

तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया प्रख्यापितमेव।

रुद्रटोऽपि वास्तवस्य भेदत्वेन भावस्याऽलङ्कारतामङ्गीकृत्येदं समर्थयते।

---

१. रुय्यकः, अ० स०, पृ० ३। २. वामनः, का० सू० ४.३.८।
३. ध्वन्या०, ३. ४२-४३ ४. तत्रैव०, २.५।

यथा—

यस्य विकारः प्रभवन्नप्रतिबद्धेन हेतुना येन।
गमयति तदभिप्रायं तत्प्रतिबन्धश्च भावोऽसौ ॥[१]

अतो ध्वनिप्रस्थानमीमांसयेदं सिद्ध्यति यदलङ्कारप्रस्थाने वर्तते प्रस्थान-त्रैविध्यं यच्च ध्वन्यनास्कन्दितमलङ्कारप्रस्थानविषयतां व्यावर्तयति। तात्पर्यमिदं यत् प्रधानं व्यङ्ग्यं नालङ्कारविषयं तत्र ध्वनेरभ्युपगतत्वात्। एवं गुणीभूत-व्यङ्ग्य एव अलङ्कारोऽन्तर्भाव्यते। इदं समर्थितमेव रुय्यकेनाधस्तात्, किन्तु मम्मटो नात्र बद्धादरः, गुणीभूतव्यङ्ग्यप्रकरणे अलङ्कारस्याऽनिरूपणात्, केवलमप्रधानरसस्यैव तत्र विनिवेशात्। यथा—

**एते च रसवदाद्यलङ्काराः। यद्यपि भावोदय-भावसन्धि-भावशबलत्वानि नालङ्कारतया उक्तानि, तथापि कश्चिद् ब्रूयादित्येवमुक्तम्।**[२]

अतो रसस्यालङ्कारत्वे नास्था मम्मटस्य। किन्त्वन्ये मम्मटस्य पूर्ववर्तिनः पश्चाद्वर्तिनो वाऽऽलङ्कारिकाः प्रायो रसस्याऽलङ्कारत्वमभ्युपजग्मुः। यथा—

प्रेयः प्रियतराख्यानं रसवद् रसपेशलम्।
उर्जस्वि रूढाहङ्कारं युक्तोत्कर्षं च तत् त्रयम् ॥[३]

**रसभाव-तदाभास-तत्प्रशमानां निबन्धनैर्न रसवत्-प्रेय-उर्जस्वि-समाहितानि भावोदय-भावसन्धि-भावशबलता च पृथगलङ्कारः।**[४]

**इत्थञ्चास्य रसालङ्कारत्वमुचितम्।**[५]

परमत्रेदं तत्त्वं यत्प्राचीना भामह-दण्डिप्रभृतयः उभयत्रैव रसस्य प्राधान्ये-ऽप्राधान्ये वाऽभ्युपगच्छन्ति अलङ्कारत्वं, न तथा ध्वनिकारोत्तरभाविनो ध्वनि-समर्थका अलङ्कारसर्वस्वकार-रसगङ्गाधरकारादयः। एतैः रसादीनामङ्गत्व एवाल-ङ्कारत्वाभ्युपगमात्। अतो ध्वनिकारोऽलङ्कारप्रस्थाने प्रस्थान (Schools) त्रैविध्यं समर्थयति।

किन्तु वक्रोक्तिजीवितकारोऽलङ्काररूपाया वक्रोक्तेः काव्यजीवितत्वमलङ्कार-प्राधान्यं वा स्वीकुर्वन्नपि नाभिमनुतेऽलङ्कारतां रसोक्तिस्वभावोक्त्योरिति पूर्वमेवो-पन्यस्तम्। एवं कुन्तकमत एकमेव वक्रोक्तिप्रस्थानमलङ्कारप्रस्थाने, नान्ये द्वे स्वभावोक्ति-रसोक्तिप्रस्थाने गुणीभूतव्यङ्ग्यत्वे ध्वनिकाराद्यभिमते। परमेतत् कुन्तकमतं नोचितमिति निरूप्यते—वक्रोक्तेः काव्यजीवितत्वं समर्थयन्

---

१. अ० स०, पृ० ६।    २. का० प्र०, उल्ला० ५।
३. दण्डी, २. २७५।
४. अ० सू०, ८१, ८३ (अ० स०, पृ० २०८, २१२)।
५. र० ग०, पृ० ४३।

कुन्तको ध्वनिमपि वक्रोक्तावेव अन्तर्भावयतीति पूर्वं समुपन्यस्तम्। इदं मतं भामहस्य कोऽलङ्कारोऽनया विना इति वक्रोक्तिमतस्य विस्तार एव। अतो भामहस्य वक्रोक्तेः सर्वालङ्कारसामान्यरूपत्वे खण्डिते कुन्तकस्यापि सर्वालङ्कार-रूपता निरस्यते। तथा सति ध्वनिकारसम्मतमलङ्कार-प्रस्थानत्रैविध्यं सुस्थमेव।

ध्वनिकारस्य वाक्यानि व्याकुर्वता अभिनवगुप्तपादेन भामहस्य वक्रोक्तेः सर्वालङ्कारसामान्यत्वसमर्थकं वाक्यमुद्धृत्य खण्ड्यते। यथा—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥[1]

अत्र यदि वक्रोक्तेः सर्वालङ्कारता स्वीक्रियते तदा अन्येषामलङ्काराणां स्वरूपमेव न दृश्येत। अथालङ्काराणां चारुतार्थमनिवार्या वक्रोक्तिरित्यभ्युपगम्यते, तदा तु इयमौचित्येऽनौचित्ये सर्वत्र स्यात्। अथ अतिशयोक्तिरौचित्यवती जीवितमिति चेत्, औचित्यनिबन्धनं रसभावादि विहाय नान्यत् किञ्चिदिति तदेव मुख्यं काव्यतत्त्वमङ्गीकर्तव्यम्, न तु सा अतिशयोक्त्यपरनाम्नी वक्रोक्तिः। अतो वक्रोक्तेश्चमत्कारित्वं व्यङ्ग्यार्थमूलकमेव। लक्षणास्थलेऽपि व्यङ्ग्यत्व-मनिर्बाधम्, प्रयोजनस्य व्यङ्ग्यत्वात्। एवमेतदेव व्यङ्ग्यं काव्यजीवितमिति, न तु वक्रोक्तिः। एतच्च व्यङ्ग्यं कदाचित् प्रधानम्, कदाचिच्च गौणम्। प्राधान्ये ध्वनिः, गौणत्वे च गुणीभूतव्यङ्ग्यत्वम्। एवमलङ्कारप्रस्थाने प्रस्थानत्रैविध्यं ध्वनिवक्रोक्त्योर्विवादेन निश्चीयते।

## औचित्य-प्रस्थानम्

ध्वन्यनन्तरमिदमन्तिमं प्रस्थानम्। अस्य प्रस्थानस्य मुख्यः प्रवर्तकः अभिनवगुप्तशिष्यः क्षेमेन्द्रः। अयम् "औचित्यविचारचर्चा"नामके स्वग्रन्थे औचित्यस्य स्वरूपमुपन्यस्यति। यथा—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥[2]

एतदेवौचित्यं क्षेमेन्द्रः काव्यजीवितमभ्युपगच्छति। यथा—

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥[3]

काव्यजीवितभूतमिदमौचित्यं न काव्यशास्त्रस्य नवीनं तत्त्वम्। नास्योद्भावकः क्षेमेन्द्र एव प्राधान्येन। प्रायः सर्वैरेव क्षेमेन्द्रात् पूर्ववर्तिभिरालङ्कारिकैरस्य

---

१. ध्वन्या० ३, पृ० ४६७ (लोच० सटी०)।
२. औ० वि० च०, कारिका० ७। ३. तत्रैव, ३।

तत्त्वस्य साक्षात्परम्परया वा निर्देशः कृतः, किन्तु दृष्टिभेदस्तत्र प्रथते। अलङ्कारप्राधान्यवादिनां कृतेऽलङ्कारस्याधारभूतं तत्त्वमौचित्यमेव। एवमेव रस-ध्वनि-वक्रोक्त्यादीनां सर्वेषामेव तत्त्वानामिदमौचित्यं मूलम्। अत्र विस्तरभिया कतिपयेषामेव क्षेमेन्द्रपूर्ववर्तिनामालङ्कारिकाणाम् औचित्यस्य सङ्केतपराणि वाक्यानि उपन्यस्यन्ते। यथा, तत्र भरतः—

अदेशजो हि वेषस्तु न शोभां जनयिष्यति।
मेखलोरसि बन्धे च हास्यायैवोपजायते॥[1]

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथाऽर्थसंस्थम्।
मिश्राः कवीन्द्रैरथ नाल्पदीर्घाः कार्याः मुहुश्चैव गृहीतमुक्ताः॥[2]

ध्वन्यालोककाराः—

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा॥
वाच्यानां वाचकानाञ्च यदौचित्येन योजनम्।
रसादिविषयेणैतन्मुख्यं कर्म महाकवेः॥[3]

कुन्तकः—प्रस्तुतौचित्यविच्छित्तिं स्वमहिम्ना विकाशयन्।
प्रत्ययं पदमध्येऽन्यामुल्लासयति वक्रताम्॥[4]

एभिः पूर्वदत्तैरुद्धरणैः सिद्धमिदं यद् औचित्यं पूर्वमुद्भावितमेव, नात्र काचिन् नव्योद्भावना क्षेमेन्द्रस्य। सत्यप्येवं न केनाप्यन्येन पूर्ववर्तिनाऽऽलङ्कारिकेणाऽस्य औचित्यस्य काव्यजीवितत्वमुररीकृतम्। सर्वेषामेव दृष्टिः स्वोपज्ञेषु रसाऽलङ्कार-रीति-ध्वनि-वक्रोक्त्यादिष्वेव काव्यतत्त्वेषु प्राधान्येन केन्द्रिता। प्रथमं क्षेमेन्द्र एवेदं काव्यजीवितत्वेन मनुते। अतोऽस्य प्रस्थानस्य प्रवर्तकः क्षेमेन्द्र इति स्वीक्रियते।

क्षेमेन्द्रस्य औचित्यं पूर्वालङ्कारिकाणामौचित्येभ्यो भिन्नम्। अत एव दृष्टिभेदात्तत्र घटते प्रस्थानत्वम्। पूर्वेषामौचित्यं तत्तद्भ्यो रसालङ्कारवक्रोक्तिध्वनिभ्य आक्रान्तं सत्प्रधानम्। प्राधान्यं चैतेषां तत्तदभिमतानां रसादीनां तत्त्वानाम्। परं न तथा क्षेमेन्द्रस्य औचित्यम्, तस्य प्राधान्येनाभिमतत्वात्, अन्येषां च काव्यतत्त्वानामस्याङ्गत्वेन अङ्गीकरणाच्च। अत एव प्राधान्याद् औचित्यस्य काव्यजीवितत्वमङ्गीकरोति क्षेमेन्द्रः। अनेनैव हेतुना क्षेमेन्द्रो ध्वनेर्महता संरम्भेण खण्डनं कुर्वन् औचित्यं समर्थयति स्वग्रन्थे औचित्यविचारचर्चाऽऽख्ये। यथा—औचित्यघटितसुन्दरशब्दार्थमये काव्ये किमन्येन ध्वनिना-

---

१. भरतः, ना० शा० २३,६९-७०। २. रुद्रटः, काव्या० २.३२।
३. ध्वन्या०, ३.३२। ४. व० जी०, २.१७।

ऽऽत्मभूतेन'[1] इति। किन्त्वस्यापि निराकरणं भामहस्य वक्रोक्त्यालङ्कार-सामान्यत्वप्रत्याख्यानप्रसङ्गे लोचने कृतमेव। ते स्ववचनमेव ध्वनिसद्भावाभ्युपगमसाक्षिभूतं मन्यमानाः प्रत्युक्ताः।[2]

अतो वक्रोक्तिप्रत्याख्याने प्रयुक्ता युक्तिरत्रापि ज्ञेया। यतो रसभावादि मुक्त्वा नान्यत् किञ्चिन्मुख्यं तत्त्वं यदाश्रित्यौचित्यं काव्यजीवितत्वमधिगच्छेत्। अत औचित्यस्य रसादिनिबन्धनत्वाद्रसाद् ध्वनेरभ्युपगमे ध्वनेः काव्यात्मत्व सुस्थमेव। तस्मादलङ्कारे ध्वनिप्रस्थानसमर्थितं प्रस्थानत्रैविध्यं स्वभावोक्ति-रसोक्ति-वक्रोक्त्यात्मकमव्याहतमेव।

प्रस्थानमीमांसयाऽनया स्पष्टमिदं यत् काव्यशास्त्रं भरतादारभ्य पण्डित-राजजगन्नाथपर्यन्तं सहस्रद्वयाब्दात्मकं निजं समयं रसालङ्कारयोः प्राधान्या-प्राधान्यविवाद एव क्षपयति। एष विवादः षण्णां प्रस्थानानां मूलम्। एतेषां रसालङ्कारातिरिक्तानि चत्वारि रीति-ध्वनि-वक्रोक्त्यौचित्याख्यानि प्रस्थानानि लक्षणतस्तु निजां विषयतां व्यावर्तयन्ति। परं सूक्ष्मसमीक्षायां कृतायां रसालङ्का-रयोः सङ्गतं विषयत्वं निर्धारयन्ति। तत्र रीतिप्रस्थानेऽलङ्काराद् गुणपार्थक्यव्याजेन रसो रस-प्रस्थानकालिकं स्वात्मनस्तत्प्राधान्यमधिगन्तुं यतते, यच्चालङ्कार-प्राधान्यकाले अलङ्कारणाऽऽक्रान्तं सदलङ्कारस्य अङ्गतामुपेतम्। किन्तु रसे कान्तिगुणेऽन्तर्भाविते रसप्राधान्यवादिनामाशा समाप्यते। पुनरपि गुणान्तर्भावितो रसः परम्परया अलङ्काराङ्गतामुपैति। एवं रीतिप्रस्थानपर्यन्तं यथाकथञ्चिद् रसानामप्राधान्यं तिष्ठति। ध्वनिप्रस्थाने प्रायोऽयं रसालङ्कारयोः प्राधान्या-प्राधान्यात्मको विवादः समन्वयं लभते। व्यङ्ग्यस्यार्थस्य ध्वनित्वस्वीकारे रसा-लङ्कारयोरुभयोरपि समयतो व्यङ्ग्यप्राधान्यमुखेन प्राधान्यस्याभ्युपगतत्वात्। व्यङ्ग्यस्याप्राधान्येऽङ्गत्वे वा रसादीनामलङ्कारता तु स्वीकृतैव प्रायः सर्वै-र्ध्वनिवादिभिरालङ्कारिकैः। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥[3]

एवमलङ्काराणामपि व्यङ्ग्याप्राधान्ये वाच्यालङ्कारत्वं स्वीकृतम्। यथा—

व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः।
समासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः॥[4]

एवं ध्वनिकारो रसालङ्कारयोरुभयोरपि प्राधान्यं व्यङ्ग्यमुखेन स्वीकृत्यापि ध्वनौ वस्त्वलङ्कारापेक्षया रसध्वनेरेव प्राधान्यमभ्युपगच्छति। यथा—

---

१. ध्वन्या० (लोच०), पृ० ४६७। २. तत्रैव, पृ० ४६९।
३. तत्रैव २.५। ४. तत्रैव (लोच० सटी०), पृ० १३०।

कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्। तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत्तदेमां भङ्क्त्वाऽपि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत्। नहि कवेरितिवृत्तमात्र-निर्वहणेन किञ्चित्प्रयोजनम्, इतिहासादेव तत्सिद्धेः।[1]

ध्वनिकारेण कृतो निर्णयः प्रायः काव्यशास्त्रस्याभिमतः। अतः काव्यसरणिः ध्वन्याधारेण व्यवस्थिता। वक्रोक्त्यौचित्यादिप्रस्थानानां विरोधेन न किञ्चिच्छिन्नं ध्वनेः, अपितु वर्धितं वपुरस्य। विरोधेनानेन महानुपकारोऽभूत् ध्वनेः, अन्यथा तस्य काव्यत्वमेव स्यादनभ्युपगतम्। यथा—गुणालङ्कारौचित्यं विना ध्वननसद्-भावेऽपि काव्यत्वव्यवहाराभावात्। अत एव लोचनकारोऽपि यथा—'चेत् गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य सति ध्वननाख्यात्मनि काव्यरूपता-व्यवहारः।"[2]

अनया प्रस्थानमीमांसया अलङ्कारस्य रीति-ध्वनि-वक्रोक्त्यौचित्यादिभ्यो व्यावृत्तं स्वरूपं सिद्धम्। अत्र विशेषतया ध्वनि-वक्रोक्तिप्रस्थानयोर्विवादोऽधिकं साहाय्यमकरोद् अलङ्कारप्रस्थाने अवान्तरप्रस्थानत्रैविध्यस्यावधारणे। यतो हि वक्रोक्तेः सर्वालङ्काररूपता ध्वनिकारेण औचित्याभावादेव खण्डिता। औचित्यञ्च रसभावादि मुक्त्वा नान्यत् किञ्चित्। अतोऽलङ्कारे प्रस्थानत्रैविध्यं निर्बाधम्। वक्रोक्तेः सङ्कोचो वास्तविकव्यावृत्तं स्वरूपं वा वक्रोक्तिधारानिरूपणे निरूपयिष्यते। दण्डिभोजभामहादीनां मतानि समुपन्यस्य वक्रोक्तेः पृथक् स्वभावोक्तिरसोक्त्योः स्वतन्त्रा सत्तापि तत्रैव साधयिष्यते स्वभावोक्ति-रसोक्तिधाराप्रसङ्गे, येनालङ्कारे प्रस्थानत्रैविध्यं प्रतीयेत। अस्य भावस्य प्रकाशनार्थं पुष्ट्यर्थं चालङ्कारस्य विधीयते विशिष्टो विचारः।

## अलङ्कार-लक्षणम्

अलङ्क्रियतेऽनेनेति करणप्रधानव्युत्पत्त्या अलङ्कारशब्दः शरीरसुषमाधाय-कत्वेन हारादीनामिव काव्यशोभासम्पादकत्वेन अनुप्रासोपमादीनामलङ्काराणां वाचकः।

अलङ्कृतिरलङ्करणं वाऽलङ्कार इति भावप्रधानोऽलङ्कारशब्दः साहित्य-शास्त्रस्य साक्षात् सौन्दर्यस्य सर्वेषाञ्च सौन्दर्याधायकतत्त्वानां वा वाचकः। अलङ्कारस्य प्रथमं लक्षणमाह दण्डी—

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।[3]

---

१. तत्रैव० ३, पृ० ३६६। २. तत्रैव (लोच०) १, पृ० ५९।
३. दण्डी, काव्या० २.१।

एतल्लक्षणानुसारं काव्यस्य सर्वे शोभाकारिणो धर्मा गुणरसरीत्यादयोऽलङ्कार-शब्दवाच्याः स्युः । अस्य समर्थनं स्वत एव करोति लक्षणकारो दण्डी—

यच्च सन्ध्यङ्गवृत्त्यङ्ग-लक्षणाद्यागमान्तरे ।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः ॥[1]

इमामलङ्कारस्य व्यापकतां वामनः सङ्कोचयति गुणान् अलङ्कारात् पृथक्-कृत्य । यथा—

काव्यशोभायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलङ्काराः ।[2]

एष गुणालङ्कारयोर्भेदो यद्यपि अलङ्कारस्य व्यापकतां सङ्कोचयति; तथापि वामन-पूर्ववर्तिनो भामहोद्भटादयो गुणालङ्कारयोरभेदमेव अङ्गीकुर्वन्ति । यथा—

समवायवृत्त्या शौर्यादयः, संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः । ओजःप्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेद[3] इति ।

किन्त्विदमुभयमपि गुणालङ्कारविषयकं मतं नाभिमतं मम्मटभट्टानाम्। एते मतद्वयमपाकुर्वन्ति । तत्र वामनमतस्य 'यदप्युक्तम् ; तदपि न युक्तमि'ति भामहोद्भटादीनां च 'इत्यभिधानमसदि'ति उद्धरणेन च ।[4] विस्तरभिया नात्र प्रदर्श्यतेऽपाकरणप्रकारः ।

सम्प्रति मम्मटभट्टानां प्रामाणिकमलङ्कारलक्षणं प्रस्तूयते—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्ते -ऽनुप्रासोपमादयः ॥[5]

ये धर्माः अङ्गद्वारेण अङ्गिनो रसस्याङ्गभूतौ शब्दार्थौ तद्द्वारेण तदतिशयाधानमुखेन तमङ्गिनं रसं सन्तं कदाचित्, न तु नियमेनेति यावत्, उत्कर्षयन्ति ते धर्मा अनुप्रासोपमादयोऽलङ्काराः । तत्र शब्दद्वारेण अनुप्रासादयः, अर्थद्वारेण उपमादयश्च । यथा कण्ठाद्यङ्गोत्कर्षद्वारेण शरीरिणोऽप्युपकारकाः हारादयोऽलङ्काराः ।

एतेऽलङ्कारा यत्र रसस्य संभवस्तत्र तमुपकुर्वन्ति । यत्र तु तस्यासम्भवस्तत्र वैचित्र्यमात्रपर्यवसिताः । यथा हारादयोऽपि कामिनीसौन्दर्ये सति तदङ्गानामुत्कर्षकाः, कुरूपाङ्गे तु दृष्टिवैचित्र्यमात्रहेतवः ।

---

१. काव्या० २.३६७ ।

२. वामनः, का० सू० वृ० ३.१.१, २ ।

३. का० प्र०, ८, पृ० ४७० ( वामनी ) ।

४. का० प्र०, ८, पृ० ४७०–४७१ । ५. तत्रैव, ६७ ।

अत्र लक्षणेऽङ्गद्वारेणेति रसधर्मत्वमलङ्काराणां निरस्तम्। अनेन रसावृत्तित्वं चलस्थितित्वञ्च अलङ्काराणाम्। एवञ्चालङ्कारा रसं विनाऽवतिष्ठन्ते, अवश्यञ्च नोपकुर्वन्ति, न वा रसं साक्षात्, किन्तु अङ्गद्वारेणेति गुणेभ्यो विलक्षणाः। अतः फलितमलङ्कारलक्षणम्—'रसोपकारकत्वे सति तदवृत्तित्वम्। तथात्वे सति रसानियतस्थितिकत्वम्, अनियमेन रसोपकारत्वञ्चेति त्रितयम्'[1] काव्यालङ्कारस्य लक्षणम्। कुवलयानन्दचन्द्रिकायान्तु "रसादिव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयितासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वम्। अनुप्रासादिविशिष्ट-शब्दज्ञानादुपमादिविशिष्टार्थज्ञानात् च चमत्कारोदयात् तेषु लक्षणसमन्वयः। शब्दार्थयोर्ज्ञाननिष्ठचमत्कृतिजनकतायां विषयितावच्छेदकत्वे तद्विशेषणभूतानुप्रासोपमादेस्तन्निष्ठावच्छेदकत्वात्। रसाद्यलङ्कारसङ्ग्रहाय व्यङ्ग्योपमादिवारणाय च भेदद्वयगर्भं सत्यन्तोपादानम्"[2] इत्युक्तम्।

एवमिदं काव्यालङ्कारलक्षणं प्राधान्यतो ध्वनिमतमनुरुद्ध्यैव कुवलायानन्दचन्द्रिकायां कृतम्, तस्यैव काव्यशास्त्रेऽभिमतत्वात्। अत एव मयाऽपि तदेव काव्यप्रकाशतोऽत्र (वामनीटीकातः) समुद्धृतम्। इदमेव नवीनं ध्वनिसम्मतमलङ्कारलक्षणमस्माकं प्रबन्धविषयमुपकरोति, ध्वनिस्वीकार एव रसगुणालङ्काराणां प्रातिस्विक्यां व्यवस्थितौ सम्पन्नायामलङ्कारप्रस्थाने प्रस्थानत्रैविध्यसम्भवात्। तत्र स्वभावोक्तिप्रस्थाने गुणानां प्रभावो रसोक्तौ रसानां वक्रोक्तौ तु अलङ्काराणां प्रभावः स्फुट एव। ध्वनिमते गुणरसयोरलङ्कारतायामापतति विरोधः, अलङ्कार्यत्वेनैतयोः अभ्युपगतत्वात्। किन्तु ध्वनिकारेण अन्यत्र अङ्गदशायां रसस्यालङ्कारत्वेऽङ्गीकृतेऽपैति विवादः। ध्वनिकारेण स्वत एवैष प्रश्नः पूर्वपक्षत्वेन समुपन्यस्य समाहितः। यथा—

**यत्र च रसस्य वाक्यार्थीभावस्तत्र कथमलङ्कारत्वम्। अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः। नासावात्मनैवाऽऽत्मनश्चारुत्वहेतुः।**[3]

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥**[4]

ध्वनिकारस्यैव मतं प्रायः सर्वे मम्मट-विश्वनाथ-पण्डितराजादय आलङ्कारिकाः समर्थयन्ति। यथा—

**रस-भाव-तदाभास-भावशान्त्यादिरक्रमः।**
**भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः॥**[5]

---

१. का० प० (वामनी) ८, पृ० ४६६। २. तत्रैव, पृ० ४६६।
३. ध्वन्या० २.५ (वृत्तिः) ४. तत्रैव २.५।
५. का० प्र० ४.२६।

काव्यात्मनो व्यङ्ग्यस्य रमणीयताप्रयोजका अलङ्काराः।[१]

अत्र यदि रसानामङ्गत्वेऽलङ्कारताऽभिमता ध्वनिवादिनां तर्हि तद्धर्मभूतानां गुणानामपि विशेषस्थितौ न काप्यनुपपत्तिः। अलङ्कारवादिनां प्राचीनानां नये तु सर्वेषामेव तत्त्वानामलङ्कारताऽभ्युपगतैव। अतः प्राचीनार्वाचीनोभयोरपि दृष्ट्योरलङ्कारप्रस्थाने प्रस्थानत्रैविध्यमव्याहतमेव।

## प्राचीनाऽर्वाचीनयोः अलङ्कारदृष्ट्योर्भेदः

काव्यशास्त्रपरिशीलनात् स्पष्टमिदं यत्प्राचीनार्वाचीनालङ्कारदृष्ट्योः महान् भेदः। प्राचीनदृष्टौ अलङ्काराणां नवीनदृष्टौ च व्यङ्ग्यस्य प्राधान्येनाऽभिमतत्वात्। प्राचो नये रसवस्त्वलङ्कारात्मकं व्यङ्ग्यमलङ्कारपक्षनिक्षिप्तं मन्यते। तत्र वस्तुमात्रं व्यङ्ग्यं पर्यायोक्ताऽप्रस्तुतप्रशंसादौ वाच्योपस्कारत्वेन निक्षिप्यते। उपमालङ्कारश्च रूपक-दीपकाऽपह्नुत्यादौ वाच्योपस्कारित्वेनोक्तः। रसभावादिरपि रसवत्-प्रेय-ऊर्जस्विप्रभृतिषु वाच्यशोभाहेतुत्वेनोक्तः। उत्प्रेक्षायां प्रतीयमानता स्वीकृतैव। वामनोऽपि गुणालङ्कारयोः शोभाविशेषाद् भेदाविवक्षयाऽलङ्कारप्राधान्यवादी एव। उद्भटादयस्त्वलङ्कारप्राधान्यसमर्थका एव, गुणालङ्कारयोः साम्यस्य स्वीकारात्।

तदेवमलङ्कार एव काव्ये प्रधानमिति प्राचो मतम्। वक्रोक्तिजीवितकारोऽप्यलङ्कारप्राधान्यपोषकः, वक्रोक्तेरलङ्कारत्वेन स्वीकारात्, तस्याश्च काव्यजीवितभूतत्वेनाभ्युपगतत्वात्।[२] यथा—

उभावेतावलङ्कार्यौ तयोः पुनरङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥[३]

एवमेषामलङ्कारप्राधान्यवादिनां नयेऽभिधाप्रकारविशेषा एवाऽलङ्काराः। अत्रैव द्योतक-व्यञ्जकावप्यन्तर्भावं भजतः, द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचारात्।[४]

किन्तु कालेनैषा प्राचामलङ्कारप्रधानता अपैति, अभ्युपगम्यते च व्यङ्ग्यप्राधान्यं नवीनैः। एतच्च व्यङ्ग्यं नाभिधा-लक्षणा-तात्पर्याख्यव्यापारत्रयविषयम्, अपि तु ध्वनन-द्योतनशब्दाभिधेय-व्यञ्जनाव्यापारगम्यम्। अत एव नवीना आलङ्कारिकाः व्यङ्ग्यार्थस्य प्रतीत्यै व्यञ्जनाव्यापारमवश्यमभ्युपगच्छन्ति। एष एव व्यङ्ग्यार्थो वाक्यार्थत्वेन प्रधानः। न कदापि अभिधाव्यापारस्तस्य, वाक्यार्थत्वाभावात्। एवं नवीनालङ्कारिकाणां मते व्यङ्ग्यार्थस्य प्राधान्यम्।

१. र० ग०, पृ० १५६।
२. अ० स०, पृ० ७।
३. व० जी० १।१०।
४. तत्रैव, पृ० १५।

गुणालङ्कारौ च तमुपकुरुतः। अतो व्यङ्ग्यार्थस्य उपस्कार्यत्वम्, उपस्कारकत्वं च अलङ्काराणाम्। एवं ध्वनिपूर्ववर्तिनां प्राचामलङ्कारप्राधान्यं ध्वनिकाले क्रमशः सङ्कोचं भजद् गौणतां प्राप।

ध्वनिकारः पूर्ववर्तिनामालङ्कारिणां नये रसवदलङ्कारेऽन्तर्भावितानां सर्वेषां रसभावादीनामलङ्कारतां निषिध्य केवलमङ्गत्व एव तेषामलङ्कारत्वमङ्गीचकार। एवं रससामान्ये व्यापृता रसालङ्कारता केवलमङ्गत्व एव सीमिता अभूत्। मम्मटस्तु काव्यलक्षणे 'अनलङ्कृती पुनः क्वापी'ति स्वीकृत्य गौणामप्यलङ्कारतां न सेहे। किन्तु चन्द्रालोककारेण जयदेवेन मम्मटस्य विरोधः कृतः। यथा—

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥[1]

एवमलङ्काराणां क्रमशो वर्धमानो विरोधः शमनं भेजे, प्रापुश्चालङ्कारा अक्षुण्णां प्रतिष्ठाम्। अभिनवगुप्तपादैस्तु अलङ्काराणां प्रतिष्ठा ध्वनिकालेऽपि मूर्धानमधिरोपिता स्वकथनेन, निराकृताश्च अलङ्कारविरोधिनां ध्वनितत्त्वानवमर्शनविजृम्भिता उक्तयो यद् ध्वनिप्रस्थानविवृद्धौ फल्गुत्वं व्रजन्ति गुणालङ्काररीतयः। यथा—

**न ध्वननसद्भावेऽपि काव्यत्वव्यवहारः, गुणालङ्कारविशिष्टशब्दार्थवपुषो वाक्यस्य एव काव्यत्वव्यवहार इति।[2]**

एवं प्राचीनार्वाचीनयोरुभयोरपि दृष्ट्योरलङ्काराणां महन्महत्त्वम्। तत् प्राधान्याप्राधान्यकृतमित्यन्यदेतत्।

सम्प्रति अलङ्काराणां रस-रीति गुण-ध्वनि-वक्रोक्त्यौचित्यादिभ्योऽतीव संक्षेपेण भेदः प्रस्तूयते। अलङ्कारात् भिन्नोऽपि रसः अलङ्कारप्राधान्यकाले दण्डिभामहादिभी रसवदलङ्कार एव अन्तर्भावितः। यथा—

**इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्।[3]**

अतो रसालङ्कारयोरैक्यं प्रतीयते स्म। किन्तु ध्वनिकारेण अङ्गत्व एव रसवदलङ्कारस्याभ्युपगतत्वेन जायते भेदो रसालङ्कारयोः। व्यङ्ग्यप्राधान्ये एव रसो रसध्वनिर्वा, व्यङ्ग्याप्राधान्येऽन्यरसाङ्गत्वे वा रसवदलङ्कार इति भेदस्य स्फुटत्वात्।

---

१. चन्द्रा० १.८।

२. ध्वन्या० १, पृ० ५९।

३. दण्डी : काव्या०, २.२९२।

## अलङ्कारस्य रीतेश्च भेदः

रीतेश्चर्चा प्रथमं भामहस्य काव्यालङ्कारे वैदर्भ-गौडमार्गप्रसङ्गे समुपलभ्यते—

अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमपि नान्यथा ॥[1]

परन्त्वस्या विस्तृतं विवेचनं दण्डिनः काव्यादर्शे समुपलभ्यते। अत एव कतिपये दण्डिनं रीतेः पोषकं मन्वते, नालङ्कारस्य। परं नैतत् सङ्गतम्; स्वयं दण्डिनैव रीतीनामप्यलङ्कारत्वेन अभ्युपगमात्। यथा—

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥
यच्च सन्ध्यङ्ग-वृत्त्यङ्ग - लक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः ॥[2]

एवं दण्डिपर्यन्तं रीत्यलङ्कारयोर्गुणालङ्कारयोर्वा ऐक्यमवतिष्ठते। वामनसमये गुणालङ्कारयोर्भेदेन रीतेरलङ्कारो भिद्यते, गुणानां काव्यशोभाधायकत्वाद् अलङ्कारस्य च तत्रोत्कर्षकारित्वात्—पूर्वे (गुणाः) नित्याः, तान् विना काव्यस्यासंभवात्। परे (अलङ्काराः) अनित्याः, तद्भावेऽपि काव्यव्यवहारात्।[3] इत्थं रीत्यलङ्कारयोर्महान् भेदः। अलङ्कारप्रस्थानवादिनामिव वामनोऽपि गुणानां शब्दार्थवृत्तित्वं मनुते, रीतिमपि अलङ्काररूपतयैवाऽभ्युपगच्छति। यथा—**सौन्दर्यमलङ्कारः।**[4]

परमेषोऽलङ्कारशब्दो भिन्नो! दण्डि-भामहयोरलङ्कारशब्दप्रयोगात्। रीत्यलङ्कारयोः पार्थक्यं गुणालङ्कारयोर्भेदेनैव सिद्धम्। किन्तु गुणालङ्कारयोः पार्थक्यमलङ्कारप्रस्थाने प्रस्थानत्रैविध्यं सङ्केतयतीत्यतः पुनरपि तयोर्भेदो विशदीक्रियते।

अलङ्कारप्राधान्यवादिनां नयेन पूर्वं गुणालङ्कारयोर्दर्शितो भेदः। इदानीं ध्वनिवादिमतेन स प्रदर्श्यते—

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥

ये रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते, ते गुणाः शौर्यादिवत्। वाच्यवाचकलक्षणानि अङ्गानि ये पुनस्तदाश्रिता अलङ्कारा मन्तव्याः।

एवं ध्वनिवादिनां मते रसमात्रधर्मा गुणाः, शब्दार्थमात्रधर्माश्च अलङ्कार इत्यनयोर्भेदः। गुणानां शब्दार्थधर्मता तु परम्परया औपचारिकी वा।

---

१. भामहः, काव्या० १.३५.। २. दण्डी, काव्यादर्शे २.१, ३६७,।
३. दण्डी ३.१.३। ४. वामनः, का० सू वृ० १.१.२।

परं नव्या नेदमनुमन्वते, गुणानां रसमात्रधर्मत्वे प्रमाणाभावात्। यतो हि नात्र प्रत्यक्षं अवतरेत्, दहनगतस्योष्णस्पर्शस्येव रसवृत्तिगुणानां तत्कार्यभूतानां द्रुत्यादिचित्तवृत्तीनां वा विभिन्नतयाऽनुपलम्भात्। अनुमानमपि न धत्ते पदम्, गुणैः सह रसानां कार्यकारणभावानभ्युपगमात्। वेदान्तनये निर्गुणस्याऽऽत्मनो गुणाभाव इव काव्यात्मभूतस्य रसस्य निर्गुणत्वमेवोचितम्। प्रमाणाभावात् गुणे गुणान्तरानङ्गीकाराच्च रसोपाधिभूतरत्यादीनामिमे गुणा इत्यपि न सम्भवति। 'श्रृङ्गारो मधुर' इति व्यवहारस्तु कथञ्चिदुपपादनीयः। अतो गुणालङ्कारयोर्भेदो नैतयोस्तात्त्विके भेदे पर्यवस्यति, अपि तु अङ्गाङ्गिभाव एव। अर्थात् क्वचिदलङ्कारः स्वभावमलङ्करोति, क्वचिच्च स्वभावोऽप्यात्मानमेव अलङ्करोति। स्वभावश्चैषो वस्तु-चित्तवृत्तिगतत्वेन द्विविधः। एष स्वभावश्च गुणरूप एव। अत एव भोजदेवोऽपि 'गुणप्राधान्ये स्वभावोक्तिरि'ति प्राह। अस्य विस्तारो रसोक्ति-स्वभावोक्ति-धाराविमर्शे द्रष्टव्यः।

### अलङ्काराद् ध्वनेर्भेदः

अलङ्काराद् भिद्यते ध्वनिः, व्यङ्ग्यप्राधान्य एव ध्वनित्वस्वीकारात्; गुणीभूतव्यङ्ग्येऽङ्गत्वे वा अलङ्कारताया अङ्गीकारात्। अलङ्कारध्वनौ अलङ्कारव्यपदेशस्तु ब्राह्मणश्रमण-न्यायाद् बोध्यः। एवमेव रसवदलङ्कारो रसोक्तिर्वा रसध्वनेर्भिन्ना; रसस्य प्राधान्ये रसध्वनिः, अङ्गत्वे च रसालङ्कारतेति सिद्धान्तितत्वात्। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥[1]

### वक्रोक्तेर्भेदः

वक्रोक्तिरपि भिन्ना अलङ्कारात्। यद्यपि वक्रोक्तिजीवितकारो वक्रोक्तिमलङ्कृतिमेव मनुते, परमियम[2]लङ्काराद् भिन्ना, अलङ्काराणां वक्रोक्तेः प्रकारत्वेनाभ्युपगतत्वात्। यथा—

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥[2]

न केवलमलङ्कारा वाक्यवक्रतायामन्तर्भाविताः, अपि तु रसस्य ध्वनेश्चापि विनिवेशो वक्रोक्तेः प्रकारभूतासु प्रकरणप्रबन्धोपचारवक्रतासु विहितः। अतो वक्रोक्तेऽलङ्काराद् भेदः स्पष्ट एव।

कुन्तको वक्रोक्तेरलङ्कारतामभ्युपगच्छन्नपि न भामह-दण्डि-भट्टोद्भटादीनां प्रदर्शितमलङ्कारपन्थानमनुसरति, रसोक्तिस्वभावोक्त्योरलङ्कारवादिनामलङ्कारत्वेन

---

१. ध्वन्या० २.६। २. व० जी० १.१०।

अभिमतयोरलङ्कारत्वस्यास्वीकारात्। परं दण्डिभामहोद्भटवामनादिभिः कृतो ध्वनेः पर्यायोक्ता-ऽऽक्षेप-समासोक्ति-विशेषोक्त्यादिषु विनिवेशो गौणता वाऽभिमता कुन्तकस्य। अतोऽयमपि वक्रोक्तौ ध्वनिमन्तर्भाव्य तस्य गौणतामङ्गीकरोति। वक्रोक्तौ ध्वनेरन्तर्भावप्रकारस्तु पूर्वं प्रस्थानमीमांसायां समुपन्यस्त एव। अनेन स्पष्टमिदं यन्नालङ्कारेण समता वक्रोक्तेः, न वा रीतिध्वन्यौचित्यादीन्यपि प्रस्थानानि वक्रोक्तेस्तुलामधिरोहन्ति, सर्वेषामेषां वक्रोक्तेरङ्गरूपत्वात्।

अतो वक्रोक्तिप्रस्थानं ध्वनिकारेण निर्दिष्ट भाक्तप्रस्थानमेव भवितुमर्हति, यत्रान्तर्भावितो ध्वनिः गौणतां भजते। अत्रास्या वक्रोक्तेरलङ्कारप्रस्थानेन सह स्पष्टैव समता, यतोऽत्रापि ध्वनेर्गौणता स्वीक्रियते। अत एव कुन्तको वक्रोक्तिमलङ्कृतिं मनुते। ध्वनिकारेण भाक्तप्रस्थानस्य निर्देशः कृतः। यथा—

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥[1]

किन्तु नैषा वक्रोक्तिः सर्वथा भाक्तप्रस्थानमप्यनुसरति, स्वभावोक्तिरसोक्त्योरलङ्कारतायाः स्वीकाराभावात्, भाक्तप्रस्थानेन चैतयोरलङ्कारताया अङ्गीकाराच्च। अतो भिद्यते वक्रोक्तिरलङ्कारप्रस्थानात्।

## औचित्याद् भेदः

एवमेव अलङ्कारोऽङ्गत्वेन स्थित औचित्यादपि भिद्यते। अलङ्कारवादिनो दण्डिभामहादयो रसस्य प्राधान्याप्राधान्ये वा उभयत्रापि अलङ्कारतामङ्गीकुर्वन्ति, न तथा औचित्यवादिनः, तेषां रसस्य प्राधान्येऽलङ्कारतानभ्युपगत्वात्। शब्दार्थयोः धर्मरूपत्वादलङ्कारः काव्यस्य शरीरस्थानी। रसस्याऽऽत्मस्थानिनो जीवितभूतमौचित्यन्तु काव्यस्य आत्मस्थानीयम्। अतो भिन्न एवालङ्कार औचित्यात्। औचित्यमलङ्कारस्यापि जीवितम्। यथा—

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्॥[2]

औचित्यं स्थिरमविनश्वरं जीवितं काव्यस्य, तेन विनाऽस्य गुणालङ्कारयुक्तस्यापि निर्जीवत्वात्। अत उपमोत्प्रेक्षादयोऽलङ्कारा बाह्यशोभाहेतुत्वात् काव्यात्म-

---

१. ध्वन्या० १.१।
२. औ० वि० च०, का० ५ (वृत्तिश्च)।

भूताद् औचित्याद् भिन्नाः। अलङ्कारस्य अलङ्कारत्वमपि औचित्याधीनम्। यथा—

उचित-स्थान-विन्यासादलङ्कृतिरलङ्कृतिः।[१]

अतोऽलङ्कारस्य औचित्याद् भेदः सुस्पष्टः।

एवमलङ्कारस्य सर्वेभ्यः प्रसिद्धेभ्यो रस-रीति-ध्वनि-वक्रोक्त्यौचित्यादिभ्यः प्रस्थानेभ्यो दर्शिता भेदाः। एतानि व्यतिरिक्तानि प्रस्थानानि साक्षात्परम्परया वा अलङ्कारस्य प्रस्थानत्रैविध्यं निर्दिशन्ति। अस्य सङ्केतः प्रस्थानमीमांसा-प्रकरणे कृतः, अग्रे च विस्तरेण विधास्यते।

## अलङ्कारस्य विकाशः

अलङ्कारशास्त्रीयेतिवृत्तस्य अध्ययनेन स्पष्टमिदं यदलङ्काराणां विकाशवर्गी-करणयोः आधारो भित्तिर्वा अलङ्कारप्रस्थानानां प्रसार एव। दृष्टिभेदादलङ्कारेषु वर्धमानो भेदोऽलङ्कारस्य विकाशवर्गीकरणयोः प्रयोजकः। अतो विकाशवर्गी-करणावबोधाय प्रस्थानपरिज्ञानं नितरामावश्यकम्। प्रस्थानानामवान्तरभेदोऽपि विकाश-वर्गीकरणयोः सहायकः। अत इतिहासाधारेण प्रस्थानपुरःसरमाल-ङ्कारिकक्रमेण अलङ्कार-विकाश-वर्गीकरणे विविच्येते।

प्रथमं समयदृष्ट्याऽलङ्कारप्रस्थानानि त्रिधा—प्राचीन-मध्य-नव्यभेदात्। तत्र प्राचीनमपि रस-रीत्यलङ्कारभेदेन त्रिविधम्। प्राचीनेऽलङ्कारप्राधान्यकाले अलङ्का-रेण गतार्थमपि रसप्रस्थानं चतुर्णाम् उपमा-रूपक-दीपक-यमकालङ्काराणां पूर्वं निर्देशकारित्वादत्र निर्दिष्टम्। वस्तुतः प्राचीनप्रस्थानं रीत्यलङ्कारप्रस्थानभेदेन द्विविधमेव। अस्य प्रस्थानस्य प्रधानाः पोषका दण्डि-भामह-भट्टोद्भट-रुद्रटादय आलङ्कारिकाः यैः ईशवीय-षट्शतकादारभ्य अष्टमशतकपर्यन्तं ग्रन्थाः रचिताः।

अत्र काले प्राधान्येन वर्णिता अलङ्काराः। तत्र शब्दालङ्काराः—अनुप्रासः, यमकः, गोमूत्रिका, सर्वतोभद्रम्, प्रहेलिकादयश्च। अर्थालङ्काराश्च—स्वभावोक्तिः, उपमा, प्रतिवस्तूपमा, रूपकम्, दीपकम्, आक्षेपः, अर्थान्तरन्यासः, व्यतिरेकः, विभावना, समासोक्तिः, अतिशयोक्तिः, उत्प्रेक्षा, हेतुः, सूक्ष्मः, लवः, क्रमः, रसवद्, ऊर्जस्विन्, प्रेयः, पर्यायोक्तम्, समाहितः, उदात्तः, अपह्नुतिः, श्लेषः, विशेषोक्तिः, तुल्ययोगिता, विरोधभासः, अप्रस्तुतप्रशंसा, व्याजस्तुतिः, निदर्शनं निदर्शना वा, सहोक्तिः, परिवृत्तिः, आशीः, सङ्कीर्णम्, भाविकम्—इत्यादयो वर्णिताः।

अस्य प्राचीनप्रस्थानकालस्य आलङ्कारिका अलङ्कारप्राधान्यवादिनो नाभ्यु-पगच्छन्ति। रसध्वन्योः प्राधान्यम्, अपि त्वेतावपि अत्रैवान्तर्भावयन्ति। गुणाश्चापि प्राय एषां नये दश। भामहात् पूर्वोद्भवेभ्यो भरतादिभ्योऽधिगतान् कतिपया-

---

१. औ० वि० च०, का० ६।

नेव यमकोपमारूपकादीनलङ्कारान् एतत्प्रस्थानमियतीं विपुलां संख्यां प्रापयति। अत्रास्ति कारणं दण्डि-भामह-भट्टोद्भट-वामनादीनां स्वभावोक्ति-वक्रोक्तिविषयको दृष्टिभेदः।

## मध्यकाल-प्रस्थानम्

एतत्प्रस्थानं नवमशतकादारभ्य षोडशशतकं यावत् व्याप्नोति। अत्र प्रस्थाने ध्वनेर्व्यञ्जनाया वा उद्भावनायां सत्यामपैति प्राधान्यमलङ्काराणाम्। अस्य मुख्यः प्रतिनिधिः ध्वन्यालोककारः आनन्दवर्धनस्तदनुयायिनश्च अभिनवगुप्त-मुकुल-प्रतिहारेन्दुराजादयः। एते प्रायो मध्यकाल-प्राचीनकालप्रस्थाने समनुयन्ति। अतोऽलङ्कारप्रस्थानदृष्टिरामूलमेति परिवर्तनम्। शास्त्रसन्दर्भे चाऽलङ्काराणां विहित-मध्ययनं परिवर्तनं विस्तारयति। फलतोऽत्र प्राचीनप्रस्थानस्य अभिमता बहवो गोमूत्रिका-प्रहेलिकादयोऽलङ्कारास्त्यज्यन्ते, गृह्यन्ते चानेके सङ्कर-संसृष्टि-परिणामोल्लेखादयः। अत्रापि दृष्टिभेद एव विच्छित्तिवैलक्षण्यादलङ्कारभेदे कारणम्।

अस्य प्रस्थानस्याऽभिमता अलङ्कारा इमे—तत्र शब्दालङ्काराः, यमका-ऽनुप्रास-वक्रोक्ति-भाषासम-पुनरुक्तवदाभासादयः। अर्थालङ्काराः—उपमा-ऽनन्वयो-पमेयोपमा-रूपक-परिणाम-सन्देह-भ्रान्तिमानुल्लेखो-ऽपह्नुति-निश्चयोत्प्रेक्षाऽति-शयोक्ति-तुल्ययोगिता-दीपक-प्रतिवस्तूपमा-दृष्टान्त-निदर्शना-व्यतिरेक-सहोक्ति-समासोक्ति-परिकर-श्लेषा-ऽप्रस्तुतप्रशंसा-व्याजस्तुति-पर्यायोक्त-काव्यलिङ्गाऽनु-मान-हेत्व-नुकूलाऽर्थापत्ति-विकल्प-समुच्चय-समाधि-प्रत्यनीक-प्रतीप-मीलितसामा-न्य-तद्गुणा-ऽतद्गुण-सूक्ष्म-व्याजोक्ति-स्वभावोक्ति-भाविको-दात्त-रसवद-लङ्कार-संसृष्टि-सङ्कराभिधाः।

अत्र प्रस्थाने त्रय एव माधुर्यौजःप्रसादाख्या गुणाः, न दश प्राचीनप्रस्थानवत्। एवं स्पष्टमेवात्र भेदः प्राचीनात् प्रस्थानात्। अत एवालङ्कारेष्वपि दृश्यते महान् भेदः।

## नव्यकाल-प्रस्थानम्

इदं चान्तिमं महत्त्वपूर्णं प्रस्थानम्। सप्तदशशताब्देरुत्तरार्धादारभ्य एकोन-विंशतेरुत्तरार्धपर्यन्तं व्याप्तमिदं प्रस्थानम्। अस्य मूर्धन्यो विचारको न्यायादि-शास्त्रनिष्णातः पण्डितराजो जगन्नाथः। अयं नव्यन्यायदृष्ट्या समस्तमेव अलङ्का-रार्णवमामथ्य अलङ्कारमणिमुद्दधार, जहार च गुणवतामालङ्कारिकाणां हृदयमधि-रूढमन्तर्ध्वान्तम्। व्यङ्ग्यस्य रमणीयताप्रयोजिकया स्वालङ्कारदृष्ट्या पण्डितराजो दश नवीनालङ्कारानुद्भाव्य मध्यकालप्रस्थानाभिमतैर्मुख्यैः द्विसप्तत्यलङ्कारैः सह सङ्कलनया अलङ्काराणां संख्यां द्विनवतिं प्रापयामास। अस्य प्रस्थानस्यान्ये मुख्यतः समर्थका बभूवुः—केशवमिश्रा अलङ्कारशेखरकाराः, अलङ्कारकौस्तुभकारा

विश्वेश्वरादयश्च। अस्य प्रस्थानस्यालङ्कारदृष्टिः ध्वनेः स्वीकारेण रमणीयतायाश्चाभ्युपगमेन अतीव सङ्गता। नव्यन्यायदृष्ट्या अलङ्कारपरीक्षणेन अलङ्कारदृष्टौ अगाधता सूक्ष्मता चायाता। अत एवेदं प्रस्थानं पूर्वप्रस्थानापेक्षया अधिकमभिमतमालङ्कारिकाणाम्।

अनेन प्रस्थानेनोद्भाविता उद्धृता वा अलङ्कारा दश। यथा—१. प्रौढोक्तिः, २. ललितम्, ३. प्रहर्षणम्, ४. विषादः, ५. उल्लासः, ६. अवज्ञा, ७. अनुज्ञा, ८. तिरस्कारः, ९. लेशः, १०., असम इत्याख्याः।

एते प्रायः सर्व एवालङ्कारा प्रदीपोद्योतादि-टीकाकारैः मम्मटाभिमतेष्वेव-अलङ्कारेष्वन्तर्भाविताः। यथा—प्रौढोक्तिरतिशयोक्तौ काव्यलिङ्गे चोल्लासः। अवज्ञाविषादालङ्कारौ च विषमालङ्कारे। एवं दृष्टिभेदेन अलङ्काराणां जायते विकाशः। अत्र प्रस्थानानां प्रभाव एवाधिकं प्रथते। अत एव वयमलङ्कारविकाशे प्रस्थानानुसारं भेदं पश्यामः।

यथा यथा विवर्धन्ते प्रस्थानानि, भवति च नव्यन्यायादिशास्त्राणां प्रयोगोऽलङ्काराणां विवेचने, तथा तथा अलङ्काराणां संख्यायां नाम्नि स्वरूपे च जायते विकाशः। यथा—भरतनाट्यशास्त्रे उपमा-दीपक-रूपक-यमकेति चत्वार एवालङ्काराः। किन्तु उत्तरोत्तरं प्रस्थानप्रभावितेन आलङ्कारिकाणां दृष्टिभेदेन वर्धन्तेऽलङ्काराः। अत एव दण्डिना काव्यादर्शे पञ्चत्रिंशदलङ्काराः, भामहेन एकोनचत्वारिंशत्, उद्भटेन चत्वारिंशत्, वामनेन त्रयस्त्रिंशत्, उद्भटेन द्विपञ्चाशत्, मम्मटेन काव्यप्रकाशे सप्तषष्टिः (एषु षट् शब्दालङ्काराः), अलङ्कारसर्वस्वे एकाशीतिः (एष्वपि षट् शब्दालङ्काराः), चन्द्रालोके शतम्, कुवलयानन्दे च चतुर्विंशत्यधिकशतमलङ्कारा वर्णिताः।

अलङ्काराणां नाम्नि भेदस्तु अल्प एव। यथा—स्वभावोक्तिः स्वभावनाम्ना जात्याख्यया वा व्यपदिष्टा। एवमेव यथासंख्यालङ्कारोऽपि क्रमाभिधया व्यपदिष्टः। अलङ्काराणां स्वरूपे त्वधिकं परिवर्तनम्। अत्र विस्तरभिया विकाशोपबृंहणार्थं सङ्केत एव क्रियते। यथा समासोक्तिः—

> उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः।[1]
>
> समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
>
> व्यवहारसमारोपः प्रकृतेऽन्यस्य वस्तुनः॥[2]

अत्रानयोः प्राचीन-नवीनलक्षणयोः महान् भेदः। यतः प्राचीने वस्तुनि वस्तुनो न्यासः स्वीकृतः, किन्तु नवीने वस्तुनो व्यवहारे व्यवहारसमारोपः। अत्र नवीनमेव लक्षणं सङ्गतम्, अन्यथा रूपकेऽतिव्याप्तिर्दुर्वारा। अत एव उद्योतकारोऽपि सङ्गच्छते। यथा—

---

१. वामन ४. ३. ३।   २. सा० द० १०. ५६।

रूपके विशेष्ये प्रकृतरूपारोपः। समासोक्तौ तु प्रकृतव्यवहारे प्रकृतव्यवहारारोपः।[१]

एवं प्राचीन-नवीनदृष्टिभेदेनालङ्कारस्वरूपे पर्याप्तो विकाशः प्रतीयते।

अत्रालङ्काराणां विकाशस्य प्रधानं कारणमलङ्कारप्रस्थानस्य अवान्तरास्त्रिविधाः स्वभावोक्ति-वक्रोक्ति-रसोक्त्याख्या धाराः, यासां निरूपणार्थमेव प्रबन्धेऽस्मिन् प्रयासः।

अत्रालङ्काराणां विकाशप्रसङ्गेन आसां धाराणां सङ्केत एव कृतः, विस्तरस्तु तासां निरूपणे द्रष्टव्यः। कथमलङ्काराः स्वभावोक्ति-वक्रोक्त्यादीनां दृष्टिभेदेन वर्धन्त इत्यपि तत्रैव सयुक्तिकं समुपन्यस्तम्। अत्र तु विकाशदिगेव सङ्केतेन प्रदर्श्यते।

भामहो हेतु-सूक्ष्म-लेशान् वक्रोक्त्यभावादलङ्कारान् न मनुते। किन्तु दण्डी सर्वानेतान् उत्तमभूषणत्वेनाङ्गीकृत्य अलङ्कारान् विकाशयति। यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥[२]
हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा॥[३]

एवं नव्यशास्त्रादिसहकृतात् अलङ्कारप्रस्थानपरिशीलनाद् अधिगता अलङ्कारबीजानाम् ऋजुकुटिलनानापथजुषामालङ्कारिकाणां दृष्टिभेदेन विकसिता अलङ्काराः। दण्डी तु अलङ्काराणां बहुधा विकल्प्यमानानां वचनस्यासम्भवतां काठिन्यं वा शंसति। यथा—

ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति।[४]

ध्वन्यालोकेऽपीदमेव समर्थ्यते—

सहस्रशो हि महात्मभिरन्यैरलङ्काराः प्रकाशिताः, प्रकाश्यन्ते च। वाग्विकल्पानामानन्त्यात्।[५]

अतो मेधाविनां कल्पनायाः कदापि विरमाभावात् कल्पनाप्रभविनामलङ्काराणामियत्तया परिच्छिद्य निरूपणमसम्भवम्। अत्र त्वलङ्कारग्रन्थानाश्रित्य विकाशो दर्शितः।

---

१. प्र॰ उद्यो॰, पृ॰ ४७७।

२. भामहः, काव्याल॰ २.८६।

३. दण्डी, काव्या॰ २. २३५।

४. दण्डी, काव्या॰ २. १।

५. ध्वन्या॰ (लो॰ न॰) पृ॰ २६।

# अलङ्काराणां वर्गीकरणम्

इदं तु सर्वेषामलङ्कारग्रन्थानां पर्यालोचनया विदितं यदलङ्काराः पूर्वं शब्दार्थयोर्भेदेन विभक्ताः। ततः क्रमशस्तृतीयोऽपि भेदः शब्दार्थोभयभेदरूपेण स्वीकृतः। पूर्वमेतेषां विभागानामाधारौ बभूव आश्रयाश्रयिभावः, किन्तु मम्मटादिभिरस्य निराकरणं कृत्वा अन्वय-व्यतिरेकाभ्यामेव अलङ्कारभेदव्यवस्था शब्दार्थोभयरूपिणी स्वीकृता। एष त्रिविधो विभागोऽतीव स्थूलः। अत्रालङ्कारिकाणां न वर्ततेऽधिकं वैमत्यम्। वक्रोक्ति-श्लेषादयः कतिपये सन्तीदृशा अलङ्कारा यत्र शब्दार्थयोर्भेदे वर्धते विवादः। अन्येषां शिष्टानामलङ्काराणां भेदस्तु शब्दार्थोभयभेदकृतो न तथा विवादं भजते। केवलं भोजस्यैव भेदः सर्वथा नव्यो यत्र सर्वथा पर्येति भोजात्पूर्वं स्वीकृता शब्दार्थोभयभेदकृता व्यवस्था। भोजो द्विसप्ततिरलङ्कारान् मनुते, यत्र चतुर्विंशत्यलङ्कारा शब्दगताः, शिष्टे च द्वे चतुर्विंशती अर्थ-शब्दार्थोभयगताश्च। एष विभागः सर्वथा नवीनेन न केनाप्यालङ्कारिकेण अङ्गीकृतः। एवमेते स्थूला विभागा न मनोवैज्ञानिकतामावहन्ति। अलङ्काराणां चित्तवृत्तिरूपत्वात्, स्थूले चात्र विभागे तस्या अदर्शनात्।

प्रथमं भामहोऽलङ्कृतीनामेकां वक्रोक्तिमेव भेदिकां मनुते, शब्दार्थभेदस्य तदाऽभावात्। स इमां स्वभावोक्ति-वक्रोक्तिभेदेन द्विधा विभजते, तथापि अधिक आग्रहो वक्रोक्तावेव। अत एव स्वभावोक्तिमूलकान् हेतु-सूक्ष्म-लेशादीनलङ्कारान् नायं सहते, तत्र वक्रोक्तेरभावात्। अतोऽस्य दृष्ट्या सर्वेऽलङ्काराः वक्रोक्तिमूलका एव। परं दण्डी नेदं सहते। स स्वभावोक्ति-वक्रोक्तिभेदेन भिन्नं द्विविधं काव्यवाङ्मयमङ्गीकृत्य अलङ्कारान् द्विधा विभजते। इममेव वैज्ञानिकं क्रमं कालान्तरेण स्वीकृत्य भोजोऽपि काव्यवाङ्मयं स्वभावोक्ति-वक्रोक्ति-रसोक्तिभेदेन त्रिधा विभज्य त्रिविधं कृतवान् वर्गीकरणमलङ्काराणाम्।

किन्त्वेतान् त्रीन् आलङ्कारिकान् विहाय न केनाप्यन्येनात्र कृतोऽधिक आयासो येनैषा विशिष्टा मनोवैज्ञानिकी पद्धतिरग्रेऽस्तं याति। मम्मटसदृश आलङ्कारिकमूर्धन्योऽपि वर्गनिर्देशं विनैव अलङ्कारान् विवराञ्चक्रे। दण्डि-भोजयोः पश्चादपि भवन्ति प्रयासा अलङ्काराणां वर्गीकरणस्य। परं तत्र दृष्टिभेदाद् भिद्यन्त आधाराः।

प्रथमं भट्टोद्भट एव काव्यालङ्कारसारसङ्ग्रहे वर्गीकरणाय प्रयतते। स स्वाभिमतान् चत्वारिंशदलङ्कारान् षोढा विभजते।

तत्र प्रथमवर्गस्यालङ्काराः—पुनरुक्तवदाभास - छेकानुप्रास - त्रिविधावृत्ति - ( परुषा, कोमला - उपनागरिका ) - लाटानुप्रासो - पमा - त्रिविधदीपक - ( आदि-मध्यान्तभेदेन )-प्रतिवस्तूपमा इत्यभिधाः।

द्वितीयवर्गस्य—आक्षेपा-ऽर्थान्तरन्यास-व्यतिरेक-विभावना-समासोक्त्य-तिशयोक्तयः इति।

तृतीयवर्गस्य—यथासंख्यो-त्प्रेक्षा-स्वभावोक्तयः इत्याख्याः।

चतुर्थवर्गस्य—प्रेय-रसवदू-र्जस्वि-पर्यायोक्त-समाहिताभिधाः।

पञ्चमवर्गस्य—अपह्नुति-विशेषोक्ति-विरोध-तुल्ययोगिता-ऽप्रस्तुतप्रशंसा-व्याजस्तुति-निदर्शनो-पमेयोपमा-सहोक्ति-सङ्कर-परिवृत्तय इति।

षष्ठवर्गस्य—अनन्वय-सन्देह-संसृष्टि-भाविक-काव्यलिङ्ग-दृष्टान्ताः।

किन्तु एतेषु चतुर्थवर्ग एव सङ्गतः प्रतिभाति। शिष्टेषु वर्गेषु न किमपि एतादृक् व्यावर्तकं भेदकं तत्त्वमुपलभ्यते. यदाश्रित्य अन्ये वर्गाः स्वतन्त्रां सत्तामादध्युः। चतुर्थवर्गेऽपि प्रेय, रसवत्, ऊर्जस्वि, समाहित एतेषां स्थापनं सङ्गतिं भजते। उदात्त-पर्यायोक्तयोरपि यथाकथञ्चित् व्यङ्ग्यत्वेन विषयसाम्यात् स्थापनं भवेत् क्षम्यम्। किन्तु श्लेषस्य तत्र स्थितिस्तु न कथमपि समर्थनं सहते।

अतः परं रुद्रटस्य वर्गीकरणमधिकं सफलं यतोऽत्रत्या वर्गाः प्रायो वैज्ञानिकाधारमाहिताः। अनेन अर्थालङ्काराश्चतुर्धा विभक्ताः। तद्यथा—वास्तवम्, औपम्यम्, अतिशयः श्लेषश्च।

वस्तुस्वरूपकथनं वास्तवम्। अत्र सहोक्ति-समुच्चयादयोऽलङ्काराः। उपमेयोपमेयभाव औपम्यम्। उपमो-त्प्रेक्षा-रूपकादयोऽलङ्कारा अत्र गृह्यन्ते। पूर्व-विशेषो-त्प्रेक्षादयोऽलङ्कारा अतिशयवर्गे आयान्ति। अनेकार्थाभिधाने श्लेष इष्यते। अत्र च श्लेष-विरोधा-ऽधिकादयोऽलङ्काराः।

अनेन कतिपयेऽलङ्कारा वर्गद्वये स्थापिताः। यथा—उत्तर-समुच्चयौ वास्तववर्गे औपम्यवर्गे च स्तः। एवमेव विरोधाऽधिकालङ्कारौ श्लेषाऽतिशयवर्गयोः स्थापितौ। विषमोऽपि वास्तवाऽतिशयवर्गयोः।

अतः परं रुय्यकस्य अलङ्कारसर्वस्वकृतं वर्गीकरणम्। एकावलीकारो विद्याधरः प्राय इदमेवानुसरति। एकावलेः टीकाकारो मल्लिनाथोऽनयोरुभयोरपि वर्गीकरणयोः सफलं सामञ्जस्यं विधाय तत्रैव सङ्गतं वर्गीकरणं दर्शितवान्। अतो रुय्यक-विद्यानाथयोः वर्गीकरणमनेन गतार्थमितीदमेव प्रदर्श्यते। अत्र पूर्वं षोढा प्रधानो विभागः, तदनन्तरमनेकेऽवान्तरभेदाः। यथा—

१. सादृश्यमूलको वर्गः—इदमपि सादृश्यं द्विविधम्—भेदाभेदप्रधानम्, अभेदप्रधानं च। तत्र अभेदप्रधानमपि द्विविधम्—आरोपाऽध्यवसायभेदात्।

तत्र भेदाभेदप्रधाना अलङ्काराः—उपमा, उपमेयोपमा, अनन्वयः, स्मरणं च।

अभेदप्रधानाः पुनः आरोपमूलकाः—रूपक-परिणाम-सन्देहादयः। अध्यवसायमूलकौ च द्वौ–उत्प्रेक्षाऽतिशयोक्ती।

२. औपम्यमूलको वर्गः—अत्रापि पदार्थगतं वाक्यार्थगतं भेदप्रधानं विशेषण-विच्छित्तिकं विशेष्यविच्छित्तिकं विशेषणविशेष्यविच्छित्तिकं चेति षड्विध-मौपम्यं यदवलम्ब्य षोढा विभागाः औपम्यमूलकानामलङ्काराणां जायन्ते। यथा—

पदार्थगताः—दीपक-तुल्ययोगिते।

वाक्यार्थगताः—प्रतिवस्तूपमा-दृष्टान्त-निदर्शनाभिधाः।

भेदप्रधानाः—सहोक्ति-र्विनोक्ति-र्व्यतिरेकश्चेति त्रयः।

विशेषणविच्छित्तिकौ—समासोक्ति-परिकरौ।

विशेषणविशेष्य-विच्छित्तिकाः—श्लेषः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यास-श्चेति। इमावपि औपम्यसम्पन्नौ, अतोऽत्रैव गणितौ। गम्यौपम्यत्वेन च पर्यायोक्तम्, आक्षेपः, व्याजस्तुतिश्चेति त्रयोऽप्यत्रैव अन्तर्भवन्ति।

३. विरोधमूलको वर्गः—विरोध-विभावना-विशेषोक्त्यादयः।

४. शृङ्खलामूलको वर्गः-कारणमाला, मालादीपकम्, एकावली, दीपकादयश्च।

५. न्यायमूलकाः—तर्को वाक्यं लोकश्चेति भेदेन न्यायस्य त्रैविध्यात् न्यायमूलका अपि त्रिविधाः। तत्र—

(क) तर्कन्यायमूलौ—काव्यलिङ्गम्, अनुमानश्च।

(ख) वाक्यन्यायमूलाः—यथासंख्यादयः।

(ग) लोकन्यायमूलाः—प्रत्यनीक-प्रतीपादयः।

६. गूढार्थप्रतीतिमूलको वर्गः—सूक्ष्म-व्याजोक्ति-वक्रोक्त्यादयः।

एवं षड्वर्गेषु विभक्ता अलङ्काराः।

विद्यानाथोऽपि पूर्ववर्तिनां रुद्रट-रुय्यक-विद्याधरादीनां वर्गीकरणानि आकलय्य अर्थालङ्कारान् चतुर्धा विभजते। यथा—

(१) केचन प्रतीयमान-वस्तवः।

(२) केचन प्रतीयमानौपम्याः।

(३) केचन प्रतीयमान-रसभावादयः।

(४) केचन अस्फुट-प्रतीयमानाः।

एतेषामेवान्तरविभागा नव विद्यन्ते यत्राऽऽहितोऽशेषोऽलङ्कारवर्गः। यथा—

१. साधर्म्यमूलः (अयमपि त्रिधा—भेद-अभेद-भेदाभेदभेदात्)। २. अध्यवसायमूलः। ३. विरोधमूलः। ४. वाक्यन्यायमूलः। ५. लोकव्यवहारमूलः। ६. तर्कन्यायमूलः। ७. शृङ्खलावैचित्र्यमूलः। ८. अपह्नवमूलः। ९. विशेषण-वैचित्र्यमूलश्चेति।

प्रायः एतान्येव वर्गीकरणानि अनुसृत्य दर्पणकारो विश्वनाथोऽपि विधत्ते वर्गीकरणम्; तथापि स प्राधान्येन अलङ्कारसर्वस्वकारमनुवर्तते। यथा—

तत्र प्रथममर्थालङ्काराः सप्तधा—सादृश्यगर्भः, विरोधगर्भः शृङ्खलाबन्धः, तर्कन्यायमूलः, वाक्यन्यायमूलः, लोकन्यायमूलः, गूढार्थप्रतीतिमूलश्चेति भेदात्।

१. सादृश्यगर्भोऽपि भेदाभेदप्रधानः, अभेद-प्रधानः, गम्यौपम्याश्रयश्चेति त्रिधा। तत्र—

(क) भेदाभेदात्मकाश्चत्वारः–उपमा, उपमेयोपमा, अनन्वयः, स्मरणञ्चेति।

(ख) अभेदप्रधान आरोपाऽध्यवसायमूलाभ्यां द्विधा। तत्र आरोपमूलकाः–रूपक-परिणाम-सन्देह-भ्रान्तिमदु-ल्लेखा-ऽपह्नुत्यभिधाः। अध्यवसायमूलौ-उत्प्रेक्षाऽतिशयोक्त्याख्यौ।

(ग) गम्यौपम्याश्रयः पुनः पदार्थगतो वाक्यर्थगतो भेदप्रधानो विशेषण-विच्छित्तिको विशेषणविशेष्यविच्छित्तिकश्चेति पञ्चधा। तत्र—

(अ) पदार्थगतौ—दीपकम्, तुल्ययोगिता चेति।

(आ) वाक्यार्थगताः—प्रतिवस्तूपमा, दृष्टान्तो निदर्शना चेति।

(इ) भेदप्रधानाः—व्यतिरेकः, सहोक्तिर्विनोक्तिश्चेति।

(ई) विशेषणविच्छत्तिकौ—समासोक्तिः, परिकरश्च।

(उ) विशेषणविशेष्यविच्छित्तिकः–श्लेषः।

अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, पर्यायोक्तम्, व्याजस्तुतिः, आक्षेपश्चेतीमेऽपि गम्यौपम्यत्वेन अत्रैव गण्यन्ते।

२. विरोधगर्भाः—विरोधः, विभावना, विशेषोक्तिः, अतिशयोक्तिः (कार्यकारण-विपर्ययरूपा), असङ्गतिः, विषमः, समम्, विचित्रम्, अधिकम्, अन्योन्यम्, विशेषः, व्याघातश्चेत्यभिधाः।

३. शृङ्खलमूलाः—कारणमाला, एकावली, मालादीपकम्, सार इत्याख्याः।

४. तर्कन्यायमूलौ—काव्यलिङ्गम्, अनुमानञ्चेति।

५. काव्यन्यायमूलाः—यथासंख्यम् पर्यायः, परिवृत्तिः, परिसंख्या, अर्थापत्तिः, विकल्पः, समुच्चयः, समाधिश्चेत्यभिधाः।

६. लोकन्यायमूलाः—प्रत्यनीकम्, प्रतीपम्, मीलितम्, सामान्यम्, तद्गुणः, अतद्गुणः, उत्तरम् इत्याख्याः।

७. गूढार्थप्रतीतिमूलाः—सूक्ष्मम्, व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः, भाविकम्, उदात्तम्, रसवद्, प्रेयः, ऊर्जस्वी, भावोदयः, भावशान्तिः, भावसन्धिः, भावशबलता इत्यभिधाः।

संश्लेषमूलौ—संसृष्टि-सङ्करौ।

अत्र दर्पणकारो निश्चयालङ्कारमधिकम् अपह्नुतेरन्तरं स्थापयति। व्याजस्तुतिः, पर्यायोक्तम्, अर्थान्तरन्यासः, काव्यलिङ्गम्, अनुमानश्चेत्याख्यान् अलङ्कारान्

परिभाष्य तेनैव क्रमेण स्थापयति, येन रूपेणाऽत्र वर्गीकरणे ते स्थापिताः। हेत्वनुकूलाभिधौ अलङ्कारौ चाधिकौ आक्षेपानन्तरं स्थापितौ। विभावना-विशेषोक्ती च विरोधस्य पूर्वं स्थापिते। पूर्वं मालादीपकं लक्षयति, तत एकावलीम्। उत्तरालङ्कारञ्च अर्थापत्तेः पूर्वं स्थापयति।

एवमिदं दर्पणकारपर्यन्तमलङ्काराणां वर्गीकरणम्। शिष्टञ्च वर्गीकरणं रसगङ्गाधरकाराद्यभिमतं नवीनप्रस्थाननिरूपणप्रसङ्गे निरूपयिष्यते। स्वभावोक्ति-वक्रोक्ति-रसोक्तिमूलकान्यपि वर्गीकरणानि तत्तन्निरूपणप्रकरणे एव प्रदर्शयिष्यन्ते।

इदं तु पूर्वं दर्शितमेव यदलङ्काराणां विकाशे प्रस्थानानां प्रसारः कारणम्। तत्रापि अलङ्कारस्य अवान्तरप्रस्थानानि प्राधान्येन। अतोऽलङ्कारप्रस्थानगर्भं वर्गीकरणं सङ्गतं स्यात्। तदेव सर्वेषु वर्गीकरणेषु समुपलभ्यमाना विविधा भेदोपभेदात्मका विरोधा अन्तर्दध्युः। अत एवंविधस्य वर्गीकरणस्य कृते प्राचीनं वर्गीकरणं सहायकम्।

इदमपि असकृन्निवेदितं यद् भामहः सर्वेषामलङ्काराणां मूलं वक्रोक्तिमेव मनुते, **कोऽलङ्कारोऽनया विना** इति वचनात्। एवमेव दण्डी **स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्** इति चाङ्गीकृत्य स्वभावोक्ति-वक्रोक्ती सर्वालङ्काराणां मूलत्वेन स्वीकुरुते। अनेनैव क्रमेण तृतीयोऽपि वर्गीकरणस्य आधारो निर्दिष्टो रसोक्तिरूपो यस्य प्रधानसमर्थकः सरस्वतीकण्ठाभरणकर्ता भोजदेवः। यथा—

स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं परिचक्षते॥[1]

एवमेष त्रिविधो मार्गो वर्गीकरणस्याऽऽदौ निर्दिष्टः। अलङ्काराणां विकाशावस्थायामेष त्रिविधो विभागः प्रायो विस्मार्यते वर्गीकरणकारकैः। कोऽप्येषां त्रिविधानां मनोवैज्ञानिकानां भेदानां महत्त्वं न स्वीकरोति। सर्वे एव स्वदृष्ट्यनुसारं वैचित्र्यव्याजेन वर्गीकरणे व्यग्रा भवन्ति। अस्यैव फलमप्रास्थानिको दृष्टिभेदः, वर्गीकरणेऽनैक्यम्, स्थाने-स्थाने असङ्गतिर्विरोधश्च। अत एषां पश्चाद्भवा आलङ्कारिका एतैर्वर्णितानलङ्कारान् स्वीकुर्वन्तोऽपि नैतेषां वर्गीकरणं मन्वते। यदा कोऽप्यालङ्कारिकः स्वपूर्वोद्भवानामालङ्कारिकाणाम् अलङ्कारविशेषं निषेधति, स्वीयालङ्कारेष्वन्तर्भावयति, तत्र भेदांश्चोद्भावयति वा, तदाऽपरस्तस्य दृष्टिभेदं मत्त्वा मौनमास्ते, खण्डयति वा तं स्वकल्पितया वैचित्र्यबुद्धया युक्त्या वा। किन्तु खण्डन-मण्डनात्मकस्यास्य विधेर्न दृश्यते कोऽपि प्रभावोऽलङ्काराणां विकाशे ह्रासे वा। अतो बहवः पूर्वैस्त्यक्ता अलङ्कारा उद्धृताः,

---

१. स० क० ५. ८।

पूर्वमनुद्भाविता अपि परैः स्वयमेव कल्पिताः। अस्येदं तात्पर्यं यदलङ्काराणां ग्रहण-हानयोर्न कोऽपि नियमो न वा कापि दृष्टिः। अत एव अलङ्काराणामदृष्टि-मूलकोऽक्रमिकोऽव्यवस्थात्मकश्च विकाशोऽभवत्।

एतान् दोषानपाकर्तुं पुनरपि अस्माभिस्ता एव पूर्वमुद्भाविताः स्वभावोक्ति-वक्रोक्ति-रसोक्तिमूलका दृष्टयोऽभ्युपगन्तव्याः। तेन अलङ्कारसम्बधिन्यः सर्वाः समस्याः समाहिताः स्युः। आसामाधारेण कृतमलङ्काराणां वर्गीकरणं मौलिकं वैज्ञानिकं स्थायि प्रस्थानात्मकञ्च स्यात्।

एतासां प्रस्थानत्वे वर्तते विवादः। आसु वक्रोक्तेः प्रस्थानकल्पना स्वीकृतैव। रसोक्तिरपि यथाकथञ्चित् रसप्रस्थानेन उररीकृता। अवशिष्टा चैका स्वभावोक्तिः कतिपयेषामलङ्काराणां व्यापिकैव दण्डिना स्वीकृता, न कदापि प्रस्थानरूपिणी। इयं केवलं विशिष्टालङ्काररूपेण प्रायः सर्वैरेव आलङ्कारिकैरङ्गी-क्रियते। किन्त्वनेन नास्याः हानिः, यतः केवलं कुन्तकस्य विरोधो दण्डिनश्च समर्थनं पर्याप्तम्।

एतदाधारेण स्वभावोक्तेरपि अलङ्कारस्य अवान्तरप्रस्थानत्वं वक्रोक्ति-रसोक्तिवत् साधयितुं सुकरम्। तदैवालङ्कारप्रस्थानस्य वास्तविकी विवेचना भवेत्। अतो-ऽलङ्कारस्य विकाश-वर्गीकरण-भेदोपभेदादीनां विविधानां परिज्ञानाय अलङ्कारस्य अवान्तरभूतानां त्रिविधानां स्वभावोक्ति-वक्रोक्ति-रसोक्त्याख्यानां प्रस्थानानां विमर्शो नितरामावश्यकः।

# द्वितीयो भागः

१. अलङ्कारस्य अवान्तरधाराः, प्रस्थानत्वञ्च ।

२. स्वभावोक्ति-धारा ।

३. वक्रोक्ति-धारा ।

४. रसोक्ति-धारा ।

## प्रथमोऽध्यायः

# अलङ्कारस्य अवान्तरधाराः, प्रस्थानत्वञ्च

### काव्यलक्षण-प्रस्थानयोः अलङ्कार-महत्त्वम्

काव्यलक्षण-विचारे निरूपितानां काव्यलक्षणानां समीक्षया स्पष्टमिद यत् प्रायः सर्व एवालङ्कारिका अलङ्कारान् साक्षात् परम्परया वा काव्याङ्गत्वेन अभिमन्वते। अनलङ्कृती पुनः क्वापि[1] इति मतमुपन्यस्य अलङ्कारस्याऽनिवार्यताविरोधी मम्मटोऽपि नालङ्कारव्यामोहमात्मनः संवृणुते, वर्णयति च विस्तरेण अलङ्कारान् एकषष्ठिसंख्याकान् दशमोल्लासे। मम्मटस्येममपि विरोधमसहमानः चन्द्रालोककारो जयदेवो जगाद—

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती॥[2]

वामनमते तु काव्यं ग्राह्यमलङ्काराद्[3] इति सिद्धान्तित्वेन अलङ्कार विना काव्यस्य ग्राह्यतैव न स्यात्। कुन्तकोऽपि सालङ्कारस्य काव्यता[4] इति स्वीकृत्य अलङ्कारस्य महत्तामनिवार्यताञ्च अङ्गीकुरुते।

एवमलङ्कारस्य महत्त्वं काव्येऽक्षुण्णम्। न कोऽप्यालङ्कारिकः कदाप्यस्य विरोधाय तत्परोऽभवत्। यश्च साक्षात्परम्परया वा दृश्यते निषेधः काव्यप्रकाशादिग्रन्थेषु, स नालङ्कारविरोधबुद्ध्या, अपि तु दृष्टिविशेषसमर्थनभावनया। अन्यथाऽलङ्काराणां विस्तरेण वर्णनस्य वैयर्थ्यापत्तेः। अतो नालङ्कारविरोधे तात्पर्यं मम्मटस्य, अपि तु रसस्याऽलङ्कारताखण्डने। यतो हि अलङ्कारत्वे रसस्य चित्रत्वं स्यात्, अलङ्कारस्य चित्ररूपत्वात्। अतो वाच्योपस्कारकदशायामपि मम्मटो रसस्य गुणीभूतव्यङ्ग्यत्वमेव मनुते, न कथमप्यलङ्कारताम्। अत एव तेन न रसवदलङ्कारोऽलङ्कारेषु गणितः, अपि तु गुणीभूतव्यङ्ग्यस्य भेदे अपराङ्गत्वे एव। केवलं गुणीभूतव्यङ्ग्य-निरूपणोपसंहारे रसवदाद्यलङ्काराणां चर्चैव विहिता। यथा—
एते च रसवदाद्यलङ्काराः। यद्यपि भावोदय-भावसन्धि-भावशबलत्वानि नालङ्कारतया उक्तानि, तथापि कश्चिद् ब्रूयादित्येवमुक्तम्।[5]

---

१. का० प्र० ना०, पृ० ७। २. चन्द्रा० १.८। ३. वामनः १.१.१।
४. व० जी० १.६। ५. का० प्र० ना०, पृ० १२७।

यद्यपि मम्मटो ध्वनिप्रस्थान-पोषकः, तथापि रसालङ्कारयोः प्राधान्याप्राधान्यविषये नायं ध्वनिकारमनुवर्तते। तेन स्पष्टमेव रसस्यालङ्कारताऽभ्युपगता। यथा-

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥**[1]

किन्तु नैवं मम्मटेन अभ्युपगम्यते, अपि तु गुणीभूतव्यङ्ग्यत्वेनैव तदङ्गीकारात्। मम्मटो न कदापि रसस्यालङ्कारतां स्तौति, कामं भवतु स वाच्यस्योपस्कारकोऽपि। 'अङ्गत्वे रसोऽलङ्कारः, अङ्गित्वे च ध्वनिरि'ति व्यवस्था अलङ्कारप्राधान्यवादिनां प्राचामालङ्कारिकाणाम्। मतमिदमंशतोऽलङ्काराणामलङ्कार्यत्वमेव समर्थयति, न कथमप्यलङ्कारत्वेऽपि सर्वांशरूपेण उपस्कार्युपस्कार्योभयरूपत्वेन वा प्राच्यालङ्कारिकवत्। यथा—**तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया प्रख्यापितम्। तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम्।**[2]

अलङ्कारसर्वस्वकारो रसस्य अलङ्कारतां समर्थयन् ध्वनिकारदर्शितदिशमेव अनुसरति। तेन ध्वनिसम्प्रदायेऽपि अलङ्कारस्य माहात्म्यं नैव हीयते। प्रत्युत ध्वनित्वेन व्यङ्ग्यप्राधान्येन वा स रसेन सह साम्यं भजते। तत्रापि रसध्वनेरेव प्राधान्यं वस्त्वलङ्कार-ध्वन्यपेक्षया इत्यन्यदेतत्। ध्वनिकारस्य नात्र विशेष आग्रहः, अलङ्कारकरे मग्नस्य ध्वनेरेव प्रकाशनार्थं प्रवर्तमानत्वात्। अन्यैरपि लोचनदिभी रसध्वनेः प्राधान्यसमर्थनव्याजेन तथैव समर्थितत्वात्। दर्पणकारेण विश्वनाथेन काव्यलक्षणप्रसङ्गे ध्वनेः काव्यात्मत्वखण्डनपुरस्सरं रसध्वनेरात्मत्वं समर्थयता रसालङ्कारयोर्विवादे रसस्यैव प्राधान्यं समर्थितमलङ्कारापेक्षया। किन्तु विश्वनाथस्यापि काव्यलक्षणं खण्डयता पण्डितराजेन ध्वनिसमर्थनव्याजेन अलङ्काराणां समता रसेन सह समर्थिता गुणीभूतव्यङ्ग्यत्वेन।

रीति-वक्रोक्ति-प्रस्थानयोस्तु अलङ्कारस्य प्रतिष्ठा अक्षुण्णैव। औचित्यप्रस्थानेऽपि ध्वनिविरोधव्याजेन अलङ्कारप्रतिष्ठैव प्रकारान्तरेण समर्थ्यते। ध्वनिविरोधिप्रस्थाने पुनः अलङ्कारसमर्थनं विहाय नान्यत् किमपि सम्भाव्यते। आनन्दवर्धनोऽलङ्कारस्य प्राधान्यं निराकृत्य तत्स्थाने ध्वनिं स्थापयामास। अत एव तेन समग्रमलङ्कारप्रस्थानं समालोडितम्। ततश्च त्रिविधो वस्त्वलङ्काररसात्मको ध्वनिर्निरूपितः। एवं शिष्टो गुणीभूतव्यङ्ग्यरूपस्त्रिविधो व्यङ्ग्यस्य अप्राधान्यादलङ्काररूप एव, व्यङ्ग्यप्राधान्ये ध्वनित्वस्यैव स्वीकारात्। इत्थं ध्वनिकारा अलङ्कारे प्रस्थानत्रैविध्यं प्रकटयन्ति। यतो हि येभ्यो विशिष्टेभ्योऽलङ्कारस्रोतेभ्यो व्यङ्ग्यप्राधान्ये ध्वनिरुद्भूतः, तान्येव स्रोतांसि पूर्वं त्रिधारारूपेण प्रस्थानाभिधया वा प्रसिद्धान्यासन्।

---

१. ध्वन्या० २.५। २. अ० स०, पृ० ६.७।

कुन्तकस्य स्वभावोक्ति-रसोक्त्योः अलङ्कारताया विरोधोऽपि[1] इदमेव धारा-त्रैविध्यं प्रस्थानत्रिविधतां वा द्योतयति। यतो हि भरतादारभ्य कुन्तकपर्यन्तमासां तिसृणां धाराणां (प्रस्थानानां) प्रवाहः स्पष्टं प्रवर्तते। भरतनाट्यशास्त्रे त्वासां धाराणां परम्परयैव प्राप्यते सङ्केतो नाट्यस्य **लोकधर्मीनाट्यधर्मीति**[2] निर्दिष्टे भेदे। तत्र लोकधर्मी भेदः स्वभावोक्तिं निर्दिशति। वक्रोक्ति-रसोक्त्योः सङ्केतस्तु नाट्यधर्मीति। इत्थमेषां प्रस्थानानां प्रारम्भो भरतादेव। किन्तु वास्तविको निर्देशो भामहात् प्रारभ्यते। यथा—

**सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥**[2]

एवञ्च भामहदृष्ट्या एकमेव वक्रोक्ति-प्रस्थानम्। तदभावे न कोऽप्यलङ्कारोऽलङ्काररूपतामर्हति। यथा लेश-सूक्ष्म-हेतवो वक्रोक्त्यनभिधानतो नालङ्कार-पदभाजः, किन्तु स्वभावोक्तिगर्भत्वादेते अलङ्काराः। दण्डिदृष्ट्या एते सर्वे उत्तम-भूषणेषु गण्यन्ते। एवं दण्डिकाले स्वभावोक्ति-वक्रोक्तिभेदेन द्विविधं प्रस्थानं पप्रथे। यथा—

**श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।**
**भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥**[3]

भोजस्तु प्रस्थानत्रैविध्यमङ्गीकरोति। यथा—

**वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।**
**सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥**[4]

एवं त्रिविधमिदम् अलङ्कार-प्रस्थानमलङ्कारस्याऽऽदित एव प्रसिद्धम्। एषां प्रस्थानानामभ्युपगमः प्रायः सर्वेषामेव प्राचीनार्वाचीनानामालङ्कारिकाणाम् अलङ्कार-प्रसारस्य मूलम्। भरतादारभ्य भोज-कुन्तकं यावदेतेषां त्रयाणां प्रस्थानानां साक्षात् परम्परया वा सङ्केतः प्राप्यते। तथापि भामहकाले त्रिविधमिदं प्रस्थानं वक्रोक्तौ विनिमज्जति, स्वभावोक्ति-रसोक्ती च तत्प्रकारतां प्राप्नुतः। अतो वक्रोक्तेः प्रकार-त्वेनाभिमते भामहस्य स्वभावोक्ति-रसोक्ती सर्वथा भिन्ने दण्डि-भोजयोः स्वभा-वोक्ति-वक्रोक्तिभ्याम्। एवमेव स्वभावोक्तेः प्रकारत्वेनाभ्युपगता दण्डिनो रसोक्तिरपि भिन्नेव स्वतन्त्रतया स्थितायाः भोजस्य रसोक्तेः। एवं त्रिविधमिदं प्रस्थानमाल-ङ्कारिकाणां दृष्टिभेदेन भिद्यते। एकैव वक्रोक्तिः भामह-दण्डि-वामन-कुन्तकादीनां 'दृष्टिभेदात् प्रस्थानभेदः' इति न्यायेन अनेकरूपतामाप्नोति। तत्र—

---

१. व० जी० १.११.३.१०।  २. भामह २.८५।
३. दण्डी २.३६३।  ४. सर० क० ५.८।

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् ।
मन्वतेऽतिशयोक्तिं तामलङ्कारतया बुधाः ॥[१]

इति निर्देशेन भामहस्य वक्रोक्तिः केवलं निमित्ततो लोकातिक्रान्तगोचर वचनम् । दण्डिनः श्लेषपुष्टालङ्कारविषया । वामनस्य सादृश्यात् लक्षणात्मिका ।[२] कुन्तकस्य च प्रकर्षकाष्ठाधिरोहः कोऽप्यतिक्रान्तप्रसिद्धव्यवहारसरणिः ।[३] एवमेते वक्रोक्तेर्व्यावर्तका विशेषा दृष्टिभेदेन वक्रोक्तिं भिन्दन्ति । एत एव स्वभावोक्तेर्वक्रोक्तिं व्यावर्तयन्ति, अलङ्कारे वा संख्यातीतान् भेदान् सृजन्ति । प्रस्थानसम्बद्धो विशिष्टो विचारस्तु प्रस्थानस्य प्रातिस्विकनिरूपणप्रसङ्गे द्रष्टव्यः । अत्र तु प्रस्थानपरिचयार्थं तस्य निर्देशमात्रः कृतः ।

एवं त्रिविधमिदं स्वभावोक्ति-वक्रोक्ति-रसोक्त्यात्मकं प्रस्थानम् अलङ्कारप्रस्थानान्तर्गतमेव स्वीक्रियते । एष्वेव त्रिषु प्रस्थानेषु विभक्तो निखिलोऽलङ्कारकलापः ।

**स्वभावोक्ति-प्रस्थानम्**—अत्र स्वभावोक्तिर्नालङ्कारविशेषवचना गृह्यते, अपि तु अलङ्कारसामान्यवचनैव । यद्यपि अलङ्कारविचारे स्वभावोक्तिरलङ्कारविशेषवचनैव प्रसिद्धा, किन्त्वत्र सामान्यवचनैव ग्राह्या । नात्र कश्चन विरोधोऽलङ्कारपरम्पराविच्छेदो वा शङ्क्यः; आलङ्कारिणां स्वभावोक्तेरपि अलङ्कारगर्भतास्वीकारात् । यथा औपम्यगर्भेषु रूपकोत्प्रेक्षापह्नुत्यादिषु अनेकेष्वलङ्कारेषु गर्भतया स्थिता उपमा न स्वालङ्कारविशेषवचनतां विजहाति, न वा विरोधो विभावनाविशेषोक्त्यसङ्गत्यादिषु बहुष्वलङ्कारेषु विनिविष्टोऽपि अङ्कारविशेषवचनत्वं परित्यजति, तथैवेयं स्वभावोक्तिरपि अनेकेषु दीपक-सूक्ष्म-पनिवृत्त्यादिष्वलङ्कारेषु गर्भिताऽपि न नैजामलङ्कारविशेषवचनतां त्यजति । एवमलङ्कारसामान्यस्वरूपेयं प्रस्थानतां प्रतिपद्यते ।

अस्याः प्रस्थानात्मकं सामान्यस्वरूपम् अलङ्कारविशेषरूपाद् भिन्नम् । अत एवेदं विच्छित्तिवशात् स्वभावोक्तिमूलकेषु पर्याय-परिवृत्ति-सूक्ष्मादिष्वलङ्कारेषु भिन्नं रूपमश्नुते । स्वभावोक्तेरिदं सामान्यात्मकं रूपम् औपम्या-ऽतिशय-श्लेषमूलकालङ्कारेभ्यो भिन्नविषयम् । अर्थात् औपम्यमूलकाः, अतिशयमूलकाः, श्लेषमूलकाश्च अलङ्कारा न स्वभावोक्तिप्रस्थानविषयतामर्हन्ति । एते तु वक्रोक्तिप्रस्थानस्य विषयाः । अस्य नेदं तात्पर्यं यत्स्वभावोक्तौ औपम्या-ऽतिशय-श्लेषादीनां सर्वथा विरह उपदिश्यते, तथात्वे अस्या अलङ्कारताया एवाऽभावात् । अत एषामनुप्राणयितृत्वेन अप्राधान्या स्थितिः । तस्मात् दीपक-सहोक्ति-यथासंख्यादिष्वलङ्कारेषु वर्तमाना अपि औपम्या-ऽतिशयादयः स्वभावोक्तिमेव समर्थयन्ति, न कथमपि वक्रोक्तिम् ।

---

१. भामह २.८१ । २. वामन ४.३.८ ।
३. व० जी०, पृ० १९५ ।

**वक्रोक्ति-प्रस्थानम्**—वक्रोक्तिप्रस्थानेऽपि स्वभावोक्तिवद् वक्रोक्तेः सामान्य-वचनतैव ग्राह्या, न कथमपि विशेषवचनता। अस्याः सामान्यवचनता तु अलङ्कारसर्वस्वकारैरपि समर्थिता। यथा—

**वक्रोक्तिशब्दश्च अलङ्कारसामान्यवचनोऽपीह अलङ्कारविशेषसंज्ञितः।**[1]

अस्य वक्रोक्तिप्रस्थानस्य व्यावर्तका औपम्यातिशयश्लेषाः। अर्थात् औपम्या-तिशयश्लेषमूलका अलङ्कारा वक्रोक्तेर्विषयाः। अत्र औपम्यातिशयश्लेषा वक्रोक्तिप्रयोजकाः प्रधाना एव ग्राह्याः, अन्यथा एषां स्वभावोक्तावपि समयतो वर्तमानत्वात् तत्रातिव्याप्तेः।

**रसोक्ति-प्रस्थानम्**—रसोक्तिप्रस्थानेऽपि रस-भावादीनाम् अन्यरसापेक्षया अङ्गतैव ग्राह्या, न कथमपि अङ्गिता, तस्या ध्वनेरेव विषयत्वात्। न चात्र हृदयसंवादमात्रेण स्वभावोक्ति-रसवदलङ्कारयोरभेदः; वस्तुस्वभावसंवादरूपत्वात् स्वभावोक्तेः, चित्तवृत्तिसंवादरूपत्वाच्च रसवदलङ्कारस्येति व्यवस्थितेः।[2]

## अलङ्कार-प्रस्थान-समर्थनम्

अलङ्कारस्य स्वभावोक्ति-वक्रोक्ति-रसोक्त्याख्यानि त्रीणि प्रस्थानानि प्रागुपन्य-स्तानि। एषां व्यावृत्तं क्षेत्रमपि निर्धारितम्। तत्तत्प्रस्थाने तेषां तेषामलङ्काराणां सन्निवेशोऽपि कार्य इत्युपदिष्टम्। किन्तु यावदेषां त्रयाणां प्रस्थानानां कृते प्राचीनालङ्कारशास्त्रकोविदानां नव्यानां च संस्कृतसमीक्षाशास्त्रनिष्णातानां समर्थनं नोपलभ्येत, तावत् कथं भवेद् विश्वासोऽत्र। अत एवात्र प्रस्थानदृष्ट्या युक्त्या च समन्वितं समर्थनं प्रस्तूयते।

अलङ्कारशास्त्रे न क्वापि सुस्पष्टं प्रस्थानदृष्टयस्तन्निर्वाहिका युक्तयश्च समुप-दिष्टाः। अत एव तत्पूर्वकं प्रस्थानस्य समर्थनमालङ्कारिकाणां नोपलभ्यते। केवलं तत्सङ्केत एव प्राप्यते। अतो दृष्टीनामप्यत्र अधिगमः क्रियते यदाश्रिताभिः युक्तिभिरनुप्राणितं समर्थनं सङ्गच्छेत्।

ध्वन्यालोकस्य प्रथमोद्योते **प्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः**[3] इत्यत्र 'प्रस्थान'-शब्दो रीति-मार्ग-सम्प्रदायादि-शब्दानां पर्याय-त्वेन प्रयुक्तः। अत्रत्यं प्रस्थान-शब्दं व्याकुर्वाणो लोचनकार आह—'प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन तत् प्रस्थानम्' इति। अस्यैव व्याख्यां कुर्वद्भिरस्माकं गुरुवर्यैर्ध्वन्यालोकस्य 'बालप्रिया'-टीकायामुक्तम्—'परम्परया अविच्छिन्नप्रवाहेण व्यवहरन्ति काव्यव्यवहारं कुर्वन्ति मार्गेण मार्गतुल्येन येन' इति।

---

१. अ० स०, पृ० १९७। २. तत्रैव, पृ० २०३।

३. ध्वन्या०, पृ० २३।

इत्थं यदि काव्ये व्यवच्छिन्नव्यवहार एव प्रस्थानस्य नियामकः, तदा तु स्वभावोक्ति-वक्रोक्ति-रसोक्ति-प्रस्थानानां तथाऽभ्युपगमो निर्विवादः। यतस्त्रिविधेनानेन प्रस्थानप्रभेदेन काव्यव्यवहाराः कवीनां दृश्यन्ते। अत्र कुत्रचित् स्वभावोक्तेः प्राधान्यं भवति, तिष्ठतश्चान्ये द्वे गौणभावेन। अन्यत्र वक्रोक्तिरसोक्त्योः प्राधान्ये गौणभावं भजते स्वभावोक्तिः। एवमेतास्तिस्रः काव्यव्यवहारे विराजमानाः प्रस्थानतां प्रतिपद्यन्ते। अलङ्कारस्य प्रस्थानता तु सामान्यरूपेण प्रसिद्धै रस-रीति-ध्वनि-वक्रोक्तिप्रस्थानैः सह पूर्वत एवाऽभ्युपगता, परं न तदवान्तरभूतानां स्वभावोक्ति-वक्रोक्ति-रसोक्तीनाम्। तदर्थमेवास्माकं शोधप्रबन्धोऽयं प्रयतते। एतानि त्रीणि प्रस्थानान्याश्रित्य प्रावर्तत काव्यव्यवहार इति बाणभट्ट-पद्मगुप्त-कुन्तकादयः स्पष्टं निर्दिशन्ति। यथा—

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्॥[1]

अत्र बाणो निर्दिशति त्रिविधमिदमलङ्कारप्रस्थानं प्रकारान्तरेण। तत्र 'अग्राम्या जातिरि'ति पदेन स्वभावोक्तिं, 'श्लेषो क्लिष्ट' इत्यनेन वक्रोक्तिं 'स्फुटो रस' इत्यनेन च रसोक्तिम्। यथा—

तत्त्वस्पृशस्ते कवयः पुराणाः श्रीभर्तृमेण्ठप्रमुखा जयन्ति।
निस्त्रिंशधारासदृशेन येषां वैदर्भमार्गेण गिरः प्रवृत्ताः॥[2]

सुकुमाराभिधः सोऽयं येन सत्कवयो गताः।
मार्गेणोत्फुल्ल-कुसुम-काननेनेव षट्पदाः॥
सोऽतिदुस्सञ्चरो येन विदग्धकवयो गताः।
खड्गधारापथेनेव सुभटानां मनोरथाः॥[3]

कुन्तकस्तु स्वभावोक्ति-रसोक्ति-वक्रोक्ति-प्रस्थानपोषकाणां कवीनां नामपुरस्सरं काव्यान्यपि निर्दिशति। यथा—

मातृगुप्त-मायुराज-मञ्जीरप्रभृतीनां सौकुमार्य-वैचित्र्य-संवलित-परिस्पन्दीनि काव्यानि सम्भवन्ति। सहजसौकुमार्यसुभगानि कालिदास-सर्वसेनादीनां काव्यानि दृश्यन्ते। तथैव विचित्रवक्रत्व-विजृम्भितं हर्षचरिते प्राचुर्य्येण बाणभट्टस्य विभाव्यते। भवभूति-राजशेखरविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु (?) परिदृश्यते।[4]

अनेन सिद्धमिदं यदेतानि त्रीणि प्रस्थानानि आदित एव काव्येऽविच्छिन्नतया व्यवहृतानि। अत एवैषां काव्यव्यवहारप्रयोजकत्वात् सिद्धं प्रस्थानत्वम्।

१. हर्षचरित १.८। २. नवसाहसाङ्कचरितम् १.५।
३. व० जी० १.२९, ४३। ४. तत्रैव पृ० ७१।

यद्यपि कुन्तको न मनुते स्वभावोक्ति-रसोक्त्योरलङ्कारताम् ; तथापि वक्रताया मार्गभेदव्याजेन तयोरप्यलङ्कारतां सूचयत्येव। वक्रताया अलङ्कृतिरूपत्वात् तद्भेदस्यापि तथात्वेनैव स्वीकारौचित्यात्। इत्थमविच्छिन्न-काव्यव्यवहारदृष्ट्या अलङ्कारे प्रस्थानत्रैविध्यं सिद्धम्।

प्रस्थानदृष्टेरपरं वैशिष्ट्यमस्ति सङ्कल्पितप्रस्थानस्य आत्मत्वस्थापनम्। किमपि काव्यतत्त्वं प्रस्थानदशायां काव्यात्मत्वं प्रपद्यते। काव्ये प्रस्थानस्याऽऽत्मता अनिवार्या। शरीरभूतौ शब्दार्थौ तन्मूलकावलङ्कारौ वा न कथमपि काव्यस्याऽऽत्मत्वं प्राप्नुतः, देहात्मनोर्भेदेन अवस्थानात्। अतोऽलङ्काराणां न कथमपि प्रस्थानता। ते केवलमङ्गभूताः, **उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्**[1] इत्यादिनिर्देशात्। प्रस्थानतासिद्ध्यै त्वलङ्काराणामात्मत्वस्थापनमावश्यकम्। यतः सर्वाण्येव तत्त्वानि यानि प्रस्थानतां प्रापुस्तेषामात्मत्वमनिवार्यतया स्वीकृतं प्रस्थानप्रवर्तकैस्तत्र तत्र। यथा—

**रीतिरात्मा काव्यस्य।**[2] **वक्रोक्तिः काव्यजीवितम्।**[3]
**काव्यस्यात्मा ध्वनिः।**[4] **औचित्यं काव्यजीवितम्।**[5] इत्यादि।

सत्यप्येवं त्रिविधस्यालङ्कारप्रस्थानस्य प्रस्थानत्वाभावो न शङ्क्यः ; पूर्वमलङ्काराणां प्रस्थानत्वस्यालङ्कारिकैः समर्थनात्, अस्य चावान्तरप्रस्थानत्रयस्यापि तदङ्गत्वेन तथात्वात्। यदि चात्मत्वं प्रस्थानतास्थापनेऽनिवार्यमुच्येत, तदा तु रीति-वक्रोक्त्योरपि प्रस्थानत्वे विवाद आपतेत्, तयोरपि काव्यशरीरत्वेनैव अवस्थानात्, रीतेः केवलं पदसङ्घटनारूपत्वेन वक्रोक्तेश्च शब्दार्थरूपतयैव स्वीकारात्। रीति-वक्रोक्त्योः प्रस्थानतायाः समर्थकैरालङ्कारिकैः यदि तत्र शब्दार्थापेक्षाया वैशिष्ट्यमुपन्यस्य तयोः प्रस्थानताऽभ्युपगम्यते, तदा अलङ्कारप्रस्थानेविषयेऽपि तथैव सुवचत्वात्। यथा शरीरमात्मानं विना व्यर्थं शवमात्रम्, एवमेव शरीरं विना आत्माऽपि व्यर्थो नात्माभिव्यञ्जने समर्थः, शरीरद्वारेणैव तस्याभिव्यञ्जकत्वात्। एवमेव काव्यशरीरभूतयोः शब्दार्थयोः साहाय्येन व्यङ्ग्यानां रसादीनामभिव्यक्तिः। इत्थं काव्यशास्त्रे उभयोरप्यनयोः वाच्यप्रतीयमानरूपयोरर्थयोः आत्मत्वमधिकृतम्। अत एव ध्वनिकारोऽपि **वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ** इति अङ्गीचक्रे।

तथ्यं त्विदं यदेतावेव शब्दार्थौ अशेषस्य प्रस्थानविचारस्य मूलम्। एतयोः शरीररूपतायां त्रीणि अलङ्कार-रीति-वक्रोक्ति-संज्ञकानि प्रस्थानानि। शरीरि-

---

१. का० प्र० ८.६७। २. वामनः १.२.६।
३. सा० द०, पृ० १४ (लक्ष्मीटीका)।
४. ध्वन्या० १.१। ५. औचि० वि० च०, कारि० ५।

रूपतायाञ्च शिष्टानि त्रीणि ध्वनि-रसौचित्याख्यानि। अलङ्कारस्य अवान्तर-प्रस्थानानामपि आत्मत्वेन प्रस्थानत्वं पुनरनिर्बाधम्।

तथा च अलङ्कारप्रस्थाने त्रीण्येतानि प्रस्थानानि निष्पद्यन्ते। इदमत्राव-धेयम्—यद्यप्येकत्र एकस्यैव प्रस्थानस्य प्राधान्यम्, अपरयोश्च गौणता; तथापि तत्तत्स्थले प्रत्येकस्य प्रातिस्विकरूपेण प्राधान्यमिति प्रस्थानत्वव्यपदेशः सर्वेषा-मपि कृतेऽव्याहत इति सुव्यवस्थितम्।

एवं 'स्वभावोक्तौ प्रधानायामन्ये वक्रोक्ति-रसोक्ती स्थास्यतः प्राधान्येन' इत्यस्य अयमभिप्रायो यत् स्वभावोक्तिस्थले नास्ति वक्रोक्ति-रसोक्त्योः सर्वथा विरहः, तयोरपि तत्र स्पर्शस्यानिवार्यत्वात्, एतासामसम्पृक्तविभागस्य असम्भवाच्च। अतोऽनया दिशा एतासां प्रस्थानकल्पनायां तदनुकूले चालङ्कारविभागे न स्यात् कापि बाधा। यतः सम्पूर्णमपि अलङ्कारक्षेत्रं व्याप्नुवन्त्योऽप्येताः स्वप्रातिस्विके क्षेत्रे प्रधानतां लभमानाः प्रस्थानतां प्रपद्यन्ते। अतो नात्र प्रस्थानान्तर्गतालङ्कार-विभाजने काठिन्यम्। तत्तदलङ्कारगत-चमत्कृतिजनकतावच्छेदकरूपस्य तत्तत्-प्रस्थानानुरूपत्वात्।

अनेनेदं सिद्धं यत् स्वभावोक्तिस्थलेऽपि वक्रोक्ति-रसोक्त्योः सम्पृक्तता वतत एव, अलङ्कारतानिष्पत्त्या एतासां तिसृणामनिवार्यत्वात्। यतः किमपि वस्तु यदा स्वसामान्यस्वरूपं विहाय कविप्रतिभावेद्यमलङ्काररूपं प्रतिपद्यते, तदा तदलङ्करणार्थं वक्रोक्ति-रसोक्ती अपेक्ष्येते। यदि कविः प्रतिभातं वस्तुविशिष्टं स्वभावं वक्रोक्त्या न वर्णयेत्, रसोक्त्या च नास्कन्दयेत्, तदा न कथमपि स्याद-लङ्कारता अविशिष्टस्य वस्तुस्वभावमात्रस्य। अतो वक्रोक्ति-रसोक्तिभेदेन विविधैः कविभिर्वर्णित एक एव विशिष्टो वस्तुस्वभावो वैविध्यमापद्यते। अत्र सहृदया एव प्रमाणम्। एवमेव वक्रोक्ति-रसोक्तिस्थलेऽपि स्वभावोक्तेश्चमत्कारप्रयोजकत्वेन अनिवार्यता सुधीभिरूह्या।

तस्मात् स्वभावोक्तिमूलकेषु अलङ्कारेष्वपि न सर्वथा विजहीतः वक्रोक्ति-रसोक्ती स्वभावोक्तिम्, न वा सर्वथा विजहाति स्वभावोक्तिः स्वप्रस्थानान्तर्गतेष्वलङ्कारेषु वक्रोक्ति-रसोक्ती। अस्यायं निर्गलितोऽर्थो यत् स्वभावोक्तावप्यस्त्येव स्पर्शो वक्रोक्ति-रसोक्त्योः। एवमेव वक्रोक्ति-रसोक्त्योरपि स्वभावोक्तेः परिष्वङ्गः, अन्यथा वस्तुस्वभावविरहिते वक्रोक्ति-रसोक्ती खपुष्पवत् सर्वथा कल्पनातुलामारूढे न सहृ-दयहृदयवर्जनायाऽलम्। अत एतासां पारस्परिकः संश्लेषोऽलङ्काराय अनिवार्यः। एकस्या अपि विरहे विधवेव सरस्वती न काव्यकमनीयतां धत्ते। यथा—

जानीमहेऽस्या हृदि सारसाक्ष्या,
विराजतेऽन्तः प्रियवक्त्रचन्द्रः।

तत्कान्तिजालैः प्रसृतैस्तदङ्गे-
ष्वापाण्डुता कुड्मलताक्षिपद्मे ॥[1]

अत्र स्वभावोक्तिमूलकोऽनुमानालङ्कारो वक्रोक्तिमूलकैः रूपकापह्नुत्युत्प्रेक्षादिभिरलङ्कारैः अनुप्राणित इति सिद्धैव स्वभावोक्तेः वक्रोक्तितः पृक्तता। तथा हि—'प्रियवक्त्रचन्द्रः' इत्यत्र रूपकम्, अङ्गपाण्डुत्वेऽपह्नुतिः, वियोगजन्यपाण्डुतायां चन्द्रप्रकाशजन्यपाण्डुतायाः स्मृतिजन्याक्षिसङ्कोचे च चन्द्रप्रकाशजन्यसङ्कोचस्य सम्भावनात् 'जानीमहे' इति वाचकोपलम्भाच्च वाच्योत्प्रेक्षा च। एवञ्च 'इयमन्तःप्रियवक्त्रचन्द्रवती तत्कान्त्यधीनपाण्डुदेहसङ्कुचितनेत्रपद्मवत्त्वात्' इति बोधादनुमानालङ्कारः। अतोऽत्र स्वभावोक्तेः प्राधान्यान्न वक्रोक्तिमूलरूपकापह्नुत्यालङ्कारमुखेन व्यपदेशः; तस्य इहाऽनुप्राणयितृत्वेनाभ्युपगमात्। अपि तु अनुमानालङ्कारेणैव व्यपदेशो न्याय्यः। एवमेव वक्रोक्ति-रसोक्तिस्थलेऽप्यूह्यम्। अतोऽलङ्कारप्रस्थाने एतास्तिस्रः उक्तीरवलम्ब्य कृता प्रस्थानकल्पना न कथमप्यानुमानिकी, अपि तु सहृदयहृदयावर्जनमादधाना कवीनां काव्यानाञ्च पन्थानमालोकयन्ती विद्वन्मनोग्राहितामातनुते। अत एवैतासामाधारेण अलङ्कार-प्रस्थानकल्पना न कथमपि निराधारा, प्रत्युत प्रस्थानपोषकैः पूर्वप्रदर्शितैः सर्वैरपि साधनैः संस्तुतैवेति।

एवंविधे प्रस्थानत्रैविध्येऽङ्गीकृते एतन्निबन्धनोऽलङ्कारविभागोऽपि करणीय एव। तत्र तत्र अलङ्कारेषु प्रस्थानपोषकस्यानिवार्यस्य तत्त्वस्य साक्षात्कारोऽपि अवश्यमेव करणीयः। एतादृशे विभागे कृतेऽपि कतिपयेऽलङ्कारा एवंभूता अपि स्युर्येषामेकत्र व्यावर्तिका स्थितिः स्यादसम्भवा। यथा—

दीपक-विषम-सहोक्त्यादयोऽलङ्कारा रुद्रटेन वर्गद्वये स्वभावोक्ति-वक्रोक्ति-प्रस्थानद्वये वा स्थापिताः। अत्र प्रस्थानदृष्ट्या वर्गव्यवस्थितिर्विधेया। अत्र प्राचीनानां भामह-दण्डि-कुन्तक-भोजादीनां मतानि समुपन्यस्य प्रस्थानत्रैविध्यं समर्थितम्। ध्वन्यालोककारास्तदनुवर्तिनश्च ध्वनेस्त्रैविध्यव्याजेन अस्यालङ्कारस्य प्रस्थानत्रैविध्यं प्रकटयन्तीत्यसकृदावेदितम्। रुद्रटादिभिश्चतुर्धा, सप्तधा, नवधेत्यादिरूपस्य अलङ्कारवर्गीकरणस्यान्तरगर्भतया वर्तमानमिदमलङ्कारप्रस्थानत्रैविध्यं स्वीक्रियते परम्परयेति वक्रोक्तिधारानिरूपणे निर्दिश्येन। पण्डितराजेन च काव्यलक्षणविचारे दर्पणकारस्य 'रसात्मकं वाक्यं काव्यमि'ति लक्षणस्य खण्डनं क्रियते, न ध्वनेर्वक्रोक्तेश्चाऽऽत्मत्वस्य। एतेन सिद्धमिदं यदयमपि अलङ्कारे प्रस्थानत्रैविध्यं स्वीकरोति। एवं सर्वैः प्राचीनार्वाचीनैः लक्षणविधायिभिः समर्थितत्वादलङ्कारे प्रस्थानत्रिविधत्वमनिर्बाधम्। अतो ध्वनिकारैर्ध्वनिप्रस्थाननिरूपणार्थं या युक्तयः समुपन्यस्ताः, ताः प्रायोऽत्रापि प्रस्थानत्रैविध्यस्य समर्थनार्थमुपयुज्यन्ते।

---

१. सा० द०, पृ० ७८६ ( लक्ष्मीटीका )।

सम्प्रति आधुनिकानां पी० वी० काणे, एस० के० डे प्रभृतीनां मान्यानामलङ्कारशास्त्रसमीक्षकाणां सम्मतयः समुपन्यस्यन्ते। यथा—

There is a Sharp Conflict of opinion as regards the essentials of Parivriti among writers on Rhetoric. There are two schools, one represented by Mummat and Jagannath, the other by Alankar-Sarvaswa and Vaman. Our author without following any particular school seems to have made a compromise by accepting the views of both the schools.[१]

We can reasonably asume, therefore, that Radrat, Passessed as he is of great inventive powers, either follows a system of classification and definition peculiar to himself or follows a tradition of opinion different in same respect from that of Bhamah and his followers although in general theory he belongs to a Common school.[२]

एवमन्येषामपि डॉ० राघवन्, ए० पी० गजेन्द्रगड़कर-प्रभृतीनां मान्यानां संस्कृतसमीक्षाशास्त्रविदां सम्मतयो विस्तरभिया नेह दीयन्ते।

आभिः पूर्वसमुपन्यस्ताभिः प्रस्थानदृष्टिभिः युक्तिभिर्विविधाभिः साम्प्रतिकानां संस्कृतसमीक्षाविदां सम्मतिभिश्च सिद्धमिदं यदलङ्कारे प्रस्थानत्रैविध्यं वरीवर्ति। इदञ्च मम्मटात् पूर्वमधिकं स्पष्टं समुलभ्यते दीपक-सहोक्ति-हेतु-व्याजोक्ति-परिवृत्त्यादिषु विविधेषु अलङ्कारेषु। किन्तु मम्मटानन्तरम् अलङ्कारविचारे प्रस्थानमिदं विलीयते। स्वयं मम्मटो न कमप्यलङ्कारप्रस्थानविशेषम् अलङ्कारविचारे समनुसरति, किन्तु हेत्वलङ्कारस्य अलङ्कारत्वमस्वीकुर्वाणोऽयं वक्रोक्तिप्रस्थानेऽनुरक्तिं प्रकटयति, न स्वभावोक्तौ। एवमन्ये प्रायः सर्वेऽप्यालङ्कारिका मम्मटपश्चाद्वर्तिनो विच्छित्ति-वैचित्र्य-हृद्यत्व-कविप्रतिभानिवर्तितत्वादिशब्दैः अलङ्कारप्रस्थानविशेषं प्रति निजानुरागं निर्दिशन्ति।

अमीषु पूर्वमुपन्यस्तासु साम्प्रतिकासु सम्मतिषु यद्यपि अलङ्कारप्रस्थानविशेषस्य, विशेषतश्च त्रिविधस्य स्वभावोक्तिवक्रोक्तिरसोक्त्याख्यस्य निर्देशो नास्ति। किन्तु पूर्वप्रसिद्ध्या उत्तरोत्तरालङ्कारविकाशे चोपयोगितया च तान्येव स्वभावोक्ति-वक्रोक्ति-रसोक्त्याख्यानि त्रीणि प्रस्थानानि अलङ्कारे स्वीकार्याणि। एतानि प्राचीनानि प्रस्थानानि। नवीनानामलङ्कारप्रस्थानानां चर्चा तृतीयभागे नवीनालङ्कार-प्रस्थाननिरूपणप्रसङ्गे करिष्यते। किन्तु तान्यप्येतेषां प्राचीनप्रस्थानानां विजृम्भितान्येव। एतत्तत्रैव उपपादयिष्यते। अतः त्रीण्यलङ्कारप्रस्थानानीति सुस्थम्।

१. सा० द०, पृ० २७१ (पी० वी० काणे)।
२. संस्कृत पोइटिक्स, भा० २, पृ० ८२।

## द्वितीयोऽध्यायः

# स्वभावोक्ति-धारा

### स्वभावोक्तेर्विकाशः, काव्ये मूल्यञ्च

SRI AUROBINDO LIBRARY PONDICHERRY (India)

स्वभावोक्तिः किल अलङ्काराणां विकाशस्य आरम्भादेव अलङ्कारेषु परिगणिता। किन्त्वस्याः स्वरूप-लक्षणविषये आदित एव विवादो जागर्ति आलङ्कारिकेषु। केचन त्वस्या अलङ्कारत्वेऽपि विवदन्ते। अपरे स्वीकुर्वन्तोऽपि अस्या अलङ्कारत्वं परस्परं विविधां दृष्टिं दर्शयन्ति। एवंस्थितासु विविधासु विप्रतिपत्तिषु स्वभावोक्तेः स्वरूपनिर्णयोऽनिवार्य एव। यतो विषयरूपेण स्वीकृतस्य 'अलङ्कार-प्रस्थान-विमर्श'स्य साऽपि एकाऽवान्तरधारा। अत्रापि स्वभावोक्तिगर्भाणां बहूनामलङ्काराणां स्यात् समावेशः। येषु रसोक्तेर्वक्रोक्तेर्वा न स्यात् स्पष्टा प्रधानता, तेऽप्यत्रैव अन्तर्भाव्याः, रसोक्ति-वक्रोक्तिप्रतियोगिकालङ्कारतायाः पारिशेष्यात् स्वभावोक्तावेव सत्त्वेन तन्मूलकालङ्काराणामपि तत्रैव विनिवेश्यत्वात्। अतः स्वभावोक्तेर्याथातथ्येन परिचर्यार्थं तन्मूलकालङ्काराणां च तत्र विनिवेशाय तस्या विकाशः प्राय आलङ्कारिकक्रमेण प्रस्तूयते।

संस्कृत-समालोचकास्तदेव वाक्यं काव्यं मन्वते, यत्र भवति रमणीयता, सौन्दर्यं विच्छित्तिर्वा। एषैव रमणीयता भवति व्यावर्तिका काव्यस्य अन्यस्मात् लौकिकात् शास्त्रीयाद् वा वाक्यात्। शास्त्रीयेषु वाक्येषु न चकास्ति तत्सौन्दर्यं यत् स्वभावतः समुल्लसति काव्यवाक्येषु। लौकिकवाक्येष्वपि त एव भावा विचाराश्च व्यज्यन्ते विविधैर्वाक्यैः, तथापि न भवति सा रमणीयता या चेतश्चमत्कारमातन्वती स्वभावतः सर्वाः रूक्षताः दुरूहताः अन्यांश्चाशेषान् देशकालोद्भवान् विविधान् दोषान् निहन्ति, ये किल भावानां विचाराणाञ्च सुगमतामवरुन्धन्ति।

वाक्यैनैव शास्त्रकारा अपि भावान् विचारान् वा बोधयन्ति, किन्तु तेषां तानि रमणीयतापादकतत्त्वविरहितानि वाक्यानि न भवन्ति क्षमाणि सुखेन भावानामवगमने सर्वेषाम्। अन्यच्च, तानि भवन्ति शून्यानि अर्थरूपेण शब्दानां सौन्दर्येण च याभ्यामाकृष्टः श्रोता द्रष्टा वा स्वत एव भवति प्रवृत्तो वाक्यस्थानां भावानामवगतये। काव्य-वाक्येषु अर्थस्य रम्यता, शब्दस्य च मधुरिमा इत्येषा द्विविधा सम्पत् स्वत एव नानारूपेण शब्दार्थयोः तिष्ठति। अस्याः शक्तेः सम्पदो वा स्फुरणं जागरणं वा अलङ्काराणां विन्यासेन जायते। अत्र च कवेः प्रतिभैव प्राधा-

न्येन प्रथते । कविप्रतिभाया आनन्त्यादनन्ततां यान्त्यलङ्काराः । कविरेभिरलङ्कारै-र्भूषयति वाक्यानि । अतो वाक्यस्थाः शब्दा अर्था वा त्यजन्ति सर्वमेव रूढिग्रस्तं[1] ग्राम्यं समुदायात्मकं प्रयोगप्रवाहपतितं कालेनार्जितं च संस्कारं वार्तात्मकम्, गृह्णन्ति च सर्वथा नवीनां व्यावर्तिकां वैयक्तिकीमाकर्षिकां स्वभावोपेतां वक्रतया रसेन वाऽऽप्लुतामद्भुतां शक्तिं शब्दार्थयोः । अत एव तैरेवालपितैः शब्दैः अभिलषितैश्च अर्थैः कविर्मोहयति जगत् । यथा—

यानेव शब्दान् वयमालपामः यानेव चार्थान् वयमुल्लिखामः ।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्तः कवयो जयन्ति ॥[2]

एतदधस्तान्निर्दिष्टं काव्यवाक्यानां वैशिष्ट्यमुपरिष्टाद् वक्ष्यमाणानाम् अलङ्कारलक्षणानामाधारेणैव उपन्यस्तम् । यतः अलङ्कारा एव प्राधान्येन काव्यावाक्यानि लोक-वाक्येभ्यो व्यावर्तयन्ति, रसांश्च अलङ्कृतैर्वाच्यविशेषैः प्रकाशयन्ति । अत्र कतिपयान्युद्धरणानि समुपन्यस्यन्ते विविधाभ्य आलङ्कारिकाणां कृतिभ्यो येन प्रदर्शिता भावा सुबोध्या स्युः । यथा—

तत्-( रस )-प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलङ्काराः ।[3]
तथा च शब्दार्थयोर्विच्छित्तिरलङ्कारः ।[4]
चारुत्वं हि वैचित्र्यापरपर्यायं प्रकाशमानमलङ्कारः ।[5]
रसा वाच्यविशेषैरेव आक्षेप्तव्याः, तत्प्रतिपादकैश्च शब्दैस्तत्प्रतिपादिनो वाच्यविशेषा एव रूपकादयोऽलङ्काराः ।[6]

कवेरेतत् शब्दार्थयोरलङ्करणं प्रायः त्रिविधमेव भवति । यत्र च कविः स्वसरसया उक्त्या केवलं भावान् रसान् वा रसान्तराङ्गत्वेन अभिधत्ते, तत्र रसोक्तिरूपमलङ्करणमङ्गीक्रियते । अत्र शब्दार्थयोः प्राधान्येन माधुर्यौजःप्रसादाख्यान् त्रीन् गुणानेव आदधाति, येन रसस्राविभिः वर्णैः स्वत एव स्रवन्ति रसा अहमहमिकया । अत एवैषा उक्तिः आलङ्कारिकै रसोक्तिरिति उच्यते । एवमेव यदा कविः चमत्कारिवाच्यवैचित्र्यनिष्पत्तय एव सर्वथा वक्रतामाश्रयते विचाराणां वस्तूनां वा परिचये, तत्र वक्रोक्तिरभिधीयते आलङ्कारिकैः । अत्र कवेर्वाक्यं सर्वथा प्रसिद्धप्रस्थानानि परित्यज्य प्रवर्तते । अस्या उक्तेः समर्थकः कविः

---

१. उद्धृतः डा० वी० राघवन् , सम कन्सेप्ट्स आफअलङ्कारशास्त्र, पृष्ठ ५० ।

२. शिवलीलार्णवः, १.१३ ।

३. ध्वन्या०, पृ० ८७ । ४. व्यक्तिविवेक-टीका, पृ० ४ ।

५. व्यक्तिवि०, द्वि०, पृ० ८७ ।

६. ध्वन्या०, पृ० ८७ । एतानि डा० वी० राघवन् महोदयस्य 'सम कन्सेप्ट्स आफ अलङ्काराज्' ( पृ० ५० ) इत्यतो गृहीतानि ।

कुन्तकः स्वभावोक्ति-रसोक्त्यौ अलङ्कारताया विरोधिन्यौ मन्वानोऽलङ्कार्यकोटावेव परिगणयति । वक्रोक्तिं तु कविः अलङ्कारसीमानं प्रापयति । अतः साम्प्रतिका अलङ्काराः प्रायेण वक्रोक्त्यैव प्रभाविताः ।

अनया स्वभावोक्तेः रसोक्तेश्च क्षेत्रमधिकृतम्, एते निष्कासिते वा सर्वथा अलङ्कारक्षेत्रात् । अत एव मूर्धन्य आलङ्कारिको भामहः प्राह—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥[1]

यद्यपि रसोक्तेः स्वभावोक्तेश्च क्षेत्रं वक्रोक्त्या समाक्रान्तं प्रतीयते, तथापि अनयोः स्वभावसुलभं सरसं वा क्षेत्रं न कदापि तयाऽऽक्रमितुं शक्यते । यतो हि वक्रोक्तेरवसरस्तु तयोरभाव एव । यदा कविः स्वभावोपहतम् अरसं वा वेत्ति वस्तु, तदा वक्रोक्तिमवलम्बते चमत्कारापादनाय । अतो अविविक्तमेव क्षेत्रं स्वभावोक्ति-रसोक्त्योः ।

किमपि वस्तु स्वभावत एव भवति सुन्दरम् । किन्तु तस्य सुन्दरता समुदाये प्रवाहे ग्रामे व्याकुलतायां वा तिरोहीयते । एवंस्थिते तद्वस्तुन आत्मनो रूपं व्यावर्तयितुम्, अभिव्यञ्जयितुं वैयक्तिकतया प्रकाशयितुं वा न प्रभवति कविः । सूक्ष्मेक्षिकया स तत् समीक्षते, उद्धरति च सामुदायिकात् प्रवाहाद् ग्राम्याद् आकुलताया रूढिग्रस्ताच्च दोषात् । यथा आधुनिकाः चलच्चित्रसञ्चालकाः कामपि सुन्दरीं तारिकां ग्राम्यदोषदग्धां सामुदायिकैरन्यैर्वा विविधैर्दोषैर्व्याकुलां सूक्ष्मदृष्ट्या निरीक्ष्य तामुद्धृत्य च विविधैश्च स्वभावसंस्कारकैरलङ्कारैः अलङ्कृत्य सचेतसामाकर्षिकां जनमनोऽनुरञ्जिकां वा सम्पादयन्ति, तथैव कविरपि स्वभावोक्त्या वस्तु प्रसाधयति, अनाविलं चमत्कारपूर्णं च कुरुते । इदमेवालङ्करणम् आलङ्कारिकैः स्वभावोक्तिरुच्यते । इमां पूर्वोक्तां त्रिविधामुक्तिं समर्थयति भोजोऽपि—

स्वभावोक्ती रसोक्तिश्च वक्रोक्तिश्चेति वाङ्मयम् ।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥[2]

अत्र प्रस्तावानुसारं स्वभावोक्तिर्निरूप्यते । अवशिष्टे च वक्रोक्ति-रसोक्ती यथावसरमन्यत्र प्रपञ्चयिष्येते । प्रथमतो वयं स्वभावोक्तेः सङ्केतं बाणभट्टस्य हर्षचरिते उपलभामहे । यथा—

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ॥[3]

---

१. भामहः, काव्या २.८५ । २. रस० क०, ५.८ ।
३. हर्षचरितम् १.८ ।

अत्र अग्राम्या जातिः, स्फुटो रसो विकटाक्षरबन्धश्चेति शब्दैः तिस्र एव पूर्वोक्ताः उक्तयः सङ्केतिताः। एतासां तिसृणामुक्तीनामेकत्र प्रबन्धे कृत्स्नतया सत्ता सुदुर्लभा एव। किन्तु प्रबन्धेऽस्मिन् सर्वाः सामस्त्येन सन्तीति व्यतिरेको द्योत्यते बाणभट्टेन। अत्र तु अग्राम्या जातिरित्येव प्रकृततया प्रस्फुटं प्रसार्यते। अस्यैव मीमांसया आरभ्यते विचारो जातेः स्वभावोक्तेर्वा। जातिः स्वभावोक्तेः प्राचीनतमा आख्या। अत्र 'अग्राम्या' इति विशेषणं स्वभावोक्तेः स्वरूपं व्यावर्तयति। यतः कस्यापि वस्तुनो वर्णनं स्वभावतो ग्राम्यदोषोपहतं भवति। फलतस्तत्र साधारण्यम्, असौन्दर्यम्, अनाकर्षकत्वम्, अहृद्यत्वमित्यादयो दोषा आयान्ति। स्वभावोक्त्यैव ते दोषा अपाक्रियन्ते, चारुता चाऽऽनीयते तत्र। किमपि वस्तु निसर्गत एव समाकर्षकं भवति, परं काव्यसमर्पणाय तदपि चारुताम पेक्षते। यथा मण्यादयः खनितो निस्सारिता एव न पूर्णां शोभाम् असाधारणं सौन्दर्यं वा आवहन्ति, किन्तु शाणोल्लीढनेनैव।

काव्य-वस्तु-वर्णनं लौकिकाद् शास्त्रीयाद् वा वस्तुवर्णनाद् भिद्यते। लौकिके शास्त्रीये च वस्तुवर्णने वर्णयितुर्दृष्टिः प्राधान्येन वस्तुन्येव भवति। अतोऽत्रत्या वस्तुवर्णना केवलं वस्तुनस्तादृशं स्वरूपमभिव्यनक्ति, यद्भवति केवलं तस्य परिचायकं ज्ञानात्मकं वा। इदं वर्णनन्तु नग्नं खल्वाटं वा स्यात्। यतस्तत्र न भवति परिस्थितेः सन्दर्भस्य अन्येषां वा बहूनां वस्तुनः पूर्णतायाः कृत्स्नतायाः सुन्दरतायाश्च बोधकानां तत्त्वानां समावेशो येन संपृक्तं विक्रीयमाणं वस्तु स्वभावत एव आकर्षणकतामावहेत्। अत एतादृशं सन्दर्भादिसम्पन्नं कस्यापि वस्तुनो वर्णनं स्वभावोक्त्याऽऽस्कन्दितं भवति।

अन्यच्च, वर्णनेऽस्मिन् वस्तुनस्त एव धर्माः सङ्गृह्यन्ते ये सामान्यतया तथाविधे वस्तुसामान्ये सहृदयैरेवाऽनुभूयन्ते, दृश्यन्ते वा प्रत्यक्षतः। वर्णना च तेषां परिचयेन सह वस्तुनो जीवनसमुद्बोधस्य परिस्फुटतायाश्च समुन्मीलनं तेन तेन व्यापारेण सहैव करोति। एवं स्वभावोक्त्यलङ्कारेण परिष्वक्तं वस्तुवर्णनं सर्वथैव भिन्नं लौकिकात् शास्त्रीयाद् वा साधारणाद् वस्तुवर्णनात्।

अपरञ्च, लौकिकं शास्त्रीयं वा वस्तुवर्णनं वस्तुप्रधानमेव भवति। नहि तत्र कदापि देश-काल-सन्दर्भादिभेदाः संह्रियन्ते, तत्त्व एवाभिनिवेशात्। किन्तु वस्तुनः काव्यात्मके स्वभावोक्त्यात्मके वा वर्णने कवेः प्रतिभोन्मेषविशेषणबलाद् देश-कालजन्यानामशेषाणां साधनानाञ्च प्रभाववशात् सन्दर्भबलेन वा स्वभावोक्तेः संख्यातीताः भेदाः सम्भवन्ति। किन्तु तत्र सर्वथैवाऽङ्गीक्रियते स्वभावोक्ति-रालङ्कारिकैरिति विदितमेवास्ति समीक्षकाणाम्।

अत एव कालिदासादिभिः कृतं वन-नगरादीनां स्वाभाविकं वर्णनमतिशेते, अन्येषां पश्चाद्भवानां भारवि-माघादीनां च प्रकृतिवर्णनम्। प्रकृतेर्यादृशः स्वच्छः

स्वच्छन्दो वा स्वारसिकः स्वभावसुलभश्च प्रवाहः परिदृश्यते कालिदासादीनां रचनासु, तादृशस्तु दुर्लभ एव अन्येषां भारवि-माघादीनामलङ्कृतिबहुलासु कृतिषु। माघादीनां काव्येषु स्वभावोक्त्या न केवलं हता अन्तःप्रकृतिः, अपि तु सामान्या बाह्या प्रकृतिरपि पर्याप्तमस्ति पराभूता प्रतिकूलैस्तत्तत्सामयिकैः प्रभावैः। अतो द्वयोरेवानयोः भिन्नसमययोः कव्योश्च स्वभावोक्तिर्न कदापि कथमपि स्यात् समाना। हिन्दी-भाषाया आलोचकास्तु अहरह इदं तथ्यं स्थापयन्ति, कथयन्ति च सूरदासकृतं कृष्ण-स्वभाववर्णनमतिशेत एव अन्य-कविकृतात् कृष्णस्वभाववर्णनात्। एवं सूरस्य बालस्वभाववर्णनम् अतीव सूक्ष्मं सहृदयसंवेद्यं सरसञ्च तुलसीदासस्य अन्येषां वा कवीनां स्वभाववर्णनापेक्षया।

तस्मात् निर्गलितोऽयमर्थो यद् वस्तुवर्णनं लौकिकं शास्त्रीयं वा न तुलामारोहति काव्यस्य स्वभावोक्त्यलङ्कृत्या कृतस्य वस्तुवर्णनस्य। दण्डी यद्यपि 'शास्त्रेष्वस्याः साम्राज्यमि'त्यभ्युपगम्य अस्याः क्षेत्रं प्रससार, आपाततश्च काव्यशास्त्रवाक्ययो-रैक्यं समर्थयामास। किन्तु नात्र आलङ्कारिकाणां न च दण्डिनोऽपि सम्मतिः, सौन्दर्यस्य चमत्कृतेर्वा अलङ्कारबीजस्य शास्त्रवाक्येषु सर्वथा अभावात्। अतः स्वभावोक्तिरपि कविप्रतिभानिर्वर्तितत्वमपेक्षत एव। अन्यथा तस्या अलङ्कारतैव उच्छिद्येत। अस्य विस्तृतो विचारस्तु उपरिष्टात् करिष्यते। अत एव सर्वैरेवा-लङ्कारिकैः स्वभावोक्तिश्चार्वग्राम्यादिभिः विशेषणैः लोकशास्त्रवाक्येभ्यो व्यावर्ति।

भट्टनायकस्तु 'हृदयदर्पणे' काव्यस्य वैशिष्ट्यं वर्णयन्निदमतीव स्पष्टं करोति। स मनुते यद् काव्यस्य सर्वे एव विधयो भवन्ति भिन्नाः लोकात् शास्त्रीयाद् वा विधेः। यतः काव्ये प्रयुक्तानां शब्दानामर्थानां विलक्षणा एव भवति दृष्टिः शास्त्रीयात् लौकिकाद् वा विधेः। शास्त्रे शब्दानां प्राधान्यमङ्गी-क्रियते। आख्यानादिषु चार्थस्यैव प्राधान्यम्। अर्थाच्छास्त्रे केवलं शब्दा एव प्रयुज्यन्ते। तेषां शब्दानामेवाधारो भवति प्राधान्येन बोद्धॄणां पुरः। न किमपि अन्यतमं वस्तु भवति सहायकं बोधाय। अत एव बोद्धा विविधान् उपायान् अनुमानोपमादीन् आश्रयते अभिधायाः सहायतार्थम्। किन्तु काव्ये विचित्रैव व्याप्रियते अभिधा, यया विना अनायासमेव अशेषाः पदार्थाः स्वत एव चमत्कुर्वते चेतांसि सचेतसाम्। काव्ये भिन्ना भवति प्रक्रिया शब्दार्थयोः। न तत्र शास्त्रवत् प्रधानाः शब्दाः, न चाऽऽख्यानवत् वर्तन्ते प्रधाना अर्थाः, अपि तु तत्र व्यापारस्यैव भवति प्राधान्यम्। अत एवोक्तं हृदयदर्पणे—

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथक् विदुः।
अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः।
द्वयोर्गुणत्वे व्यापारप्रधाने काव्यगीर्भवेत्॥[1]

१. ध्वन्या०, लोच० सटी०, पृ० ८७।

इत्थं सुस्पष्टमेव यत् लौकिकवस्तुवर्णनात् काव्यात्मकं स्वभावोक्त्या चमत्कृतं वस्तु भिन्नमेव भवति। लौकिकं शास्त्रीयं वा वस्तुवर्णनं तत्त्वप्रधानम् ( Fidelity to facts only )। किन्तु स्वभावोक्ति-प्रसाधितवस्तुवर्णनं व्यापार-प्रधानम् ( Relating to actions only )। अतः काव्येषु स्वभावोक्तेः चमत्कारजनकत्वमसन्दिग्धमेव।

विद्यानाथो यथा—

**स्वभावोक्तिरसौ चारु यथावद् वस्तुवर्णनम्।**

अस्य लक्षणस्य व्याख्यां विदधता कुमारस्वामिना "चारु-विशेषणमप्यत्र अग्राम्यमेव पूर्वोक्तं विशेषणं पोषयति" इत्युक्तम्। आभ्यां चार्वग्राम्य-विशेषणाभ्यां स्वभावोक्तेः स्थापनायां न स्यात् कोऽपि विरोध आलङ्कारिकाणाम्। विविधैरालङ्कारिकैः समये समये यानि अलङ्काराणां लक्षणानि विहितानि, तानि अशेषाणि अनयोरेव चार्वग्राम्यविशेषणयोरेव अन्तर्भवितुं शक्नुवन्ति, आभ्यां वा गतार्थानि स्युः। अतः स्वभावोक्तिः प्रायः सर्वैरेवालङ्कारिकैः समर्थ्यते।

एतेन कुन्तकेन वक्रोक्तिजीविते कृतः स्वभावोक्तिविरोधोऽपि समाहितो भवति। यथा—

**स्वभावयुक्तमेव सर्वथा अभिधेयपदवीमवतरति इति शाकटिक-वाक्यानामपि सालङ्कारतां प्राप्नोति स्वभावयुक्तत्वेन।**[1]

दण्डिनः प्राक् प्रायः स्वभावोक्तिपर्याये जाति-शब्द एव प्रयुक्तः समुपलभ्यते। क्वचन स्वभाव-शब्दोऽपि अधिगम्यते। किन्तु जातिशब्दः प्रायेण स्वभावोक्तेः पर्यायरूपेण प्रयुक्तः। अयं जातिशब्दोऽतीव प्राचीनः। इदमनुमीयते यदेष शब्दो 'जायत इति जातिः' इत्यन्वर्थ एव प्रयुक्तः स्यात्। उचितमपीदं प्रतिभाति, यतः पदार्थाः जायमाना एव स्वेषां स्वभावानां ददति परिचयम्। प्रारम्भेऽयं केवलं जातिमूलकस्य पदार्थप्राणप्रदरूपस्य स्वभावस्यैव निर्देशमकरोत्। परन्तु क्रमशोऽलङ्कारदृष्टेर्विकासेन सह जाति-शब्दोऽप्ययं पर्याप्तं विस्तारमभजत्।

दण्डिनः काले तु जातिः स्वसङ्कुचितं जात्यात्मकं विषयं क्षेत्रं वा विहाय वस्तुनो जाति-गुण-क्रिया-द्रव्यात्मकं रूपमप्यादातुं समर्था बभूव। अत एव स कथयति—

**जातिक्रियागुण द्रव्यस्वभावाख्यानमीदृशम्।**
**स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्यथा॥**[2]

---

१. व०जी०, पृ० २४। २. दण्डी, काव्याद० २.८।

स्वाभिप्रायं समर्थयितुकामेनानेन उदाहृता अपि जातिः । यथा–

शुण्डैराताम्रकुटिलैः पक्षैः हरितकोमलैः ।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः ॥[१]

इत्थं स्पष्टमेव पश्यामो यज्जातिः स्वभावोक्तिर्वा प्रचुरं प्रसारं प्राप्ता उदाहृता चाऽऽलङ्कारिकाणां मान्यतां लभते । दण्डिकालतो न तिष्ठति मनागपि सन्देहः सचेतसां चेतसि अस्या अलङ्कारतायाः ।

यद्यपि भामहस्य ग्रन्थे न कुत्रापि स्पष्टा चर्चा समुपलभ्यते स्वभावोक्तेः, येन तत्परम्पराया अविच्छेदः संसूच्येत, स्याच्च सुगमता तस्या उत्तरोत्तरं विकशिताया वैज्ञानिकाध्ययने । अत एव केचन भामहस्यारुचिं तर्कयन्ति स्वभावोक्तेरलङ्कारतां प्रति । किन्तु तदीयस्य काव्यालङ्कारस्य पर्यालोचनेन सा स्फुटं समर्थयितुं शक्या । आलोडनस्य परम्परेयं न तथा स्तुत्या, यथा साक्षात् चर्चा । किन्तु तदनुपलब्धौ किं करोतु तपस्वी तटस्थ आलोचकः आलोडनं विहाय । विशेषतस्तस्मिन् युगे यदा अलङ्काराणां परम्परा प्रौढिमापन्ना नासीत्, नूनं योऽलङ्काररचनाया प्रारम्भकाल एवासीत् । तदा अलङ्काराणां सत्तायाः समर्थनाय बहव उपाया व्यवहृताः स्युः, येषु ग्रन्थस्य पर्यालोचनमपि आसीदन्यतमः श्रेष्ठ उपाय आलङ्कारिकसमाजे बद्धमूलः ।

स्वभावोक्तिविषये भामहस्य स्पष्टसङ्केतविरहेऽपि कतिपयानि विकीर्णानि तदीयवाक्यानि नूनं स्वभावोक्तिं समर्थयन्त्येव । काव्यविचारावसरे दोषान् निर्धारयन् स स्पष्टं स्वीकुरुते यद् दोषाः कवितायाः प्रतिबन्धकाः । दोषाणामभावे कविता-कामिनी स्वाभाविकं सौन्दर्यं पुष्णाति । दोषास्तस्य तिरोधायकाः । एतेन स्फुटमनुमीयते यद् भामहः स्वाभाविकं सौन्दर्यमपि स्वीकुरुते सङ्केतरूपेण, कामं तेन तस्याः स्पष्टो निर्देशो न कृतः स्यात् ।

तथापि कल्पनायामस्यामापत्तय आपतन्ति यासामुद्धारोऽवश्यं करणीयो भवेत् । ताश्चेमाः—यदाऽग्रे भामहस्य अलङ्कारविचारं विमृशामस्तदा स्वभावोक्तेरस्य आनुमानिकस्य आधारस्य दार्ढ्यापेक्षया प्रातिकूल्यमेव उपलभामहे । स हि स्वभावोक्तेः विपरीतां वक्रोक्तिमेव पुष्णाति । ततो भामहस्य विरोध एव प्रतीयते स्वभावोक्तिं प्रति, तेन केवलायाः वक्रोक्तेरेव समादरात् । यथा—

रूपकादिरलङ्कारस्तथाऽन्यै - र्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥[२]

---

१. तत्रैव २.९ ।

२. भामहः, काव्या० १.१३ ।

एतेन भामहः सर्वथा स्वीकरोति केवलं वक्रोक्तिमेव यां विना न कथमपि काव्यं काव्यं स्यात् । स्फुटं वदति सः—यथा सुन्दरमपि वनितामुखमलङ्कारं विना न शोभते, एवं वक्रोक्तिं विना काव्यमपि ।

केवलमिदमेव न, पूर्वकथनात् अत्र सर्वथैव विरोधोऽपि प्रतीयते । इत्थं वक्रोक्तिमेव अलङ्कारभूषणमङ्गीकृत्य भामहो वक्रोक्तिरहितान् अलङ्कारानेव न मनुते । यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनवधानतः ॥[1]

अर्थात् यत्र नास्ति वक्रता तत्र नास्त्येव अलङ्कारता, यथा हेतु-लेश-सूक्ष्मादीनाम्।

अग्रे च स इदमपि स्वीकुरुते यद् वक्रताया अभावे न काप्युक्तिरलङ्कारतां भजते, अपि तु वार्तामात्रमेव । यथा—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते ॥[2]

अर्थात् नेयं स्वभावोक्तिः, न वा जातिः, अपि तु ग्राम्याणां वार्तैव । यथा वाणो मनुते—समुदायाभिधानकथनं वा । स्वयं भामहः स्वीकुरुते नेयं स्वभावोक्तिरिति। स्वभावोक्तेस्तु ग्राम्यादिदोषरहितत्वेन स्वीकारात् ।

इत्थं स्वभावोक्तेरलङ्कारताविषये भामहस्य आपाततो विरोधे दृश्यमानेऽपि सूक्ष्मदृशा विचार्यमाणे सर्वस्यास्य ग्रन्थजातस्येदं तात्पर्यं यद् भामहदृष्ट्या यत्र साधारणं केवलं सूचनात्मकं ग्राम्यादिदोषयुक्तं वर्णनं तत्र वार्ता । यत्र च स्वाभाविकी वस्तुनः पूर्णपरिचयात्मिका वर्णना अभिव्यक्तिर्वा, तत्र स्वभावोक्तिः । इतोऽधिकायां वक्तृतायां वक्रोक्तिरिति । इत्थं भामहोऽपि समर्थयत्येव स्वभावोक्तिं सङ्केतरूपेण, न स्पष्टनिर्देशेन ।

इदं रहस्यमनाकलय्यैव समीक्षकेषु प्राप्यते महान् विवादो विषयेऽस्मिन् यद् भामहः स्वभावोक्तिं स्वीकुरुते न वा ? स्पष्टनिर्देशाभावे एवंविधा विमतयः स्वाभाविक्य एव । अत एव कतिपयेषां प्राचीनानामालङ्कारिकाणां स्वभावोक्तिसमर्थकानां सम्मतयः पूर्वं दीयन्ते, पश्चाच्च अन्येषामपि मतानि प्रपञ्चयिष्यन्ते ।

प्रथमं भामहस्य पश्चाद्वर्तिनो बहव आलङ्कारिका इदं मन्वते यद् भामहोऽङ्गीकुरुते स्वभावोक्तिम् । अतः स्पष्टनिर्देशाभावेऽपि वयमिदं स्वीकुर्मो यद् भामहस्य समर्थनं प्राप्नोति स्वभावोक्तिः । कुन्तको यो वक्रोक्तिं प्रस्थानरूपतां प्रापयत् , सोऽपि स्वभावोक्तेः खण्डनावसरे न क्वापि करोति सङ्केतं भामहस्य

---

१. भामह २.८६ । २. तत्रैव २. ८७ ।

स्वमतपुष्ट्यै। यदि भामहो न स्वीकारमकरिष्यत् स्वभावोक्तेस्तदा अवश्यमेव तस्योद्धरणमकरिष्यत् कुन्तकः स्वभावोक्तिनिरसनपूर्वकं स्वाभिमतवक्रोक्ति-स्थापनायै। कुन्तकस्यात्र मौनं सूचयति यत् स्वीकुरुते स्वभावोक्तिं भामहः। कुन्तकः स्वभावोक्तेः समर्थकान् पूर्वपक्षभूतान् बहून् चिरन्तनान् कीर्तयन् भामह-मपि तत्र गणयेदिति। यदि स्वल्पमपि भामहकृतं विरोधमधिगमिष्यत् कुन्तकस्तदा-ऽवश्यमेव स तस्य चर्चामकरिष्यत्। यतः कुन्तकस्यासीदतीव आवश्यकता स्वभावोक्तिनिराकरणपुरस्सरं नव्यस्य स्वसमुद्भावितस्य वक्रोक्तिप्रस्थानस्य समर्थनाय स्थापनायै वा। भामहसदृशस्य मान्यस्य आलङ्कारिकस्य स्वभावोक्तिनिराकरणं न कदापि विस्मृतं स्यात् कुन्तकेन। विशेषतस्तदा यदाऽयं परिचितोऽस्ति पूर्णतया भामहेन। अत इदं प्रतीयते यद् भामहः समर्थयते स्वभावोक्तिम्।

उद्भटस्तु स्वग्रन्थे ददाति स्वभावोक्तेः लक्षणमुदाहरणञ्च तेनैव अलङ्कारवर्णन-क्रमेण येन किल भामहः प्रादात्। यथा—

क्रियायां संप्रवृत्तस्य हेवाकानां निबन्धनम्।
कस्यचिद् मृगडिम्भादेः स्वभावोक्तिरुदाहृता॥
क्षणं नष्टार्धवलितः शृङ्गेणाग्रे क्षणं नुदन्।
लोलीकरोति प्रणयादिमामेष मृगार्भकः॥[1]

एतद्वर्णनमुद्भटस्य स्पष्टं प्रत्याययति यद् भामहेन स्वीकृता स्वभावोक्तिः।

भोजोऽपि स्वभावोक्तेरलङ्कारतामङ्गीकुरुते। अत एवायमर्थव्यक्तेः स्वभावोक्ते-र्भेदं कुर्वन्नस्या लक्षणोदाहरणे ददाति। यथा—

नानाऽवस्थासु जायन्ते यानि रूपाणि वस्तुनः।
स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते॥
अर्थव्यक्तेरियं भेदं इयत्ता परिपद्यते।
जायमानमियं वक्ति रूपं सा सार्वकालिकम्॥[2]

भोजः स्वपूर्ववर्तिना, विशेषतश्च भामहदण्ड्युद्भटादीनां मतानि सश्रद्ध-मविकलञ्च अङ्गीकुरुते। अतो भोजस्येदं वर्णनं द्रढयति यद् भामहोऽङ्गीकरोति स्वभावोक्तिम्। अतः स्वभावोक्तिर्मान्या भामहस्यापि इत्यत्र नास्ति संशीतिः।

इत्थं सर्वथा विपुलेषु साधनेषु स्वत्स्वपि केचन आधुनिका विचारका विश्वसन्ति यत् नास्ति अभिमता स्वभावोक्तिर्भामहस्य। एतेषु सन्ति प्रधानाः सु० कु० दे, ए० शङ्करमहोदयाः।[3] किन्तु एतेषां मतानि पूर्णं पर्यालोच्य डी० टी० तन्त्राचार्य शिरोमणिमहोदयैः कृताऽस्ति स्वभावोक्तेः पुष्टिः स्वकीये काव्यलक्षणमिति निबन्धे

१. उद्भट ३.८,९। २. ३. ४,५।
३. संस्कृत पोयटिक्स', बाइ : एस० के०, भा० २. पृ० ३९।

( A definition of Poetry ) ।[1] डा० राघव महोदयोऽपि इदमेव विस्तरेण द्रढयति स्वकीये ग्रन्थे ( Some Concepts of Alankar Shastra )। इत्थं सतीष्वपि विमतिषु प्रायो मान्यं मतं तु इदमेव सिद्ध्यति यत् भामहस्य स्वभावोक्तिः अभिमता इति ।

सु० कु० दे महोदयेन स्वीये समीक्षाशास्त्रे ( Poetics vol. II ) स्वभावोक्तेः स्वरूपं निर्णयता स्वीकृतमिदं यत्तादृशी स्वभावोक्तिर्नाभिमता भामह-कुन्तकयोः यादृशी किल दण्डिनः ।[2] अयन्तु दण्डिनं मनुते पक्षपातिनं स्वभावोक्तेः, न केवलं समर्थकम् । किन्तु दण्डी स्वभावोक्ति-वक्रोक्त्योरुभयोः समानमेव धत्ते श्रद्धाम्। भामहोऽपि न तथा विरोधी स्वभावोक्तेर्यथा कुन्तकः । यतो हि तेन विस्तरशः खण्डिता स्वभावोक्तिः । एतद्विपरीतं पुनः भामहेन अन्यालङ्कारवत् क्रमप्राप्तः स्वभावोक्त्यलङ्कारोऽपि तथैवाऽऽद्रियते, यथा अन्येऽलङ्काराः । अतोऽयं स्वीकुरुत एव स्वभावोक्ति-वक्रोक्ती समानादरेण । यथा—

स्वभावोक्तिरलङ्कार इति केचित् प्रचक्षते।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा ॥
आक्रोशन्नाह्वयन्नन्यानाधावन् मण्डलैर्नुदन् ।
गा वारयति दण्डेन डिम्भः शस्यावतारिणीः ॥[3]

इदं वर्णनमुपलभ्य बहव उद्घोषयन्ति यन्न स्वीकुरुते स्वयं भामहः स्वभावोक्तिम् । यतोऽयं 'केचित् प्रचक्षते' इत्येव वक्ति । किन्तु भामहस्य अलङ्कारवर्णनालोडनेन नैतदनुमानं मान्यतां याति । यतो हि यत्र भामहो न मन्यते कमपि अलङ्कारम्, तत्र स्पष्टमिदं स्वीकुरुते यत् 'नालङ्कारतया मतः' इति । यथा हेतुसूक्ष्मादीनामलङ्काराणां विचारप्रसङ्गे—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः ।[4]

अतोऽत्र स्वभावोक्तिप्रसङ्गे भामहस्य 'केचित् प्रचक्षते' इति कथनं तत्र तस्य आंशिकीं सम्मतिमेव प्रकटयति । एवञ्च स्वभावोक्तिरभिमता भामहवचनमालोचमानानां सचेतसामालङ्कारिकाणाम् ।

एवं विस्तरशो विचारिते स्पष्टमिदं यद् भामहोऽसंशयं स्वीकुरुते स्वभावोक्तिमलङ्काररूपेण, या किल वार्तामतिक्रम्य स्वल्पां वक्रतामप्यञ्चति । वक्रताधिक्ये च वक्रोक्तिरेव । अत एवायं समस्तं वाङ्मयं स्वभावोक्ति-वक्रोक्तिभेदेन द्विधा

---

१. 'सम कन्सेप्ट्स आफ अलङ्कारशास्त्र, पृ० १०१ ।
२. संस्कृत पोयटिक्स', भा० २. पृ० ६१ ।
३. भामहः, २. ९३, ९४ । ४. तत्रैव २. ८६ ।

विभजते। अयन्तु स्वभावोक्त्यतिरिक्तां सर्वामेवोक्तिं वक्रोक्तौ परिगणयति। रसोक्तिमपि तत्रैवाऽन्तर्भावयति सदैव।

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।

इति च निर्दिशति। इत्थं दण्डी स्वभावोक्ति-वक्रोक्ति-क्षेत्रयोः विविक्तं सीमानं निर्धारयति। किन्तु पश्चाद्भवैरालङ्कारिकैस्तां परित्यज्य सङ्गता मनोवैज्ञानिकी च समीक्षा क्रियते।

प्रथमं भोजेन वक्रोक्तिविवेचनां विधाय तत्र वक्रोक्ति-रसोक्त्याख्यो द्विविध विभागो विहितः। विभागेनानेन दण्डिना स्वीकृते वक्रोक्तिक्षेत्रे नायाति सङ्कोचः, यतो हि रसोक्तिस्ततो बहिर्भवति। अत एवायं त्रिविधामुक्तिं मनुते—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥[1]

तत्र उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिः। तत्रापि गुणप्राधान्ये स्वभावोक्तिः, विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तौ च रसोक्तिरिति। भोजेन स्वीकृतायाः अस्याः त्रिविधायाः उक्तेः विस्तृता मीमांसा डॉ० राघवन् महोदयेन श्रृङ्गारप्रकाशविषयकस्य शोधप्रबन्धस्य द्वितीयभागे उक्ति-विचारप्रकरणे कृता।[2]

अस्याः त्रिविधायाः उक्तेः पूर्णतया समर्थनं विधत्ते बहुरूपमिश्रोऽपि दशरूपकस्य स्वकीयदीपिकायाम्। 'साहित्यमीमांसा'ग्रन्थेऽपीदं समर्थ्यते। अपरे पुनः स्वभावोक्तिं 'ऋजूक्ति'-नाम्नाऽपि व्यपदिशन्ति।

स्वभावोक्तेः स्वरूपे तु आदित एवास्ति विवादः। किन्त्वस्याः समर्थकैः समुन्मीलितं रूपं वार्तायाः, अर्थव्यक्तेः वक्रोक्तेश्च सर्वथा व्यावृत्तम्। अस्याः वक्रोक्तेर्भेदस्तु पूर्वं सामान्यतया दर्शितः, अग्रे च यथावसरं विस्तरेण विचारयिष्यते। अत्र वार्ताया अर्थव्यक्त्याचास्या भेदो निरूप्यते—वार्ता-स्वभावोक्त्योराभासतः प्रतीयते समानता, यतो हि उभयत्रापि वस्तुनो वर्णनं याथातथ्येन क्रियते। तथापि वार्तावर्णनं भवति भिन्नं स्वभावोक्तिवर्णनात्। वार्तायां नास्ति अलङ्कारता, सौन्दर्यस्य वैचित्र्यस्य विच्छित्तेर्वा तत्राभावात्। यथा-'आक्रोशन्नाह्वयन्' इत्यादौ।

एवमनयोर्भेदस्तु स्थाने स्थाने आलङ्कारिकैः प्रकटित एव। विस्तरभियाऽत्र संक्षेपेणैव उपन्यस्तः। इदमपि सत्यं यत् कतिपयैरालङ्कारिकैः भट्ट्यादिभिः वार्ताऽपि अलङ्कारेषु परिगणिता, परं कालान्तरेऽलङ्कारताया विचारप्रवाहे ततः सा विलयं गता।

---

१. क स० क० ५.९।

२. डॉ० राघवन, 'भोजाज् श्रृङ्गार-प्रकाश' ग्रन्थे, पृ० ११३–११४।

तत्र प्रथमं भामहकृतां वार्ताचर्चामेव विचारयन्तु। यथा—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते॥

अत्र श्लोकस्य पूर्वांशं भामहो वार्तामेव मनुते, न काव्यम्। यतो हि वार्ता समुदायाभिधानात्मिकैव भवति। तत्र केवलं तत्त्वार्थकथनमात्रं वस्तुनो निर्विशेषरूपेण वा वर्णनं भवति। न च वक्रोक्तेरीषदपि स्पर्शः। अतो भामहदृष्ट्या वार्ता नालङ्कारव्यपदेशमर्हति। अलङ्कारस्वरूपनिष्पत्तये वस्तुनो विशिष्टं स्वाभाविकं वक्रोक्त्या च किञ्चिदास्कन्दितं वर्णनमपेक्षितं भवति। अन्यथा वार्तैव भवेत्सा, या लोकवार्ता शास्त्रवार्ता वा कथ्येत। अत्र न भवति कथमप्यलङ्कारता। एवं वार्ता सर्वथा भिन्ना स्वभाववर्णनात्मिकायाः स्वभावोक्तेर्जातेर्वा। चमत्कारापादकं सौन्दर्यसाधकं वा किमप्यतिशयाधायकं तत्त्वं तत्र नोपलभ्यते। इत्थं वस्तुनस्तत्त्वार्थकथनं वार्ता, अग्राम्यं पुष्टं चेतश्चमत्कारिवर्णनं च स्वभावोक्तिः। एवञ्च वार्तायाः पार्थक्यं सुस्पष्टम्। स्वभावोक्तेर्वक्रोक्तेश्च क्षेत्रं ततो नितरां व्यावृत्तम्।

यदा एवंविधं स्वभावोक्तेः व्यावृत्तक्षेत्रमतीत्य आलङ्कारिकाः सामान्यरूपेण वार्ता-स्वभावोक्त्योः प्रयोगं कुर्वन्ति, तदा जायते भ्रमः। एतादृशो भ्रमो वार्ता-स्वभावोक्त्योः विशेषतः संभवति। यथा दण्डी स्वभावोक्तिप्रसङ्गे **शास्त्रेष्वस्य साम्राज्यम्**[1] इत्युक्त्वा वार्तामेव स्वभावोक्तिं मनुते। यतः स न कदापि शास्त्रीयेषु लौकिकेषु च वस्तुवर्णनेषु स्वीक्रियते स्वभावोक्तिम्, अपि तु वार्तामेव। भट्टी तु मनुते। भट्टिकाव्ये समुपन्यस्तेन वार्तायाः उदाहरणेनेदं समर्थयितुं शक्यते। यथा—

विषधरनिलये निविष्टमूलं शिखरशतैः परिमृष्टदेवलोकम्।
घनविपुलनितम्बपूरितांशं फलकुसुमाञ्चित-वृक्षरम्यकुञ्जम्॥[2]

वार्ताया इदमुदाहरणं विचार्येदमनुमीयते यद् भामहात् प्राक् स्वभावोक्तिः, वार्ता जातिर्वा पर्यायरूपेणैव स्वीकृताऽऽलङ्कारिकैः। भट्टी वार्ताशब्देनैव व्यवहरति स्वभावोक्तिमपि, तत्र प्रायो जाति-स्वभावोक्ति-शब्दयोरभावात् वार्ताशब्दस्यैव प्रयोगात्। किन्तु भामहसमये क्रमशोऽलङ्कारदृष्टौ सूक्ष्मतामञ्चत्यां वक्रोक्तेः प्राधान्यमागतम्। फलतो वक्रोक्तिरेव अनुप्राणयितृतामाप अलङ्काराणाम्। तस्मान्न केवलं सर्वथा वक्रोक्तिविरहिता वस्तुकथनात्मिका वार्तैव, अपि त्वन्येऽपि वास्तवात्मका हेतु-सूक्ष्मादयोऽलङ्कारा अलङ्कारसम्प्रदायात् निष्कासिताः। एवं भामहकालोऽलङ्कारदृष्टेः स्वर्णकालः। यतो भामहेन उद्भाविता वक्रोक्तिः स्थायिनी अलङ्कारप्राणदा च बभूव। अतः परं प्रायः सर्वैरेव परवर्तिभिरालङ्कारिकैः

१. दण्डी २.९३। २. भट्टी० १.४५।

सेवितेयमसंख्यातान् कविप्रतिभानिर्वर्तितान् अलङ्कारान् ससर्ज। स्वभावोक्तिः रसोक्तिश्च अस्या एव प्रकारतां प्रापतुः।

एतेन चिरन्तनैर्भामहप्राग्भवैरालङ्कारिकैः सेविता वास्तवात्मिकी स्वभावोक्तिर्निरस्ता। केवलं वक्रोक्त्या ईषदञ्चिता सा स्वभावोक्तिरूपेणाऽगृह्यत। किन्तु दण्डिसमये पुनरपि स्वभावोक्तिः प्राक्तनं सामर्थ्यमाप, बभूव च विभागोऽलङ्काराणां स्वभावोक्ति-वक्रोक्तिभेदेन द्विविधः। अस्मिन् समये स्वभावोक्तेः क्षेत्रमभूत् स्वतन्त्रं प्रधानं वा, समाप्तिमभजद् वक्रोक्तेः प्रकारतात्मकं रूपम्। एवं दण्डिनः परं स्वभावोक्तिरक्षुण्णतामध्यगच्छत्। वक्रोक्तिवदस्या अपि प्रभावो बभूव व्यापकः, अलङ्काराणामन्तं यावत्सा तस्थौ च। कुन्तकसदृशाः कतिपये त्वस्याश्चक्रुर्विरोधम्, अधितस्थुश्च प्रचुरं प्रयासं पुनरपि वक्रोक्तिं प्रकर्षकाष्ठामधिरोहयितुम्। किन्तु नाभूवन् कृतकामाः। परिणामतश्च कुन्तकप्रयासो न प्रससार। न कोऽप्यालङ्कारिकोऽस्य समर्थको बभूव। एवमेव वक्रोक्ति-स्वभावोक्त्योर्विवादो ववृधे क्रमशोऽलङ्काराणां विकाशेन सह। सम्प्रत्यपि प्राय एतन्निबन्धन एवालङ्काराणां भवति विवादः।

अधुना वार्ताया अलङ्कारविषयकविवादव्याजेन पूर्वं निर्दिष्टस्य विचारस्य विधीयते समर्थनम्। यतो वार्ताया अलङ्कारताविचारो वक्रोक्ति-स्वभावोक्त्योर्विचारः। स्वभावोक्तेः समर्थका वार्ताया अलङ्कारत्वं समर्थयितुमुद्यताः, वक्रोक्तेश्चानुयायिनो विरोधाय। भट्टिकाव्यस्य जयमङ्गलाटीकायां स्वभावोक्ति-वक्रोक्त्यनुप्राणित एव विचारः समुपलभ्यते। अत्र निर्विशेषात्मकस्य वस्तुवर्णनस्य अलङ्कारता अंशतः स्वभावोक्त्या समर्थ्यते, विशेषात्मकस्य च वक्रोक्त्या। एवमस्य वार्तालङ्कारविमर्शस्य मूलं स्वभावोक्ति-वक्रोक्त्योर्विचार एव। तथापि जयमङ्गलाटीकाया व्याख्या विचित्रा, अतः साऽत्र प्रदर्श्यते।

भट्टिकाव्यस्य जयमङ्गलाख्यायां टीकायां वार्ताया अद्भुता व्याख्या समुपलभ्यते, या नान्यत्रालङ्कारग्रन्थेषु दृश्यते। यथा—

"वार्तेति तत्त्वकथनात्। सा विशिष्टा निर्विशिष्टा च। तत्र या पूर्वा सा स्वभावोक्तिरुदिता, यथा इयमेव। तथा चोक्तम्—

स्वभावोक्तिरलङ्कारः इति केचित् प्रचक्षते।
अर्थस्य तादवस्थ्ये च स्वभावोऽभिहितो यथा॥ (भामहः २.९३)

निर्विशिष्टा वार्तानाम अलङ्कारः। यथा—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादिकं काव्यं वार्तामेनां प्रचक्षते॥ (भामहः २.८७) इति।

अनेन सिद्ध्यति यत् भट्टिकाव्ये नास्ति स्वभावोक्तिः, अपि तु तस्याः स्थाने वार्तैव। किन्तु तत्र विन्यस्तं वार्तायाः स्वरूपं न कथमपि विरुद्धम्, अपि तु सर्वथा स्वभावोक्तेः संवादकम्। इत्थं नामतः एव भेदो न स्वरूपतः। अग्रेऽलङ्काराणां सूक्ष्मायां समीक्षायां सत्यां वार्ताया यत् निर्विशिष्टं स्वरूपं तत् त्यज्यते, गृह्यते च विशिष्टरूपमालङ्कारिकैः स्वभावोक्तिपदेन। यथा उपरिष्टादुपन्यस्तं भट्टिकाव्यस्य जयमङ्गलाटीकायाः उदाहरणनिर्देशप्रसङ्गे। अनेन सामान्यतो दर्शितेन पथा वार्तायाः स्वभावोक्तेश्च भेदः संसिद्ध्यति।

यदि च वार्ताया अलङ्कारत्वमभिमतम्—यथा प्राचीनानां केषाञ्चन भट्यादीनामालङ्कारिकाणाम्, तदेयमपि अलङ्कारकोटौ रक्षणीयैव। किन्तु तदा अस्या अन्तर्भावः स्वभावोक्तावेव येन केनापि रूपेण, न कथमपि वक्रोक्तौ, तत्र तस्याः सर्वथा स्पर्शाभावात्।

दण्डिनः काव्यादर्शे वार्तायाश्चर्चा यद्यप्यलङ्कारप्रकरणे स्वभावोक्तेः प्रसङ्गे नोपलभ्यते; तथापि कान्तिगुणवर्णनावसरे प्राप्यत एव। यथा—

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।
तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते॥[1]

अत्र स्पष्टतयैवेदं स्वीक्रियते यद् वार्ता अभिधेयात्मिका वर्णनात्मिका अपि भवति, यत्र कान्तिगुणस्य सद्भावः। किन्तु अत्रत्य-शब्दस्वारस्येनेदं द्योत्यते यद् वार्ता तथा नाभिमता दण्डिनः, यथा स्वभावोक्तिः। एष च कान्तिगुणो लौकिकार्थानतिक्रमे स्वाभाविके वा वर्णनेऽवतिष्ठते। अतोऽनेन प्रतीयते आभासतः साम्यं स्वभावोक्तेः। दण्डी वार्तामुदाहरत्यपि यथा—

गृहाणि नाम तान्येव तपोराशिर्भवादृशः।
संभावयति यान्येवं पावनैः पादपांशुभिः॥[2]

इदमुदाहरणं समीक्ष्याऽनुमीयते यत् सचेतसां समालोचकानां नेयं वार्ता अभिमताऽलङ्कारत्वेन दण्डिनः। अत्र तु वार्ता केवलं स्वागतसंभाषणम्, समागतस्य च मान्यस्यातिथेः प्रश्नोत्तररूपा प्रश्नपूर्विका संकथा वार्तालापो वा न कथमप्यलङ्कारः। अतो न कोऽप्यालङ्कारिकोऽग्रे वार्तायाः अलङ्कारतां समर्थयते।

वार्ताया लक्षणानि अन्यत्राऽपि दत्तानि, किन्तु नास्ति स्वीकृता प्रायोऽलङ्कारता तस्याः केनापि। यथा—'वार्तानाम अन्योन्यकथनम्' इति हृदयागमे। हेमचन्द्रोऽपि काव्यानुशासनस्य टीकायां प्राचीनानां गुणानां प्रस्तावावसरे कान्तिगुणप्रसङ्गे वार्तायाश्चर्चां विधत्ते। तत्र स्वीकुरुते च यद् दण्डिना वर्णितः कान्तिगुणो

१. दण्डी १.८५। २. तत्रैव १.८६।

वार्तायामन्तर्भवति। यथा दण्डिनः वार्ता-विचारे दर्शितं यत् हेमचन्द्रोऽपि काव्यानुशासने विधत्ते लक्षणं वार्ताया वर्णनायाश्च। यथा—'तत्र उपचारवर्णनं वार्ता, प्रशंसावचनं वर्णना' इति। एवं श्रीरङ्गभूपालेनापि स्वीये काव्यालङ्कारे 'वार्ता नाम कुशलसंकथा' इति लक्षणं कृतम्। सरस्वतीकण्ठाभरणस्य टीकायां रत्नेश्वरोऽपि 'अनामये प्रियालापे वार्ता वार्तेति कीर्त्यते' इति लक्षणं विधत्ते।

एभिः पूर्वविन्यस्तैः लक्षणैरिदं तु स्पष्टमेव यद् वार्ता सर्वथा भिन्ना स्वभावोक्तेः। वार्तायाः लक्षणानि सर्वाणि परीक्ष्येदं स्पष्टं भवति यत् यथा दण्डी वार्ताया अलङ्कारतामङ्गीकुरुते, न तथा कोऽप्यन्य आलङ्कारिकः। अतः स्वभावोक्तेरलङ्कारतां स्वीकुर्वद्भिरपि आलङ्कारिकैर्न समर्थ्यते प्रायो वार्ताया अलङ्कारता। अत एव तस्या लक्षणोदाहरणे नावाप्येते। एवं स्वभावोक्तेः न कथमप्यस्ति समता वार्तायाः, यतः स्वभावोक्तिरलङ्कारः, न च तथा वार्ता। सा तु केवलं प्रश्नपूर्विका कथा, उपचारवार्ता, इतिहासवर्णनम्, अनामयप्रियालापः, इत्यादिभिः विविधै रूपैः समुपलभ्यते। इयं वैचित्र्यस्य विच्छित्तेर्वा विरहात् न भजतेऽलङ्कारताम्।

सम्प्रति स्वभावोक्त्यर्थव्यक्त्योः विचारो विधीयते। स्वभावोक्त्यर्थव्यक्त्योरपि आभासतः साम्यं प्रतीयते। यत उभयत्रापिअर्थानां स्वभावस्य चोपलभ्यते वर्णनम्। स्वभावोक्तौ कविः वस्तूनामर्थानां वर्णनं याथातथ्येन, आकर्षकञ्च कुरुते। अतो वस्तूनि भजन्ते काममपि कमनीयताम्। वर्णनञ्च पुष्टमसमुदायाभिधायकमग्राम्यं चारु च भवति। एवं कविप्रतिभया प्रस्तुतात् स्वभावोक्तिप्रसाधिताद् वस्तुवर्णनाद् भिन्नमेव अर्थव्यक्त्यात्मकं वर्णनम्। अर्थव्यक्तौ स्वभावतः सम्पद्यमाना वस्तुविवृत्तिर्न कथमपि साम्यमञ्चति कविप्रतिभया स्वभावोक्त्यलङ्कारेण समुल्लासितया वस्तुविवृत्या। अत एव अर्थव्यक्तिः प्राचीनैः, विशेषतश्च वामनादिभिः आलङ्कारिकैर्गुणमध्ये गणिता, नालङ्कारे।

सम्प्रति कतिपयेषां प्राचीनार्वाचीनानाम् आलङ्कारिकाणां मतानि समुद्धृत्य अनयोर्भेदो विशदीक्रियते। यथा—

क्रियायां सम्प्रवृत्तस्य हेवाकानां निबन्धनम्।
कस्यचिन् मृगडिम्भादेः स्वभावोक्तिरुदाहृता॥
क्षणं नष्टार्धवलितः शृङ्गेणाग्रे क्षणं नुदन्।
लोलीकरोति प्रणयादिमामेष मृगार्भकः॥[1]

समुपन्यस्ताभ्यां लक्षणोदाहरणाभ्यामाभ्यां निसर्गत एव निर्धार्यते सीमितं स्वरूपं स्वभावोक्तेः। यतोऽत्र केवलं केषाञ्चन मृगडिम्भादीनामेव हेवाकस्य

१. उद्भट २. ८, ९।

औत्सुक्यस्य वा वर्णनं स्वभावोक्तिः स्वीकृता। किन्तु बालमृगादीनां क्रियायामेव, स्वभावोक्तेरेवंविधः सङ्कोचो नोचितः, अन्यत्रापि नदीपर्वतादीनां स्वभाववर्णने चारुतायाः सम्भवात्। एतस्यैव मतस्य समर्थनं विधत्तेऽस्य टीकाकारस्तिलकोऽपि स्वटीकायाम्—

**व्यापारप्रवृत्तस्य बालमृगादेः समुचितहेवाकनिबन्धनं स्वभावोक्तिर्न केवलं स्वभावमात्रकथनम्**[१] इति।

प्रतिहारेन्दुराजकृते लक्षणे पूर्वापेक्षया दृश्यते विस्तारः स्वभावोक्तौ। यतोऽयं हेवाकं व्यापकं गृह्णाति, न बालमृगादीनामेव। अनेन न केवलं व्यापारप्रवृत्तस्य बालमृगादेरेव, अपि तु सर्वेषां सर्वसाधारणानां स्वभावस्य। एवमत्र जायत आपेक्षिको विस्तारः स्वभावोक्तौ।

भोजस्योभयोरेव सरस्वतीकण्ठाभरण-शृङ्गारप्रकाशयोः स्वभावोक्तिलक्षणे समुपलभ्यते पर्याप्तो विस्तारः। अत्रैवेयं स्वभावोक्तिः पूर्वापेक्षया व्यापकतरं क्षेत्रमुपलभते स्वचरमं सीमानमधिरोहति च। यथा—

नानावस्थासु जायन्ते यानि रूपाणि वस्तुनः।
स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते॥

स्वभावोक्तेर्जातेर्वा लक्षणेऽस्मिन् वस्तुनः स्वभावस्य वास्तविकं वर्णनमुपलभ्यते, यत्र स्वभावस्य सर्वाङ्गसुन्दरचित्रणं स्फुटतामेति। तस्माद् वस्तुनो यद् व्यावर्तकं नैसर्गिकं सर्वाङ्गपरिपूर्णं चमत्काराञ्चिताङ्कनं तत्स्वभावोक्तेः क्षेत्रम्, तदन्यद् वार्ताऽर्थव्यक्त्योः। एवमुपस्कारकत्वे वैचित्र्ये वा वार्ताऽर्थव्यक्त्योः स्वभावोक्तौ अन्तर्भावः सुशकः। अन्यथा तयोः क्रमशः स्वलक्षणानुसारं वा वास्तविकं वार्तात्मकत्वं गुणत्वं वा सुस्थमेव।

एवमेभिरुपरिदत्तैः विविधैर्लक्षणैः स्वभावोक्तेः सङ्गतं क्षेत्रं सम्यक् व्यावृत्तम्। किन्तु दर्पणकारोऽपि स्वभावोक्त्यर्थव्यक्त्योरभेदमाकलयन्निदमेव मतं समर्थयते। अत एव वामनप्रदत्तान् दश शब्दगुणान् दश चार्थगुणान् खण्डयन् स्वभावोक्त्यैव अर्थव्यक्तिगुणं गतार्थयते। यथा—

अर्थव्यक्तिः स्वभावोक्त्यालङ्कारेण तथा पुनः।[२]

इति वस्तुस्वरूप-स्वभावादिस्वरूपाणां साकल्येन स्पष्टं प्रतीयमानत्वरूपकथनात्मिकाऽर्थव्यक्तिर्न कथमपि भिन्ना स्वभावोक्तेः। उदाहरणलक्षणादिभिः स्फुटीभवन्नेष एवार्थो नैषधकारस्य श्लोकेन समर्थ्यते—

---

१. भा० सा०, द्वितीयभागतः, पृ० ३४९।

२. सा० द० (लक्ष्मीटीका), प० ८, श्लो० १५।

**अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः।**
**स तिर्यगावर्तितकन्धरः शिरः पिधाय पक्षेण रतिक्लमालसः॥[१]**

अत्र रतिक्लमालसस्य हंसरूपस्यार्थस्य स्फुटत्वेन प्रतीयमानत्वादर्थव्यक्तिः। किन्त्वेषा स्फुटा हंसरूपस्यार्थस्य विशिष्टस्वभावरूपार्थव्यक्तिर्न कथमपि स्वभावोक्तेर्भिन्ना। तथापि बहव इमां स्वभावोक्तेर्भिन्नां कल्पयन्ति। त इदं कथयन्ति यद् यावान् भेदो गुणालङ्कारयोस्तावानेव भेदः स्वभावोक्त्यर्थव्यक्त्योरङ्गीकरणीय एव। अतः स्थायिधर्मात्मिका अर्थव्यक्तिर्गुणरूपा भिन्नैव अस्थिरधर्मात्मिकायाः अलङ्काररूपायाः स्वभावोक्तेः। कतिपये तु न केवलं गुणालङ्कारकृतमेव भेदं मन्वन् तेऽनयोः, अपि तु केवलमलङ्कारकृतमेव, उभयत्र विच्छित्तेर्भिन्नत्वात्। यथा—

**अर्थव्यक्तिरिमं भेदं नियता प्रतिपद्यते।**
**जायमानमियं वक्ति रूपं सा सार्वकालिकम्॥**

अत्र भोजो मनुते यदर्थव्यक्तौ वस्तुनः स्वरूपं सार्वकालिकं स्थाय्यपरिवर्तनशीलमनव्यं वा। स्वभावोक्तौ तु जायमानं क्षणे परिवर्तमानात्मकमस्थायि नव्यमागन्तुकं नैमित्तिकं वा। इदं सर्वं प्रतिभाप्रसूततया सङ्गतमेव, विच्छित्तिवैचित्र्यस्य अलङ्कारप्रयोजकत्वात्। अत एव रत्नेश्वरोऽपीदमेव समर्थयते। यथा—

**वस्तुस्वरूपोल्लेखनाऽर्थव्यक्तिरर्थगुणेषु युक्ता। तत्र सार्वकालिकं रूपम्। अत्र तु जायमानमागन्तुकनिमित्तं समवधानप्रभवं व्यभिचरितमित्यर्थः।**

इदमनुमीयते यद् भोज-रत्नेश्वरयोर्मतमिदं तेषां सिद्धान्तेन प्रभावितम्, ये च प्रबन्धगुणाद् भाविकात् स्वभावोक्तेर्भेदप्रदर्शने दक्षतां दर्शयन्ति। अन्यथा अर्थव्यक्तिस्वभावोक्त्योरेष यो भेद उपरिदर्शितः, स न सङ्गच्छते। यतो हि पूर्वैः पश्चाद्भवैर्वा बहुभिर्मान्यैरालङ्कारिकैः एतयोरैक्यमेव समर्थितम्। अनयोरभेददर्शनस्येयं दृष्टिरग्रेऽपि वैयर्थ्यमेति। अलङ्कारविषये अग्निपुराणेऽपि भेदात्मकं रूपमग्रे प्रसार्यते। यथा—

**स्वभाव एव भावानां स्वरूपमभिधीयते।**
**निजमागन्तुकञ्चेति द्विविधं तदुदाहृतम्।**
**सांसिद्धिकं निजं नैमित्तिकमागन्तुकं तथा॥[२]**

अग्निपुराणकारो लक्षणमिदमुपन्यस्य स्पष्टयति यत् स्वभावमात्रस्य चित्रणं स्वभावोक्तौ भवति। तत् सांसिद्धिकं निजम्, आगन्तुकं नैमित्तिकं वा। किन्तु

१. नैषधम्, सर्गः १, श्लो० १२१।
२. अ० पु०, अ० ३४४।

नेत्थं मतं भोजस्य। सन् तु सांसिद्धके स्वभावाङ्कनम् अर्थव्यक्तिमङ्गीकुरुते, नैमित्तिके आगन्तुके वा चित्रणे स्वभावोक्तिम्। एवं स्वभावोक्तौ भोजस्य मतमतीव महत्त्वपूर्णमस्ति। अनेन सरस्वतीकण्ठाभरणे यत् लक्षणमुपन्यस्तं स्वभावोक्तेर्जातेर्वा तेन स्वभावोक्तेः स्वरूपं स्पष्टतामेति। किन्तु इतोऽपि सूक्ष्मः सारगर्भितश्चोपन्यासः शृङ्गारप्रकाशे, यत्रोक्तीनां त्रैविध्यं समर्थितम्।

यद्यपि दण्डिना स्वभावोक्ति-वक्रोक्तिभेदेन वाङ्मयं द्विधा विभज्य उक्तिद्वयं स्वीकृतम्, किन्त्वत्र भोजो वक्रोक्तौ मग्नां रसोक्तिमुद्धृत्य एकं स्वतन्त्रमेव रूपमुपस्थापयति। अत्र त्रिविधामुक्तिं स्वीकृत्य एतासां तिसृणां स्वतन्त्रं व्यावृत्तं स्वरूपमप्युन्मीलितम्। लक्षणान्यपि सन्ति कृतानि, यैः एतासामुक्तिनामवबोधे सारल्यमापद्यते। यथा—

**तत्र उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिः, सोऽपि गुणप्राधान्ये स्वभावोक्तिः विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तीः रसोक्तिः।**[1]

एतस्यैव मतस्य सरस्वतीकण्ठाभरणेऽपि उल्लेखो यथा—

**वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।**
**सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥**[2]

भोजस्येदं स्वभावोक्तिविषयकं मतं विचारमर्हति। यतो हि अत्र स्वीक्रियते यद् यथा रसोक्तिं रसै रसवदाद्यलङ्कारैरलङ्कृता भवति। वक्रोक्तिश्च उपमादिभिरन्यैर्वा अलङ्कारैरलङ्करणतां भजते, तथैव स्वभावोक्तिरपि गुणैः भवति भूषिता। अस्य मतस्य वक्रोक्तिरसोक्तिसम्बन्धिनो विचारस्तु तयोर्विचारावसरे एव मीमांसयिष्यते। किन्तु स्वभावोक्तिविषयको विचारस्तु प्रकरणप्राप्तत्वात् मीमांस्य एव। यतो हि 'गुणप्राधान्ये स्वभावोक्तिरलङ्कार' इति कथनमेव न सङ्गतम्; यन्मूलकं प्राधान्यं तन्मूलकस्यैव व्यपदेशस्य न्याय्यत्वात्। यदि चात्र गुणाः सन्ति प्रधानास्तदा कथं न तैरेव व्यपदेशं विधाय त्यज्यते स्वभावोक्तिरलङ्कारस्य मोहः। यथा रसस्य प्राधान्ये नेष्टा अलङ्कारता रसानाम्, एवं गुणप्राधान्येऽपि नालङ्कारता भवेत् इष्टा स्वभावोक्तेः। किन्तु अत्र विमर्शविस्तारापेक्षया भोजस्यैव मतं पर्यालोचनीयं येन प्रकाश्येत उपरिदर्शितानामुद्धरणनामभिप्रायः, विशेषतश्च 'गुणप्राधान्ये स्वभावोक्तिरि'त्यस्य। तथा च राघवेन्द्रमहोदयैः शृङ्गारप्रकाशस्योपरि लिखितः शोधप्रबन्धोऽप्यवलोकनीयो यत्र विस्तरेण विहित एतद्विषयको विचारः।

साम्प्रतं स्वभावोक्तेरत्र विचारोपसंहार इदं स्पष्टमेव यद् अस्याः स्वभावोक्तेरलङ्कारतावादिनां संख्या अतिशेते, न विरोधिनाम्। अतः स्वभावोक्ते-

---

१. शृ० प्र०, भाग २, अ० ११, पृ० ३७२ (उद्धृतम्—'सम कन्से० अलङ्कारशास्त्र'तः)।

२. स० क० ५.८।

रलङ्कारता विवादापेता। कुन्तक एव एतादृशो यो न सहतेऽलङ्कारतां स्वभावोक्तेः, यतोऽसौ अनुमनुते विरहिणीं अलङ्कारतां वस्तुवर्णने। केवलं वस्तुवर्णनं तु अयं काव्यशरीरमेव मनुते। तदतिरिक्तं तत्सौन्दर्यसाधकं पुनरलङ्कारं प्रचक्षते। एवं कुन्तकदृष्ट्या वस्तुवर्णनं किलाऽलङ्कार्यकोटावेव समायाति, नालङ्कारकोटौ। यदि च वक्रतारहितं शुद्धं वस्तुवर्णनमेव कोऽपि अलङ्कारत्वेन स्वीकर्तुं साग्रहः स्यात्, तदाऽपि स्वभावोक्तेः अलङ्कारता असम्भविनी, आत्मनः स्कन्धे एवात्मनः आरोहणकल्पत्वात्तस्याः। एतावति विरोधेऽपि नाशक्नोत् कुन्तकोऽवरोद्धुं स्वभावोक्तेः अलङ्काराणामादित एवाविच्छिन्नां प्रवहन्तीमलङ्कारतामान्यताम्। अपि तु सोऽपि समयतो बभूव बाध्यः स्वीकर्तुमस्या अलङ्कारतां प्रकारान्तरेण। फलतः स इत्थं समुपन्यस्यति यत् यदि किञ्चिद्वस्तुवर्णनं सातिशयत्वेन समर्प्यमाणं सद् औचितीमशेषतोऽधिगत्य मुख्यतया अलङ्कार्यतां भजदपि सौन्दर्याधिक्याद् अलङ्कारत्वेन अनुभूयते।

**यदि वा प्रस्तुतौचित्यमाहात्म्यात् मुख्यतया भावस्वभावः सातिशयत्वेन वर्ण्यमानः स्वमहिम्ना भूषणान्तरासहिष्णुः स्वयमेव शोभातिशयशालित्वाद् अलङ्कार्योऽपि अलङ्करण-मित्यभिधीयते तदा अयमास्माकीन एव पक्षः।**[1]

कुन्तको यद्यपि प्राधान्येन भामहमेवाऽनुसरति प्रायः सर्वत्र अलङ्कारविचारे; तथापि स्वभावोक्तिविषये तत्परित्यजत्यनुसरणम्। अतः कतिपये आशङ्कन्ते यन्नाभिमता स्वभावोक्तिर्भामहस्य। प्राचीनैः प्रायः सर्वैरालङ्कारिकैः जातिनाम्ना, केनापि च वार्तानाम्नाऽपि अस्याः (स्वभावोक्तेः) स्वीकृता अलङ्कारतेति दर्शितं विस्तरेण उपरिष्टात्। किन्तु कुन्तक एवास्याः विशिष्टो विरोधी, यो हि न कथमपि मनुते यद्वस्तुवर्णनं भावस्वभावो वा स्याद् अलङ्कारः। यतो हि तत्र कोऽपि स्पर्शो नास्ति वक्रोक्त्याः। अस्य वक्रोक्तिव्यवच्छिन्ना अलङ्कारताऽभिमता। परं न भामहवत् सामान्या वक्रोक्तिः, अपि तु प्रकर्षकाष्ठाधिरोहिण्येव। अत एव बहवः स्वभावोक्ति-रसोक्तिमूलका अलङ्काराः वक्रतायाः स्पर्शाद् भामहेन स्वीकृता अपि न लभन्ते मान्यतां कुन्तकस्य, प्रकर्षकाष्ठाधिरोहिण्या वक्रोक्तेरभावात्। यदि च वस्तु-स्वभावोऽलङ्कार्योऽपि वक्रतां विनाऽपि परं प्रस्तुतौचित्यं प्राप्य स्वत एव सातिशयां शोभां गतोऽलङ्कारतां गच्छति, तदापि कुन्तकः आत्म-पक्षस्यैव समर्थनं मन्यमानो वक्रोक्तिमुखेनैव स्वभावोक्तेः स्वीकारं विधत्ते न्यायालङ्कारिकवद् वक्रोक्तिं विहाय। फलतः कुन्तकस्य वक्रोक्तेर्दृष्टिर्न केवलं स्वभावोक्ति रसोक्तिपोषकयोः दण्डिभोजावेव अतिशेते, अपि तु भामहमपि यः स्वीक्रियते

१. व० जी०, पृ० १३९।

प्रधानप्रवर्तको वक्रोक्तेरलङ्कारशास्त्रे। एवं कुन्तकस्य वक्रता न केवलमलङ्कारान्, अपि तु सर्वाण्येव काव्यशोभाकराणि तत्त्वान्यन्तर्भावयति, मान्यं ध्वनिप्रपञ्चमन्तर्भावयितुमेवास्याः सर्जना कुन्तकेन कृतेति। कुन्तकस्य पश्चाद्वर्ती व्यक्तिविवेककारो महिमभट्टो व्यक्तिविवेके पञ्च काव्यदोषान् वर्णयति। तत्रैव पञ्चसु दोषेषु अवाच्यवचन-नाम्नो दोषस्यापि चर्चामारचयति सः। अस्य लक्षणं कुर्वाणो महिमभट्ट इदं मनुते यदयं दोषस्तत्रैव भवति, यत्र कविः कस्यापि वस्तुनो वर्णनमिच्छन् तान्येव विशेषणानि उपादत्ते यानि स्वरूपसिद्धानि, ग्राम्याणि स्वरूपानुवादैकफलानि वा, न कथमपि वस्तुनः साक्षात्कारताया आपादकानि भवन्ति। एवंविधानि विशेषणानि निस्साराणि केवलं वस्तुनः स्मारकाणि च कवेः प्रतिभोद्भवं भावं नाभिव्यञ्जयन्ति। अतो व्यर्थ एव एवंविधानां विशेषणानां प्रयोगः अवाच्यवचन-दोषग्रस्तो भवतीत्यभ्युपेयम्। यथा—

यदा स्वरूपानुवादैकफलं फल्गु विशेषणम्।
अप्रत्यक्षायमाणार्थं स्मृतमप्रतिभोद्भवम्॥
तदवाच्यमिति ज्ञेयं वचनं तस्य दूषणम्।
तद् वृत्तपूरणायैव न कवित्वाय कल्पते॥[1]

अस्यैव अवाच्यवचनदोषस्य मीमांसां कुर्वाणेन महिमभट्टेन द्विविधः प्रोक्तो वस्तुस्वभावः—सामान्यात्मको विशेषात्मकश्च। अत्र च सामान्यात्मको वस्तुस्वभावः निर्विकल्पकविधिना ज्ञातो न काव्यालङ्कारस्य विषयः, न वा प्रत्यक्षायमाणतां भजते। कवेः प्रतिभाप्रसारोऽपि न तत्र जायते। तादृशस्य वस्तुनां सामान्यस्वभावस्य परिचयस्तु केवलं शब्दप्राधान्याश्रितानां न्यायादिशास्त्राणामेव विषयः, न कदापि काव्यस्य यत्रालङ्कारमाध्यमेन जातो वस्तुनो विशेषस्वभावो वर्ण्यमानः क्षणे क्षणे नवतामुपचीयमानः कवेः प्रतिभाप्रसारमपेक्षते। एवं वस्तुनः सामान्यस्वभाव-बोधकानि व्यर्थानि विशेषणाण्येव अवाच्यावचनदोषस्य विषयतां व्रजन्ति, विशेषस्वभावस्य च प्रत्यक्षायमाणवत्। प्रातिपदिकानि तु स्वभावोक्त्यलङ्कारस्य विषयाणि भवन्ति, न तत्र जायते कथमपि स्पर्शोऽवाच्यवचनदोषस्य। कविप्रतिभासंरम्भगोचरतायास्तत्र सत्त्वात्। एवं महिमभट्टो दोषविशेषस्य स्थापनाव्याजेन समर्थयतेऽलङ्कारतां स्वभावोक्तेः, करोति च खण्डनं कुन्तकेन कृतस्य स्वभावोक्तेरलङ्कारताया विरोधस्य। यथा—

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।
वस्तु तद्रहितं यस्मात् निरुपाख्यं प्रसज्यते॥[2]

वस्तुन इदमेव सामान्यस्वभाववर्णनं बाणो[3] जाति-विचार-ग्राम्यदोषग्रस्तं

---

१. व्य० वि०, पृ० २७९। २. व० जी० १.१२। ३. हर्षचरितम्।

मनुते। रुद्रटोऽपि स्वभावोक्तिविचारे अपुष्टात्मकत्वमङ्गीकरोति।[1]

एवं वस्तुनः स्वभावोक्तिप्रवणं वर्णनं न सुलभम्। विरला एव महाकवयोऽत्र सफलतां व्रजन्ति। एतदर्थं कवेः सूक्ष्मा समीक्षा-दृष्टिः अपेक्ष्यते। यतो हि कस्यापि वस्तुनो वर्णने केवलं तस्य स्वभाव एव वर्ण्यो भवति, न कथमपि वस्तु। स्वभावविरहितं वर्णनं तु निरूपयितुमेव न शक्यम्। अतो बाध्याः कवयः स्वभाववर्णने पराभवन्ति। यदि च ते सामान्ये मज्जन्तं वस्तुनो विशिष्टं स्वभावं स्वसूक्ष्मया दृष्ट्या निभाल्य उद्धरन्ति, तदा भवन्ति कृतकार्याः प्रतिभोद्भवस्य भावस्य प्रसारे। अन्यथा ते दोषास्तान् कवीन् सामान्यभावप्रकाशन एव व्याकुलयन्ति। सामान्यस्वभावप्रकाशनमेतद् अग्राम्याऽपुष्टाऽवाच्यवचनादिभिः दोषैर्दुष्टं न कदापि काव्यपदवीमवतरति। अधुना तस्यैव उपर्युक्तस्य मीमांसितस्य सिद्धान्तस्य पोषणार्थं व्यक्तिविवेककारस्य पङ्क्तय एताः समुद्धरणीयाः—

कथं तर्हि स्वभावोक्तेरलङ्कारत्वमिष्यते।
न स्वभावमात्रोक्तौ विशेषः कश्चनाऽनयोः॥
उच्यते वस्तुनस्तावद् द्वैरूप्यमिह विद्यते।
तत्रैकमत्र सामान्यं यद् विकल्पैकगोचरः॥
स एव सर्वशब्दानां विशेषः परिकीर्तितः।
अत एवाभिधेयं ते सामान्यं बोधयन्त्यलम्॥
विशिष्टमस्य यद्रूपं तत् प्रत्यक्षस्य गोचरम्।
स एव सत्कविगिरां गोचरः प्रतिभाभुवाम्॥
सा हि चक्षुर्भगवतः तृतीयमिति गीयते।
येन साक्षात्करोत्येष भावांस्त्रैलोक्यवर्तिनः॥
इत्यादि प्रतिभातत्त्वमस्माभिरुपपादितम्।
शास्त्रे तत्त्वोक्तिकोशाख्य इति नेह प्रपञ्चितम्॥
अर्थस्वभावस्योक्तिर्या सालङ्कारतया मता।
यतः साक्षादिवाभान्ति तत्रार्थाः प्रतिभार्पिताः॥
सामान्यस्तु स्वभावो यः सोऽन्यालङ्कारगोचरः।
श्लिष्टमर्थमलङ्कर्तुमन्यथा को हि शक्नुयात्॥
वस्तुमात्रानुवादस्तु पूरणैकफलो मतः।
अर्थदोषः स दोषज्ञैरपुष्ट इति गीयते॥[2]

अस्यैव उपरिदर्शितस्य स्वभावोक्तिसमर्थनस्य हेमचन्द्र-माणिक्यचन्द्रावपि स्वटीकायां पुष्टिं कुरुतः—"कविप्रतिभया निर्विकल्पकप्रत्यक्षकल्पया विषयीकृता वस्तुस्वभावा यत्रोपवर्ण्यन्ते, स जातेर्विषयः।" एवञ्च—

१. रुद्रटः, का० अ० ८.१० । २. व्य० वि० २.१३–१६ ।

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवतिष्ठते ॥[1]

इति यत्कञ्चित् प्रतिपादितं तन्निरस्तमेव।

**तस्माद् वस्तुनो हि सामान्यस्वभावो लौकिकः, अर्थोऽलङ्कार्यः। कविप्रतिभासंरम्भविशेषविषयस्तु लोकोत्तरार्थोऽलङ्करणमिति।**[2] तथा चाह

**इह वस्तुस्वभाववर्णनमात्रं नालङ्कारः तत्त्वे सर्वं काव्यमलङ्कारः स्यात्। तस्मात् सामान्यस्वभावोऽलौकिकोऽर्थोऽलङ्कार्यः। कविप्रतिभा-गोचरस्तु अत एव तन्निमित्तस्य स्वभावस्योक्तिरलङ्कारः।**[3]

स्वभावोक्तेः समर्थनविषये महिमभट्टेन निरूपितोऽयं वस्तुनः सामान्यविशेषात्मकः स्वभावस्य भेदो न सर्वथा काल्पनिकः, अपि तु दर्शनशास्त्रे विशेषतश्च न्यायशास्त्रे प्रसिद्ध एव। तत्र सामान्यस्वभावो 'निर्विकल्प'शब्देन व्यपदिश्यते, विशेषश्च 'सविकल्पक'नाम्ना। एवमत्र यो हि सविकल्पकनामा विशिष्टः स्वभावः, स एव कवि-प्रतिभागोचरतां गतः स्वभावोक्त्यलङ्कारस्य विषयः, सामान्यश्च अलङ्कार्य एव। अतः सामान्यस्वभावो न भवति विषयः काव्यस्य, केवलं विशिष्ट एव सत्कविगिरां गोचरतामितः काव्यव्यपदेशमाप्नुते। वस्तुनः सामान्यस्वभावस्तु कार्यकारणात्मकैर्विविधैस्तत्र तत्र दर्शनेषु प्रसिद्धैः प्रमाणैः प्रायस्तैरेव विज्ञैः नियमतो ज्ञायते, ये सन्ति पटवः प्रमाणपरिपाटीषु विविधासु। आभिश्च प्रमाणपद्धतिभिः परिचीयमानो वस्तुनः सामान्यस्वभावो न केवलं शब्द-द्वारा, प्रत्युत प्रत्यक्षानुमानाभ्यामपि ज्ञायते। किन्तु वस्तुनो हि यो विशेषः स्वभावः, स तु केवलं सूक्ष्मेक्षिकया त्रैलोक्यवर्तिनो भावान् साक्षात्कुर्वतां केषाञ्चन रस-सिद्धानां प्रत्यक्षतां प्रतिपद्यते। एते च कवयः रमणीयार्थप्रतिपादनार्थं तथा तत्साक्षात्कृतं वस्तुनो विशेषस्वभावं वर्णयन्ति, यथा न कथमपि हीयते वर्धते वा वस्तुस्वभावः, अपि तु स्वभावमहिम्नैव सर्वेषां साक्षात्कारतामश्नुते। इत्थं स्वभावोक्तेरलङ्कारताविषये प्रायः सर्व एव विरोधिनः पक्षाः निराकृताः।

एतावति विस्तृते विचारेऽपि यदि न शान्तिमेति कुन्तकेन समुत्थापितो विरोधः; तदा तु सहृदया एव प्रमाणम्। यतो हि कुन्तकस्तु वस्तुनो विशेषं स्वभावमेव काव्यस्य विषयं मनुते, न कथमपि सामान्यस्वभावम्। स तु दर्शनशास्त्रस्य विषयः। अतो यदि विशेषस्वभाव एव वस्तुनः काव्ये वर्णनीयो भवति, तदा तु तत् काव्यशरीरमेव, न कथमपि काव्यालङ्करणम्। इदमेव उदाहरणेन विशदीक्रियते। यथा—

---

१. व० जी०, पृ० २३।  २. हेमचन्द्रः, काव्यानु०, पृ० २७५।
३. माणिक्यचन्द्रकृता काव्यप्रकाश-सङ्केतव्याख्या, पृ० ४०३।

अनुत्कृष्टधर्मयुक्तस्य वर्णनीयस्य अलङ्करणमपि असमुचितभित्तिभागोल्लिखिताऽऽलेख्यवत् न शोभातिशयकारितामावहति। यस्मादत्यन्तरमणीयस्वाभाविकधर्मयुक्तं वर्णनीयं वस्तु परिग्रहणीयम्।[1]

एवञ्च अयमेव निष्कर्षो भवति यत् सुन्दर एवार्थः काव्ये ग्राह्यो नासुन्दरः।

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥[2]

अतो विशिष्टस्वभाववर्णनैव काव्ये मान्या, न कथमपि सामान्यस्वभावाङ्कना। यतो हि कुन्तकेन अनिवार्यतया स्वीकृता वक्रता काव्ये विशिष्टस्वभाववर्णनायां सत्यामेवाऽऽयाति, न कदापि सामान्यस्वभावाङ्कनायाम्, तस्याश्च दर्शनादिशास्त्राणामेव विषयत्वात्।

अत एव सचेतसः समीक्षका वस्तुनः सामान्यस्वभावं वर्ण्यकोटौ स्थापयन्ति, विशिष्टस्वभावं पुनरलङ्करणकोटौ। स च स्वभावो वस्तुनि निसर्गतो न भवति व्यक्तः, किन्तु प्रक्रान्तदृष्टिसम्पन्नैः महाकविभिः प्रतिभाप्रयासेन उन्मील्यते। एवमेवैतैः कविभिः प्रतिभाप्रसूतैः वस्तुनो विशिष्टस्वभावैरुपचीयमाना स्वभावोक्तिः सर्वेषां स्वभावोक्तिमूलकानामलङ्काराणां मूलम्। अत एवास्या विस्तृतो विहितो विमर्शः। स्वभावोक्तिधाराविचारे प्रायः सर्वं एव प्रश्नाः समाहिताः, ये चास्या विरोधे सम्भाव्यन्ते। केवलं कतिपयेऽलङ्कारा आपाततोऽनया साम्यं भजमानाः प्रतीयन्ते। तेषामपि संक्षिप्ता समालोचनाऽनिवार्येति कृत्वा इतः परं सोऽपि विचारः संक्षेपेण आरभ्यते।

एतावत्पर्यन्तं स्वभावोक्तेर्विचारे केवलमस्याः प्राधान्येन वक्रोक्तेरेव भेदो दर्शितः। किन्त्वन्ये येऽलङ्काराः वक्रोक्तिप्रस्थाने रसोक्तिप्रस्थाने वाऽन्तर्भूताः मन्यन्ते, तेभ्योऽप्यस्याः भेदो दर्शनीयो यदि तेऽस्यामापाततः समाविशेयुः। स्वभावोक्तौ आपाततो रसोक्तेः समावेशः प्रतीयते। यतो हि यथा वस्तुनः स्वभावस्य वर्णनं स्फुटतया प्रत्यक्षतया याथार्थ्येन चापेक्ष्यते स्वभावोक्तौ, तथा रसोक्तावपि। अत एव स्वभावोक्तेः प्रतीतिर्न साधारणतो भिद्यते रसोक्तेः। रसप्रतीतौ यथा प्राधान्येन प्रसादगुणोऽपेक्ष्यते, तथैव स्वभावोक्तावपि। एवमनयोः समावेशः स्वभावत एवैकत्र संभाव्यते। अतो दण्डी स्वभावोक्ति-वक्रोक्तिभेदेन द्विविधमेव मनुते वाङ्मयम्।

एतेन स्पष्टमिदं यत् स्वभावोक्तौ वक्रोक्तौ वा भवेत् समावेशो रसोक्तेः, उभयोर्वा। यतो हि आभ्यामतिरिक्ता रसोक्तिर्नाभिमता दण्डिनः। किन्तु कुत्र

१. व० जी० पृ० १२५। २. तत्रैव, १.९

स्यात् समावेशो रसोक्तेरित्यस्य निर्णयो नातीव सरलः। प्रत्येकस्यां द्वयोर्वा समावेशो रसोक्तेः सम्भाव्यते ?

वस्तुतः स्वाभाविके वर्णनेऽपि आनन्दाकारा जायते चित्तवृत्तिः वक्रता-सम्पन्नेऽपि। अतः केवलायां स्वभावोक्तौ वक्रोक्तौ वा रसोक्तेः समावेशे नालोक्यते आपाततः कापि बाधा। किन्तु विचारे कृते वक्रोक्त्यपेक्षया स्वभावोक्तावेव समाश्रिता रसोक्तिर्वास्तविकीं कमनीयतां प्राप्नोति। चित्तस्य या तिस्रोऽवस्थाः सामान्यतो रसोक्तौ स्वीक्रियन्ते, तासां साक्षात्कारस्तु केवलं स्वभावोक्तावेव, न तु वक्रोक्तौ। यतो हि वक्रोक्तौ बुद्धेर्व्यापारः प्राधान्येन प्रथते, श्लेषादिना काक्वादिना वा अस्या अनुप्राणितत्वात्। अतो वक्रोक्तौ रसोक्तेः समावेशो न सम्भाव्यते, अपि तु स्वभावोक्तौ। अतः प्रथमं स्वभावोक्तेः रसोक्तेरेव प्रस्तूयते भेदः।

स्वभावोक्तिक्षेत्रं तु लौकिकवस्तुगत-सूक्ष्मधर्मस्वभावस्य यथावद्वर्णनपर्यन्तं भवति। यदा कविः किमपि लौकिकं वस्तु विलोक्य तस्मिन् वर्तमानान् विविधान् कविप्रतिभामात्रवेद्यान् दुरूहान् विशिष्टान् स्वभावान् समीक्षते, तांश्च यथावद् वर्णयति, तदा भवति स्वभावोक्त्यलङ्कारः। अतो यत्र वस्तुभावः सर्वथा लौकिको ग्राम्यश्च वर्ण्यते, तत्र नेष्टेयं स्वभावोक्तिरालङ्कारिकाणां कविप्रतिभयाऽप्रतीतस्यार्थस्य वर्णनीयतया चारुताया अभावात्।

गोरपत्यं बलीवर्दो घासमत्ति मुखेन सः।
मूत्रं मुञ्चति शिश्नेन अपानेन च गोमयम्॥[1]

इत्यादौ नाभिमता स्वभावोक्तिः, विच्छित्तेरभावात्; अपि तु केवलं वार्तैव। स्वभावोक्तेरुदाहरणं यथा—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः,
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥[2]

अत्र कविप्रतिभावेद्यो हरिणस्वभावो यथावद् वर्ण्यते। अतः स्वभावोक्तेः स्फुटता पराकाष्ठामधिरोहति। तथा च भयानकरसोऽपि रथाधिरूढेन दुष्यन्तेन आलम्बनविभावेन रथानुपतन-शरपतनाद्युद्दीपनविभावैः ग्रीवाभङ्गार्धावलीढशष्प-पतनशरीरसङ्कोचादिभिरनुभावैः त्रास-शङ्काऽऽवेगादिभिर्व्यभिचारिभिः कम्पादिभिः सात्त्विकभावैश्च निष्पन्नः सहृदयहृदयमधिरोहति। अत्र गम्योत्प्रेक्षा-काव्यलिङ्गा-दयोऽर्थालङ्काराः छेकवृत्तिश्रुत्यादयः शब्दालङ्कारा अपि दृश्यन्ते। किन्तु स्वभावोक्तेः प्राधान्यात् तस्या एव साम्राज्यम्। काव्यलिङ्गमपि यदा स्फुटं स्वीक्रियते, तदा

१. रुद्रट ८.१० (नमि साधु-व्याख्यातः)। २. शाकु० १.७।

अनया सह स्वभावोक्तेरङ्गाङ्गिभावरूपः सङ्करः स्वीकार्यः। तथापि अङ्गिन्याः स्वभावोक्तेः स्फुटतयैव सामान्येन जायते व्यपदेशः।

अत्र यथा हरिणस्य विविधाः स्वभावाः कविप्रतिभोद्भासिताः स्वभावोक्त्या वर्णितास्तथैव हरिणे वर्तमानो भयानकभावोऽपि वर्णितः सहृदयैः विभावानुभावसञ्चारिसात्त्विकयोगात् स्थायितां प्राप्तः रसत्वेनानुभूयते। एवं स्वभावोक्तिरसोक्त्योश्च क्षेत्रे नात्र पार्थक्यं याति, द्वाभ्यामेवाभ्यां हरिणस्वभावस्यैव चित्रणात्। यद्यप्यत्र नवीनालङ्कारिकमतेन नेष्टा रसोक्तिः, रसस्याप्राधान्ये एव तस्याः स्वीकारात्; अत्र च भयानकस्य प्राधान्यात् अलङ्कारताया अभावाच्च। किन्तु प्राचीनानां नये अलङ्कारस्यैव प्राधान्येन अस्या अपि रसस्वरूपत्वेन अलङ्कारत्वेनैवेष्टत्वात् सिद्धैव अलङ्कारता। ध्वनिकारादीनां मतेऽपि न कथमपि भयानकरसस्याऽलङ्कारता समर्थयितुं शक्यते।

> प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
> काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥

इति नयेन रसस्य रसान्तराणामङ्गत्वे एव रसालङ्कारतया अङ्गीकारात्। किन्तु वस्तुचित्तवृत्तिरूपात्मकभेदभिन्नेन स्वभावेनानुप्राणितयोः स्वभावोक्ति-रसोक्त्योः भेदप्रदर्शनायैव रसप्रधानोऽप्ययं श्लोक उदाहृतः।

वस्तुतस्तु कश्चनान्य एव श्लोकः सहृदयैरूह्यो यत्र भवेत् सर्वमान्या रसोक्तिः स्वभावोक्तिसंवलिता। अन्यथा प्राचीनाऽर्वाचीनालङ्कारिकमतेन समर्थिता रसोक्तिधारैव विघटेत्। अतोऽत्रत्यो भेदविचारस्तु केवलं वस्तु-चित्तवृत्तिभेदेन भिन्नस्य द्विविधस्य भावस्य विचार एव ज्ञेयः। वस्तुरूपात्मको भावः स्वभावोक्तौ उपलभ्यते, चित्तवृत्त्यात्मकश्च प्रधाने रसे रसोक्तौ वा।

रसत्वेऽपि भयानकस्य स्वभावोक्त्या वर्णितात् हरिणस्वभावात् भयेनानीतादस्य स्वभावात् भेदो दर्शनीय एव। अन्यथा एतयोरुभयोरुक्त्योः एतादृशस्थले स्वतन्त्रता संदिग्धा स्यात्। आभ्यां प्रतिपाद्यस्यार्थस्य ऐक्ये एतयोर्भेदस्य अकिञ्चित्करत्वात्। अत आभ्यां प्रतिपाद्याऽर्थे प्रदर्श्यते भेदः।

यद्यपि स्वभावोक्तावपि यथा वस्तुनः स्वभावो वर्ण्यते, तथैव रसोक्तावपि। किन्तु एतयोः स्वभाववर्णनं न कथमपि आत्यन्तिकीमेकतामावहति, तयोर्लक्ष्यभेदेन स्वभाववर्णनेऽपि भेदस्यानिवार्यत्वात्। यद्यपि स्वभावोक्त्या वस्तुनो विशिष्टः कविप्रतिभावेद्यः स्वभाव एव वर्ण्यते, किन्तु तत्र लक्ष्यभूतं वस्त्वेव भवति, न कथमपि वस्तुजन्यो भावो यस्य वर्णनार्थमपेक्षिता रसोक्तिः। रसोक्तेः लक्ष्यं भवति वस्तुजन्यो भाव एव, न कथमपि वस्तु। एवं स्वभावोक्तिः विविधस्वभावसम्पन्नं वस्तु एव लक्ष्यं कुरुते। रसोक्तिश्च केवलं वस्तुजन्यं भावम्। एवं स्वभावोक्तिरसोक्त्योर्यद्यपि हृदयसंवादमात्रेण सामान्यतः प्रतीयतेऽभेदः, किन्तु हृदय-

संवादस्य वस्तु-चित्तवृत्तिगतत्वेन द्विविधत्वाद् भविष्यत्येव भेदोऽनयोः। यतः स्वभावोक्तौ भवति केवलं वस्तुसंवादो रसोक्तौ च चित्तवृत्तिरूपः। एवं स्वभावोक्ति-रसोक्त्योः स्पष्टो भेदः। यदि चाधुनिक्या हिन्दीभाषायाः शब्दावल्या निवेद्येत तदा इदं कथनीयं यत् स्वभावोक्तौ भवति मूर्तविधानं ( Mental Image ) रसोक्तौ च भावविधानम् ( Imotiand Image )। अलङ्कारसर्वस्वस्य विमर्शिनी-टीकाऽपि इदमेव समर्थयते। न च हृदयसंवादमात्रेण स्वभावोक्तिरसवदलङ्कारयो-रभेदः, वस्तुसंवादरूपत्वात्स्वभावोक्तेः, चित्तवृत्तिसमाधिरूपत्वाच रसवदलङ्कारस्य।

**हृदयसंवादो हि वस्तुचित्तवृत्तिगतत्वेन द्विविधः।**
**तत्र स्वभावोक्तौ वस्तुसंवादः प्रदर्शितः। इति।**

एवं संक्षेपेण प्रदर्शितो भेदो रसोक्तेः स्वभावोक्तेश्च। सम्प्रतीदं विचार्यते यत् कथं स्वभावोक्तिः अलङ्कारविशेषरूपाऽपि अलङ्कारसामान्यवचनतामेति। यथा विरोधमूलकेषु सर्वेषु विभावनाविशेषोक्त्यसङ्गत्यादिषु अनुप्राणयितृतया स्थितोऽपि सामान्यवचनो विरोधो न स्वालङ्कारविशेषतां विजहाति, न चोपमा औपम्यगर्भेषु रूपक-समासोक्त्यपह्नुत्यादिषु अनुस्यूतापि नैजामलङ्कारविशेषवचनतां मुञ्चति। तथैव यथावसरं सूक्ष्मानुमानादिषु अलङ्कारविशेषेषु गर्भत्वेन वर्तमानाऽपि स्वभावोक्तिरात्मनः प्रातिस्विकतां न परित्यजति। अतोऽलङ्कारविशेषवचनाऽपि स्वभावोक्तिः स्वभावोक्तिगर्भेषु बहुषु सारोत्तर-यथासंख्य-हेत्वादिषु प्राणप्रदत्वेन असंशयमवतिष्ठत इति।

सामान्यतया स्वभावोक्तेः क्षेत्रं रसोक्ति-वक्रोक्तिभ्यां व्यावर्त्य निःसन्दिग्धतया निःशेषेण निर्देशयितुमसुकरम्, लोकातिक्रान्तगोचरताया वक्रोक्तेः रसोक्ति-वक्रोक्त्योरिव अत्रापि वर्तमानत्वात्; अभावे चास्याः स्वभावोक्तेरप्यलङ्कारताया अभावात्, **कोऽलङ्कारोऽनया विना** इति भामहोक्तेः, सर्वैरालङ्कारिकैः स्वीकाराच्च। किन्तु अलङ्कारप्रस्थानस्य समुद्भावितासु तिसृषु धारासु ( Schools ) स्वभावोक्तिरपि अन्यतमेत्यस्या अपि व्यावृत्तं प्रातिस्विकं रूपं निर्धार्यमेव। अतो विस्तरेण स्वभावोक्तिधारानिरूपणप्रसङ्गेऽस्मिन् स्वभावोक्तेः रूपं समुपन्यस्तम्। अत्रास्या अलङ्कारविशेषवचनतया सह सामान्यवचनताऽपि साधिता।

अनेन विमर्शेनेदं स्पष्टं यत् कथमलङ्कारविशेषवचनापि स्वभावोक्तिरनेकेषु स्वभावोक्तिगर्भेष्वलङ्कारेषु अनुस्यूतेति। स्वभावोक्तेरस्मिन् व्यावृत्तरूपे दण्डि-मतस्यैव प्राधान्येनास्ति समर्थनम्। यतोऽयमेव प्रवर्तकोऽस्याः स्वभावोक्ति-धारायाः। भामहसमये तु वक्रोक्तेः प्रकाररूपतामेव प्राप्नोति स्वभावोक्तिः, न स्वतन्त्रां सत्तां वक्रोक्त्यनालीढाम्। वक्रोक्तेर्व्यापकतां फलतश्च काव्यजीवितत्वं समर्थयन् कुन्तकस्तु न सहते स्वभावोक्तेरत्र प्रकारत्वमपि। अत एवायं स्वभावोक्ते-रलङ्कारतामपि निषेधति। कुन्तकस्यैतन्मतं नात्राभिमतम्। विरोध्यपीदं महदुप-

करोति प्रस्थानविमर्शम्, विशेषतश्च स्वभावोक्तिधारानिरूपणमिति बुद्ध्या विस्तरेणात्र समुपन्यस्तम्।

## स्वभावोक्तिमूलका अलङ्काराः

### १. दीपकम्

दीप इव दीपकम्, संज्ञायां कन् प्रत्ययः। यथा एकस्थ एव दीपः पार्श्वस्थान् अशेषान् पदार्थान् प्रकाशयति, एवमेक एव विशिष्टो गुण एकस्मिन् वाक्ये वर्तमानोऽन्यत्र वाक्ये वर्तमानान् पदार्थान् दीपयति। केषाञ्चन विश्वासोऽयं दीपकमेकस्मिन्नेव वाक्ये भवति, न बहुवाक्ये। अत एव ते वदन्ति यत् काव्यप्रकाशे 'एकस्थ' इति पठितः शब्दो वाक्यैकदेशस्थमेवार्थं प्रत्याययति। एवमेव 'समस्तवाक्यम्' इति शब्दः समस्तमेव वाक्यं बोधयति, नैकदेशम्। एतद्विवरणाय रसगङ्गाधरो[1] द्रष्टव्यः।

दीपकस्यास्य लक्षणं मम्मटभट्टेन एवं कृतम्—

सकृद्वृत्तिस्तु धर्मस्य प्रकृताऽप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम्॥[2]

प्रकृतं प्राकरणिकमुपमेयम्, अप्रकृतमप्राकरणिकमुपमानम्। तदात्मनां तद्रूपाणां धर्मिणां धर्मस्य क्रियादिरूपस्य सकृद्वृत्तिः एकवारमेव उपादानं यत् तदेकं दीपकम्। बह्वीषु क्रियासु सतीषु कारकस्य कर्मादिकारकमध्ये कस्याप्येकस्य सैव सकृद्वृत्तिः द्वितीयं दीपकमिति। एवं क्रियादीपकम्, कारकदीपकमिति भेदेन दीपकं द्विविधम्। उदाहरणम्—

कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम्।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम्॥[3]

अत्र वर्णनीयत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेन अप्रकृतानां कृपणधनादीनां च स्पर्शनक्रियारूपसाधारणधर्मस्य सकृदुपादानात् क्रियादीपकम्।

श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः॥[4]

अत्र श्यामलत्वं साधारणो धर्मः। भुवश्चेति चकारेण पूर्ववाक्यगतस्य श्यामला इति गुणवाचकपदस्य परामर्श इति गुणदीपकम्।

---

१. र० गं०, पृ० २३३। २. का० प्र० (वामनीसहिता), पृ० ६३९।
३. का० प्र० ( नागेशीसहिता ), पृ० २२७।
४. का० प्र० (वा० टी०), पृ० ६४०।

कारकस्य बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकं यथा—

स्विद्यति कूणति वेल्लति विचलति निमीषति विलोकयति तिर्यक्।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणीतावधूः शयने॥[1]

अत्रापि अनेकासु क्रियासु एकस्य वधूरिति कारकस्य सकृदुपादानात् कारक-दीपकम्। अत्र सर्वासां क्रियाणां प्रकृतत्वमेव। इदं दीपकं स्वभावोक्ति-मूलकेषु अलङ्कारेषु पठ्यते।

अत्र किं स्वाभाविकं तत्त्वं यदाश्रित्य अलङ्कारोऽयं गण्यते स्वभावोक्तौ, न तु तुल्ययोगितादय ईदृशस्वभावा इति विचार्यते। तत्र प्रथममिदमेव विचार्यं यदत्र प्रकृताप्रकृतयोरस्ति एकधर्मकृतं गम्यौपम्यं न वा ? यदि गम्यौपम्यं न स्वीक्रियते, सादृश्यरहितावेव प्रकृताप्रकृतौ दीपकवद् एकेन धर्मेण प्रकाश्येते, तदा त्वस्य स्वभावोक्तौ गणने न कापि बाधा। यथा च अनुमान-समुच्चयादयोऽलङ्काराः सादृश्यशून्या अपि कविप्रतिभानिवर्तितत्वात् स्वस्वाभाविक्यैव विच्छित्या स्वभावोक्तौ अन्तर्भाव्यन्ते, तथाऽयमपीति। गम्यौपम्यस्य स्वीकार एव बाधा, रूपकोत्प्रेक्षादिवदस्य वक्रोक्तौ अन्तर्भावस्यौचित्यात्। अस्य गम्यौपम्यत्वविषये नास्ति ऐक्यमत्यमालङ्कारिकाणाम्। केचन स्वीकुर्वते गम्यौपम्यत्वमत्र व्यापारे।[2] अन्ये पुनः मौनमासते।[3]

अयं चातीव प्राचीनतमोऽलङ्कारः, भरतेनापि चतुर्षु (उपमा-रूपक-यमक-दीपकेषु) अस्य स्वीकारात्। भामह-दण्डि-रुद्रट-भोज-विश्वनाथदयोऽत्र गम्यौपम्य-विषये मौनमासते। तेषामयं मौनभावो गम्यौपम्यस्य निषेधमेवात्र निर्दिशति। अत एषां मते दीपकस्य स्वभावोक्तौ गणनायां न बाधा। किन्तु उद्भट-वामन-रुय्यक-विद्याधर-विद्यानाथ जगन्नाथादयस्तु दीपके गम्यौपम्यमनिवार्यमेव मन्वते।

यो हि अनुपदमत्र काव्यप्रकाशकृतो मम्मटस्य द्विविधः प्रकारो दर्शितो दीपकस्य, तत्र प्रथमे प्रकारेऽस्ति औपम्यं प्रकृताप्रकृतयोः स्पार्शनरूपं गम्यम्। द्वितीये पुनर्नास्ति बह्वीषु क्रियासु एकधर्मकृतमौपम्यम्। तयोरुदाहरणाभ्यामेव एतन् सुस्पष्टम्। पण्डितराजो जगन्नाथः काव्यप्रकाशकर्तुः खण्डनं करोति। यथा—

किञ्च दीपक-तुल्ययोगित्वादौ गम्यमानमौपम्यं जीवातुरिति सर्वेषां सम्मतम्। न चात्र (मम्मटोदाहरणे) स्वेदन-कूणनादीनाम् एककारकान्वितानामपि औपम्यं कविसंरम्भ-गोचरम्। तस्मात् समुच्चयालङ्कारच्छायाऽत्र उचिता।[4]

---

१. का० प्र० (नागे०), पृ० ३७८। २. उद्भट-वामन-जगन्नाथादयः।
३. भामह-दण्डि-विश्वनाथादयः। ४. र० ग०, पृ० ३२६।

पण्डितराजस्तु 'तुल्ययोगितातो न दीपकं पृथग्भावमर्हति'[1] इत्यपि कथयति, धर्मसकृद्वृत्तिमूलाया विच्छितेरभावात्, विच्छित्तिवैलक्षण्यस्यैव अलङ्कारविभागहेतुत्वाच्च। एवञ्च प्राचीनानां तुल्ययोगितातो दीपकस्य पृथगलङ्कारमाचक्षणानां दुराग्रहमात्रम्। अतस्तुल्ययोगितायाः प्रकारविशेष एव दीपकम्। किन्तु अलङ्कारकौस्तुभकारो विश्वेश्वर इतो विपरीतमेव मनुते। स तु कथयति यत् 'प्राचीनोऽलङ्कारो दीपकम्, अतोऽस्यैव भेदभूता भवेत् तुल्ययोगिता, न पुनर्दीपकं तुल्ययोगितायाः भेद' इति।

किन्तु अलङ्काराणां यथास्थितिं पालयद्भिरस्माभिः किञ्चिदेतादृशं पार्थक्यं मीमांस्यमेव येन दीपकं स्वभावोक्तौ परिगण्येत, न तुल्ययोगिता। अतः इदं कथयितुं शक्यते यद् 'दीपके वास्तवं गम्यौपम्यम्, उपमानोपमेययोः प्रकृताप्रकृतरूपयोस्तत्र सत्त्वात्। तुल्ययोगितायां तु तद् वैवक्षिकम्, उपमानोपमेयस्वरूपभावात्।'[2] अतोऽस्य वास्तवौपम्यबोधकतया स्वभावोक्तौ गणना निर्बाधैव, न तथा तुल्ययोगितायाः, तदीयौपम्यस्य वैवक्षिकत्वेन अवास्तविकत्वात्, वक्रोक्तावेव गणनाया युक्तत्वात्।

यद्यपि उपमेयोपमानत्वयोः प्रकृताप्रकृतत्वे नास्ति किञ्चिन्मानम्। अन्यथा उपमेयोपमायां प्रतीपे च औपम्याभावेन तयोरपि स्वभावोक्तावेव परिगणनं भवेत्, न वक्रोक्तौ। तच्च न सम्भवति, आलङ्कारिकैस्तयोरौपम्यस्य स्वीकारेण वक्रोक्तावेव अन्तर्भावस्य स्वीकारात्। तेन दीपकविषया पूर्वकल्पना न सर्वमान्या स्यात्। किन्तु नास्ति काप्यन्या गतिः, ऋते दीपकस्य स्वभावोक्तिवक्रोक्त्युभयरूपतायाः स्वीकारात्। अत्र औपम्यापेक्षया निरौपम्यमेव दीपकस्याधिकमानुकूल्यमुपैति, दीपकनाम्नैव तत्समर्थनात्। अत एव औपम्याभावेऽपि कविप्रतिभानिर्वर्तितत्वस्य सत्त्वेनाऽभिमता विच्छित्तिरत्र विजृम्भत एव।

वस्तुतस्त्वेष विवादः स्वभावोक्ति-वक्रोक्तिधारानुप्राणित एव। स्वभावोक्तिधारायाः समर्थका औपम्याभावेऽपि दीपकवद् दीपनाद् दीपकं मन्वन्ते, वक्रोक्त्युद्भावकाश्चात्र दीपके औपम्यमनिवार्यम्। दीपकस्यास्य आदित लक्षणविकाशे दृष्टिः दीयेत चेदस्माकमियं परिकल्पना परमार्थतामियात्।

अत एवात्र कतिपयेषां प्राचीनार्वाचीनानाम् आलङ्कारिकाणां मतानि समुपन्यस्य विधीयते विचारः। तत्र भामहः—

> आदिमध्यान्तविषयं त्रिधा दीपकमिष्यते।
> एकस्य त्र्यवस्थत्वादिति तद् भिद्यते त्रिधा॥

---

१. रस० गं०, पृ० ३२६। २. तत्रैव, पृ० ३२७।

अमूनि कुर्वतेऽन्वर्थामस्याख्यामर्थदीपनात्।
त्रिभिर्निदर्शनैश्चेदं त्रिधा निर्दिश्यते यथा ॥[1]

अस्यैव लक्षणस्य खण्डनं कुर्वता वक्रोक्तिप्रवर्तकेन कुन्तकेन यदुक्तं तेनेदमतीव स्पष्टं यदत्रालङ्कारे आदित एवास्ति स्वभावोक्ति-वक्रोक्तिधारयोः स्पष्टः प्रभावातिरेकः। एतयोः सन्दर्भज्ञानमन्तरा दीपकस्य औपम्यानौपम्यविषयकोऽयं विवादो न कथमपि सुबोध्यः। अतः कुन्तककृत्-खण्डनमत्र समुपन्यस्यते—

"आदौ मध्ये चान्ते वा व्यवस्थितं क्रियापदमतिशयमासादयति येनालङ्कारतां प्रतिपद्यते इति चेत्; तेषां वाक्यादीनां परस्परं तथाविधः कः स्वरूपातिरेकः सम्भवति ?

क्रियापदप्रकारभेदनिबन्धनं वाक्यस्य यदादिमध्यान्तं तदेव तदर्थवाचकेष्वपि सम्भवतीत्येवमपि दीपकप्रकारानन्त्यप्रसङ्गः। यदि वा समानविभक्तीनां बहूनां कारकानामेकं क्रियापदं प्रकाशकं दीपकमित्युच्यते, तत्रापि काव्यच्छायातिशयकारितायाः किं निबन्धनमिति वक्तव्यमेव। तच्च प्रस्तुताप्रस्तुतविध्यसामर्थ्यसम्प्राप्त-प्रतीयमानवृत्तिसाम्यमेव, नान्यत् किञ्चिदित्यभियुक्ततरैः प्रतिपादितमेव। अत्र प्रस्तुताप्रस्तुतयोः प्रतीयमानवृत्तिसाम्यमेव अन्तर्गतोपमाधर्मः।"

अनेन कुन्तकस्य खण्डनेनेदं नितान्तं स्पष्टं यद् वक्रोक्तिधारापोषकाणां दीपके औपम्यमनिवार्यम्। कुन्तकोऽस्य मतस्य समर्थनाय 'अभियुक्ततरैः प्रतिपादितमेवे'ति समुदीर्य उद्भटमेव निर्दिशति। यतो हि भामहस्य काव्यालङ्कारस्य टीकाकारः स्वयमेव उद्भट इद स्पष्टं स्वीकुरुते—

आदिमध्यान्तविषयाः प्राधान्येतरयोगिनः।
अन्तर्गतोपमाधर्मा: यत्र तद् दीपकं विदुः ॥[2]

इत्थं खण्डनपुरस्सरं कुन्तकः उद्भटतः स्फूर्तिमधिकृत्य दीपकेऽन्तर्गतोपमाधर्मं समर्थयते। दीपकस्य स्वतन्त्रलक्षणमपि स समुपन्यस्यति यथा—

औचित्यावहमम्लानं तद्विदाह्लादकारणम्।
अशक्तं धर्ममर्थानां दीपयद् वस्तु दीपकम् ॥[3]

इदञ्च दीपकं स द्विधा विभजते—

एकं प्रकाशकं सन्ति भूयांसि भूयसां क्वचित्।
केवलं पङ्क्तिसंस्थं वा द्विविधं परिदृश्यते ॥

---

१. भामहः २. २५, २६।     २. उद्भटः १.२८।

३. व० जी०, ३ उन्मे० पृ० १८०-१८१।

उदाहरणं यथा—

अशारं संसारं परिमुषितरत्नं त्रिभुवनम्,
निरालोकं लोकं मरणशरणं बान्धवजनम्।
अदर्पं कन्दर्पं जननयननिर्माणमफलम्,
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥[1]

अत्र विधातुं व्यवसितः कर्ता संसारादीनामसारत्वप्रभृतीन् धर्मानुद्योतयन् दीपकालङ्कारतां प्राप्तवान्।

एवमेव पङ्क्तिसंस्थस्याप्युदाहरणं दत्तम्। एतदेव पङ्क्तिसंस्थं नाम दीपकं पश्चाद्भवानामालङ्कारिकाणां मालादीपकेन प्रायः साम्यं भजते। इत्थं कुन्तकेन दीपकस्य विस्तरतो विचारो विहितः। विस्तरभिया नेह समुपस्थाप्यते।

एभिः पर्याप्तैरुद्धरणैः स्पष्टमिदं यदादित एवास्ति दीपकालङ्कारे द्वयोर्धारयोः प्रस्फुटः प्रभावः। एतयोर्मध्ये दोलायितं दीपकं नैकमत्यमावहति आलङ्कारिकाणाम्। अत एव प्रायः आलङ्कारिकाणां बाहुल्यं समन्वयमेव स्तौति द्वयोर्धारयोर्दीपके, येन विरुद्धधारे बिभ्रदपि दीपकं धर्मान् स्वभावतया दीपवदुद्योतयत् स्वभावोक्तावेव गण्यते।

अत एव दीपके औपम्यतत्त्वस्य आदावनिवार्यतां समर्थयन्नपि उद्भटो वृत्तौ स्पष्टमिदं निर्दिशति—**धर्माः क्रियादिरूपाः**। अनेनेदं स्पष्टं यदयमपि क्रियातोऽतिरिक्तं कारकमपि दीपकस्य प्रयोजकं मनुते। अस्यैवानुसरणं पश्चाद्भवैः आलङ्कारिकैरकारि। यथा विश्वनाथः—

प्रस्तुताप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु च ॥[2]

तथैव रुद्रटः—

यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति।
तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥[3]

चन्द्रिकाकारोऽपि—

वर्ण्यावर्ण्यान्वितैकचमत्कारिधर्मो दीपकम्।[4]

एभिर्लक्षणैः स्पष्टमिदं यत् सादृश्यस्य अनिर्वार्यता केवलं वक्रोक्तिधारापोषकैरेव अङ्गीक्रियते, न स्वभावोक्तिधारासमर्थकैः। स्वभावोक्तिसमर्थकानां संख्या पुनरतिशेते वक्रोक्तिपोषकान्। स्वीकृताऽपि वक्रोक्तिः स्वभावोक्त्यभिभूतैवेति सङ्गत एवाऽन्तर्भावो दीपकस्य स्वभावोक्ताविति। इत्थं दीपके औपम्यस्यानिवार्यत्वं

१. माल० मा०ना० ५.३०। २. सा० द० १०.४८।
३. रुद्रटः, काव्या० ७.६४। ४. चन्द्रिका, पृ० ५२।

Sai 72-058

समर्थयताम् उद्भट-कुन्तक-पण्डितराजादीनां मतानि समुपन्यस्य निराकृतानि, साधिता च दीपके स्वाभाविकी विच्छित्तिः सादृश्याभावेऽपि । अतो दीपकं स्वभावोक्तौ अन्तर्भवतीति सिद्धम् ।

## २. समुच्चयः

समुच्चयस्य लक्षणमुक्तं मम्मटभट्टेन—

**तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् । समुच्चयोऽसौ ।**[1]

अर्थात् यत्र प्रस्तुतस्य कार्यस्य सिद्धिहेतौ एकस्मिन् स्थिते सति अन्यत् साधकान्तरं सिद्धिकरं भवेत्, असौ समुच्चयः । 'सूत्रे लिङ्गवचनमतन्त्रमि'ति न्यायेन अन्यदिति एकवचनमविवक्षितम् । अत एव वृत्तौ अन्यदित्यस्य व्याख्यानं 'साधकान्तराणि' इति कृतं ग्रन्थकारेण । उदाहरणम्—

**दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकम्,**
**गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।**
**स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो,**
**नो सख्यश्चतुराः कथन्नु विरहः सोढव्य इत्थं शठः ॥**

अत्र विरहासहत्वरूपं कार्यं स्मरमार्गणा एव कर्तुं समर्थाः, तदुपरि प्रियतम-दूरस्थित्यादीनि साधकान्तराणि सिद्धिकराणि गृहीतानीति स्पष्ट एव समुच्चयः ।

समुच्चयेऽस्मिन् सदसतोः कार्यकारणसम्बन्धेन स्थितयोः सम्बन्धः स्तूयते । समालङ्कारेऽपि सदसतोः सम्बन्धो भवति, किन्तु न स कार्यकारणात्मक इत्येतावानेव विशेषः । समालङ्कारो भामह-दण्ड्युद्भट-वामन-रुद्रटादिभिः कैश्चिदपि न स्वीकृतः । केवलं मम्मट एव सर्वप्रथममवतारयत्यमुम् अलङ्कारक्षेत्रे ।

विरुद्धयोः एककालमेव प्रतिपादने यथा विकल्पालङ्कारस्तथा अविरुद्धानामेककालं प्रतिपादने कोऽलङ्कार इत्यपेक्षायां समुच्चयः । तथा च कार्यस्य प्रस्तुतार्थस्य एकस्मिन् साधके कारणे सति 'खलेकपोतिका'न्यायात् परोऽपि पदार्थस्तत्कार्यकरः स्यात्तदाऽयं समुच्चयालङ्कारः । अयमेकविध एव ।

यद्वा—एककालं गुणौ ( यत्किञ्चिद् गुणद्वयम् ), क्रिये ( यत्किञ्चित् क्रियाद्वयम् ), गुणक्रिये वा (एको गुणः, क्रिया चैकेति) स्याताम्, तदाप्ययं समुच्चयः स्यात् । इत्थं चतुर्विधोऽप्ययं सद्योगे, असद्योगे, सदसद्योगे चेति त्रिधा भिन्नो द्वादशप्रकार इत्यवगन्तव्यम् ।

केवलं समुच्चय एव वास्तवविभागे स्वभावोक्तौ वा गण्यते, न पुनः समकाव्यलिङ्ग-समाध्यलङ्काराः, येष्वन्तरस्तिष्ठत्येव येन केनापि रूपेण समुच्चयः । यद्यपि सूक्ष्मदृष्ट्या एष्वस्ति भेदः, किन्तु समुच्चयस्तु सर्वत्र जागर्त्येव ।

---

१. का० प्र०, पृ० ४०४ ।

अत्रेदं विचार्यते—कथं समुच्चयालङ्कारस्य समुच्चये तिष्ठति स्वभावोक्तिः, नान्यत्र अलङ्कारेषु अधिगतेऽपि समुच्चये। समालङ्कारे प्रतीयमानः सदसतोः सम्बन्धो न भवति कार्यकारणात्मकः, अपितु कविप्रतिभया वक्रतया वा आनीतः सचेतसश्चमत्कारितां भजते। **समुच्चये सतोरसतोर्वा कारणयोः समुच्चयः, अत्र (समालङ्कारे) तु अकारणयोरपि तयोर्योगस्यौचित्याभिधानमिति** विवेकः।[१] अतोऽत्र अपैति स्वभावोक्तिः, कवेः प्रतिभया सम्बन्धस्यातिरञ्जनात्। किन्तु नैषा स्थितिः समुच्चयालङ्कारस्य। समुच्चये स्वभावसुलभया कार्यकारणविधयैव ज्ञायत स्वभावतः सम्बन्धः। अतः समुच्चये स्वभावोक्तेः सत्ता अक्षुण्णैव। एवं काव्यलिङ्गेऽपि आपाततो नाभाति महान् भेदः सदसतोः समुच्चये। किन्तु विचारे कृते सम्बन्धे दृश्यत एव भेदः। यतो हि समुच्चयालङ्कारस्य सम्बन्धो कार्यकारणात्मकतया यादृशः स्वाभाविको न तादृशः काव्यलिङ्गस्य। अत्र तु केवलं हेतुरेव स्थाप्यते, न तेन साधितः समुच्चयो येन सचेतसां बोधो भवेत् सुखेन। अत्र काव्यलिङ्गे प्रतिभया प्रस्तुतानां हेतूनामध्ययनेन प्रतीयते सम्बन्धः समुच्चयः प्रतिभाबलात्। अतोऽयं काव्यलिङ्गालङ्कारो न स्थानमर्हति स्वभावोक्तौ।

अनयैव दिशा समाध्यलङ्कारेऽपि प्रतीयमानः सदसतोः समुच्चयः साहित्यं वा, परन्तु नासौ समायाति वास्तवविभागे स्वभावोक्तौ वा। यतोऽत्र अतिशयोक्तेरस्ति अधिकः प्रभावो यश्च विरोधी वर्तते स्वभावोक्तेः। समाध्यलङ्कारे एकेन कार्ये निष्पाद्यमानेऽपि अनेकैराकस्मिकं काकतालीयन्यायेन आपतद्भिः कारणैः सौकर्यादिरूपोऽतिशयो यत्र सम्पाद्यते, स विषयः। समुच्चयालङ्कारे च न तादृशः सौकर्यातिशयोऽपेक्ष्यते। यतस्तत्र समुच्चयभेदे एककार्यसम्पादनाय युगपदनेके हेतवः खले-कपोतन्यायेन सहैव अहमहमिकया स्वत एव समापतन्ति। कार्यस्य च न कोऽप्यतिशयस्तत्र। न चायं समुच्चयः समाध्यलङ्कारेऽन्तर्भवति। यत्र ह्येकस्य कार्यं प्रति पूर्णं साधकत्वम्, अन्यस्तु सौकर्याय काकतालीयन्यायेनापतति, तत्र समाधिः। यत्र तु-खले कपोतिकया बहूनामवतरस्तत्र समुच्चयः। अतश्चानयोः सुमहान् भेदः। अतः समाधिर्न प्रवेशमर्हति स्वभावोक्तौ अतिशयोक्तेस्तत्राधिक्यात्।[२]

अतः खले-कपोतन्यायेन एकं कार्यं सम्पादयितुमेकस्मिन् वर्तमानेऽप्यनेकेषां साधकान्तराणां सहैव समापत्तिरेवात्र विच्छित्तिः। इयञ्च साध्यतेऽतिशयोक्तिशून्यया स्वाभाविक्यैव कार्यकारणविधया। अतोऽन्तर्भाव्यते समुच्चयः स्वभावोक्तौ, न वक्रोक्तौ अतिशयाभावादिति।

---

१. उद्योतः, पृ० ५५५। २. अ० स०, पृ० १८२।

३. अनुमानम्

अनुमानालङ्कारस्य लक्षणं यथा—

अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ।[१]

अस्य उदाहरणम्—

यत्रैता लहरी चलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः ।
तच्चक्रीकृत-चापमञ्चित-शरप्रेङ्खत्-करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदाऽऽसां स्मरः ॥

अत्र लक्षणे पक्षे सम्बन्धः, सपक्षवृत्तित्वम्, विपक्षावृत्तित्वञ्चेति रूपत्रयवान् हेतुः साधनम् । व्यापकत्वाभिमतस्य पक्षेऽयोगव्यवच्छेदो व्यापकसम्बन्धपर्यवसन्नः साध्यम् । तदुभयवचन-कविप्रतिभोल्लिखितमनुमानालङ्कारः । अत्र अनुमानमिति भावे ल्युट्, तेन जायमाना अनुमितिरत्रालङ्कारः । सा च 'मन्ये शङ्केऽवैमि जाने' इत्यादिवाचकपदोपादाने वाच्या । यत्र लिङ्गलिङ्गिनोः सत्त्वं तत्र तेषामनुमितिबोधकत्वम् । यत्र च सादृश्यादिनिमित्तसद्भावस्तत्र उत्प्रेक्षाबोधकत्वम् । 'वक्ति, कथयति' चेत्यादिलक्षणपदोपादाने लक्ष्या । उभयानुपादाने साध्यसाधनाभ्यां तदाक्षेपे च प्रतीयमानेति ।

नन्वत्र लक्षणे साध्यसाधनयोर्वैपरीत्यमपि कथं नोक्तमिति चेन्न । तथात्वे कार्यकारणप्रतीतिरूपवैचित्र्यस्याभावात् ।

'यत्रैता लहरी'त्युदाहरणे पूर्वार्धे साधनस्य उत्तरार्धे च साध्यस्य वचनमिति ।

एषोऽलङ्कारः प्राचीनैः भामह-दण्ड्युद्भट-वामनादिभिः न स्वीकृतः । केवलं रुद्रट एव प्रथममिममलङ्कारत्वेन स्वीकुरुते । ततश्च मम्मटादिभिर्मान्यतां गतोऽयमलङ्कारेषु श्रेष्ठस्थानं प्राप्तवान् । यद्यप्ययं नाम्ना 'अनुमानम्' इत्येव सङ्कीर्तितः, तेन च स्वभावतः एव प्रतीयते यद् यादृशी अनुमानप्रणाली न्यायशास्त्रे सैवात्रापि स्वीकार्या । परं नैतद् युक्तम्; तथा सति चारुत्वाभावेऽलङ्कारताया एवाभावात् । अत एवात्र लक्षणे न तथाविधा न्यायशास्त्रप्रसिद्धा अनुमानप्रणाली पञ्चावयवयुक्ता स्वीक्रियते । किन्तु आलङ्कारिकाः साध्य-साधनयोर्वचनमात्रेण व्याप्तिप्रदर्शनमन्तराऽपि स्वीकुर्वन्ति अनुमानालङ्कारम् । न्यायशास्त्रे पुनः व्याप्तिज्ञानं विना अनुमितेरेवानुदयात् । अतोऽस्मिन् अनुमानालङ्कारे जागर्ति वैशिष्ट्यं न्यायशास्त्रप्रसिद्धादनुमानात् । अत एव मम्मटो रुद्रटेन स्वीकृतां साध्य-साधनयोर्विपरीतां स्थितिं न स्वीकुरुते; तथा सति चारुत्वस्य

१. काव्यप्रकाशः ( प्रदी० उद्यो० ), पृ० ५३९ ।

विलोपसम्भवात्। अत एव मम्मटः 'अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः' इति लक्षणं कृतवान्।

अत्रैव उदाहरणप्रदर्शनोत्तरं स इदमपि कथयति यत् 'साध्यसाधनयोः पौर्वापर्ये न किञ्चिद् वैचित्र्यमिति दर्शितम्' इति। तेन चायं रुद्रटस्य खण्डनमपि विधत्ते य एवंविधे स्थलेऽपि मनुते अनुमानम्। अनेन रूपेणानुमानस्य कवि-प्रतिभोल्लिखितत्वेन चमत्कारित्वेऽलङ्कारता भवति। यत्र च शुद्धैव न्यायनयेन अनुमितिरानीयते, तत्र नायमलङ्कार इति फलति। यथा—

तस्मिन् मणि-व्रातहतान्धकारे पुरे निशा-लोप-विधानदक्षे।
सद्यो वियुक्ता दिवसावसानं कोकाः सशोकाः कथयन्ति नित्यम्॥[1]

अत्र 'कथयन्ति' इतिपदेन स्फुटो बोधः प्रतीयते। स चाऽनुमित्यात्मक एव, कोकवियोगरूपस्य लिङ्गस्य व्याप्यत्वेन निश्चयकरणात्। तत्र चान्धकार-विशेषाभावस्य तत्सामान्याभावत्वेन अध्यवसिते निशालोपविधानदक्षतासिद्धौ दिवसावसानसिद्ध्यभावप्रयुक्ता दिवसावसानानुमितिरिति कविप्रतिभोल्लिखितत्वम्।

न चात्र पूर्वोक्तश्लोके उन्मीलितालङ्कारः शङ्क्यः; अस्यापि हेतुत्वेनैव समर्थनात्। यतो हि अनुमानालङ्कारे साध्यसाधनात्मको हेतुहेतुमद्भावो न तादृशो यादृशः उन्मीलितस्य। 'अनुमाने हेतुहेतुमद्भावो भवति शुद्धः, उन्मीलिते तु रूपकानु-प्राणित इति।'[2] अत एव न गणितः उन्मीलितालङ्कारः स्वभावोक्तौ।

काव्यलिङ्गम्—अत्र अयमप्यलङ्कारो हेतुहेतुमद्भावसम्पन्नोऽपि कथमनु-मानालङ्कारवद् न गण्यते स्वभावोक्ताविति प्रश्नो नोदेति; यतो हि सामान्यविशेष-भावेनालिङ्गितेऽनुमाने स्वभावत एव अर्थबोधनवैचित्र्यस्य सत्त्वात्। काव्यलिङ्गे पुनः सामान्यविशेषभावरहिते कविप्रतिभाप्रसूतेन हेतुहेतुमद्भावेन अस्वाभाविकेन आयासलभ्येन साधनेनाऽर्थप्रतीतेः। एष एव भाव उद्योतकारैरपि समर्थितो यथा—

"व्याप्त्यानिर्देशान्नानुमानालङ्कारः। श्रोतुर्यल्लिङ्गकानु-मिति बुबोधयिषा विषया कवेर्व्याप्त्यादिविशिष्टहेतुबोधक-काव्यनिर्माणं तल्लिङ्गमनुमानविषयः। काव्यलिङ्गजानु-मितिस्तु न कविना श्रोतुर्बुबोधयिषिता, किन्तु श्रोतुर्यत्पिपाद-यिषितेति भेद इत्यन्ये।"[3]

एतेन सुस्पष्टं यदनुमानस्य हेतुहेतुमद्भावः श्रोतुः स्वभावतयोन्मिषितमेव बोधं जागरयति। अतोऽनुमानालङ्कारः स्वभावोक्तौ अन्तर्भवति, न काव्यलिङ्गम्,

---

१. रसग०, पृ० ४७५।

२. रसग०, पृ० ४७६।

३. काव्यप्रकाशः (प्र० उद्यो०) पृ० ५२७।

तन्निष्ठस्य हेतुहेतुमद्भावस्य श्रोतुः सुप्तस्यानुत्पन्नस्य वा भावस्य जागरार्थमनैसर्गिकतयोत्पादनार्थं वा व्यवहार्यमाणत्वात् ।

अर्थान्तरन्यासः—अत्राप्यधिगम्यत एव परम्परया सामान्यविशेषभावेन हेतुहेतुमद्भावः सत्येवमयमपि कथं न गण्यते स्वभावोक्तावित्यपि न भ्रमितव्यम्; यतः अत्रत्यो हेतुहेतुमद्भावो भवति सामान्यविशेषभाव एवातिगूढः, यो हि कल्पनयैव सहृदयहृदयमधिरोहति, न स्वभावतो यथाऽनुमानालङ्कारे। एवमेव दृष्टान्तप्रतिवस्तूपमानिदर्शनादिष्वपि परम्परयाऽनुप्राणको हेतुहेतुमद्भावो नाधिरोहति सहृदयानां चेतांसि सद्यः स्वभावतः। अतो नैते कथमपि स्वभावोक्तौ अन्तर्भाव्यन्ते अपि तु तत्तद्रूपया वक्रतयाऽऽक्रोडिता वक्रोक्तावेव विनिवेश्यन्ते। एवं न केवलं सामान्यतया साध्यसाधनयोर्वचनतैव कमप्यलङ्कारं स्वभावोक्तौ अन्तर्भावयति। परं वैच्छित्त्या निश्चिततया ज्ञापकः प्रत्यायको वा हेतुरत्र प्रथते। अत एव शुद्धानुमाने 'वह्निमान् धूमादि'त्यादौ निष्पादकहेतुमति काव्यलिङ्गे, अनिश्चीयमानहेतुविशिष्टेषु उत्प्रेक्षाभ्रान्तिमान्सन्देहादिषु च सादृश्यादिनिमित्तसद्भावेषु नास्ति विषयता स्वभावोक्तेः। अनुमानालङ्कारः पुनः स्वभावोक्तौ अन्तर्भावमर्हति। यतोऽस्य हेतुर्निश्चिततया साध्यं ज्ञापयति, सादृश्यादिनिमित्तसद्भावोऽपि च नास्त्यत्र। एषोऽलङ्कारः स्वभावोक्तिगर्भेष्वलङ्कारेषु विस्तरेण विचारितः। यतोऽस्य वास्तविके निर्णये स्वभावोक्तिवक्रोक्त्योः क्षेत्रं स्फुटीभवति।

## ४. परिकरः

परिकरालङ्कारस्य लक्षणं यथा—

विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः।[1]

अस्य उदाहरणम्—

महौजसो मानधना धनार्चिता धनुर्भृतः संप्रतिलब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥[2]

अत्र 'महौजस' इत्यादिविशेषणानां परानभिभवनीयत्वाद्यभिप्रायकत्वाद् 'धनुर्भृतः' इति विशेष्यस्य परिपुष्टिः। तेन च प्रधानस्य दुर्योधनस्यातिशयः प्रतीयत इति स्पष्ट एव परिकरः।

अस्यालङ्कारतायामेव विवदन्ते आलङ्कारिकाः। केचन अपुष्टार्थदोषस्य अभावरूपमेव स्वीकुर्वन्तो न समर्थयन्ति अस्यालङ्कारताम्, यतो हि भावात्मकतायामेव अलङ्कारताया अधिगमात्। मम्मट एतस्य विरोधस्य स्वरूपं जानन्नपि

१. का० प्र० ( नागेश्वरी सहितः ) पृ० ४११ ।
२. तत्रैव ।

परिकरस्य समर्थयतेऽलङ्कारताम्। किन्तु तदैव, यदा भवन्ति बहूनि साभिप्रायाणि विशेषणानि विशेष्यस्य। यतो हि बहुभिर्विशेषणैर्या चारुता लभ्यते विशेष्येऽलङ्कारात्मिका न सा कतिपयैरेव पुष्टार्थतायै प्रयुक्तैर्विशेषणैः।

इत्थं साभिप्रायाणां विशेषणानां बाहुल्य एव परिकरालङ्कारमङ्गीकुरुते मम्मटः। एतस्यैव समर्थनं विधत्ते रूय्यकस्तद्व्याख्याता चापि अलङ्कारसर्वस्वे—"**विशेषणसाभिप्रायत्वं परिकरः**[1]" इति विशेषणानां साभिप्रायत्वं प्रतीयमानार्थगर्भीकारः। अत एव प्रसन्नगम्भीरपदार्थत्वाद् नायं ध्वनेर्विषयः। विद्याधरः एकावल्याम्,[2] विद्यानाथः प्रतापरुद्रीये[3], विश्वनाथश्च साहित्यदर्पणे एवमेवाहुः—**उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः**[4] इति।

किन्त्वेतद्विपरीतं काव्यप्रकाशटीकाकारो गोविन्दठक्कुरः, तद्व्याख्याता च नागेशः प्रदीपोद्योतयोः लिखतः—

**(प्रदी०) तादृशैकविशेषणोपन्यासेऽप्यलङ्कारत्वमुचितम्।**

**(उद्यो०) साभिप्रायैकविशेषणनिबन्धश्चमत्कारो दुरपह्नव इति भावः॥**[5]

एवमेव अप्पयदीक्षितः कुवलयानन्दे[6] जगन्नाथश्च रसगङ्गाधरे[7] लिखति यदेकमपि सुन्दरं विशेषणं पर्याप्तं परिकरस्य पोषणाय। पण्डितराजस्तु इदमपि स्वीकुरुते यद् अपुष्टार्थदोषस्याभावस्तु विशेषणं विनापि सेत्स्यति, अतो न कथमपि गतार्थतां भजते परिकरोऽपुष्टार्थताभावरूपेण। परिकरे तु साभिप्रायैर्विशेषणैः विशेषणेन वा विचित्राया एव चारुताया उदयात्।

अस्मिन् विवादे इदं वक्तुं शक्यते यदपुष्टार्थस्य अभावरूपे पुष्टार्थे केवलं वाच्यात्मके भावे भावेन सा चारुता आयास्यति, या साकूतैर्विशेषणैर्लब्धेन व्यङ्ग्यार्थेन समर्थिते वाच्यार्थे यो हि परिकरालङ्कारस्य प्रतिपाद्यः। अतोऽस्ति स्वतन्त्र एव भावरूपो भावो यः परिकरालङ्कारेण बोध्यते। एवमेव विशेषणानां बहुत्वे सत्येव चारुत्वातिशयः, एकत्वं तु दोषाभाववत्त्वेन गतार्थमित्यपि न चारु। एतयो रूपयोरभावेऽपि दोषाभावस्य सिद्धत्वेन उभयविधमपि विशेषणमेकमनेकं वा वैचित्र्यातिशयमानयति। अत्रापि विशेषणानेकत्वं व्यङ्ग्याधिक्याधायकत्वाद् वैचित्र्यविशेषाधायकं भवति, न तु प्रकृतालङ्कारशरीरम्। तत्तु विशेषणस्यैकत्व एव सम्भवेत्। अत्र साभिप्रायाणि विशेषणान्येव स्वभावतया कवेर्भावं व्यञ्जयन्ति सचेतसाम्, न तत्र कवि-

१. अ० सर्व०, पृ० १००। २. एकावली, पृ० २५७।
३. प्रतापरुद्रीयम्, पृ०४३९। ४. सा० द० (लक्ष्मी) पृ० ७६५।
५. काव्यप्रकाशः (प्रदी० उद्यो०), पृ०५४१।
६. कुव०, पृ० ७२-७३। ७. रसग०, पृ० ३८७।

प्रतिभाकृतः सहृदयप्रतिभाकृतो वा अस्वाभाविकोऽपेक्ष्यत आयासः प्रकृतस्यार्थस्य बोधाय। अतोऽयमलङ्कारो गण्यते स्वभावोक्तौ।

अथ यथायं साभिप्रायविशेषणः सहेतुकविशेषणो वा परिकरो गण्यते स्वभावोक्तौ, तथैव पदार्थकाव्यलिङ्गालङ्कारोऽपि न कथं गण्यते ? तत्रापि पदार्थानां विशेषणवत् साभिप्रायत्वात् हेतुभूतत्वाच्च। परं नैतत् साधुः यतो हि परिकरे साभिप्रायैः विशेषणैः व्यङ्ग्योऽर्थः स्वभावतश्चारुतां तनोति वाच्यार्थस्य, न तथा काव्यलिङ्गे आयासलब्धो हेतुभिः कविप्रतिभाप्रसूतैः समर्थितो वाच्यार्थः, तत्र वक्रताया एव प्राधान्यात्।

कतिपये आलङ्कारिकास्तु साभिप्राये विशेष्येऽपि अपरमेकं परिकराङ्कुरनामानमलङ्कारं मन्यन्ते। यथा चन्द्रालोककारो जयदेवः, एकावलीकर्ता विद्याधरश्चः—'साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः। चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः' ॥[1]

अत्र श्लोके चतुर्भुजशब्दो विशेष्यतया स्थितः साभिप्रायत्वात् परिकराङ्कुरस्य विषयः। किन्त्वयं देवस्य विशेषणमपि सुखेन भवितुं शक्नोति, तथा सति परिकरेणैवास्य अलङ्कारस्य गतार्थता जायते। लक्षणस्य विशेषणशब्दस्य उपलक्षणत्वेऽपि विशेष्यविशेषणयोरुभयोर्ग्रहणेऽत्रापि परिकरालङ्कार एव।

प्राचीना भामहदण्ड्युद्भट-वामनप्रभृतयो नेममलङ्कारमलक्षयन्। रुद्रट एव प्रथममिमं वर्णयति। हेमचन्द्रस्तु नेममलङ्कारं मनुते, पुष्टार्थदोषस्य अभावरूपेण गतार्थत्वात्।

## ५. परिसङ्ख्या

परिसङ्ख्यालङ्कारस्य लक्षणं यथा—

किञ्चित् पृष्टमपृष्टं वा कथितं यत्प्रकल्प्यते।
तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता ॥[2]

अस्य उदाहरणम्—

किं भूषणं सुदृढमत्र यशो न रत्नं,
किं कार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं,
जानाति कस्त्वदपरः सदसद्विवेकम् ॥[3]

---

१. चन्द्रा० पृ० ९२।
२. ना० का० प्र० ( नागे० ), पृ० ४१२।
३. काव्य प्र० ( प्रदी० उद्यो० ), पृ० ५४५।

अत्र प्रश्नपूर्वके कथने व्यवच्छेद्यस्य वाच्यत्वम्। एवमन्येऽपि भेदा ज्ञेयाः। अत्र किञ्चिद् वस्तु 'पृष्टमपृष्टं वा' शब्देन प्रतिपादितं सत् स्वतुल्यान्यवस्तु-व्यवच्छेदाम् यत् पर्यवस्यति, सा परिसङ्ख्या मता। एवमस्यां परिसङ्ख्यायां, तदन्यथा अप्रश्नपूर्वकम्। तथा च प्रश्नपूर्विका अप्रश्नपूर्विका चेति द्विविधा परिसङ्ख्या। तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यता चेति चतुर्विधा परिसङ्ख्या गण्यते।

एषोऽलङ्कारो प्राचीनैः भामह-दण्ड्युद्भट-वामनैः न गणितोऽलङ्कारेषु। प्रथमं रुद्रट एवेमं गणयत्यलङ्कारे। अयमलङ्कारस्तु मीमांसाशास्त्रतो गृहीतः। तत्रास्य विचारो विधिविचारे कृतः। अपूर्वविधिः, नियमविधिः, परिसङ्ख्या-विधिश्चेति भेदैस्त्रिविधा विषयः स्वीकृता मीमांसाशास्त्रे। अत्र पूर्वौ द्वौ विधी नालङ्कारतया गृहीतौ, केवलं परिसङ्ख्याविधिरेव गृहीतः। तथापि अलङ्कार-शास्त्रीया परिसङ्ख्या मीमांसाशास्त्रीयपरिसङ्ख्यातो भिन्ना परिभाषिता 'प्रमाणा-न्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तर-व्यवच्छेदाय पर्यवस्यति सा भवेत् परिसङ्ख्या' इति तल्लक्षणकरणात्। अतोऽत्र दर्शने नियमोऽपि उक्तलक्षणाक्रान्तत्वात् परिसङ्ख्यैव। 'एवमत्र कविप्रतिभानिर्मिते-तरव्यावृत्तिस्तत्रालङ्कारता। यथा 'कौटिल्यं कचनिचये' इत्यत्र कौटल्यादिकं कविप्रतिभया एकीकृतमिति तद्द्वारा तत्प्रतियोगिकवृत्तिस्तन्निर्मितेति बोध्यम्।'[1] यत्र च कविप्रतिभानिर्मिता विच्छित्तिविशिष्टा वर्जनबुद्धिस्तत्रैवालङ्कारता अस्याः, नान्यत्र। यथा 'पञ्चपञ्चनखा भक्ष्याः' इत्यादौ शुद्धा परिसङ्ख्यैव, नालङ्कारः परिसङ्ख्याख्यः।

साहित्यदर्पणकारस्तु श्लेषमूलामपि इमामुदाहरति। तत्रास्या वैचित्र्यविशेषोऽधिक आभाति। यथा 'यस्मिंश्च राजनि जितजगति, पालयति महीं चित्रकर्मसु वर्णसङ्कराश्चापेषु गुणच्छेदः।'[2]

अलङ्कारेऽस्मिन् इयती अधिका स्वाभाविकता यदस्या ग्राम्यत्वरूढितादिदोषं परिहर्तुकामा आलङ्कारिकाः कविप्रतिभया विशेषयन्त—आवर्जनबुद्धिम्। किन्तु श्लेषमूलैवेयं विशेषतया कविप्रतिभाप्रसूता वास्तविकीमलङ्कारतां पुष्णाति।

अत इदं सिद्ध्यति यत् स्वभावोक्तिरपि न सर्वथा श्लेषरहिता। यत्र श्लेषेऽपि न प्रतीयते विशेषो बुद्धेरायासो झटिति वा प्रतीयमानस्यार्थस्य प्रतीतिस्तत्र वर्तत एव स्वभावोक्तिः। एवमस्यां परिसङ्ख्यायां स्वाभाविकेन विधिना कवि-प्रतिभानिर्मितेतरव्यावृत्तिरिति स्वभावोक्तिगर्भेयमिति सुस्थम्। यद्यपि दर्पणानुसारं श्लेषानुप्राणिताऽपीयं प्रदर्शिता; तथापि नैतत्स्वल्पं श्लेषानुप्राणनमिमां वक्रोक्तौ

१. काव्य प्र० ( प्रदी० उद्यो० ), पृ० ५४६।
२. सा० द० ( लक्ष्मी वि० ), पृ० ८१२।

अन्तर्भावयितुं समर्थं स्वभावोक्तेरेवात्र प्राधान्येन प्रतीयमानत्वात्, विच्छित्त्यर्थमेव श्लेषस्य अङ्गत्वेनाङ्गीकारात्। 'प्राधान्येन हि व्यपदेशा भवन्ती'तिन्यायेन परिसङ्ख्यायाः स्वभावोक्तावेव अन्तर्भावः सङ्गत इति।

## ६. व्यतिरेकालङ्कारः

व्यतिरेकालङ्कारस्य लक्षणमुक्तं मम्मटेन—

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः।[1]

अस्य उदाहरणम्—

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते नित्यम्।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु॥

"अत्रोपमानादित्युक्तेः 'कुमुदादतिरिच्यते मुखम्' इत्यादौ नायमलङ्कार इति।"[2]

'तमात् उपमानस्योत्कर्षे व्यतिरेक' इति रिक्तं वचः न ह्यत्रोदाहरणे चन्द्रयौवनयोः सादृश्यम्, किन्तु तत्क्षययोः। तत्र चन्द्रक्षयस्य वृद्धिबाध्यतया न्यूनत्वं यौवनस्य त्वबाध्यतयाऽऽधिक्यमिति सिद्ध एव व्यतिरेक उपमानादुपमेयस्याधिक्य इति।'[3]

एषोऽलङ्कारोऽतीव विवादग्रस्तः। अत्र सर्वेषामालङ्कारिकाणां नैकमत्यम्। विस्तरभियाऽत्र समुपन्यस्य प्राचीनार्वाचीनानां मतानि संक्षेपतो विधीयते विचारः।

तत्र भामह—

उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम्।
व्यतिरेकं तमिच्छन्ति विशेषापादनाद् यथा॥[4]

दण्डी पुनरिदमाह—

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।
तत्र यद् भेदकथनं व्यतिरेकः स कथ्यते॥[5]

उद्भटस्तु—

विशेषापादनं यत् स्यादुपमानोपमेययोः।
निमित्तादृष्टिदृष्टिभ्यां व्यतिरेको द्विधा मतः॥[6]

---

१. काव्य प्र० (प्रदी० उद्यो०), पृ० ५०२।

२. उद्यो० (काव्य प्र०), पृ० ५०२।

३. प्रदी०, (काव्य प्र०) पृ० ५०३।

४. भामहः २.७५। ५. दण्डी २.१८०। ६. उद्भटः २.६।

रुद्रटस्तु—

योगुण उपमेये स्यात्तत्प्रतिपन्थी च दोष उपमाने ।
व्यस्तसमस्तन्यस्तौ तौ व्यतिरेकं त्रिधा कुरुतः ॥[1]

यो गुण उपमाने वा तत्प्रतिपन्थी च दोष उपमेये ।

भवतो यत्र समस्तौ व्यतिरेकोऽयमन्यस्तु ॥ इति पाठान्तरम् ।

विभिन्नालङ्कारिकानामेभिः व्यतिरेकलक्षणैः स्पष्टं यदुपमानोपमेययोरुभयोरपि मिथो विशेषापादने व्यतिरेको न केवलमुपमेयस्यैवाऽऽधिक्ये यथा मम्मटो मनुते । अतोऽत्र मम्मटस्य दृष्टिः सर्वथा नवीना । पश्चाद्भवैरालङ्कारिकैः प्रायोऽस्यैव पन्था अनुसृतः । यथा—

'उपमानादुपमेयस्य गुणविशेषत्वेनोत्कर्षो व्यतिरेकः ।'[2]

अत्र तृतीयान्तं प्रतीपादिवारणाय वैधर्म्यपरम् । तत्र च प्रतीपादौ उपमानतामात्रकृत एवोत्कर्षः, न वैधर्म्यकृतः, साधर्म्यस्यैव तत्र प्रत्ययात् । अधिकगुणवत्त्वमात्रं उपमानगतापकर्षमात्रं वा न व्यतिरेकस्वरूपम् । तयोरुपमेयोत्कर्षाक्षेपमन्तरेण असुन्दरत्वात् । अत एव न सादृश्याभावमात्रम्, उपमानादुपमेयस्य अपकर्षेऽपि तत्सम्भवात् । तस्य च वास्तवेनासुन्दरत्वात् । उपमेयोत्कर्षविशिष्टत्वेन सादृश्याभावविशेषणे तस्यैवालङ्कारत्वौचित्यात् । यथा—

अनिशं नयनाभिरामया रमया संमदिनो मुखस्य ते ।
निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम् ॥[3]

अनिशं नयनाभिरामतारूपेण विशेषगुणेन मुखं पङ्कजाद् व्यतिरिच्यत इति ।

अत्र विचार्यते यद् उपमेयस्य प्राधान्यमाधिक्यं प्रतीपेऽपि, किन्तु न तस्य स्वाभावोक्तावन्तर्भावो विधीयते, प्रत्युत वक्रोक्तावेव । किमत्र कारणम्? साधर्म्यमूलकाः प्रायः सर्व एवालङ्काराः वक्रोक्तावेव बिनिवेश्यन्ते । किन्तु यत्र साधर्म्ये जायते कथमपि संस्पर्शो वैधर्म्यस्य, तत्र तु स्वभावोक्तेरेव स्वीकारात् । अतो वैधर्म्यस्य स्पर्शाद् व्यतिरेको गण्यते स्वभावोक्तिप्रस्थाने न पुनः कथमपि प्रतीपो यस्मिन् केवलं राजते साधर्म्यमेव, न मनागपि स्पर्शो वैधर्म्यस्य । व्यतिरेके गुणविशेषेण उपमानापेक्षया उपमेये उत्कर्षो न निश्चयेन सादृश्योपबृंहितः, असादृश्येऽपि तत्सम्भवात्, 'अयमनेन धनेन गुणेन वाधिक' इति सार्वजनीनव्यवहारात् । न चात्रापि सादृश्यप्रतीतिरिति शङ्क्यम्, तस्य हतप्रभतया चमत्कारितायाम् अप्रयोजकत्वात् । केवलं गुणाधिक्यस्यैव वैचित्र्यापादकत्वात् । अतो

१. रुद्रटः, ७.४६ । २. रसग० पृ० ३४६ ।
३. तत्रैव, पृ० ३४७ ।

व्यतिरेके सादृश्यमचमत्कारीति । अत्रास्ति पण्डितराजादीनां सम्मतिः । यथा—

नन्वस्यालङ्कारस्य वैधर्म्यमूलस्य उपमाप्रतिकूलत्वमेवोचितम्, न तु उपमागर्भत्वम्, तस्याः साधर्म्यमूलकत्वात्। अस्य च तन्निषेधरूपेणैव प्रवृत्तेः ।[1]

अतो व्यतिरेको न वक्रोक्तौ अन्तर्भाव्यः, औपम्याभावात् । किन्तु स्वभावोक्तावेव, सादृश्यातिशयश्लेषादीनां वक्रोक्तिपोषकाणां तत्त्वानामत्राभावात्। अतो व्यतिरेकस्य स्वभावोक्तिगर्भता सङ्गतेति ।

## ७. यथासंख्यम्

यथासंख्यालङ्कारस्य लक्षणं पण्डितराज आह—

उपदेशक्रमेणार्थानां सम्बन्धः यथासंख्यम् ।[2]

अत्र यथासंख्यमित्यत्र 'संख्यामनतिक्रम्य यथासंख्यमि'ति विग्रहे पदार्थानतिवृत्तिरूपे यथार्थेऽव्ययीभावः । संख्याया अनतिक्रमश्च प्रथमस्य प्रथमेनैव द्वितीयस्य द्वितीयेनैवेत्यादिक्रमेण भवतीति योगार्थ एव लक्षणम् । यथा—

यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः ।
सङ्कुचन्ति विकशन्ति राघवे जानकीनयननीरजश्रियः ॥[3]

अत्र यौवनोद्गमनितान्तशङ्किताः सङ्कुचन्ति, शौर्यबलकान्तिलोभिता विकशन्तीति प्रथमद्वितीयक्रिययोः प्रथमद्वितीयविशेषणावच्छिन्नेन कर्त्राऽन्वयः। भावसन्धिश्चात्र प्रधानम् । अस्यैवालङ्करणं कुरुते यथासंख्यम् ।

अस्मिन्नलङ्कारे क्रमेणान्वयबोधे केचन योग्यताज्ञानस्यैव नियामकतां मन्यन्ते। अत एव 'वृन्दापितृगहनचरौ भीतिं मे हरिहरौ हरताम्' इत्यत्र हरौ श्मशानचारितायाः हरे च वृन्दावनचारित्वस्य च बाधितत्वाद् अन्वयबोधाभावे हरौ वृन्दावनचारित्वस्य हरे श्मशानचारित्वस्य च योग्यत्वादन्वयबोधो जायमानः समर्थ्यते क्रमिकान्वयबोधम् । अन्ये तु योग्यताज्ञानस्य नेच्छन्ति नियामकतां क्रमान्वयबोधे; तथात्वे क्रमभङ्गदोषस्य दोषतैव न स्यात् 'कीर्तिप्रतापौ भातस्ते सूर्यचन्द्रमसाविव' इत्यादौ चन्द्रे कीर्तिसादृश्यस्य प्रतापे सूर्यसादृश्यस्य च व्युत्क्रमोक्त्या वर्तमानोऽपि क्रमभङ्गदोषो योग्यतावशादेव अन्वयोपपत्त्या निवार्येत । अतः अन्वयिसमसंख्यपदार्थज्ञानस्य यथासंख्यान्वयबोधत्वं कार्यतावच्छेदकमङ्गीकर्तव्यम् । एवञ्च "कीर्ति-प्रतापौ" इत्यत्र यथाश्रुतानां यथासंख्यान्वयबोधो बाधनिश्चयपराहत इति 'मुख्यार्थहति'सद्भावात् क्रमभङ्गस्य

१. रसग०, पृ. ३५० । २. रसग०, पृ० ४७६ ।

३. तत्रैव, पृ० ४७७ ।

दोषत्वं सुस्थमेव। इत्थमत्र यावत्संख्याका ये प्रथममुद्दिष्टाः, तेनैव क्रमेण पश्चादपि तेषां तावत्संख्याकेषु पदार्थेषु स्वभावतो जायत एव सम्बन्धः। एष एव संख्याया अनतिक्रमणतया यथासंख्यनाम्ना व्यह्रियत अलङ्कारः।

यद्यप्येषोऽलङ्कारः प्राचीनैः भामह–दण्डयुद्भट–वामन–रुद्रटभोजादिभिः स्वतन्त्रतया स्वीकृतो लक्षणोदाहरणाभ्यां प्रौढिं नीतश्च। काव्यानुशासनकारो हेमचन्द्रो[1] पुनर्नेच्छति अस्यालङ्कारतां कविप्रतिभानिर्वर्तितत्वरूपालङ्कारता जीवातोरत्राभावात्। तथापि एकत्र पद्ये बहूनां क्रमान्वये वैचित्र्यादलङ्कारतां मन्यन्त एव आलङ्कारिकाः। जयरथोऽपि[2] अलङ्कारविमर्शिन्याम् अलङ्कारत्वमस्या निषेधति। एवमेव पण्डितराजोऽपि न समर्थयतेऽस्यालङ्कारत्वम्, पूर्वदर्शितकारणात्। विस्तरस्तु रसगङ्गाधरे द्रष्टव्यः।[3] इत्थं प्राचीनैरस्य यद्यपि स्वतन्त्रालङ्कारता अङ्गीकृता, तथाप्येतेषां लक्षणस्वरूपेऽस्ति मौलिको भेदः। भामह असधर्माणामेव अन्वयं समर्थयते। यथा—

भूयसामुपदिष्टानामर्थानामसधर्मणाम्।
क्रमशो यो नु निर्देशो यथासंख्यं तदुच्यते॥[4]

किन्तु अस्य सर्वथा विरोधं कुर्वन् वामन उपमानोपमेयरूपाणामेव यथासंख्यालङ्कारतां समर्थयति। किन्तु मम्मटो न सीमानं विधत्तेऽस्यालङ्कारस्य। तन्मते केवलं क्रमान्वय एव आवश्यकः, कामं स उपमानोपमेयभावरूपोऽन्यरूपो वा स्यात्।

सम्प्रतीदं विचार्यते यत् किमत्र स्वभावसाधकं तत्त्वं यदाश्रित्याऽयं स्वभावोक्तौ अन्तर्भाव्यते? पूर्वमिदं दर्शितं यदत्र कविप्रतिभानिर्मितं किमपि वस्तु न जागर्ति, यस्मान्निषिध्यतेऽस्य अलङ्कारता। किन्त्वेष एव गुणः स्वभावोक्तेर्यदियं वाञ्छति अतीवाल्पः कवेः प्रतिभाप्रयासः। चारुता तु स्वत एवायाति क्रमेण पदार्थानामन्वये। सेयं चारुता स्वभावोक्तिमूला। अस्या एव माध्यमेन समुदाये मज्जन्तं पादर्थं क्रमविधिमाश्रित्य निःसारयति कविः, स्थापयति च तस्य पदार्थस्य विशिष्टं वैयक्तिकं स्वभावं सहृदयानां पुरः। इदं तु पूर्वोदाहरणे स्पष्टमेव यद् हरिहरावुभावपि पूर्वविशेषणबलेन-'वृन्दापितृगहनचरौ' इत्यनेनैव स्वभावसुलभं विशिष्टरूपं प्राप्नुतः। अत्र च एतयोः स्वभावो वैयक्तिकः परिचयो वा यथासंख्यालङ्कारमन्तरा दुर्लभः। यतो हि नेमं विना हरिर्वृन्दावनचरो भवितुं शक्नोति, न च हरः पितृगहनचरः। अतोऽयं स्वभावोक्तिगर्भो येनास्य गणना तत्र कृता।

---

१. का० अनु०, पृ० २९२-९३। २. अल० विम०, पृ० १४९-५०।
३. रसग०, पृ० ४७७। ४. भामह २. ८९।

किन्त्वालङ्कारिका नात्र लेशमपि कवेः प्रतिभाप्रयासं पश्यन्तोऽलङ्कारतामपि संदिहन्तीति शङ्क्यम्, प्रातिभ-प्रयासं विना एवंविधाया रचनाया एव असम्भवात्। तथापि नात्र स्पर्शोऽपि प्रतीयते वक्रोक्तेः सचेतसां सहृदयानां स्वत एव स्वभावतोऽभिप्रेतार्थस्य झटित्येव प्रतीतेः। अतः स्वभावोक्तिमूलकेषु अलङ्कारेषु न भवत्येव कदापि प्रातिभः प्रयासः कवेरित्याशङ्का निर्मूला एव, तत्रापि कवेः प्रतिभायाः प्रथनात्, तां विना च सौन्दर्याभावेन अलङ्कारताया अभावाच्च। अतः सर्वत्रैव स्वभावोक्तिमूलकेष्वलङ्ककारेष्वपि कवेः प्रतिभा अनिवार्यतयैव।

एवमेव वामनदृष्ट्याऽत्र स्वीकृत-उपमानोपमेयभावमूलकोऽपि क्रमान्वयो न बाधते स्वभावोक्त्याऽर्थस्य प्रतीतिं, साधारणस्य वक्रोक्तेः स्पर्शस्य स्वभावोक्तावपि स्वीकारात्, कस्यापि स्वभावसिद्धस्य वस्तुनो वर्णने कवेः प्रतिभायाः स्पर्शे वक्रोक्तेरनिवार्यत्वात्। भामहमते च असमानधर्ममूलायां स्वभावोक्तौ एवंविधायाः शङ्काया अनुदयात्। मम्मटमते पुनर्नैवावसर एवंभूतायाः शङ्कायाः, तत्र क्रमान्वय उपमानोपमेयभावास्वीकारात्।

अतः क्रमान्वयेन चारुतामारचयन् यथासंख्यालङ्कारोऽलङ्कारतामर्हति, कविप्रतिभानिर्वर्तितत्वस्य च धर्मस्य वर्तमानत्वात्। औपम्यरहितस्य चास्य धर्मस्य, स्वीकृतेऽपि स्वभावोक्त्या हतप्रभस्य स्वभावोक्तिप्रयोजकतया यथासंख्यालङ्कारः स्वभावोक्तौ अन्तर्भावमर्हति।

## ८. स्वभावोक्तिः

विश्वनाथः स्वभावोक्तेः लक्षणमेवमाह—

**स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्।**[1]

अत्र स्वभावस्य उक्तिः स्वभावोक्तिरिति विग्रहः। एषा च तत्रैव भवति यत्र कविर्दुरूहार्थयोर्विशेषचातुर्यबोध्यत्वेन पामरजनैरज्ञेययोः केवलसहृदयसंवेद्ययोः, डिम्भादेरर्थस्य स्वक्रियारूपयोः तत्तद्गतस्वाभाविकमात्रचेष्टाकारयोर्वर्णनं निरूपणं वा विधत्ते। तथा च यस्य कस्यापि दुरूहवस्तुनो साधारणधर्मवर्णनं स्वभावोक्तिरिति फलति। एवञ्च यत्र पामरजनवेद्यस्यार्थस्य स्वाभाविकचेष्टाक्रिययोः वर्णने नैषोऽलङ्कारः। यथा—

**गौरपत्यं बलीवर्दो घासमत्ति मुखेन सः।**
**मूत्रं मुञ्चति शिश्नेन अपानेन तु गोमयम्॥**[2]

अत्र पामरजनवेद्यस्य बलीवर्दस्य वर्णने नायमलङ्कारः। एतेन स्पष्टमिदं यत् स्वभावोक्तावपि प्रथत एव कवेः प्रतिभानिर्माणम्, तद्भावेऽलङ्कारताया एवाभावात्।

---

१. सा० द०, पृ० ८३१। २. तत्रैव, पृ० ८३१ (टीका)।

एषोऽलङ्कारो विविधैरालङ्कारिकैः विविधया आख्ययाऽभिधीयते। तत्र भामह इमां स्वभावोक्तिं स्वभावनाम्नाऽभिधत्ते।[१] केशवमिश्रश्च[२] अलङ्कारशेखरे तथैव कथयति। अग्निपुराणे चेयं स्वरूपनाम्ना कथ्यते।[३] दण्डी जातिनाम्ना[४] इमां बोधयति। रुद्रट[५]–भोज[६]–हेमचन्द्र[७]–वाग्भटादयोऽपि[८] जातिनाम्नैवेमां व्यपदिशन्ति।

स्वभावोक्तेर्विस्तृतो विचारस्तु स्वभावोक्तिधारानिरूपणप्रसङ्गे कृत एव। अत एव नात्र स वितन्यते, केवलं स्वभावोक्तिधारागर्भेष्वलङ्कारेषु परिगणितेयं प्रसङ्गतोऽलङ्कारविशेषरूपेण निरूपिता। किन्त्वनेन न हीयतेऽस्या अलङ्कारसामान्यवचनता। यथा औपम्यगर्भेष्वनेकेषु रूपकोत्प्रेक्षापह्नुत्यादिषु वर्तमानापि उपमा अलङ्कारविशेषवचनतां न विजहाति, यथा च विरोधगर्भेष्वनेकेषु विभावना-विशेषोक्त्यसङ्गत्यादिषु स्थितोऽपि विरोधः स्वतन्त्रामलङ्कारविशेषवचनतामश्नुते, तथैवेयं स्वभावोक्तिरपि–सूक्ष्मविषमा-ऽनुमान-हेत्वादिष्वलङ्कारेषु गर्भतया वर्तमानापि अलङ्कारविशेषवचनतां पुष्यतीति।

स्वभावोक्तेः सामान्यं रूपं विशेषरूपतः पृथक् प्रतीयते। सामान्य-रूपं तु स्वाभावोक्तिगर्भेषु अलङ्कारेष्वन्तर्भूतं तिष्ठति। विशेषरूपञ्चात्र स्वभावोक्त्यलङ्कार-विशेष एव। एतद्विषयको गभीरो विमर्शस्तु धाराणां प्रातिस्विकविचारे द्रष्टव्यः।

## ९. सहोक्तिः

मम्मटाचार्यः सहोक्तेरेवं लक्षणमाह—

> सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्।[९]

अस्या उदाहरणम्—

> सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः,
> सह मणिवलयैर्बाष्पधारा गलन्ति।
> तव सुभग वियोगे तस्या उद्विग्नायाः,
> सह तनुलतया दुर्बला जीविताशा॥

अत्र दिवसनिशासु यद् दीर्घत्वं तत्तु भिन्नमेव, श्वासस्य दीर्घत्वात्। एवमेव मणिवलयानां गलनमपि भिन्नमेव, बाष्पधाराया गलनात्। एषैव भिन्ना स्थितिः

---

१. भामहः २.९३।
२. अ० शे०, पृ० ३५।
३. अ० प्र०, ३४४.३।
४. दण्डी २.८।
५. रुद्रटः ७.३०।
६. भोजः ३.४।
७. का० अ०, पृ० २७५।
८. वाग्भटाल० ४.४७।
९. का० प्र० (नागे०), पृ० ३९६।

तनुलतायां वर्तमानाया दुर्बलतायाः जीविताशाया दुर्बलतातश्च। किन्त्वत्र सर्वत्रैव सहोक्त्या आनीयत एव अभेदः। एष चाभेदः अतिशयोक्तिमूलक एव, तस्याः निगीर्याध्यवसानरूपत्वेन स्वीकारात्। इत्थमेव **"सहाधरदलेनास्या यौवने रागभाक् प्रियः"** अत्रापि अधरदले स्थितात् रागात् (शक्तिमातः) भिन्न एव प्रिये वर्तमानो रागः (प्रेम), किन्तु सहोक्त्या एतयोरभेदोऽतिशयोक्तिमूलक एव, भेदेऽप्यभेदरूपत्वेन अतिशयोक्तेः स्वीकारात्। एवमत्र उदाहरणद्वये सहोक्तेः सत्तायै अतिशयोक्तेराधारः स्वीकार्य एव। वैच्छित्यै तु प्रायः सर्व एवालङ्कारा अपेक्षन्ते एव अतिशयोक्तिम् 'कोऽलङ्कारोऽनया विना' इति भामहोक्तेः।

अत एवानेके आलङ्कारिका अतिशयोक्तेः स्पष्टतयैव आधारं स्वीकुर्वते प्रायः सर्वालङ्कारेषु। यथा दर्पणकारो विश्वनाथः—

सहार्थस्य बलादेकं यत्र स्याद् वाचकं द्वयोः।
सा सहोक्तिर्मूलभूताऽतिशयोक्तिर्यदा भवेत्॥[1]

अतिशयोक्तिरपि अभेदाध्यवसानमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च। अभेदाध्यवसानमूलाऽपि श्लेषभित्तिका, अन्यथा च। अत्र केवला श्लेषप्रतिपन्नभेदा अभेदाध्यवसानरूपा अतिशयोक्तिमूला सहोक्तिरुदाह्रियते। यथा—सहाधरदलेनास्या यौवने रागभाक् प्रियः। अत्र रागपदे श्लेषः।

पण्डितराजजगन्नाथोऽपि अतिशयोक्त्यनुप्राणितमेव विधत्ते लक्षणं सहोक्तेः। यथा—

गुणप्रधानभावावच्छिन्नसहार्थसम्बन्धः सहोक्तिः। हृद्यत्वं चालङ्कारसामान्यलक्षणगतं सकलालङ्कारसाधारणमेवेत्यसकृदुक्तम्। तच्चात्र कार्यकारणपौर्वापर्यात्मिकया श्लेषभित्तिकाभेदावसानात्मिकया केवलभेदाध्यवसानात्मिकया चातिशयोक्त्यानुप्राणने भवतीति वदन्ति।[2]

लक्षणे अवच्छिन्नान्तं विशेषणं तु गुणप्रधानभावरहिते स्थलेऽपि अतिप्रसक्तिवारणाय। यथा—

अनुकूलभावमथवा पराङ्मुखत्वं सहैव लोके।
अन्योन्यविहितमन्त्रौ विधिदिल्लीवल्लभौ वहतः॥

अत्र विधि-दिल्लीवल्लभयोर्न गुणप्रधानभावात्मकः सहार्थसम्बन्धः, अपि तु उभयप्रधानात्मक एव। अत एव नात्र सहोक्तिः।

---

१. सा० द, पृ० ७५०-५१।    २. र० ग०, पृ० ३५७-५८।

सम्प्रति त्रिविधया अतिशयोक्त्या अनुप्राणिताया सहोक्तेरुदाहरणानि क्रमशो दीयन्ते, येन स्पष्टं भवेत् यत् अतिशयोक्तिरेव सहोक्तौ विच्छित्तिमानयतीति यथा—

केशैर्वधूनामथ सर्वकोषैः प्राणैश्च साकं प्रतिभूपतीनाम् ।
त्वया रणे निष्करुणेन राजंश्चापस्य जीवा चकृषे जवेन ॥[1]

अत्र चापाकर्षणकार्याणां केशाकर्षणादीनां पौर्वापर्यविपर्ययेणानुप्राणितः सहभावः, निष्करुणत्वेन पौर्वापर्यविपर्ययः ।

श्लेषभित्तिकाया अभेदाध्यवसानात्मिकाया अतिशयोक्तेरुदाहरणं । यथा—

त्वयि कुपिते रिपुमण्डलखण्डनपाण्डित्यसम्पदुद्दण्डे ।
गिरिगहनेऽरिवधूनां दिवसैः सह लोचनानि वर्षन्ति ॥

अत्र वर्षणवर्षवदाचरणयोः श्लेषेण अभेदाध्यवसितिः ।

अभेदाध्यवसानात्मिकया अतिशयोक्त्या अनुप्राणनं यथा—

पद्मपत्रैर्नृणां नेत्रैः सह लोकत्रयश्रिया ।
उन्मीलन्तो निमीलन्तो जयन्ति सवितुः कराः ॥

अत्र उन्मीलन-निमीलनयोः पद्मपत्राश्रयभेदेन भिन्नयोरपि प्रकटत्वाप्रकटत्वाद्यनेकोपाध्यवच्छिन्नतया अभिन्नीकृतयोरुपादानमित्यस्ति एकक्रियासम्बन्धः । अत एव न श्लेषः, तस्य प्रतिपाद्यतावच्छेदकभेद एव स्वीकारात् ।

एतेषु त्रिषु उदाहरणेषु गुणप्रधानभावात्मकः सहार्थः 'सहयुक्ते प्रधाने' ( २।३।१९ ) इति पाणिनीयसूत्रेण 'सहयोग तृतीया प्रयुक्त' एव त्रिविधयाऽतिशयोक्त्याऽनुप्राणित एव दर्शितः ।

सम्प्रतीदं विचार्यते यत् सहोक्तिः अतिशयोक्त्यनुप्राणितैव भवति शुद्धा वा ? यदि चाऽतिशयोक्तिः स्पष्टतया प्रतीयते सहोक्तौ तदा तु अतिशयोक्त्यनुप्राणिताया अस्या गणना वक्रोक्तावेव संभाव्या, न कदापि स्वभावोक्तौ अतिशयोक्तेः स्फुटत्वात् वक्रोक्तावन्तर्भावस्य योग्यताया वर्तमानात् ।

इदं तु सत्यं यद पूर्वमुक्तेषु त्रिष्वपि उदाहरणेषु स्पष्टैव अतिशयोक्तिः, किन्तु एवंविधेषु स्थलेषु सहोक्तिः शुद्धातिशयोक्तिर्वेत्यपि विचारणीयमेव । यद्यपि सहोक्तौ हृद्यत्वम् अतिशयोक्तिकृतमेव भवति । अत एव 'पुत्रेण सह आगतः पिता' इत्यत्र नायमलङ्कारः, अतिशयोक्तेरभावात् । परमत्र एतद् विचार्यते यद् यदि अतिशयोक्तिं विनाऽपि सहोक्तौ वैच्छित्तिश्चारुता वा स्यातुं शक्नोति, तदा तु स्वभावोक्तौ तस्याः गणनायां न स्यात् कापि बाधा । अतिशयोक्त्या सह नियतसम्पर्के तु वक्रोक्तेर्गणनायाः प्रश्न आगच्छेदेव । इयमपि चारुता यदा भवेत्

१. रसग०, पृ० ३५८-५९ ।

प्रधाना अप्राधाना चेयं नालङ्कार व्यपदेशाय अलम्। अत इदं मन्तव्यं यद् यद्यपि सहोक्तौ अतिशयोक्तिरानयति चारुताम्, किन्तु अनया उपस्क्रियत एव सहोक्तिः, अतः प्रधान्यं तु तस्या एव। एवञ्च नात्र अतिशयोक्तिकृतः वक्रोक्त्यवस्याः प्रवेशः शङ्कनीयः, यतस्तस्याः (अतिशयोक्तेः) गौणत्वेनावस्थानात्, सहोक्तेश्च प्राधान्येन समर्थितत्वाच्च।

यदि च प्राधान्याप्राधान्यव्यवस्था नाङ्गीक्रियेत अलङ्काराणां पार्थक्यविचारे, तदा सर्वमेवाकुलं स्यात्। तदा तु सादृश्यप्रयुक्तेषु सर्वेष्वेव रूपकोत्प्रेक्षा-अपह्नुत्यादिष्वपि सादृश्यसम्पर्कात् अभेद एव स्यात्, न कदापि पार्थक्यम्। किन्तु यथा तत्र सर्वत्रैव सादृश्यस्य गुणत्वात् अभेद-संभावनाऽपह्नवानां तत्तदलङ्कारपार्थक्यप्रयोजकानां विश्रान्तिधामतया प्राधान्येन तैरेव व्यपदेशः। अर्थात् रूपकस्थले सादृश्यस्य गुणत्वं प्राधान्यञ्चाभेदस्य, अतस्तेनैव न्याय्यो व्यपदेशो न गुणभूतेन सादृश्येन। एवमेव प्रकृते सहोक्तिस्थलेऽपि गुणभूतया अतिशयोक्त्या न व्यपदेशः, अपि तु प्राधान्येन सहार्थेनैव। तथात्वे तु सहोक्तेः स्वभावोक्तौ गणना सङ्गतैव स्वभावात्मकस्य सहार्थस्य प्राधान्येन तत्र सत्त्वात्।

न च यत्राऽतिशयोक्तेरनुप्राणनं तत्रातिशयोक्तेः सम्पर्काद् वक्रोक्तावेव अन्तर्भाव उचितः सहोक्तेरिति वाच्यम्; तथात्वे सर्वेषामेवालङ्काराणाम् अतिशयोक्त्यनुप्राणिततया वक्रोक्तावेव अन्तर्भावस्यौचित्यात् न चेदमभीष्टम्; दण्डिभोजादिभिः स्वीकृताया आलङ्कारिकाणाञ्चाभिमतायाः स्वभावोक्तिवक्रोक्तिभेदेन द्वैविध्यम्, रसोक्तिसङ्कलनेन त्रैविध्यं वाऽधिगतायाः व्यवस्थाया भङ्गप्रसङ्गात्। अतः सहोक्तौ अनुप्राणत्वेनान्तर्भूतोऽतिशयो भिन्न एव अतिशयोक्तौ अभिमतादतिशयात्। सहोक्तेः परस्परभेदाध्यवसानमात्रमतिशयः, अतिशयोक्तेश्च उपमानेनोपमेयस्य निगरणरूपः। अमुमेवाशयं पण्डितराजोऽपि प्रकटयति। यथा—

किं च परस्परभेदाध्यवसानमात्रमतिशयो नातिशयोक्तिः। तस्य श्लेषादावपि सत्त्वात्। सा तूपमानेनोपमेयस्य निगरणम्। एवं च "वर्षन्त्युन्मीलन्तो निमीलन्त" इत्यादिषु एकेन अपरनिगरणाभावान्नातिशयोक्तिगन्धोऽपि। अतिशयमात्रं तु प्रायशः साधारणधर्मांशे बहूनामलङ्काराणामुपस्कारकम्।[1]

अत एव पण्डितराजो नातिशयोक्तिं स्वीय सहोक्तिलक्षणघटकतया स्वीकरोति, केवलं हृद्यत्वार्थमेव अतिशयस्यानिवार्यतां मनुते, यश्च (अतिशयः) प्रायः साधारणधर्मांशे बहूनामलङ्काराणामुपस्कारकः। अतः सहोक्तेरतिशयो न वक्रोक्तेः पोषकः, प्रत्युत स्वभावोक्तेरेव। अत एव प्रायो बहव आलङ्कारिका स्वलक्षणेषु घटकतया नातिशयोक्तिमङ्गीकुर्वन्ति। यथा भामहः—

---

१. रसग०, ३६१–६२।

तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रये।
पदेनैकेन कथ्येते सहोक्तिः सा मता यथा॥[1]

दण्डी—

सहोक्तिः सहभावेन कथनं गुणकर्मणाम्।[2]

वामनः—

वस्तुद्वयक्रिययोस्तुल्यकालयोरेकपदाभिधानं सहोक्तिः।[3]

अप्पय-दीक्षितः—

सहोक्तिः सहभावश्चेद् भासते जनरञ्जनः।[4]

जयदेवः—

सहोक्तिः सहभावश्चेद् भासते जनरञ्जनः।[5]

मम्मटभट्टानां लक्षणं तु दत्तमेव यत्र नास्ति अतिशयोक्तेर्घटकतया स्वीकृतिः। एवमन्येऽप्यनेक आलङ्कारिका न सहोक्तौ अतिशयोक्तेर्घटकतां स्वीकुर्वन्ति। यथा चन्द्रिकाकारादयः—'चमत्कृतिजनकं साहित्यं सहोक्तिः' इति। किन्तु विस्तरभिया न तेषां सर्वेषां लक्षणानि दीयन्ते।

सम्प्रति कतिपयेषामालङ्कारिकाणां लक्षणान्युद्ध्रियन्ते, यत्र घटकतया स्वीकृता अतिशयोक्तिरुपमानोपमेयभावश्लेषाः। तत्र रूय्यकः—

उपमानोपमेययोरेकस्य प्राधान्यनिर्देशेऽपरस्यं सहार्थसम्बन्धे सहोक्तिः।[6]

अत्र मङ्खुकः—'तत्र तृतीयान्तस्य नियमेन गुणभावादुपमानत्वम्। अर्थाच्च परिशिष्टस्य प्रधानत्वादुपमेयत्वम्। तत्रापि नियमेनातिशयोक्तिमूलत्वमस्याः। सा तु कार्यकारणप्रतिनियमविपर्ययरूपा अभेदाध्यवसायरूपा च। अभेदाध्यवसाय श्लेषभित्तिकोऽन्यथा वा।[7]

दर्पणकारस्य अतिशयोक्तिघटितं लक्षणन्तु दत्तमेव। एतेषु लक्षणेषु औपम्यातिशयश्लेषादीनां घटकता सहोक्तेर्वक्रोक्तावेव अन्तर्भावं प्रकटयति। किन्तु सर्वेषामेषामङ्गीकारो नैसर्गिकविच्छित्त्यर्थमेव, न कथमपि वक्रोक्तिप्रयोजकः, तथात्वे सहोक्तेरेवोच्छेदप्रसङ्गात्। अस्मादेव हेतोः पण्डितराजो लाक्षणिकानामेषां मतानि खण्डयति स्थापयति च स्वतन्त्रां सत्तां सहोक्ते प्राचीनानां समर्थनाय। अन्यथेयं दीपकतुल्ययोगिताभ्यामेव गतार्था स्यादित्यपि शंसति। यथा—

---

१. भामह ३.३९। २. दण्डी २.३५१।
३. वामन ४.३.२८। ४. कुवल० पृ० ८२।
५. चन्द्रा० ५.६०। ६. अ० सू० २९।
७. अलं० स०, पृ० ७९।

'तस्मात् कार्यकारणपौर्वापर्यविपर्ययमूलः सहोक्तेरेकः प्रकारः' इति सर्वस्वकारादीनामुक्तिराग्रहमूलैव। अभेदाध्यवसानमूलस्तु प्रकारो भवतु सहोक्तेर्विषयः। यदि तु दीपके तुल्यायोगितायां चोपमानोपमेययोः प्राधान्येन क्रियादिरूपधर्मान्वयः। इह तु गुणप्रधानभावेनैवेति विशेषः सन्नपि विच्छित्तिविशेषानाधायकतया नालङ्कारान्तरताप्रयोजकः। अपि तु तदवान्तरभेदताया इति विभाव्यते।'

'प्रकृतत्वाप्रकृतत्वे प्रायेणोपमेयतोपमानतयोः निर्णायके इत्युक्तत्वादिह न ताभ्यां तयोर्निर्णयः। प्रकृतयोरपि साहित्यसम्भवात्।'[1]

एवं महता विस्तृतेनानेन विचारेणेदं सिद्धं यत्सहोक्तौ नास्ति वक्रोक्त्यन्तर्भावप्रयोजिका अतिशयोक्त्यादीनामनुप्राणता, अपि तु स्वाभाविकीं विच्छित्तिं हृद्यत्वं वा पोषयितुमेव। अतो वक्रोक्तिप्रयोजकानाम् औपम्यातिशयश्लेषाणां विरहे स्वभावोक्तावन्तर्भावः सङ्गत एव।

वस्तुतोऽत्र स्वभावोक्तिवक्रोक्तिधारयोर्विवाद एवाशेषस्य विचारकलापस्य मूलम्। रुद्रटकृतान् वास्तवौपम्यातिशयश्लेषाख्यान् भेदाननुसरता मया अस्याः सहोक्तेरन्तर्भावः स्वभावोक्तौ वास्तवविभागे वा कृतः। वक्रोक्तिपोषकैः रुय्यकविश्वनाथादीनां मतान्यनुसरद्भिः वक्रोक्तावपि कर्तुं शक्यत एवान्तर्भाव इति। किन्त्वेषाऽपि वक्रोक्तिर्न वक्रोक्तिधारात्मिका, अपि तु स्वभावोक्तिधारात्मिकैव। केवलं तत्र वक्रोक्तेः प्रभावः पूर्वस्याः स्वभावोक्त्यपेक्षयाऽधिक एवात्र तात्पर्यम्। परं नैष प्रभावो वक्रोक्तिधाराप्रयोजकः अपि तु स्वभक्तिधाराविच्छित्तिविवर्धक एव। अतो वक्रोक्तिमात्राभेदेन स्वभावोक्तिधारायामप्यवतिष्ठतेऽवान्तरो भेदो, यस्य परिचायकाः स्वभावोक्तिधारापोषका अनेकेऽलङ्काराः।

## १०. परिवृत्तिः

परिवृत्त्यलङ्कारस्य लक्षणं मम्मट एवमाह—

**परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः।**[2]

अर्थात् समासमैर्वस्तुभिः यो वस्तूनां विनिमयः परिवर्तनं सा परिवृत्तिः। क्वचित् समेन समस्य, क्वचिद् असमेन असमस्येति द्विविधोऽयमलङ्कारः। अन्त्योऽपि (असमः) द्विविधः—क्वचिन्न्यूनेन उत्तमस्य, क्वचिच्च उत्तमे न्यूनस्येति भेदात्।

अस्य उदाहरणम्—

लतानामेतासामुदितकुसुमानां मरुदयं,
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा,
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम्॥

१. रसग०, ३६०।
२. का० प्र०, (नागे०) ३९८।

अत्र पूर्वार्धे लास्येनोपादेयतया समस्य आमोदस्य विनिमयः। उत्तरार्धे उपादेयतया उत्तमया दृशा आधिव्याधीनामतादृशतया न्यूनानां विनिमयः। अवशिष्टभेदस्योदाहरणं तु न दीयते। अत्र परिचयार्थमेवोदाहरणं दत्तं यत्र कतिपय एव भेदा उदाहृताः। एतावतैव प्रकृतविचारे स्यात् सहायतेति।

एष अलङ्कारोऽपि स्वभावोक्तौ गणितः। अत्र तु विनिमये स्वाभाविकं तत्त्वमतीव स्पष्टम्, अतो नापेक्षते विचारम्। किन्तु विनिमये स्वाभाविकताऽपि कविकल्पितैव ग्राह्या। सर्वथा वास्तवे विनिमये तु नायमलङ्कारः। यथा—

**क्रीडन्ति प्रविकचलोचना समस्तान् मुक्ताभिर्बदरफलानि यत्र बालाः।**[1]

एतेनेदमायातं यत् स्वभावोक्तावपि सर्वथा वास्तवो विनिमयो दानादानव्यवहारो न ग्राह्यः, अपि तु कविकल्पित एव। एवमेव अस्मिन् दानादानरूपे[2] विनिमयेऽपि न स्वकीयं यत्किञ्चिद् वस्तुत्यागमात्रं ग्राह्यम्, अपि तु परस्मै यत्किञ्चिद् वस्तुसमर्पणमात्रम्। अन्यथा—

**किशोरभावं परिहाय रामा बभार कामानुगुणां प्रणालीम्।**

इत्यत्रापि स्यादतिव्याप्तिः। न चेदं लक्ष्यमेवेति वाच्यम्; पूर्वावस्थात्यागपूर्वकमुत्तरावस्थाग्रहणस्य वास्तवत्वेन अनलङ्कारत्वात्।

अतोऽलङ्कारसर्वस्वकृता 'विनिमयोऽत्र किञ्चित् त्यक्त्वा कस्यचिदादानम्' इति यत् परिवृत्तेर्लक्षणं कृतम्, यच्च—

**किमित्यपास्याभरणानि यौवने, धृतं त्वया वार्धकशोभिवल्कलम्।**

इति उदाहरणं च दत्तम्, तदुभयमप्यसङ्गतम्।

अनेनेदं स्पष्टमेव यत् स्वभावोक्तिमूलकेषु अलङ्कारेषु स्वभावोऽपि कविकल्पित एव ग्राह्यः, न कदापि वास्तवः सर्वथा लौकिको वा। एवं सर्वानेव स्वभावोक्तिमूलकान् अलङ्कारान् विविच्य कोऽपि विचारक इदं बोद्धुं प्रभवति यत् कीदृशस्य स्वभावस्य उक्तिः स्वभावोक्तौ गृह्यते कविभिः।

आलङ्कारिकेषु अत्र नास्ति ऐकमत्यम्। केचित्तु कस्यचन वस्तुनस्त्यागं कृत्वा कस्यचिदादानमेतावदेव मन्यन्ते। अपरे च 'स्वकीयं किञ्चित् परस्मै दत्वा तस्मात् परस्मात् तदीयस्य कस्यचिदादानम्', इत्येवं रूपां स्वीकुर्वन्ति परिवृत्तिम्। अत्र प्रथमस्य पक्षस्य समर्थकाः—भामहोद्भट-वामन-भोज-रुय्यक-विश्वनाथादयः। द्वितीयस्य पोषकाः—दण्डि-रुद्रट-मम्मट-पण्डितराज-विश्वेश्वरादयः।[3] एवमुभेऽपि मते परिवृत्त्यलङ्कारस्य विषये दत्ते। अत्र कतिपये-

१. वा० का०, पृ० ६७५। २. रसग०, पृ० ४८२।
३. ए० बी० गजेन्द्रगडकरः नोट्स् आन काव्यप्रकाश, पृ० ३६८।

षामुभयपक्षसमर्थकानामालङ्कारिकाणां लक्षणानि दीयन्ते येन जायेत पुष्टिः परिवृत्तौ वर्तमानाया द्विविधाया:[1] ( Two Schools ) धारायाः । इमे प्र धारे स्वभावोक्तेरेव शाखे प्रतीयेते, वक्रोक्तेर्वा भवेत् स्वल्पः प्रभावोऽनयोरेक- स्यामिति । किन्तु प्राधान्यन्तु स्वभावोक्तिधाराया एव ।

अत्रैकस्या धारायाः प्रतिनिधिभूता मम्मटभट्टाः । पोषकाः पण्डितराज- विश्वेश्वरादयः । उद्भावकाश्चास्या दण्डिरुद्रटादयः । एषां नये 'विनिमयो हि केनचिद् वस्तुना दत्तेन कस्यचिदादानम्'[2] इति । अस्यैव समर्थनं कुरुते उद्योतकारोऽपि—'परकीयस्य कस्यचिदादानमित्यर्थः । विनिमयस्य तत्रैव शक्तेः । एवमादाय दानमपि सा ।'

अपरस्या धारायाः प्रतिनिधिभूता अलङ्कारसर्वस्वकाराः । पोषकाश्च भोज- विश्वनाथादयः । उद्भावकाश्च भामह-उद्भटवामनादयः । एषां मते 'विनि- मयोऽत्र किञ्चित् त्यक्त्वा कस्यचिदादानम्'[3] इति ।

सम्प्रति धाराद्वयस्य प्रतिनिधिभूतानां कतिपयेषां लक्षणानि समुपन्यस्यन्ते । तेषु मम्मटभट्टानां लक्षणन्तु पूर्वं दत्तमेव । ततः परं पण्डितराज :—

**परकीययत्किञ्चिद् वस्त्वादानविशिष्टं परस्मै स्वकीययत्किञ्चिद् वस्तुसमर्पणं परिवृत्तिः ।**[4]

दण्डी—

**क्रियते परिवृत्तेश्च किञ्चिद्रूपनिदर्शनम् ।**[5]

वामनः—

**समविसदृशाभ्यां परिवर्तनं परिवृत्तिः ।**[6]

भामहः—

**विशिष्टस्य यदादानमन्यापोहेन वस्तुनः ।**
**अर्थान्तरन्यासवती परिवृत्तिरसौ यथा ।।**[7]

एतानि लक्षणानि समधीत्येदं स्पष्टं जायते यदनयोर्धारयोर्विरोधो मौलिकः । अत एव रुय्यकादीनां मतेन स्वीकृतमुदाहरणं न मम्मटादीनां मतेन परिवृत्तेरुदा- हरणतां व्रजति । यथा—

**किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभिवल्कलम् ।**
**वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ।।**[8]

---

१. अस्याः संङ्केतः—नोट्स आन सा० द०, पृ० २७१ ।
२. का० प्र० (प्रदी० उद्यो०) पृ० ५२५ । ३. अ० स०, पृ० १७१ ।
४. रसग०, पृ० ४८१ । ५. दण्डी, २.३५५ ।
६. वामनः, ४.३.१६ । ७. भामहः, ३.४१ ।
८. कुमारसम्भवम् सर्गः ५ ।

अत्र नास्ति विनिमयः, एकयैव पार्वत्या आभरणानि त्यज्यन्ते, न चान्यतः किमपि गृह्यत इति हेतोः। विनिमयार्थं द्वयोः सत्ता अनिवार्या। तत्रापि दानादानयोः। एवं मिथो विरोधिन्यपि इमे द्वे धारे अलङ्कारशास्त्रे आलङ्कारिकैर्मान्यतां गते। अतोऽलङ्काराणामसंदिग्धतया ज्ञानाय वर्तमानस्य च विरोधस्य शमनाय चापेक्षत एव धाराज्ञानमलङ्कारप्रस्थानस्य। अन्यथा प्रतिभानन्त्याद् अनन्ततामुपगतमलङ्कारजातमज्ञातं स्यात्। अत्र कस्य सत्यता इत्यत्र सहृदया एव प्रमाणम्। मया तु 'अपरे' इति मतमेवाश्रित्य परिवृत्तौ स्वाभाविकं तत्त्वं गृहीतम्। अत्रैव स्यात् मान्यता व्यापकरूपेण स्वभावोक्तिनियतविवेचने कृते।

मतद्वयेऽपि स्वभाव एव प्राधान्येन विजृम्भते परिवृत्तौ। तत्रापि अपरे इति मतेन समर्थिता दानादानरूपा परिवृत्तिस्त्वधिकां स्वभावोक्तिं बिभर्ति। अतोऽस्याः स्वभावोक्तावन्तर्भावः सर्वथा सङ्गतः।

## ११. कारणमाला

कारणमालालङ्कारलक्षणं मम्मटेन इत्थं कृतम्—

> यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता।
> तदा कारणमाला स्यात्।[1]

उत्तरमुत्तरमर्थं प्रति पूर्वस्य पूर्वस्यार्थस्य हेतुता चेत्तदा कारणमाला इत्यर्थः। इदमुपलक्षणम्। यथापूर्वं परस्य परस्य कारणत्वम् इत्यपि बोध्यम्।

उत्तरमुत्तरं प्रति यथोत्तरं पूर्वस्य पूर्वस्यार्थस्य हेतुतायामुदाहरणं यथा—

> जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते।
> गुणप्रकर्षेण जनोऽनुरज्यते, जनानुरागप्रभवा हि सम्पदः॥

अत्र जितेन्द्रियत्वाद्विनयस्तस्माद् गुणप्रकर्षस्तस्माज्जनानुरागस्तस्मात् सम्पद इति पूर्वपूर्वस्य उत्तरोत्तरं प्रति कारणत्वात् कारणमाला।

इदमुपलक्षणं यथापूर्वं परस्य परस्य कारणत्वेऽपि कारणमाला भवति। यथा—

> भवन्ति नरकाः पापात् पापं दारिद्र्यसम्भवम्।
> दारिद्र्यमप्रदानेन तस्माद्दानपरो भव॥

अत्र परं पापं पूर्वस्य नरकस्य कारणम्, परं च दारिद्र्यं पूर्वस्य पापस्य कारणमित्यादि रूपेणास्ति कारणमाला।

'अस्यां कारणमालायां किं चमत्कारजनकमिति न शङ्क्यम्, उत्तरोत्तरवस्तुकारणत्वात् सर्व एत उपादेया इति ज्ञानस्य चमत्कारकारणत्वात्।[2] किन्त्वस्या

१. का० प्र० (नागे०) पृ० ४१५। २. का० प्र० (उद्यो०), ५४६–४७।

उपस्कारकतया अलङ्कारत्वे उपस्कारकत्वे सन्दिहन्ति बहव आलङ्कारिकाः। यद्यपि आपातत एतादृश्यां कार्यकारणात्मिकायां शृङ्खलायां वैचित्र्यं न प्रतीयते, किन्तु कविप्रतिभानिर्मितायामस्यां भवत्येव चारुता। एवमस्या उदाहरणे जितेन्द्रियत्वं विनयस्य कारणं श्रुत्वा जितेन्द्रियत्वस्यापि किं कारणं विनयः कस्य वा कारणमिति वा आकाङ्क्षा स्वत एवोदेति। एवम्भूतायाः पूर्वं कविनैवोत्थापिताया आकाङ्क्षाया उत्तरेण कारणदानेन शमनमेव वैचित्र्यम्। अत्र सहृदया एव प्रमाणम्।

यद्यप्यस्मिन् श्लोके येन विधिना आकाङ्क्षाया आरम्भस्तेनैव विधिना शमनं तस्याः। अतो भग्नप्रक्रमो नाम दोष एव दूरे तिष्ठतु का कथा अलङ्कारस्य। यतो हि जितेन्द्रियत्वं विनयस्य कारणमिति आरभ्य जितेन्द्रियत्वस्य किं कारणमित्युत्थापिताऽऽकाङ्क्षा कविना विनयो गुणप्रकर्षस्य कारणमिति साक्षादुक्त्वा न शाम्यते, प्रत्युत गुणप्रकर्षो विनयादवाप्यते इति परम्परया एव, अतोऽपैति चारुता, आयाति च प्रक्रमभङ्गो दोषः। अत्र दोषाभावरूपं वैचित्र्यमिति विचार्य कारणमालाया निषेधो न शङ्क्यः; अन्यत्र स्थलेऽपि 'भवन्ति नरकाः पापादि' त्यादौ वैचित्र्यस्य सत्त्वेन तस्य समर्थनात्।

मम्मटः कारणमालायाः प्रसङ्गे अत एव एवंविधस्यालङ्कारताप्रयोजकस्य वैचित्र्यस्याभावात् हेत्वलङ्कारस्य निषेधं करोति। स इत्थं कथयति यत्—

हेतुमता सह हेतोरभिधानमभेदकृद् भवेद्यत्र।
सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्-भूतः॥'

(काव्यालङ्कारे; पृ० ८२) इति रुद्रटेन स्वीकृतोऽलङ्कारो न कथमपि अलङ्कारपदवीमारोहति, अलङ्कारताप्रयोजकस्य वैचित्र्यस्याभावात्। यथा 'आयुर्घृतमित्यादौ' कार्यकारणयोर्भेदे नास्ति वैचित्र्यं, तथैव हेतावपि। अत एवायं हेत्वलङ्कारस्योदाहरणे काव्यत्वं प्राचीनानुरोधाद् अनुप्रासाद्यलङ्कारेण समर्थ्यते। यथा—

'अविरलकमलविकाशः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः॥'

अत्र वसन्त-कालो हेतुः, शेषा हेतुमन्तः। तथा चात्र कमलविकाशादिभिः कार्यैः कारणस्य वसन्तकालस्याभेदेनाभिधानात् आयुर्घृतमितिवत् शुद्धसारोपा लक्षणा। एवञ्चात्र कार्यवाचकपदेन कारणाभिधाने वैचित्र्याभावेन मम्मटमतेन अलङ्कारता नास्ति हेत्वलङ्कारस्य। किन्तु भामहादिभिरस्य श्लोकस्य काव्यताभिधानस्यानलङ्कृतस्य रक्षार्थमनुप्रास एव स्वीक्रियते। तैः किल हेतोरलङ्कारताया अस्वीकारात्। यथा—

हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥'

---

१. भामह २.८६।

किन्तु दण्डिना हेतोरलङ्कारता समर्थ्यते। ततश्चायं पश्चाद्भवैरालङ्कारिकैः समर्थितो मान्यतां गतः। यथा—

दण्डी—

तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः।
अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा॥[1]

रुद्रटः—

हेतुमता सह हेतोरभिधानमभेदकृद् भवेद्यत्र।
सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः॥[2]

अस्यैव खण्डनं कृतं मम्मटभट्टैः, किन्तु भ्रमाद् वामनाचार्यैः काव्यप्रकाशस्य-टीकायाम् उद्भटस्येदं मतमित्युल्लिखितम्। यथा—

गौणसारोपसाध्यवसानयोः रूपकप्रथमातिशयोक्तिप्रयोजकत्ववत् कार्यकारणभावनिबन्धनशुद्धसारोपसाध्यवसानयोर्हेत्वलङ्कारप्रयोजकत्वमिति कार्यकारणभावसम्बन्धनिबन्धनशुद्धसारोपासाध्यवसानामूलोऽयमलङ्कार इति भट्टोद्भटाशय इति।[3]

हेत्वलङ्कारसमर्थकविचारस्तु तन्निरूपणप्रसङ्गे कृतः। अतोऽत्र नापेक्षते विस्तर इति।

एषा कारणमाला न चिरन्तनैः भामह-दण्ड्युद्भट-वामनादिभिः विचारिता। केवलं रुद्रट एव प्रथम आलङ्कारिको योऽलङ्कारक्षेत्र इमामवतारयति स्वतन्त्रालङ्काररूपेण। तत एव प्रायः सर्वैरेव पश्चाद्भवैरालङ्कारिकैरियमास्थया विचारपथमानीता। एवमस्या स्वभावोक्तौ गणनायां नास्ति कापि बाधा। यतः कारणमालात्मकमत्र वैचित्र्यं राजते। माला शून्या शुद्धा कारणसम्पन्नेयं बिभर्ति स्वभाविकीं विच्छित्तिम्। अतः कारणमाला स्वभावोक्तावन्तर्भावमर्हतीति।

## १२. अन्योन्यम्

अन्योन्यालङ्कारस्य लक्षणमाह साहित्य-दर्पणकारो विश्वनाथः—

अन्योन्यमुभयोरेकक्रियायाः कारणं मिथः।[4]

उभयोः कर्तृभूतयोर्वस्तुनोः एकस्याः क्रियाया मिथः अन्योन्यं करणं सम्पादनम्। विच्छित्तिविशेषैरिति शेषः। 'मिथः' इत्यभिधानेन "दुदोह गां स यज्ञाय सस्याय

१. दण्डी, २.२५४। २. रुद्रटः ७.८२।
३. वामनाचार्य, काव्यप्रकाशव्याख्या बा० बो० पृ०७०६।
४. सा० द०, पृ० ८०३।

'मघवा दिवम्'' इत्यत्र मिथः करणाऽभावान्नातिव्याप्तिः। यत्र च न क्रियापदम्, तत्र अध्याहारेणैव कार्यं भवतीति तत्रापि नाव्याप्तिः। यथा—'क्षपया रुचिरश्चन्द्रश्चन्द्रेण रुचिरा क्षपा' इति।

अस्य उदाहरणम्—

त्वया सा शोभते तन्वी तया त्वमपि शोभसे।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी॥

अत्र द्वयोः पदार्थयोः एकक्रियया गुणेन वा परस्परमन्योन्यस्य साधितं विशेषाधानमेव वैचित्र्यम्।

अत एवास्मिन् अलङ्कारे परस्परोपकारो हि खलु स्वव्यधिकरणसाध्य एव चमत्कारित्वात् लक्षणघटकः, न तु स्वसमानाधिकरणसाध्योऽपि! तत्र हि तुषार-शिशिरकरणन्यायेन अन्यव्यापारस्यानावश्यकतया चमत्कारिताविरहात्।[1]

अस्मादेव हेतोः पण्डितराजः कुवलयानन्दकारस्य अधस्ताद् दत्तमुदाहरणं खण्डयति। यथा—

"यथोर्ध्वाक्षः पिबत्यम्बु पथिको विरलाङ्गुलिः?।
तथा प्रपापालिकापि धारां वितनुते तनुम्॥

इह हि धारातनूकरणाङ्गुलिविरलीकरणयोः कर्तृभ्यां स्वस्वकर्तृकचिरकालदर्शनार्थं प्रयुक्तयोः तत्रैवोपयोगश्चमत्कारी, नान्यकर्तृकचिरकालदर्शन इत्यनुदाहरणमेवैतद् अस्यालङ्कार-स्येति सहृदया विचारयन्तु।[2]

एवमेव रुद्रटस्य काव्यालङ्कारे नमिसाधुरपि चमत्कारिताकारकस्य स्वव्यधि-करणसाध्यस्य परस्परोपकारस्याभावान्नात्र अन्योन्यालङ्कारमङ्गीकुरुते। यथा—

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
कृष्णद्वैपायनं पार्थः सिषेवे शिष्यवत् ततः॥
असावध्यापयेत् तं तु विद्यां योगसमन्विताम्॥[3]

अत एवास्मिन्नलङ्कारे स्वव्यधिकरणसाध्येन परस्परोपकाररूपेण गुणेनैव स्वभावसिद्धेन चमत्कारो न केनापि सादृश्यातिशयादिरूपेण अन्येन केनचिद् वक्रोक्तिमूलकेनेति स्वभावोक्तौ अस्यान्तर्भावः सङ्गत एव प्रतिभाति।

## १३. पर्यायः

पर्यायालङ्कारस्य लक्षणमाह विश्वनाथः—

क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्।
भवति क्रियते वा चेत्तदा पर्याय इष्यते॥[4]

---

१. रसग०, पृ० ४५६। २. रसग०, पृ० ४५६।
३. रुद्रट, ७.९१। ४. सा० द०, पृ० ८०९।

अस्यार्थः--कुत्रापि एकं वस्तु क्रमशो न तु यौगपद्येन अनेकस्मिन् स्थाने यदि स्वयमेवावस्थितं भवति, अन्येनावस्थितं वा विधीयते तत्र भवति पर्यायोऽलङ्कारः। एवमेव तदापि भवति एष एव पर्याय अलङ्कारो यदा अनेकं वस्तु क्रमाद् एकस्मिन् स्थाने चेत् स्वयमेवावस्थितं भवति, अन्यैर्वा क्रियते।

तथा च उभयमेवं चतुर्विधो भवति। तद्यथा—

१. एकस्य वस्तुनः अनेकस्थाने स्वयमेवावस्थितौ प्रथमः।

२. अनेकस्य वस्तुनः स्वयमेव एकस्थानेऽवस्थितौ द्वितीयः।

३. एकस्यानेकस्मिन् विधाने तृतीयः।

४. अनेकस्य एकस्मिन् विधाने च चतुर्थः।

अत्र आवश्यकतानुसारं प्रथमतृतीययोरेवोदाहरणे दीयेते। यथा—

स्थिताः क्षणं पक्ष्मसु ताडिताऽधराः पयोधरोत्सेधनिपातचूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे, चिरेण नाभिं प्रथमोदबिन्दवः॥

अत्र वृष्टिबिन्दुरूपैकवस्तुनः पक्ष्मादावनेकस्मिन् स्थाने स्वयमेवावस्थितिदर्शनात् पर्यायः। प्रतिपदमर्थवत्त्वात् परिकरालङ्कारोऽपि विभाव्यते तदोभयोरेकाश्रयानुप्रवेशसङ्करोऽपि अङ्गीक्रियते भावुकैः।

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः॥[1]

अत्र एकस्य करस्य अधरे, स्तनयोः कन्दुककुशाङ्कुरे अक्षसूत्रे च यथाक्रमं विधानात् पर्यायस्तृतीयः।

अत्र लक्षणे 'क्रमात्' पदं विशेषालङ्कारस्य द्वितीयप्रभेदप्रसङ्गवारणाय। विशेषालङ्कारे एकस्य वस्तुनः अनेकस्मिन् स्थाने यौगपद्येन भवति अवस्थितिः, न क्रमशः। यथा—

नयने सुदृशां पुरो रिपूणां वचने वश्यगिरां महाकवीनाम्।
मिथिलापतिनन्दिनीभुजान्तः स्थित एव स्थितिमाप रामचन्द्रः॥[2]

अत्र एको रामचन्द्रः अनेकस्मिन् नयन-वचन-गिरादिस्थाने यौगपद्येन स्थितिं लभते, न क्रमशः।

एवमेव 'क्रमात्' इति विशेषणात् समुच्चये नातिप्रसङ्गः[3] तत्र 'युगपत्पदार्थानामन्वयः समुच्चयः' इति लक्षणकरणेन (रसग०) यौगपद्येन अर्थानामन्वयात्। यथा—

उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण।
मुदितं च सकलभुवजनचूडामणिशासनेन मदनेन॥

---

१. सा० द०, ८१०। २. रसग०, पृ० ४५७।
४. तत्रैव, पृ० ४८८,९०।

पर्यायस्य लक्षणे पठितो 'भवति-करोत्यर्थौ प्रयोजकानिर्देशतन्निर्देशौ न तु स्वाभाविकत्वास्वाभाविकत्वे'।[१] अर्थात् भवति-शब्दो न वस्तुनः स्वाभाविकताया बोधकः, न च करोति-शब्दः अस्वाभाविकतायाः, अपितु भवतिशब्दः प्रयोजकस्य अनिर्देशमात्रमेव बोधयति, करोतिश्च तन्निर्देशम्। अन्यथा—

प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुनः खलानाम्।

इत्यत्र वृषलक्ष्मणः कण्ठे कालकूटस्यास्वाभाविकत्वे न भवतीत्यत्रानुदाहरणापत्तेः।

अनयैव दिशा परिवृत्त्यलङ्कारतोऽप्यस्य वैशिष्ट्यं वैचित्र्यम्। अत्र एकवस्तु-त्यागोपाधिकान्यवस्तुग्रहणरूपस्य विनिमयस्याभावात्। एवं शृङ्खलया वस्तुनः स्व-भावस्य वैच्छित्तिसम्पन्नं वर्णनं विदधतां समुच्चय-परिवृत्ति-पर्यायाख्यानामलङ्कारा-णामापाततः साम्यानुभवेऽपि विच्छित्तिविशेषस्य सर्वत्रैव भिन्नत्वेनैते स्वतन्त्रमेव-प्रातिस्विकं स्वरूपमाप्नुवते। समुच्चये यौगपद्येन परिवृत्तौ विनिमयेन पर्याये च क्रमेण अर्थानामवस्थानात्।

प्राचीनैः भामहदण्डयुद्भट-वामनादिभिरालङ्कारिकैः पर्यायस्य न लक्षणं न चोदा-हरणं विन्यस्तम्। रुद्रट एव प्रथममलङ्कारतया अमुं स्वीकरोति। पर्याये चारुताया बीजं विच्छित्तिर्वा वस्तूनामनेकेषामेकत्र, एकस्य च वस्तुनोऽनेकत्र क्रमशोऽवस्था-नमेव। पर्यायस्यान्वर्थोऽपीदमेव साधयति। अत एव 'परावनुपात्यय इण्' (३. ३. ३८) इति पाणिनिसूत्रमपि सङ्गच्छते। अत एव[२] क्रमाश्रयणात् पर्याय इत्यन्वर्थाभिधानम्।

किन्तु एष पर्यायो यत्र वास्तवस्तत्र नायमलङ्कारः, कविकल्पितस्यैवार्थस्य अलङ्कारत्वेनाङ्गीकारात् तत्रैव चमत्काराच्च। अत एवेदं रसगङ्गाधरकारवचनमपि सङ्गच्छते—

'यत्राऽधाराधेयतत्क्रमेषु क्वचिदपि कल्पनापेक्षा तत्रैवायमलङ्कारः। यत्र तु सर्वांशे लोकसिद्धत्वं न तत्र कश्चिदलङ्कारः। अन्यथा यत्र पूर्वं घटस्तत्र 'अधुना घट' इत्यस्यापि अलङ्कारतापातात्। एवंस्थिते 'अधुना पुलिनं तत्र यत्र स्रोतः पुराभवत्' इति कुवलयानन्दगत-मुदाहरणं लौकिकोक्तिमात्रमनुदाहार्यमेव।[३]

अत्रापि परिवृत्त्यलङ्कारवत् 'द्विविधं प्रस्थानं (Two Schools) सम्भवति। एकं तु वास्तवं कविकल्पनानपोढं वाऽलङ्कारत्वेनाङ्गीकुरुते, अन्यच्च कविकल्प-नासंवलितमेव तथा, यथा पूर्वं रसगङ्गाधरमुदाहृत्य समर्थितम्। एवं मम्मट-पण्डित-राजजगन्नाथादयः प्रथमं प्रस्थानं मन्यन्ते, द्वितीयं वास्तवमलङ्कारकारमप्पय-दीक्षितादयः। किन्तु दर्पणकारस्तु उभयमप्यातिष्ठति।

---

१. का० प्र० प्रदी० उद्यो० पृ० ५३६।

२. अ० स०, पृ० १५०। ३. र० ग०, पृ० ४६१।

वस्तुतस्त्वेतद्विकल्पयुगलं सर्वानेव स्वभावोक्तिमूलकानलङ्कारान् आचामति। अत्र च वक्रोक्तेर्मात्राभेद एव प्रथते। यतोऽलङ्कारतापादनाय वक्रोक्तेः परिग्रहोऽनिवार्यः 'कोऽलङ्कारोऽनया विना'[1] इति निर्देशात्। अतो वक्रोक्तेः संसर्गेण स्वभावोक्तिधारायामपि तिस्रो वीचयः उद्वेल्लन्ते। तद्यथा-एकत्र वक्रोक्तेरस्फुटः स्पर्शः, अन्यत्र च स्फुटः परिष्वङ्गः, अपरत्र च स्पर्धात्मकोपरागः। एतदेव त्रिविधमवान्तरवैचित्र्यं स्वभावोक्तौ विविधानलङ्कारान् परिकल्पयति, यथावसरञ्च विवादमप्युपस्थापयति। नैतावता प्रस्थानसाङ्कर्यं परिशङ्कनीयम्, प्राधान्यस्यैव प्रस्थानविशेषस्वरूपनिरूपकत्वात्। तस्मादंशतो लेशतो वा वक्रोक्तिसंपृक्तावपि स्वभावोक्तिर्न स्वरूपं जहाति। तथैव स्वभावोक्तिस्पर्शेऽपि न वक्रोक्तिविशेषस्वरूपपरित्यागः। अयं स्थवीयान् विवेको विवेचकैः सर्वत्रापि संस्मर्तव्यो येन साङ्कर्यशङ्कापङ्ककालुष्यं न विकुर्यात्कथमपि तेषां मनांसि।

अत एव पर्यायः स्वभावोक्तावेवान्तर्भाव्यः। पर्यायप्रयोजकस्य आधाराधेयतत्सम्बन्धक्रमस्य स्वाभाविकत्वात्, औपम्यातिशयश्लेषादिविरहाच्च।

## १४. विषमालङ्कारः

साहित्यदर्पणकारो विषमालङ्कारलक्षणमाह—

**गुणौ क्रिये वा यत्स्यातां विरुद्धे हेतुकार्ययोः।**
**यदारब्धस्य वैफल्यमनर्थस्य च संभवः।**
**विरूपयोः संघटना या च तद्विषमं मतम्॥**[2]

अनेन लक्षणेन चतुर्विधो विषमः स्वीकृतः यथा १. कार्यगुणो यः कारणविरुद्धः, अयमेको विषमः। २. कार्यवृत्तिक्रियायाः कारणवृत्तिक्रियातो विरुद्धायां सत्यां द्वितीयः। ३. आरब्धस्य कार्यस्य वैफल्ये प्रत्युतानर्थस्य अनभिलषितस्य चोत्पत्तौ तृतीयः। ४. परस्परासम्बन्धायोग्ययोः पदार्थयोः सङ्घटनायां चतुर्थ इति। अत्र प्रथम एव दिङ्मात्रमुदाह्रियते—

**सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा।**
**तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रसूते॥**

अत्र शरदिन्दुधवलं यशः तमालनीलाया कृपाणलेखाया उत्पद्यते इति कार्यगुणः कारणगुणविरुद्धः, ततः प्रथमो विषमः। विषमता चात्र कारणगुणविरुद्धकार्यगुणात्मकत्वरूपा। **'कारणगुणाः कार्यगुणानारभन्ते'** ( वैशे० सू० ११. १. २४ ) इति कारणगुणपूर्वकः कार्यगुणो दृष्ट इति वा सिद्धान्तितत्वेन नीलायाः कृपाणलेखायाः धवलस्य यशसोऽसंभवात्। इयं च विषमता कार्यकारणगतत्वेन

१. भामह २. ८५। २. सा० द०, पृ० ७९९।

भिन्नदेशस्थयोर्विरोधे वर्तमानत्वात् वास्तवाऽपि कविप्रतिभानिर्वर्तितत्वादलङ्कारः। अत एवायमलङ्कारः स्वभावोक्तावेव अन्तर्भाव्यो न कथमपि वक्रोक्तौ, विषमाख्यस्य विरोधस्य सामानाधिकरण्येन एकदेशस्थत्वेनैवोपन्यासे वक्रोक्तेः स्वीकारात्। अत एव विरोधमूलकेषु बहुष्वलङ्कारेषु विषमताया वर्तमानत्वेऽपि न तेषां स्वभावोक्तावन्तःपातः अपि तु वक्रोक्तावेव। यथा–विरोधासङ्गत्योः। एतयोर्विषमता भिन्नैव विषयालङ्कारस्य विषमतातः।

इममेव भेदं रसगङ्गाधरकार उद्योतकारश्चापि समर्थयत :—

व्यधिकरणत्वेन प्रसिद्धयोः समानाधिकरणत्वेनोपनिबन्धने विरोधालङ्कारः। समानाधिकरणत्वेन प्रसिद्धयोर्द्वयोर्वैयधिकरण्येनोपनिबन्धनेऽसङ्गतिः।[१]

विरोधे विरोधिनोः सामानाधिकरण्यस्य असङ्गतौ च कार्यकारणयोर्वैयधिकरण्यस्य चमत्कारप्रयोजकता। अत्र तु कार्यकारणवृत्तिविजातीयक्रियागुणयोगस्य चमत्कारितेति विशेषात्।[२]

रसगङ्गाधर-कुवलयानन्दकारौ 'विषादन'–नामानमलङ्कारान्तरमपि स्वीकुरुतः। यथा—

अभीष्टार्थविरुद्धलाभो विषादनम्।[३]

इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम्। अस्यालङ्कारस्य पार्थक्यं प्रदर्शितमेवालङ्कारिकैर्विषमालङ्कारात्। यथा—यत्र तु इष्टार्थप्रयुक्तात् कारणादेव विरुद्धार्थलाभः, तत्र तादृशकारणविरुद्धार्थयोरुत्पाद्योपादकभावलक्षणसंसर्गस्यानुरूपत्वाद् विषमम्। इष्यमाणविरुद्धार्थलाभाच्च विषादनमिति सङ्कीर्णतैव। नैतावता विषमभेदैर्गतार्थतेति मन्तव्यम्; विषमासंस्पृष्टस्याप्येतद्विषयस्य अनुपदमेव दर्शयिष्यमाणत्वात्।[४] यथा—

भात्येवमेव भानुर्भार्यासुखमेवमेव विन्देयम्।
ध्यायत्येवं कोके सायं हन्ताम्बुधौ ममज्ज रविः॥[५]

अत्र हि नास्ति विषमप्रभेदस्य विषयः, इष्टार्थकारणप्रयोगाभावात्। इष्टार्थप्रयुक्तकारणेन सह विरुद्धार्थस्य उत्पाद्योत्पादकलक्षणसंसर्गस्य अननुरूपत्व हि तच्छरीरम्। तस्माद् विषादनमेवात्र अप्रस्तुतप्रशंसाघटकतयाऽवस्थितम्। अत्र ह्यप्रस्तुतचक्रवाकवृत्तान्तः अतिमात्रानित्यमैहिकं विभवं नित्यतमं प्रत्येति।

---

१. रसग०, पृ० ४४१। २. का० प्र० (प्रदी० उद्यो०), पृ० १२३।
३. रसग० ५०६। ४. कुव०, पृ० २२२।
५. अ० म०, पृ० १६४–१६५।

अशाश्वततमनिश्श्रेयससाम्राज्यसाधनोपेक्षया सममतिवाहयति। तावदेव प्राप्तताद्दशविभवभ्रंशो कस्मिंश्चिदधन्ये पर्यवस्यतीति अप्रस्तुतप्रशंसा।

एवं कार्यकारणलक्षणेन इष्टार्थप्रयुक्तेन सह यत्र विरुद्धार्थस्योत्पाद्योत्पाद्य-लक्षणस्य संसर्गस्याऽननुरूपत्वं तत्रैव विषमालङ्कारो मन्तव्यः। यत्र च कारण-कार्यभावरहिता अभीष्टविरुद्धार्थलाभात्मिका विषमता केनचिदन्येन वा सम्बन्धेनाप्रस्तुतप्रशंसादिघटकेन प्रतीयते, तत्र विषादनम्।

तस्मात् कार्यकारणात्मकस्य सम्बन्धस्य वास्तवस्य सत्त्वात् विषमालङ्कारस्य स्वभावोक्त्यात्मिका विच्छित्तिः। विषादनस्य तद्भिन्ना, तस्य कार्य-कारणभाव-रहितत्वात्। अतो विषादनस्य वक्रोक्तावन्तर्भावः स्वीकार्य एव। विषमस्य तु स्वभावोक्तावेव, कार्यकारणात्मकस्य सम्बन्धस्य सादृश्यातिशयश्लेषादिशून्यत्वात्।

काणेमहोदयास्तु एवं विषमालङ्काराणां सूक्ष्मातिसूक्ष्मभेदोपभेदमसहमानो न विषादनस्य पृथक् सत्तां स्वीकुर्वन्ति, विषमालङ्कारात्।[1] एवं कविप्रतिभा-निर्वर्तिता अतिशयोक्तिशून्याः कार्यकारणात्मिका विच्छित्तयः स्वभावोक्तावन्त-र्भाव्याः। तदन्यास्तु वक्रोक्तौ। तस्माद् विषमः स्वभावोक्तिधारावलीढ एवेति निष्कर्षः।

## १५. सारः

मम्मटाचार्यः सारालङ्कारलक्षणमाह—

उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः।[2]

उत्तरोत्तरं यथा स्यात्तथा काव्यपर्यन्तसीमोत्कर्षो यत्र प्रतीयते स सारा-लङ्कारः। अस्य उदाहरणम्—

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम्॥

पण्डितराजो न केवलं संसर्गस्योत्कृष्टत्वे, अपि तु अपकृष्टत्वेऽपि सारालङ्कारं मनुते। यथा—

सैव संसर्गस्योत्कृष्टापकृष्टभावरूपत्वे सारः।[3]

एषोऽलङ्कारो नोपलभ्यते प्राचीनालङ्कारिकाणां भामह-दण्ड्युद्भट-वामनादीनां कृतिषु। रुद्रट एव प्रथममिममलङ्कारकोटाववतारयति। रुय्यकस्त्विमम् 'उदार' नाम्ना व्यवहरति। एवमयं एकविषयत्वेन अनेकविषयत्वेन च द्विविधः स्वीक्रियते। एकविषयत्वेन यथा—

---

१. 'नोट्स आन साहित्यदर्पण' पृ० २५०।
२. का० प्र० (नागे०), पृ० ४२१। ३. रसग०, पृ० ४६५।

अङ्कुरिता पल्लविता कोरकिता कुसुमिता मम भक्तिः ।
अतस्त्वयि मधुसूदन महती भूत्वा प्रसौति फलमनघम् ॥[१]

अत्रैकस्या एव भक्तेर्महत्त्व-धर्मपुरस्कारेणोत्तरोत्तरोत्कर्षो निबद्धः ।

अत्रैकस्मिन् आश्रये क्रमेणानेकाधेयस्थितिरूपे पर्याये स्वीकृतेऽपि न सारो गलहस्त्य उत्तरोत्तरोत्कर्षरूपाया विच्छित्तेः सत्त्वात् तस्यालङ्कारतायाः स्वीकारात् ।

एषोऽलङ्कारो नोपलभ्यते प्राचीनालङ्कारिकाणां भामह-दण्ड्युद्भट-वामनादीनां कृतिषु । रुद्रट एव प्रथममिममलङ्कारकोटाववतारयति ।

एष च शृङ्खलामूलोऽलङ्कारः, किन्तु न कारणमालादिर्यथा शृङ्खलैकविषयास्तथा अयमिति शङ्क्यम्, स्वतन्त्ररूपेणापि एकविषयत्वेनास्य स्वीकारात् । अत एवायं "क्वचित् शृङ्खलानुप्राणितः अनेकविषयः, क्वचिच्च स्वतन्त्रः एकविषयश्चेति सुस्थम् ।"[२]

अत्रेदं बोध्यम्—एकविषये शृङ्खलाया अचारुत्वात्तदनुप्राणितः सारो न चारुतां धत्ते, तस्याः स्वाभाविकभेदापेक्षितत्वेन अवस्थादिकृतभेदेऽनुल्लासात् । अत एवास्मिन् विषये 'वर्धमानका'लङ्कारोऽन्यैरङ्गीकृतः । तल्लक्षणञ्च "रूपधर्माभ्यामाधिक्ये वर्धमानकम्" इति कृतम् ।

अतः शृङ्खलामूलोऽयं सादृश्यविरहात् स्वभावोक्तावेवान्तर्भाव्यः । सर्वे हि शृङ्खलामूलाः अलङ्काराः सादृश्यविरहिता आलङ्कारिकैः स्वीकृताः । इह च शृङ्खलावयवानां पदार्थानां सादृश्यमेव नास्तीति कथङ्कारं दीपकतावाचं श्रद्धीमहि । तेषां प्रकृताप्रकृतविरहाच्च ।[३]

अत एव रसगङ्गाधरकारो मालादीपकम् एकावल्याः प्रभेदमेव मनुते, न दीपकस्य, तस्य सादृश्यागर्भतायाः सकलालङ्कारिकसम्मतत्वात् । अतः सारः स्वभावोक्त्यैवानुप्राणितो न वक्रोक्त्या । सादृश्यादिधर्माभावेऽपि शृङ्खलासंवलिताया एव विच्छित्तेः सत्त्वात् ।

न चैतावता शृङ्खलायाः पृथगलङ्कारता, तन्मूलकत्वेन चायं शृङ्खलालङ्कारस्य भेद एवेति शङ्क्यम्, तथात्वे मालादीपकैकावलीप्रभृतीनां सर्वेषामेव शृङ्खलामूलकानामलङ्काराणामुच्छेदप्रसङ्गः, तत्रैव तेषामन्तर्भावस्य न्याय्यत्वात् । न चेदं सङ्गतमिति वाच्यम्; शृङ्खलामूलकानामलङ्काराणां प्रातिस्विकरूपेण विच्छित्तिवैलक्षण्यस्यानुभवसिद्धत्वात् । अपि च विरोधाभेदसादृश्यमूलकानां सर्वेषामलङ्काराणामभेदाद्यलङ्काररूपेणैव व्यवहारस्य सुवचत्वाच्च । अतोऽभेदसादृश्यवदनुप्राणकतैवोचिता शृङ्खलाया अपि न पृथगलङ्कारता । तथा सति अभेदादीनामपि

१. अ० म० हा०, भा० ३, पृ० ३ । २. रसग०, पृ० ४६६ ।
३. रस०, पृ० ४६४ ।

पृथगलङ्कारतापत्तेः ।[1] अतोऽयं सारालङ्कारोऽपि स्वभावोक्त्यवलीढ एवेति निष्कर्षः ।

## १६. एकावली

एकावल्या लक्षणमाह मम्मटाचार्यः—

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥[2]

यत्रालङ्कारे पूर्व-पूर्व-वस्तु प्रति पर-परं वस्तु विशेषणभावेन विधीयते निषिध्यते वा, सा द्विधा एकावली इत्यर्थः ।

विधौ उदाहरणं यथा—

पुराणि यस्याः सवराङ्गानि वराङ्गनाः रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥

अत्र पुराणामङ्गनाः तासामङ्गविशेषणक्रियामुखेन रूपं तस्य विलासाः तेषामस्त्रमिति क्रमेण विशेषणतया स्थापना ।

निषेधे उदाहरणं यथा—

न तज्जलं यन्न सुचारु पङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः ॥

अत्र जले पङ्कजस्य तत्र षट्पदानां तत्र गुञ्जितस्य तत्रापि मनोहारितायाः विशेषणतया बाहुल्येन निषेधः ।

क्वचिद् विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितं च दृश्यते । यथा—

वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु ।
कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम् ॥

अत्र कमलाद्युत्तरोत्तरविशेष्यं प्रति वाप्यादिकं पूर्वं-पूर्वं प्रति विशेष्यं विशेषणतया समुपन्यस्तमित्येकावली ।

अपोहनेऽप्येवमूह्यम् ।

अत्रेयमेकावली श्रृङ्खलारूपया विशेषणविशेष्यभावात्मिकया विच्छित्त्यैवालङ्कारः । श्रृङ्खलारूपापीयं न कारणमाला, तस्याः कार्यकारणात्मकत्वात् । न च मालादीपकम् , तस्य सादृश्यात्मकत्वात् । श्रृङ्खलामूलेभ्योऽपि कारणमाला-सारमालादीपकेभ्यः सर्वेभ्यो विलक्षणवैच्छित्तिसमुन्मीलकतया स्वतन्त्रं रूपं दधानेयमेकावली स्वभावोक्तावन्तर्भवेत् । सादृश्यातिशयादिधर्मशून्यतयाऽस्यां वक्रोक्तेरप्रासत्वात् स्थापनापोहनविधिभ्यां श्रृङ्खलासंसर्गस्य विशेषणविशेष्यभावात्मकस्य कविप्रतिभानिवर्तितत्वेन विच्छित्तिः । तस्मादियमपि स्वभावोक्तिक्रोडीकृतैवेति ।

---

१. रसग०, पृ० ४६४ । २. का० प्र० (नागे०), पृ० ४३०–३१ ।

१७. सूक्ष्मालङ्कारः

सूक्ष्मालङ्कारलक्षणमाह विश्वनाथः—

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा।
कयाऽपि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ॥[१]

अस्य। उदाहरणम्—इङ्गितेन यथा—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥

अत्र विटस्य भ्रूविक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनीकालभाविना पद्मनिमीलनेन प्रकाशितः। एवमाकारेणापि लक्षितोऽर्थो ज्ञेयः।

वक्रोक्तिरहितत्वादेवायं न गण्यते भामहेनालङ्कारे। यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥[२]

किन्तु दण्डी त्विमं स्वीकुरुते उदाहरति च। यथा—

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम्।
अवेक्ष्य कान्तमबला लीलापद्मं न्यमीलयत् ॥[3]

अत्र दण्डी निर्दिशत्यपीदं यद् पद्मसम्मीलनादत्र सूचितो निशि सङ्गमः। आश्वासयितुमिच्छन्त्या प्रियमत्र पङ्कजं पीडितम्। एवमेकस्मिन् प्रस्थाने धारायां वा दृश्यते दृष्टिभेदः। ( Different camps ) समर्थकानां विरोधिनाञ्चालङ्कारिकाणां वर्गोऽप्यस्ति। यथा अत्रैव केचन सूक्ष्मालङ्कारं समर्थयन्ते, ये स्वभावोक्तिधारायाः समर्थकाः। अपरे च न तथा कुर्वन्ति, वक्रोक्तिविरहात्। स्वभावोक्तावपि सूक्ष्मा धाराः काश्चन वक्रोक्त्या ईषत्स्पृष्टाः, काश्चन अधिकम्। एवं वक्रोक्तावपि स्वभावोक्त्येव स्पृष्टा अस्पृष्टा च। पूर्वस्याः समर्थका भामहादयः, परस्याश्च पोषकाः कुन्तकादयः।

सम्प्रति सूक्ष्मालङ्कारस्य समर्थकासमर्थकनिर्देशपूर्वकं स्वमतस्य क्रियते पोषः।

तत्र सूक्ष्मालङ्कारस्य समर्थकाः—दण्डी, रुद्रटः, रुय्यकः,[४] विश्वनाथः,[५] विद्याधरः[६], विद्यानाथः[७], वाग्भटः[८] अप्पयदीक्षित[९] प्रभृतयः।

---

१. सा० द०, पृ० ८२८।
२. भामहः, २.८६।
३. दण्डी, २.२१६।
४. रुय्यकः, अ०, स०, पृ० १९४।
५. सा० द०, पृ० ८२९।
६. एकावली, ८.६८।
७. प्र० रु०, पृ० ४६५।
८. वाग्भटः, काव्यानु०, पृ० ४३।
९. अप्पयदीक्षितः, कुव०, पृ० १५५।

असमर्थकास्तु—भामहोद्भटवामनजगन्नाथादयः।

उद्योतकारस्तु सूक्ष्मालङ्कारे अनुमानालङ्कारमन्तर्भावयति, किन्तु गौण-रूपेण। प्राधान्यं तु सूक्ष्मस्य। अत एव तेनैव व्यपदेशः प्राधान्यात्। यथा—

"अत्र विद्यमानमपि अनुमानं सूक्ष्माङ्गं स्ववैदग्ध्यप्रकाशनद्वारा सूक्ष्मस्यैव चमत्कारित्वात्"। अतः पूर्वोक्तदिशा सूक्ष्मालङ्कारोऽपि स्वभावोक्तिधाराप्रवाह एव।

## १८. लेशालङ्कारः

लेशालङ्कारलक्षणमाह पण्डितराजः—

**गुणस्यानिष्टसाधनतया दोषत्वेन दोषस्येष्टसाधनतया गुणत्वेन च वर्णनं लेशः।**[१]

अस्य उदाहरणम्—

**अपि बत गुरुगर्वं मा स्म कस्तूरि यासी-**
**रखिलपरिमलानां मौलिना सौरभेण।**
**गिरिगहनगुहायां लीनमत्यन्तदीनं,**
**स्वजनकममुनैव प्राणहीनं करोषि॥**

अत्रानिष्टसाधनतया गुणस्य दोषत्वेन वर्णनमात्रम्।

**नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम्।**
**शाखिनोऽन्ये विराजन्ते खण्डयन्ते चन्दनद्रुमाः।**

"अत्र दोषोऽपराधः। तथा चापराधत्वेन गुणानां स्वाभाविकतया दोषत्व-मुक्तं भवति। न चायमलङ्कारो व्याजस्तुत्या उभयरूपया गतार्थ इति शङ्क्यम्, मुखप्रतिपादनार्थवैपरीत्येनात्र सर्वत्र पर्यवसानाभावात्। नहि 'अपि बत गुरु गर्वम्' इत्यत्र कस्तूर्याः स्तुतौ कवेस्तात्पर्यम्, अपि तु जनकप्राण-हरत्वेन निन्दायामेव। अत एवाऽप्रस्तुतकस्तूरीवृत्तान्ताभिव्यक्तेः प्रस्तुत-वृत्तान्तेऽपि तस्यामेव विश्रान्तिः।"

अनेनैव क्रमेण "नैर्गुण्यमेव साधीयः" इति उदाहरणेऽपि स्वगुणैर्दुःखितस्य जनस्य वाक्येऽस्मिन्निर्गुणानां निन्दाया अवक्तव्यत्वात्, प्रत्युत स्तुतेरेव वाच्यत्वात्।

अनिष्टसाधनत्वे गुणा अपि निन्द्यन्ते, दोषाश्चापीष्टसाधनत्वे स्तूयन्त इति नयस्य स्वभावतः सिद्धत्वात्। अत्र स्वभावोक्तौ वक्रोक्तेर्लेश एव स्पर्शः। अतो नायमलङ्कारतया स्वीकृतो भामहेन। तथैव मम्मटविश्वनाथादयोऽपि नेमं स्वीचक्रुः।

---

१०. उद्यो० पृ० ११६। १. र० गं०, पृ० ५१२–१३।

अनेनापि अलङ्कारप्रस्थाने धाराः सन्तीति स्पष्टं द्योत्यते। धारास्तु स्पष्टाः, किन्तु तासां समर्थका न दृढाः। यत एकत्रैक आलङ्कारिक एकस्या धारायाः समर्थनं करोति अन्यत्र च स एव तां निषेधति रुचेर्वैचित्र्यात्। यथा हेत्वलङ्कारं रसगङ्गाधरकारो भामहमम्मटादिवन्न समर्थयते, किन्त्वत्र लेशालङ्कारे नास्य भामहमम्मटादिभिः संवादः अपि तु वक्रोक्तिविरहितमपीमं लेशमङ्गीकृत्यात्र दण्डिनमेवानुधावति। एवं धाराहृष्ट्या (According to Schools) अलङ्कारास्तु विभक्तुं शक्यन्ते, किन्तु नालङ्कारिकास्तेषां यथारुचि विभिन्नधारावगाहनात्।[1]

तस्मात् स्पष्ट एव लेशालङ्कारस्य स्वभावोक्तिकुक्षिनिक्षेपः, अस्य वक्रोक्तिशून्यत्वात्।

## १९. मीलितम्

मीलितालङ्कारलक्षणमाह मम्मटः—

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते।
निजेनाऽऽगन्तुना वापि तन्मीलितमिति स्मृतम्॥[2]

वस्तुस्वभावसिद्धेन निमित्तविशेषसम्पर्कजनितेन वा साधारणेन लक्ष्मणा यत्किञ्चिद् वस्तु वस्तुगत्या स्वभावतो यन्निगूह्यते अन्तर्धीयते वा तन्मीलितमित्यर्थः।

अत एवेदं द्विधा क्रमेण उदाहरणम्—

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम्।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते।

अत्र सहजलीलाजन्यत्वात् स्वाभाविकं दृक्तरलादिकमङ्गनिष्ठं लिङ्गम्। तच्च लीलामदसाधारणम्। एवञ्च प्रसिद्धतया बलिष्ठेन लीलारूपवस्तुना स्वाभाविकसाधारणदृक्तरलादिलक्ष्मद्वारा मदरूपं वस्तु तिरोहितमिति मीलितम्।

जलकुम्भमुम्भितरसं सपदि सरस्याः समानयन्त्यास्ते।
तटकुञ्जगूढसुरतं भगवानेको मनोभवो वेद॥[3]

अत्रागन्तूनां सुरतगमकानां स्वेदकम्पनिश्वासानां जलकुम्भानयनत्वराजनितैस्तैर्भेदस्याग्रहाद् मिलनाद् वा सुरतस्याप्रकाश इति मीलितम्।

अत्र मीलिते वस्तुना वस्तुनिगूहनमेव चमत्कृतिजनकं विच्छित्त्याधायकत्वात्। एतच्च निगूहनं साहजिकेन आगन्तुकेन वा गुणेन स्वभावतो भवति। बलवद् वस्तुना अनेन सहजेन साधारणगुणेन अन्यद् वस्तु अन्तर्धीयते।

१. मम्मट; २.८६।

२. का० प्र० (नागे०) पृ० ४९।  ३. रसग०; पृ० ५१५।

अयं मीलितालङ्कारो नोपलभ्यते भामह-दण्डयुद्भट-वामनादीनां कृतिषु। रुद्रट एव प्रथममिमं लक्षयति, किन्तु न मीलिताख्यया, अपि तु 'पिहित' नाम्ना। यथा—

यत्रातिप्रबलतया गुणः समानाधिकरणमसमानम्।
अर्थान्तरं पिदध्यादाविर्भूतमपि तत् पिहितम्॥[1]

अलङ्कारसर्वस्वकारस्तु एतदेव लक्षणं मीलितस्य उपन्यस्यति संक्षेपेण। यथा-

'वस्तुना वस्त्वन्तरनिगूहनं मीलितम्'॥[2]

अत इत्थं प्रतीयते यदित एव स्फूर्तिमधिगत्य मम्मटभट्टा उदाहरन्ति मीलितम्। एवं विशालेऽस्मिन् अलङ्काररत्नाकरे विकीर्णाऽलङ्कारा यदा कदा नामभेदेनापि भ्रमयन्ति विवेचकान्।

नात्र किमपि साधर्म्यातिशयादिधर्मकतया निगूहनं यथा अपह्नुतौ, भ्रान्तिमति च यथासंख्यसादृश्यजन्योऽपह्नवो भ्रमो वा। अतोऽस्यान्तर्भावः स्वभावोक्तौ सङ्गतः। एवमेव सामान्य-तद्गुणादिषु च निगूहनस्य सादृश्यातिशयादिमहिम्ना स्वाभाविकतया तेषां वक्रोक्तौ विनिवेशः।

## २०. हेत्वलङ्कारः

हेत्वलङ्कारस्य लक्षणमाह विश्वनाथः—

अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह।[3]

हेतुमता कार्येण सह हेतोः कारणस्य अभेदेन अनतिरिक्तस्वरूपेण अभिधा-कथनं हेतुः कारणं तन्नामालङ्कारो निगद्यते। कार्यकारणयोस्तादात्म्यप्रतिपादनमेव हेतुर्नामालङ्कार इति निष्कर्षः।

अस्य उदाहरणं यथा—

तारुण्यस्य विलासः समधिकलावण्यसम्पदो ह्रासः।
धरणितलस्याभरणं युवजनमनसो वशीकरणम्॥

अत्र वशीकरणस्य हेतुर्नायिका वशीकरणत्वेन वशीकरणरूपकार्यस्य तादात्म्येन कविना उक्ता। प्राकरणिकनायिकापदोत्तरगतप्रथमाविभक्तेः वशीकरणम् इत्यत्र प्रथमाविभक्तेश्च सामानाधिकरण्येन अभिन्नार्थकत्वादिति।

अस्मिन्नलङ्कारे कार्यकारणयोरेवाऽभेदः, न तु रूपकोत्प्रेक्षादिवद् उपमानोपमेययोः सादृश्यभित्तौ। अत एवास्य हेत्वलङ्कारस्य स्वभावोक्तावन्तर्भावः कार्यकारणात्मकत्वाद् अभेदस्य स्वभावतया प्रतीतेश्च, न तु वक्रोक्तौ, सादृश्यानुप्राणितस्याभेदस्यैव तत्रान्तर्भावात्।

१. रुद्रटः, काव्यालङ्कारः ९.५०। २. अलङ्कार स०; पृ० २१०।
३. सा० द०, ७८८।

अत एव वक्रोक्तिशून्यत्वेन शुद्धाया कार्यकारणात्मिकायाः स्वभावोक्तेरनुप्राणितत्वेन च भामहो हेत्वलङ्कारं नालङ्कारेषु गणयति। यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥[1]

इति वचनात् वक्रोक्त्यभावे वैचित्र्यस्यासम्भवात्। मम्मटभट्टा अपि अत्र भामहमेवाऽनुसरन्ति। कारणमालालङ्कारविमर्शप्रसङ्गे ते इदं स्वीकुर्वन्ति, यद् हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति हेत्वलङ्कारो न लक्षितः। 'आयुर्घृतमि'त्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात्'।[2] अस्याभिप्रायोऽप्यत्रैव पृष्ठे वामनाचार्येण बालबोधिन्यां निरूपितः। यथा—

'गौणसारोपसाध्यवसानयोः रूपकप्रथमातिशयोक्तिप्रयोजकत्ववत् कार्यकारणभावसम्बन्धनिबन्धनशुद्धसारोपसाध्यवसानयोर्हेत्वलङ्कारप्रयोजनकत्वमिति कार्यकारणभावसम्बन्धेन शुद्धसारोपासाध्यवसानामूलोऽयमलङ्कार इति भट्टोद्भटाशयः।' वैचित्र्याभावात् चमत्कारित्वाभावात्। अयम्भावः-गौणत्वे (सादृश्याख्यसम्बन्धसत्त्वे एव) वैचित्र्यादलङ्कारत्वम्, 'आयुर्घृतमि' त्यादिरूपस्यास्य कार्यवाचकपदेन कारणाभिधाने वैचित्र्याभावेनालङ्कारत्वस्यैवाभाव इति। सारबोधिन्यान्तु—"वस्तुतस्तु 'अविरलकमलविकासः' इत्यादिषु वैचित्र्यमनुभवसिद्धमिति उद्भटादिमतं समीचीनमेवेति नवीनाः" इत्युक्तम्।'

वामनाचार्याणां प्रदर्शितोऽयम्भावः स्पष्टमिदं निर्दिशति यदत्र हेत्वलङ्कारे स्वभावोक्तिवक्रोक्तिधारयोः समर्थकाः परस्परं विवदन्ते। स्वभावोक्तेः पोषका हेतोरलङ्कारतामभ्युपगच्छन्ति, न वक्रोक्तेः।

अत एव दण्डी वैचित्र्याभावात् वक्रोक्त्यनभिधानतो वा भामहेनास्वीकृतान् सूक्ष्म-लेश-हेतुसंज्ञकान् एतान् अलङ्कारान् वाचामुत्तमभूषणभूतान् मनुते–'**हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्**'[3] इति। यत एष्वेवास्याः स्वभावोक्तेर्वास्तविकं शुद्धं रूपं वक्रोक्तिविरहितमुज्जिहीते। अस्मादेव हेतोर्दण्डिनः परवर्तिनो विश्वनाथ-जयदेवाऽप्पयदीक्षितादयो हेतोरलङ्कारतां समर्थयन्ते। अनेनेदं स्पष्टं यद् स्वभावोक्तिवक्रोक्तिकृतमेवालङ्कारेषु भेदोपभेदविवर्धनं हानादाने च।

अतो हेत्वलङ्कारोऽपि स्वभावोक्तावेवान्तर्भाव्यः।

## २१. प्रमाणालङ्काराः

सम्प्रति स्वभावोक्तिगर्भितेष्वलङ्कारेषु प्रमाणालङ्कारा अपि निरूप्यन्ते। अत्रैतानि प्रमाणानि न सर्वथा शास्त्रीयाणि, तथात्वे वैचित्र्याभावेऽनलङ्कारतापत्तेः।

---

१. भामहः २.८६। २. का० प्र० (वाम०) पृ०:७०२।
३. दण्डी, २.२३५।

अतः सर्वत्रैवैतेषां लक्षणे वैचित्र्यं त्वनिवार्यम् । अन्यथा 'आयुर्घृतमायुरेवेदमि'-त्यादाविव चमत्कारित्वाभावान्नालङ्कारता ।[1] अत एतानि शास्त्रीयाण्यपि प्रमाणानि चमत्कारितायामलङ्कारतामापद्यन्ते ।

ननु यद्यनेन रूपेण शास्त्रीयमपि वाक्यप्रमाणसनाथीकृतं सालङ्कारं स्यात्तदा सर्वमेव सप्रमाणं वाक्यं सालङ्कारं स्यात् । एवञ्च काव्याकाव्ययोर्भेदाभावे काव्य-लक्षणकरणस्यैव वैयर्थ्यापत्तेः । अतो न कोऽपि प्राचीन आलङ्कारिकः प्रमाणा-लङ्कारान् वर्णयति । केवलमप्पयदीक्षितसदृशाः[2] स्वभावोक्तिधाराधौतवक्रोक्ति-व्यामोहाः कतिपये नवीनाः प्रमाणालङ्कारं वर्णयामासुः । ततः परमन्यैः पश्चाद्भवै-रलङ्कारमञ्जूषा[3] अलङ्कारमणिहार[4]कारादिभिर्नवीनैरालङ्कारिकैर्मान्यतां गता एते प्रमाणालङ्कारा अलङ्कारग्रन्थेषु प्रसिद्धा इति । अत्रोच्यते—यद्यपि प्राचीनैर्न-वीनैर्वा मूर्धन्यैः रुय्यक-रुद्रट-मम्मट-विश्वनाथ-जगन्नाथादिभिः स्पष्टतो नैते चत्वारः अष्टौ वा अलङ्कारा निर्दिष्टाः, न वा वर्णिताः । किन्त्वेतेषां सम्मतिमेते प्राप्नु-वन्त्येव प्रमाणालङ्कारा अष्टौ परम्परयेति स्पष्टमेवालङ्कारविदाम् । यतोऽनुमाना-लङ्कारः सर्वैरेव प्राय आलङ्कारिकैरङ्गीकृतः । अतोऽन्येषामपि प्रमाणानामलङ्कारत्वे नास्ति बाधा । प्रमाणत्वेन चाऽनुमाने नास्ति कोऽपि विशेषः प्रत्यक्षादिभ्योऽन्येभ्यः प्रमाणेभ्यः । विच्छित्तिसदसद्भावकृतं वैलक्षण्यमपि नात्र दृश्यते । अतोऽनुमान-वदन्यान्यपि प्रमाणान्यलङ्कारतया मन्तव्यानि ।

यद्यपि कतिपये अप्पयदीक्षितादयोऽनुमानालङ्कारतोऽत्र स्फूर्तिं गृहीत्वा सर्वेषामेवाष्टानां प्रमाणानामलङ्कारतामङ्गीचक्रुः । किन्तु नापरे तत् क्षमन्ते । यथा— 'परन्त्वष्टावप्येते न निरूपणार्हाः । केषाञ्चिदुक्तेष्वेवालङ्कारेष्वन्तर्भावात् । केषाञ्चित् चमत्कारित्वाभावात् ।'[5]

एवमेवोद्योतकारोऽपि यथा—'एवमष्टौ प्रमाणालङ्कारा अन्यैर्दर्शिताः । तत्र प्रत्यक्षं भाविकतया निबद्धम्, अन्यादृशन्तु न चमत्कारि । अनुमानं तु साक्षा-देवोक्तम् । अन्येषां तु नालङ्कारत्वम्, तत्तत्प्रमाणजन्यप्रमितिविषयत्वकृतचम-त्काराभावात् । उपमानं तु उपमयैव गतार्थमित्याद्यूह्यम्' ।[6]

एवमत्र प्रमाणालङ्कारे सन्ति विप्रतिपत्तयः । किन्तु दृष्टिभेदेन आलङ्कारिकै-रेतेषां प्रमाणालङ्काराणां विरोधः समर्थनं वा क्रियते । ये च सर्वथा शुद्धायाः स्व-ल्पातिस्वल्पवक्रोक्तिस्पर्शमप्यसहमानाया वा स्वभावोक्तिधारायाः समर्थकास्तेषां नये सर्वाण्येव अष्टप्रमाणान्यलङ्कारतां भजन्ते । किन्तु ये मात्राभेदेन वक्रोक्तेरुप-

१. का० प्र०, वामनी पृ० ७०२ । २. कुवल०, पृ० २७५-८३ ।
३. अ० मञ्जू०, पृ० २२३-२५ । ४. अ० म० हा०, भाग ४, पृ० १२ ।
५. वामनाचार्यः का० प्र० बा० पृ० ७५१ ।
६. का० प्र० उद्यो०, पृ० ५७६ ।

रागं स्वभावोक्तौ स्तुवन्ति, तेषां मते प्रमाणानामलङ्कारत्वे भविष्यति स्वभावत एव पार्थक्यम्। एतत्पार्थक्यं तु स्वभावोक्तिमूलकेषु बहुषु हेतु-सूक्ष्म-लेशादिष्व-लङ्कारेषु दर्शितमेव पूर्वमेतेषां विचारप्रसङ्गे। अत्रापि प्रमाणानामलङ्कारे तदेवा-लङ्कारिकाणां पार्थक्यं प्रथते। अत्र कारणमस्ति स्वभावोक्तिवक्रोक्तिधाराविषयको दृष्टिभेदः। अतो दण्डिदृष्ट्या प्रमाणानामलङ्कारता, भामहदृष्ट्या न। यद्यपि दण्डी नालङ्कारेषु प्रमाणानां क्वाप्यलङ्कारतामस्तौत्, किन्तु—

जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्।
शास्त्रे चास्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम्।[1]

इत्यादिनिर्देशेन तन्मते प्रमाणानामलङ्कारत्वे नास्ति बाधा। अत एवास्य समर्थकैः परवर्तिभिः कतिपयैरप्पयदीक्षित[2] श्रीकृष्ण[3] देवशंकरादिभिः[4] प्रमाणाना मलङ्कारत्वमङ्गीकृतम्।

झल्लकीकरोपाह्वानां वामनाचार्याणाम् उद्योतकारस्य च मतं पूर्वमेवोद्धृतम्। हेत्वनुमानादीनामलङ्कारतास्वीकारोऽप्यत्र साहाय्यं करोति। यथाऽनयोर-लङ्कारयोरनुभवसिद्धं वैचित्र्यमलङ्कारतां साधयति, तथैवात्रापि प्रमाणेषु वर्तमानं वैचित्र्यमेतेषामलङ्कारतायाः पोषकमिति। अत एव हेत्वलङ्कारं समर्थयन्तः "वैचित्र्यमनुभवसिद्धमेवेति उद्भटादिमतं समीचीनमिति नवीनाः इति सार बोधिनीकारा अपि सङ्गच्छन्ते"।[5]

एवं प्रमाणानामलङ्कारत्वे नास्ति काठिन्यम्। किन्त्वेषालङ्कारता यत्र तया स्वभावोक्तिधारयाऽऽस्कन्दिता तत्र भवति स्वल्पातिस्वल्पः स्पर्शो वक्रोक्तेः। यतो दण्डी स्वभावोक्तिवक्रोक्तिभ्यां वाङ्मयस्य द्विधा विभागं कृत्वाऽपि तत्रोभयत्र अति-शयोक्तेस्तत्पर्यायभूताया वक्रोक्तेर्वा अलङ्कारार्थमनिवार्यत्वं शंसति। यथा—

विवक्षाया विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिस्स्यादलङ्कारोत्तमा यथा॥[6]

अत्र यद्यप्यलङ्कारार्थं न स्पष्टमतिशयस्यानिवार्यत्वं दृश्यते, किन्तु कान्ति-गुणाद् वार्तायाश्च व्यावर्तनाय स्वभावोक्तौ अलङ्कारार्थमपेक्ष्यत एवातिशयो यस्य पराकाष्ठा प्राप्यतेऽतिशयोक्तौ अतस्तस्या अलङ्कारेषु उत्तमत्वमिति। कान्तिगुणे वक्रतायाश्च वस्तुवर्णनस्य न लोकातिक्रमता यथा—

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।
तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते॥[7]

---

१. दण्डी २।१३। २. कुव०, पृ० २७५।
३. अ० म०, भा० ४ पृ० १२-८४।
४. अ० मञ्जू०, पृ० २२३-२२६। ५. वामनी, का० प्र० पृ० ७०६।
६. दण्डी २. ११४। ७. दण्डी १.८५।

अतिशयस्याधानेन वस्तुस्वभाववर्णनेऽप्यायाति वैशिष्टयम्। अनेन सामान्य-वस्तुस्वभावोऽलङ्कार्यो भवति विशेषभावश्च स्वभावोक्त्यलङ्कारः। अत एवोद्योत-कारोऽपि सङ्गच्छते। यथा—'साधारणस्वभाववर्णनस्य स्फुटत्वान्नालङ्कारत्वम्। असाधारणस्तु लोकसिद्धोऽपि प्रतिभामात्रवेद्यत्वाद्यलौकिकवद् भातीत्यलङ्कारः'।[1]

अतः प्रमाणानि असाधारणवस्तुवर्णनायामलङ्कारतामाप्नुवन्ति। लोकसिद्धा अप्यत्र पदार्थाः प्रतिभावेद्यत्वादलौकिवद् भान्तीति। एवञ्च सिद्धमियता विस्तारेण प्रमाणानामलङ्कारत्वम्, तदपि स्वभावोक्तिधारास्कन्दितमेव।

अधुना अतीव संक्षेपतः प्रमाणानां लक्षणोदाहरणपुरःसरं क्रियते निरूपणम्। एतानि प्रमाणानि दार्शनिकदृष्टिभेदाद् भिद्यन्ते। यथा—

"चत्वारि प्रमाणानि नैयायिकानाम्, षड् वेदान्तिनाम्, अष्टौ मीमांसकानाम्, आलङ्कारिकाणाञ्चेति प्रसिद्धः पन्थाः"[2]। प्रमाणानामलङ्कारतां शंसतामपि द्विविधो वर्गः। एकः प्रमाणानामलङ्कारतामङ्गीकृत्यापि तेषां न स्वतन्त्रां सत्ताम् अपि तु तेषामन्यत्र प्रसिद्धेष्वलङ्कारेष्वन्तर्भावं स्वीकरोति, यथा—प्रदीपोद्योतकारादयः। अन्यश्च मनुते स्वतन्त्रां सत्ताम्। यथा—अप्पयदीक्षित-श्रीकृष्णादयः। स्वतन्त्रां सत्तामभ्युपगच्छतामपि वर्गो द्विविधः—एकश्चतुर्णामेव प्रत्यक्षादिप्रमाणानामुररी-करोति अलङ्कारताम्, शिष्टांश्च अत्रैवान्तर्भावयति। अपरश्च वर्गोऽष्टानामेव अलङ्कारत्वमभ्युपैति। यथा—'तत्र प्रमाणालङ्कारः प्रत्यक्षानुमानोपमानशब्द-भेदात् चतुर्धा। सम्भव-चेष्टयोरनुमानेन, ऐतिह्यस्य शब्देन अनुपलब्धेश्च प्रत्यक्षेण गतार्थत्वात्।'[3] "अष्टौ प्रमाणालङ्काराः कैश्चिदुक्ताः। ते च प्रत्यक्षानुमानोपमान-शब्दाः ऐतिह्यमर्थापत्तिरनुपलब्धिः सम्भवश्चेति"। निरूपिताश्चैते कुवलयानन्द-कारिकाव्याख्यात्रा आशाधरभट्टेन।[4]

सम्प्रत्येते सलक्षणोदाहरणं निरूप्यन्ते।

## प्रत्यक्षालङ्कारः

अलङ्कारस्यास्य लक्षणम्—

प्रत्यक्षमिन्द्रियज्ञानवर्णनं षड्विधं तु तत्।[5]

एतच्च षड्विधं श्रौत्र-त्वाच-चाक्षुष-रासन-घ्राणज-मानसभेदात्।

अस्य उदाहरणम्—

कान्तकान्तवदनप्रतिबिम्बे, भग्नबालसहकारसुगन्धौ।
स्वादुनि प्रणुदितालिनि शीते, निर्ववार मधुनीन्द्रियवर्गः॥[6]

---

१. उद्यो०, का० प्र० पृ० ५२१। २. वामनी का० प्र०, पृ० ७५१।
३. अ० मञ्जू०, पृ० २२३। ४. का० प्र०, वामनी, पृ० ७५०।
५. तत्रैव। ६. कुव०, पृ० २७५।

अत्र पञ्चादीनामपीन्द्रियाणां विषया वर्णिताः। एतेषाञ्च प्रमा प्रत्यक्ष-प्रमाण-विषयेति प्रत्यक्षालङ्कारः।

## अनुमानालङ्कारः

लक्षणम्—

[1]प्रतीतिर्लिङ्गिनो लिङ्गादनुमानमदूषितात्।

उदाहरणम्—

सौमित्रे! ननु[2] सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते,
चण्डांशोर्निशि का कथा? रघुपते! चन्द्रोऽयमुन्मीलति।
वत्सैतद्विदितं कथं नु भवता? धत्ते कुरङ्गं यतः,
क्वासि प्रेयसि! हा कुरङ्गनयने चन्द्रानने? जानकि॥

अत्र कुरङ्गधारणाद्धेतोश्चन्द्रस्य प्रतीतिरिति अनुमानालङ्कारः।

यथा वा—

यत्रैता लहरी चलाचलदृशो व्यापारयन्ति भ्रुवौ,
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः।
तच्चक्रीकृतचापपुङ्खितशरप्रेङ्खत्करः क्रोधनो,
धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः॥

अत्राप्यनुमानं किन्तु कार्यकारणपौर्वापर्यरूपयातिशयोक्त्या संकीर्णः। अत्रांगभूतातिशयोक्तिरनुमानस्य।

## उपमानम्

लक्षणम्—

[3] सादृश्याद् वस्तुनो भानमुपमानं प्रकीर्तितम्।

उदाहरणम्—

[4]अत्र मन्मथमिवातिसुन्दरं दानवारिमिव दिव्यतेजसम्।
शैलराजमिव धैर्यशालिनं वेद्मि वेङ्कटपतिं महीपतिम्॥

अत्रातिदेशवाक्यार्थसादृश्यप्रत्यक्षरूपमुपमानम्।

एवमेवान्येषामवशिष्टानां प्रमाणालङ्काराणां लक्षणोदाहरणानि कुवलयानन्दादि-ग्रन्थेभ्यो द्रष्टव्यानि।

अत्र प्रमाणालङ्काराणां कतिपयान्येव उदाहरणानि सङ्केतितानि। केवलं धारा-निरूपणार्थमेवायं संक्षिप्त उपन्यासो लक्षणोदाहरणानाम्।

प्रमाणालङ्कारानपि स्वभावोक्तिधारा स्पृशतीति निरूपितम्। धाराया वर्ततेऽत्र स्वल्पातिस्वल्पः स्पर्श इत्यन्यदेतत्। अत एवैषामलङ्कारत्वं न स्वदतेऽधिकेभ्य

---

१. वामनी का० प्र०, पृ० ७५०। २. कुव०, पृ० २७६-२७७।
३. वाम० का० प्र०, पृ० ७५०। ४. कुव०, पृ० २७८।

आलङ्कारिकेभ्यः। हेतुश्चात्र वक्रोक्तेः प्रभावो यो विकाशक्रमेण स्वभावोक्तिमाचक्राम। विदधे च तामकान्तवर्णां नैसर्गिकोपलब्धिवञ्चितां यदर्थञ्च आसीन्निर्मितिः स्वभावोक्त्यलङ्कृतेराद्यालङ्कृतिरूपेण। फलतः स्वभावोक्तेर्व्यापिनी विषयता सञ्चुकोच वक्रोक्तेर्विस्तारवादिन्या प्रवृत्त्या पराभूता। अस्य पराभवस्येदं फलं यत् संस्कृतसमालोचना स्वनैसर्गिकोपलब्ध्या स्वभावोक्त्या व्ययुज्यत, यदर्थमयं पप्रथे काव्यानामादित एव। यस्याश्च फलं बभूवुर्द्वित्रा पञ्चशो वा महाकवयो रससिद्धाः कालिदासाद्याः।

काव्येषु स्वभावोक्तेः प्रभावः काव्यानां विस्तारेण सह काव्यक्षेत्रमपि प्रससार। शनैः शनैः स्वभावोक्तिर्ज्ञानविज्ञानमयान्यपि शास्त्राणि प्रभावयाञ्चकार। अत एव बाध्यो भूत्वा दण्डी शास्त्रेष्वस्यैव साम्राज्यमित्यूचे। अस्यैव प्रभावो फलति स्म ज्ञानात्मकेषु शास्त्रेषु भाषायाः सौन्दर्यम्। अनेन न केवलमभूत् परिष्कारो भाषायाः, अपि तु ज्ञानविज्ञानादीनामध्ययनाध्यापनार्थमपि बभूव विपुलं सौविध्यं काव्यद्वारा, यच्च मुख्यं लक्ष्यं काव्यनिर्मितेरध्ययनस्य वा।

वक्रोक्त्या स्वभावोक्तेः क्षेत्रापहरणमस्त्येका संस्कृतसमालोचनायाः महती खेदावहा घटना। अस्याः कारणं न केवलं तत्कालीनाः कवयो न वा समालोचकाः, अपि तु तदानीन्तना जनरुचिरपि। इयमेव कवीन् समालोचकांश्च उभयानपि चचाल। फलतः काव्ये व्यापिका वक्रता ववृधे। भामहस्य "कोऽलङ्कारोऽनया विने"त्युक्तिः अस्यैव फलम्। त्रिविधाया उक्तेः पोषको भोजोऽपि "वक्रोक्तिमेव काव्यानां परा भूषेति भामहः" इति जगाद, स्वयमपि च "यद् वक्रं वचः काव्ये अवक्रं वच एव तत्" इति जगौ।

कुन्तकस्तु स्वभावोक्तिमलङ्कारादपि विस्थापयामास, अलङ्कारे चैकमेव प्रस्थानं प्रस्थापयितुं प्रयासमातेने। किन्तु नास्य प्रयत्नोऽलङ्कारक्षेत्रे मान्यतामाप। किन्त्वनेन वक्रोक्तिः पराकाष्ठामिता, तस्थौ चास्याः पर्याप्तः प्रभावोऽलङ्कारेषु। फलतो अलङ्काराणां विचारे बभूव क्रान्तिः। वक्रतैव अलङ्काराणामनिवार्यं बीजमभूत्। अनेकानेके स्वभावोक्तिधाराक्रोडिता अलङ्कारा अभीष्टाया वक्रोक्तेरभावादलङ्कारतामपि तत्यजुः। अवशिष्टेषु चासीत् स्वाभाविकं तत्त्वं तथाऽऽक्रान्तं वक्रोक्त्या यन्महता विमर्शेनापि तस्य प्रकाशो न सुकरः। स्वभावोक्तिधारालङ्काराणां विमर्शस्यावलोकनेनेदं सत्यं स्पष्टं स्यात्।

प्रमाणानामलङ्कारत्वस्य विरोधोऽस्या एव वक्रोक्तेः प्रभावस्य फलम्। भामहः प्रथमं वक्रोक्त्यभावादाह—

हेतुः सूक्ष्मश्च लेशोऽथ नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥ इति।

न केवलमिदमेव अपि त्वलङ्कारान् निरोद्धुं कुन्तको निःशेषं स्वभावोक्तिरसोक्तितत्त्वमलङ्कारक्षेत्रात् निःसारयामास। फलतश्चानेन केवलं वक्रोक्तिमूला

एकोनविंशतिः वर्णिता अलङ्कारा 'वक्रोक्तिजीविते'। स्वभावोक्ति-रसोक्त्योर्बहिष्कारेण विचित्रैवाव्यवस्था आगमिष्यत्। अथचेन्नाभविष्यद् ध्वन्यालोककारेण व्यवस्थिता दृढालङ्कारसरणिः।

अत एव स्वभावोक्तिमूला अलङ्कारा विस्तरेण वर्णिताः। यतो हि एतेषु बहुत्र स्थलेषु स्वभावोक्ति-वक्रोक्त्योर्वर्तते विसंवादः। अस्य प्रधानं स्थलमस्ति दीपक-परिवृत्तिपर्यायसहोक्त्यादीनां प्रसङ्गः। अतोऽलङ्काराणां वास्तविको विमर्शोऽलङ्काराधाराणां विचारं विना न सम्भवतीत्येतदर्थं धाराविचारोऽनिवार्यः।

स्वभावोक्तिधारायां विचारितेभ्योऽलङ्कारेभ्यो व्यतिरिक्ता अन्येऽप्यलङ्कारा भवेयुः येषु सङ्केतो वक्रोक्तिधारामूलकालङ्काराणां विमर्शो विधास्यते।

अत्र स्वभावोक्तिधारामूलकालङ्कारविचारे प्राधान्येन रुद्रटस्यैव अलङ्कार-विभागोऽनुसृतः। यत्र तत्र तेनैव दर्शितदिशा स्वतन्त्रोऽपि विहितो विमर्शोऽनिवार्याणां कतिपयेषामलङ्काराणाम्, येन धाराविवेचनं व्यक्ततां व्रजेत्। यथा प्रमाणालङ्काराः प्रायोऽलङ्कारान्निसारिता अपि विस्तरेणात्र विचारिताः। यतोऽत्रैव स्वभावोक्तेः सामान्यवस्तुवर्णनात्मिका रेखा आत्मनः सामान्यगुणान् विहाय नैजं विशेषं गुणमादातुमलङ्कारक्षेत्रं सेवते। अत्रैव स्वभावोक्तिः स्वकीयां शास्त्रीयजां निरलङ्कारां नैसर्गिकीमुपलब्धिं निरुध्य अलङ्कारतामाप्तुमायासति। एष एवादावायास इमाम् 'आद्यालङ्कृतिः' इत्यभिख्यया विभूषयति।

## तृतीयोऽध्यायः

# वक्रोक्ति-धारा

वक्रोक्तिर्यद्यपि कतिपयैरालङ्कारिकैः अलङ्कारविशेषरूपैव स्वीकृता, तथापि अन्यैर्भामहादिभिः 'कोऽलङ्कारोऽनया विना' इत्युदीर्य अस्याः सर्वालङ्कार-मूलत्वमप्यङ्गीकृतम्। कुन्तकस्तु अस्याः काव्यजीवितत्वं स्वीकुर्वाणः सर्वाणि अलङ्काररीतिध्वन्यादीनि काव्यात्मतत्त्वानि अत्रैवान्तर्भावयति। एवं वक्रोक्ति-विषये वर्तमानासु विविधासु विप्रतिपत्तिषु सम्प्रत्यस्या विमर्शः प्रस्तूयते।

सर्वप्रथममस्याः व्यवस्थितमालङ्कारिकसम्मतं स्वभावोक्ति-रसोक्तिभ्यामनालीढं प्रातिस्विकं स्वरूपं समुपन्यस्तुं वक्रोक्तेरलङ्कारतायाः अध्ययनमावश्यकम्। वक्रोक्तिधाराया निरूपणार्थं तस्याः सामान्य-विशेषरूपात्मकं द्विविधं स्वरूपमपि विवेचनीयम्। अन्यथा सामान्यवचनेयं स्वभावोक्ति-रसोक्तिमूलकानपि अलङ्का-रानतिव्याप्नुयात्, विशेषवचना च वक्रोक्तिमूलकानपि अलङ्कारान् व्याप्नुयात्। एवम् अव्याप्त्यतिव्याप्तिदोषापाकरणाय वक्रोक्तेर्विस्तरेण विमर्शो नितरामावश्यकः। सहैव कुन्तकस्य वक्रोक्तिसिद्धान्तोऽपि सूक्ष्मतया समीक्षणीयः। ततश्च तत्कृत-स्वभावोक्तेः रसोक्तेश्चालङ्कारतायाः खण्डनमपि संक्षेपतः प्रत्याख्यातव्यम् अन्यैरा-लङ्कारिकैरुपन्यस्तया दृष्ट्या, येन तिस्रोऽपि ( वक्रोक्ति-स्वभावोक्ति-रसोक्तयोऽपि ) अलङ्कारतां भजेयुः। यत एतासां स्वभावोक्ति-वक्रोक्ति-रसोक्तीनां तिसृणामप्य-लङ्कारता प्रायः सर्वैरेवालङ्कारिभिः साक्षात् परम्परया वा स्वीकृता।

आलङ्कारिकाणां विचारात् पूर्वमपि समुपलभ्यते प्राचुर्येण प्रयोगोऽस्या काव्येषु नाटकादिषु च। 'अमरुशतके' बाणभट्टस्य 'कादम्बर्यां'चास्याः प्रयोगः परिहासकथायां क्रीडालापे च कृतः, वक्रोक्तिनिपुणेन विलासिजनेन इत्यादि-निर्देशरूपेण। किन्तु अलङ्कारशास्त्रे प्रविष्टोऽयं शब्दः स्वकीयामशेषामेव क्रीडा-कलापात्मिकां परिहासात्मिकां वाऽऽकृतिं परित्यजति। तत्रायं स्वव्युत्पत्तिलभ्यां 'वक्रा उक्तिः' इति स्वभावसुलभां वृत्तिमाश्रयते। वक्रोक्तिरनयैव विधया स्वीक्रियते चालङ्कारिकैः। एतेषामालङ्कारिकाणां नयेनैषा वाचां वैदग्ध्यस्यैव भङ्गीभणितेर्वा वाचिका बोधिका वा भवति।

प्रथमं भामहो वक्रोक्तेः स्वरूपमुपन्यस्यति, मन्यते चेमां पर्यायवाचिकामति-शयोक्तेः—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यतेऽतिशयोक्तिं तामलङ्कारतया तथा॥
सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[१]

वक्रोक्तेर्व्याख्यां कुर्वता चानेनेदं स्वीकृतम्—'लोकातिक्रान्तगोचरं वचनमि' ति। अन्यच्च—वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते।

एवं भामहो वक्रोक्तेरनिवार्यतां मन्यतेऽलङ्काराय। अस्याः विना कोऽप्यलङ्कारो न भजतेऽलङ्कारताम्। अत एव वक्रोक्तिविरहिता हेतु-सूक्ष्म-लेशाद्या भामहेन न गण्यन्तेऽलङ्कारेषु।[२]

दण्डी पुनः प्रथम आलङ्कारिको येन वक्रोक्तेर्विशिष्टं व्यावृत्तञ्च लक्षणमुपन्यस्य साधितं तस्याः पार्थक्यं स्वभावोक्तेः। यथा—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥[३]

अयं वाङ्मयस्य द्वैविध्यमङ्गीकृत्य द्वयोरेव स्वतन्त्रं लक्षणमुपन्यस्यति। यथा स्वभावोक्तेः—

नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्यथा॥[४]

अत्र साक्षादिति शब्दस्य व्याख्यां कुर्वाणा हृदयङ्गमा टीका 'अव्याजेनेति' पदेन स्वभावोक्तिवक्रोक्त्योः पार्थक्यं करोति। अर्थात् अव्याजेनालङ्कृतिः, व्याजेन तु वक्रोक्तिरिति। एतदेव समर्थ्यते कान्तिगुणलक्षणेऽपि यथा—

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।
यच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते॥[५]

अयमेव प्रथम आलङ्कारिको यः समस्तमेव वाङ्मयं द्विधा विभजते-स्वभावोक्तिवक्रोक्तिभेदेन। तदा प्रभृत्येव स्वभावोक्तिरपि अलङ्काराणां भेदिकाऽङ्गीक्रियते वक्रोक्तिवत्। अत्र वक्रोक्तिविरहितानां हेतुसूक्ष्मादीनां रसवदादीनां चालङ्काराणां सर्वेषामाभासतो विनिवेशो विधेयः, यतो दण्डिसमये नासीदुद्भाविता रसोक्तिः, तस्या भोजेनैवोद्भावितत्वात्। किन्त्विदमग्रे विस्तरेण विचारयिष्यते।

दण्डिन एष द्विविधो विभागोऽलङ्काराणां वक्रोक्ति-स्वभावोक्तिरूपतया प्रत्याययति यत् तृतीयं रसोक्तिरूपमलङ्काराणां भेदं नायमङ्गीकुरुते। तदा रसादीनां भावानाञ्च अलङ्कारत्वेनैवावभासात्। अवभासेऽपि वा स्वभावोक्तौ वक्रोक्तौ तदुभयोर्वा तेषामन्तर्भावाच्च! एवं दण्डिना प्रथमं कृतो वाङ्मयस्य द्विविधो

१. भामह, काव्य० २-८४-८५। २. द्रष्टव्यम् काव्या०, २-८६।
३. दण्डी, २.३६२। ४. तत्रैव २.८। ५. तत्रैव १.८५

विभागोऽतीव महत्त्वपूर्णो यः पश्चाद्भाविनामालङ्कारिकाणामलङ्कारविकाशे साहाय्यं कुरुते। इत्थमनुमीयते यत् पश्चाद्भवा आलङ्कारिका इमामेव दृष्टिं मनसि निधाय अलङ्काराणां विशेषं विकाशमकुर्वन्। आलङ्कारिकैः स्वप्रातिभेन प्रयासेन प्रसारितस्य अलङ्कारकलापस्य इदमेव द्विविधं स्वभावोक्ति-वक्रोक्तिभेदेन भिन्नं वाङ्मयमाधार-रूपेण स्थितम्। अत एव दण्डिनो दृष्टया सर्वेऽलङ्काराःस्वभावोक्ति-वक्रोक्ति-भेदेन द्विधा। एतेषु कतिपयेऽनेन स्वभावोक्तौ अन्तर्भाविताः, केचन च वक्रोक्तौ। किन्तु दण्डिपर्यन्तं स्वीकृतेषु सर्वेषु अलङ्कारेषु अनया दृष्टया विभागो नास्ति सुकरः। यतो दण्डी स्वत एव नैति कमप्येतादृशं निर्णयं येन जायेत मार्गप्रदर्शनं पश्चाद्भवानामालङ्कारिकाणां कृते एवंविधस्य स्वभावोक्ति-वक्रोक्तिमूलकस्य विका-शस्य।

एवं स्थितौ कथं को नाम समर्थो भवेदस्य निर्णयाय यदेते अलङ्काराः स्वभा-वोक्तिप्रसूताः, एते च वक्रोक्तिप्रसूता इति। तथापि दण्डिना दर्शिता दिगेव स्यात् सहायिका अग्रे विधीयमाने अलङ्काराणां स्वभावोक्तिवक्रोक्त्यात्मके विभागे।

दण्डी एकमन्यदपि स्वभावोक्तेर्वक्रोक्तेश्चोपन्यस्यति विशिष्टं व्यावर्तकं पार्थक्य-साधकं वा साधनं येन सरलतयैव तयोर्भेदो विधातुं शक्यते। एतच्चास्ति साधनं श्लेषस्य। यतो दण्ड्यनुसारं वक्रोक्तिः प्रायः सर्वत्रैव श्लेषेण पोषं प्राप्नोति, न च तथा स्वभावोक्तिः।[1]

अतो ये अलङ्काराः श्लेषानुप्राणिताः, ते परिगणिता वक्रोक्तौ। तदन्ये च अन्तर्भाविताः स्वभावोक्ताविति सुकर एव भवेदानुमानिको निर्णयः समालो-चकानाम्। किन्त्वस्य निर्णयोऽपि नास्ति तथा सरलो यथा प्रतीयत आपाततः। विस्तरश्च इदमग्रे विचारयिष्यते येन भविष्यति समाधानं सर्वेषामेवोद्भविष्यतां प्रश्नानामशेषतः। संक्षेपत इदमेव कथयितुं शक्यते यद् दण्डी द्विविधं स्वभावोक्ति-वक्रोक्तिरूपमलङ्कारकं तत्त्वं मनुते। अतो दण्डिना द्विविधौ अलङ्कारौ वाङ्मयस्या-शेषस्यालङ्करणार्थमङ्गीकृतौ।

रीति-सम्प्रदायस्य प्रवर्तको वामनस्तु वक्रोक्तिं न सर्वेषां श्लेषानुप्राणितानामलङ्काराणाम् आधारभूतामलङ्कारसामान्यवचनां मनुते, प्रत्युत एकमर्थालङ्कार-विशेषम्। अत एवास्य लक्षणमप्यस्ति भिन्नं पूर्वेभ्य आलङ्कारिकेभ्यः—सादृश्य-लक्षणा वक्रोक्तिः[2] इति। बहूनि हि निबन्धनानि लक्षणायाम्। तत्र सादृश्यात् लक्षणा वक्रोक्तिर्यथा—

उन्मिमील कमलं सरसीनां कैरवञ्च निमिमील मुहूर्तम्।

अत्र नेत्रधर्मौ उन्मीलननिमीलने सादृश्याद् विकाशसंकोचौ लक्षयतः।

---

१. द्रष्ट० दण्डी २.३६२।

२. काव्या० सू०,४.३.८ (आचार्य विश्वेश्वर हि०टी०, पृ० २३६-२३७)।

असादृश्य-निबन्धना तु लक्षणा न वक्रोक्तिः। यथा—जरठकमलच्छेद-गौरैर्मयूखैः।

अस्य लक्षणस्याध्ययनेनेदमायाति यत् श्लेषो न पुष्णाति वक्रोक्तिं वामनस्य अपि तु सादृश्याज्जाता लक्षणैव। इत्थमेको महानेव प्रश्नो विवादास्पदतामानीयते वामनेन आलङ्कारिकाणां पुरतः। यतोऽन्ये आलङ्कारिका प्रायोऽभिधामेवालङ्कार-पोषिकां मन्वते।

एषा अभिधाऽपि विचित्रा यत्र सर्वाऽप्यशेषा लक्षणाव्यञ्जनात्मिका वृत्तयोऽन्तर्भवन्ति। अत एव कुन्तकोऽपीदं स्वीकुरुते—

"अर्थप्रतीतिकारित्वसामान्यादुपचारात् द्योतक-व्यञ्जकावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद् वाच्यत्वमेव।"[१] यथा—

वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाऽभिधा।[२]

वाच्यालङ्कारवर्गश्च रूपकादिर्यावानुक्तो वक्ष्यते च कैश्चित्, अलङ्काराणामनन्तत्वात्।[३]

अलङ्काराणामभिधात्वमुपगतं तेषां भङ्गिभणितिरूपत्वात्।[४]

तत्-(रस)-प्रकाशिनो वाच्यविशेषा एव रूपकादयो वाच्यविशेषा एवालङ्काराः।[५]

इत्थमालङ्कारिका दृष्टिभेदेन समयतः पातयन्ति समालोचकान् विषमायां स्थितौ। किन्तु समीक्षया विधेयं समाधानं येन स्यादैकमत्यमलङ्कारिकेषु कस्मिन्नपि विवादास्पदे विषये। वामननान्तरं बहुकालपर्यन्तमालङ्कारिका प्रायो वक्रोक्ति-मलङ्कारविशेषमेव मन्वतेस्म, दण्डिन इव नाशेषस्य श्लेषानुप्राणितस्य अलङ्कार-जातस्य अलङ्कारसामान्यत्वेनाधारभूताम्। इत्थमलङ्कारविशेषत्वेऽपि कतिपये त्विमां वक्रोक्तिं केवलं शब्दालङ्कारमेव मन्वते नार्थालङ्कारम्। शब्दालङ्कारंमन्य-मानानामालङ्कारिकाणामिमे सन्ति मुख्याः—रुद्रट-मम्मट-विद्याधर-हेमचन्द्र-जयदेव-विश्वनाथादयः। प्रायः सर्वे एव मान्या आलङ्कारिका अस्याः शब्दा-लङ्कारताया एव समर्थकाः। ते तु 'वक्रा चासौ उक्तिश्चेति व्यौत्पत्तिकमर्थं गृहीत्वेमां शब्दालङ्कार एव निक्षिपन्ति' शब्दस्यैव उक्तौ सम्भवादर्थस्य च तत्राभावात्। वामनात् पूर्वमग्निपुराणेऽप्यस्याः शब्दालङ्कारतैव स्वीकृता। यथा—

"वक्रोक्तिस्तु भवेद् भङ्ग्या काकुस्तेन कृता द्विधा"।[६] रुय्यकोऽपि

१. व० जी०, १.८, पृ० १५
२. तत्रैव पृ० २३
३. ध्वन्या०, पृ० ८८।
४. व्य० वि० (विम०) १. पृ० ३।
५. ध्वन्या०, पृ० ८७।
६. अग्निपु०, ३४२-२३।

इमां काकुश्लेषभेदेन द्विविधां मनुते। यथा—"अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्यामन्यथा योजनं वक्रोक्तिः।[१]

इत्थमस्या विषये सन्ति परस्परं भिन्ना विमतयः। कतिपये ध्वनिवादिप्रमुखा आचार्या आनन्दवर्धनाभिनवगुप्तादयो भामहोद्भट-कुन्तकादीनामिव वक्रोक्तिमलङ्कारसामान्यवचनामेव मन्वते, न रुद्रटमम्मटादीनामिव अलङ्कारविशेषाम्। भामहवदत्रापि वक्रोक्तिरतिशयोक्तेः पर्यायरूपैवोपलभ्यते। यथा—

"अतिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रिया। तत्रातिशयोक्तिर्यमलङ्कारमधितिष्ठति, कविप्रतिभावशात्तस्य चारुत्वातिशययोगः अन्यस्य त्वलङ्कारमात्रतैवेति सर्वालङ्कारशरीर-स्वीकरणयोग्यत्वेन अभेदोपचारात् सैव सर्वालङ्काररूपेत्ययमर्थोऽवगन्तव्यः। शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तरेण रूपेणावस्थानमित्यसौ अलङ्कारस्यालङ्कारान्तर्भावः। लोकोत्तरेण चैवातिशयः। तेनातिशयोक्तिः सर्वालङ्कारसामान्यम्"।[२]

अतो वक्रोक्तिनिर्देशाभावेऽपि अतिशयोक्तिनामग्रहेऽपि वर्तत एव वक्रोक्तिरलङ्कारसामान्यवचना ( रुय्यकवचनम् ) सर्वालङ्कारप्राणप्रदा ( मम्मट-कथनम् ) वेत्यत्र ध्वनिसम्प्रदायाचार्याणामपि सम्मतिः। परमेतेषां वक्रोक्तिर्भिद्यते कुन्तकादीनामलङ्कारवादिनां वक्रोक्तितो यत्राऽशेषमपि काव्यतत्त्वं रस-अलङ्कारध्वन्यादिकं वक्रोक्तावेवान्तर्भाव्यते। अत एवायं वक्रोक्तिसम्प्रदायः कुन्तकात्पूर्वं भाक्तसम्प्रदायाख्यया प्रख्यात आसीत्। यदा लक्षणयैवासीद् गतार्था व्यञ्जना ध्वन्याधारभूतस्य प्रधानव्यङ्ग्यस्याभाववत्त्वेन स्वीकारात्। अतो ध्वनिकारेण ध्वन्यालोकस्य प्रथमोद्योते ध्वन्यभाववादिभिः सह भाक्तवादिनामपि मतं विस्तरेण निराकृतम्। यथा—

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया॥[३]

अतो ध्वन्यतिरिक्ते स्थल एव वक्रोक्तिरलङ्काररूपा, न कथमपि वस्त्वलङ्काररसरूपात्मके प्रधाने व्यङ्ग्यस्थाने ध्वनिरूपे, तस्यालङ्कार्यत्वेनाङ्गीकारात्।

एवमिदं स्पष्टं यदलङ्कारसामान्यरूपाऽपि वक्रोक्तिर्ध्वनिवादिनामभिमता भिन्ना। भामह-कुन्तकादीनामलङ्कारवादिनां वक्रोक्तितः। ध्वनिवाद्यनुसारं वक्रोक्तिरलङ्काररूपा, कुन्तकादीनां चालङ्कारप्राधान्यवादिनां दृष्टौ प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधात्मिका अलङ्कृतिर्वक्रोक्तिर्यत्र रसादयः प्रधाना भावा अप्यन्तर्भूताः। न तथा ध्वनिवादिनये, रसभावादीनामङ्गतायामेव अलङ्कारतायाः स्वीकारात्। यथा—

---

१. रुय्यकः, अ०, सू० पृ० १६७। २. ध्वन्या ( लोच० ), पृ० २०८।
३. ध्वन्या०, १-१४।

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥[1]

कुन्तक एवास्तीदृश आलङ्कारिको येनाङ्गीकृता वक्रोक्तिः काव्यजीवितरूपेण। 'वक्रोक्तिः काव्यजीवितमि'ति अस्यैव मतमिति साहित्य-दर्पणेऽभिहितम्। अयं न केवलं सर्वथाऽभूतपूर्वं नवं वा किञ्चिज्जगाद अपि तु प्राचीनैर्भामहादिभिरलङ्कारवादिभिर्ध्वनिवादिभिश्चानन्दवर्धनादिभिः दर्शितां दिशमेवानुसरन् वक्रोक्तेः क्षेत्रस्य पराकाष्ठात्मकं विस्तारमकरोत् यत्राशेषाण्येव अलङ्कारप्रधानान्यन्तर्भावं भेजिरे। स्वीकृता च वक्रोक्तिरेव काव्यस्य जीवितं तत्त्वम्। अनेन च कुन्तकेन वक्रोक्तेः प्रस्थानत्वं स्वीकृत्य समस्तोऽपि ध्वनिप्रपञ्चः षड्विधाया वक्रतायाः भेद एवान्तर्भावितः। किन्त्वत्रैव सर्वानलङ्कारान् वाक्यवक्रतायामन्तर्भावयन्नयं स्वभावोक्तिरसोक्त्योरलङ्कारतां निषेधति, स्थापयति च तयोरलङ्कार्यताम्। यथा—

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवशिष्यते ॥[2]
अलङ्कारो न रसवत् परस्य प्रतिभासनात्।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि ॥[3]

कुन्तको वक्रोक्तेः प्रस्थानत्वे स्वभावोक्ति-रसोक्ती बाधिके मनुते। यत एतेऽपि प्राचीनैः दण्डि-आनन्दवर्धनादिभिरलङ्कारत्वेन स्वीकृते। यदि वक्रोक्तिर्बहूनामलङ्काराणां सामान्याधारभूतत्वेन प्रस्थानतां प्रतिपद्यते, तर्हि कथं न स्वभावोक्ति-रसोक्ती, तयोरपि स्वभावोक्तिमूलकानां रसोक्तिमूलकानाञ्चालङ्काराणामन्तः सामान्यतया स्थितत्वात्। अत एव कुन्तको नाङ्गीकुरुते स्वभावोक्ति-रसोक्त्योरलङ्कारताम्। कुन्तकस्यायं निषेध एवानयोः प्रस्थानतां द्योतयति। अनयोश्च प्रस्थानता न वक्रोक्तिवत् सर्वाणि अलङ्कार-रीति-ध्वन्यादीनि काव्यतत्त्वानि आत्मसात्कर्तुं यतते, अपि तु तथैव एतयोरलङ्कारतां परिपोष्यालङ्कारप्रस्थाने त्रिविधं प्रस्थानात्मकमवान्तरं विभागं धारां वा निर्दिशति। अस्मिन्नेव त्रिविधे विभागे सर्वोऽपि अलङ्कारकलापोऽन्तर्भावयिष्यते। कुन्तककृतस्य स्वभावोक्ति-रसोक्त्योरलङ्कारत्वखण्डनस्य प्रत्याख्यानं यथावसरं विस्तरेण तयोर्निरूपणप्रसङ्गे विहितम्, अग्रे च करिष्यते। अतोऽत्र अलङ्काराणां त्रिविधो विभागः संभवेत्। अतोऽत्र वक्रोक्ति धारायां केवलं कुन्तकस्यैव न प्रत्युत अन्येषामप्यालङ्कारिकाणाम् मतं दीयते। तथा सति बहूनामलङ्कारसम्प्रदायसमर्थितानां स्वभावोक्ति-रसोक्तिमूलकानामलङ्काराणामनुच्छेदापत्तेः।

यद्यपि कुन्तकेनोद्भावितस्य वक्रोक्तिसम्प्रदायस्य ध्वनिप्रस्थानवत् समर्थकाः

---

१. ध्वन्या० २.५। २. व० जी०, १-११।
३. तत्रैव ३-१०।

नाभवन्। तथापि परवर्तिन आलङ्कारिकान् एष सदैव प्रभावयन् आसीत्। किन्तु नायं ध्वनिप्रभावमतिचक्राम येन सूक्ष्माऽप्यस्य समीक्षा समीक्षकाणां मान्यतां न लेभे।

भोजस्य वक्रोक्तिविचारोऽपि पूर्वालङ्कारिकापेक्षया सर्वथा नवीनः। यद्यपि वक्रोक्तेर्विचारे भोजो गृह्णाति प्रेरणां पूर्वालङ्कारिकेभ्यः, विशेषतश्च भामह-दण्डि-प्रभृतिभ्यस्तथाप्यत्रास्य प्रतिभा प्रथते। यतो रसोक्तेः सत्ता वक्रोक्तौ स्वभावोक्तौ वा न भामहेन न वा दण्डिना साक्षात्कृता। किन्तु भोजस्तत्र स्थितां रसोक्तिं सूक्ष्मेक्षिकया साक्षात्कुरुते, स्थापयति च स्वतन्त्रां पृथक् सत्तां तस्याः वक्रोक्ति-स्वभावोक्तिभ्याम्। एवं भामहः प्रथमं वक्रोक्तिमलङ्कारसामान्यं मनुते। तदनन्तरं दण्डी वक्रोक्तिं द्विधा विभजते। एवं दण्ड्यनुसारं वक्रोक्ति-स्वभावोक्ति-भेदेन नालङ्कारसामान्ये जायते भेदः। केचन अलङ्काराः स्वभावोक्तिमूलकाः, केचन च वक्रोक्तिमूलकाः। एवं भामहेन साक्षात्कृता वक्रोक्तिः क्रमशः सङ्कोचमेति दण्डि-दृष्टौ, तत एव स्वभावोक्तेरुदयात्। ततोऽप्यधिकं सङ्कुचति भोजं प्राप्य, तस्या एव रसोक्तेरुदयात्। यथा—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते॥[1]

आसां तिसृणां लक्षण शृङ्गार-प्रकाशेऽपि वर्तते। यथा—"तत्र उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिः, गुणप्राधान्ये स्वभावोक्तिः, विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तौ रसोक्तिरिति त्रिविधं वाङ्मयम्।"

इत्थमेकैव वक्रोक्तिः भामह–दण्डि–भोज–कुन्तकादीनां दृष्टिभेदाचातुर्विध्यमानन्त्यं वा प्राप्नोति, अलङ्काराणामानन्त्येन तन्मूलकत्वादस्या अपि आनन्त्यमेव। अतो वक्रोक्तिदृष्टिभेदेन आलङ्कारिकैर्विकल्प्यन्त अलङ्काराः।

यथा औपम्यमूलकेषु सर्वेषु रूपकापह्नुत्युत्प्रेक्षादिषु अनुस्यूतापि उपमा स्वतन्त्रालङ्काररूपत्वेनापि स्वीकृता भणितिवैचित्र्यात्। एवमेव भामहदृष्ट्या कुन्तक-दृष्ट्या वा सर्वेष्वलङ्कारेषु अनुस्यूतापि वक्रोक्तिरलङ्कारविशेषत्वेनापि वर्ण्यते। किन्तु आलङ्कारिकभेदेन वक्रोक्तेरलङ्कारसामान्यरूपे च जायते भेदः। अतो दण्डी प्रायः श्लेषानुप्राणितां वक्रोक्तिमेव वक्रोक्तिं मनुते, तदन्यत्र स्वभावोक्तिम्। वामनस्तु सादृश्याल्लक्षणात्मिकामेव वक्रोक्तिम्, न कथमपि अन्यसामीप्यादिसम्बन्धलक्षणात्मिकाम्। अनेनैव क्रमेण भोजकुन्तकयोरपि मते भिन्नैव वक्रोक्तिर्मता। अत एव दण्डिनो भामहस्य स्वभावोक्ति-वक्रोक्त्योर्भेदः। भामहदृष्ट्या वक्रोक्ति-स्पर्श-शून्यत्वाद् अनलङ्काररूपामपि स्वभावोक्तिं दण्डी अलङ्कारत्वेन स्वीकरोति। अत एव वक्रोक्तेरभावात् हेतु–सूक्ष्म–लेशादयः स्वभावोक्तिमूलका अलङ्कारा भामहेन अस्वीकृताः।[2]

१. स० क० ५।८। २. द्रष्टव्यम् भाम०, काव्य०, द्वि० प्र० श्लो० ८४।

दण्डिदृष्ट्या एतेषामप्यस्त्यलङ्कारता, स्वभावोक्तेरन्तर्वर्तमानत्वात्। किन्तु भामहस्यालङ्कारताया मूलमस्ति वक्रोक्तिः—

वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते ॥[1]

अतोऽयं वक्रोक्तेरभावे काव्यत्वमपि नाङ्गीकुरुते, का कथा अलङ्काराणाम्। गतोऽस्तमर्को भातीन्दुः[2] इत्येवमादि किं काव्यम्? वार्तामेनां प्रचक्षते। वक्रताहीनं वाक्यं भामहः केवलं वार्ता, कथनं वा मनुते न काव्यम्। अनेनेदं स्पष्टं यद् भाहमस्य वक्रोक्तिर्भिन्ना दण्डिनो भोजस्य वा वक्रोक्त्याः। इदं पूर्वं स्वभावोक्तिधाराप्रसङ्गे साधितं यद् भामहोऽपि स्वीकरोति स्वभावोक्तिम्, किन्त्वस्य स्वभावोक्तिर्वक्रोक्त्याऽधिकं प्रभाविता, तस्याः वक्रोक्तेः प्रकारविशेषरूपत्वात्। दण्डिनः स्वभावोक्तौ वस्तुतः संवादो हृदयसंवादोपबृंहितो भवति। तत्र वक्रोक्तेरीषत्स्पर्श एव भवति, वैचित्र्यार्थम्। अत एव दण्डी स्वभावोक्तिम् आद्या सालंकृतिः[3] इति मनुते।

इयमेव वक्रता स्वभावोक्तौ च विविधान् भेदानाकलयन्ती तन्मूलकेषु अलङ्कारेष्वप्यनेकान् भेदान् करोति। न केवलमिदमेव, यदा कदा वक्रतास्वरूपाज्ञानमलङ्कारभेदेष्वपि सन्देहबुद्धिमातनोति। वक्रताया विमर्शाभावे विच्छित्तावपि न प्रतीयते भेदः। फलतोऽलङ्कारभेदे भ्रमो जायते। अस्याः स्वरूपस्य अवास्तवं ज्ञानमेव आलङ्कारिकेषु अलङ्कारविशेषविचारे कलहं सृजति, विवादभूर्वा भवति। इयमेव वक्रता रसवदलङ्कारेऽपि विभावानुभावसञ्चारिषु भेदं सृजन्ती एतैरभिव्यज्यमानेषु भेदमाकलयति। अत एक एव भावो रस-स्थायीसञ्चारिरूपां विविधां आख्यामश्नुवते। भावमिमं समर्थयते भवभूतिरपि—

एको रसः करुण एव निमित्तभेदाद् भिन्नः
पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान्विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम् ॥[4]

वक्रताया लक्षणमपि इदमेव निमित्तमवलम्ब्य समुपन्यस्यते भामहेन यथा—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यतेऽतिशयोक्तिं तामलङ्कारतया तथा ॥
सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥[5]

---

१. भाम०, १.३०।
२. तत्रैव २.८७।
३. दण्डी २.८।
४. उत्तर रा०, तृ० अ०, श्लो० ४७।
५. भामहः काव्या० २.८१,८५।

कवेरशेष आभास एव काव्यरूपः असीमस्य अर्थसार्थस्य विभावनार्थमेव विभावनाव्यापारेण बोधार्थमेव वा। विभावनाव्यापारस्य मूलमियमेव वक्रोक्तिः। इयं सर्वेष्वलङ्कारेष्वनुस्यूता अशेषान् भेदान् ससर्ज। यथा अनुमान-काव्यलिङ्गयोरापाततो दृश्यते साम्यम्, उभयत्र लिङ्गलिङ्गिनोः साधनत्वेन ग्रहणात्। किन्तु यदा सूक्ष्मेक्षिकया वक्रताविमर्शो विधीयते तदा स्पष्टमेव प्रतीयते भेदः। यतः काव्यलिङ्गे लिङ्गलिङ्गिनोः साधनता वक्रोक्त्याऽधिकमास्कन्दिताऽपि अनयोर्विरुद्धे वर्गे स्थापनायाः कारणम्। अनुमानालङ्कारे ज्ञापकेन हेतुना बोध्यते वक्रोक्तिः, यत्र बोधे भवति नैसर्गिकता। काव्यलिङ्गे च कारको हेतुर्यत्र बोधे जायते वक्रताधिक्यम्। अनुमानापेक्षया उभावपि अलङ्कारौ वक्रतास्वरूपभेदेन भिन्ने वर्गे स्थाप्येते, काव्यलिङ्गं वक्रोक्तौ अनुमानञ्च स्वभावोक्तौ।[1]

एतेन सिद्धमिदं यदशेषा अलङ्कारकलना वक्रोक्तिमूला। अस्य संकेतः पूर्वं भामहेन कृत एव कोऽलङ्कारोऽनया विना[2] इत्यनेन। अतो भामह-दण्डि-भोज-कुन्तकादीनां वक्रोक्तिस्वरूपे आपातत ऐक्येऽपि सूक्ष्मदृष्ट्या समीक्षायां सर्वत्र एव उपलभ्येत भेदः। पूर्वं दण्डिभामहयोर्वक्रोक्तेः स्वरूपं संकेतरूपेण विन्यस्तम्, प्रदर्शितश्च तत्र तयोर्भेदोऽपि। सम्प्रति भोजकुन्तकयोर्वक्रोक्तिविमर्शस्य तुलनात्मकं विश्लेषणं विधीयते।

कुन्तकस्य वक्रोक्तिविमर्शस्तु वक्रोक्तिविचारस्य पराकाष्ठा।[3] वक्रोक्तेर्यावान् यश्च विचारोऽपेक्ष्यते काव्यशास्त्रे, तावान् सर्वोऽपि पराकाष्ठात्मको विमर्शो विहितो वक्रोक्तिजीविते। अत एवास्य वक्रोक्तिर्न केवलमलङ्कारविशेषरूपा, न चाऽलङ्कारसामान्यरूपा वा। प्रत्युत काव्यस्य जीवितरूपा यत्र रसभावादयोऽप्यन्तर्भाव्यन्ते। अत्र सर्वाण्यपि गुण-रीति-अलङ्कार-रस-ध्वन्यादीनि काव्यतत्त्वानि अन्तर्भावं भजन्ते। अनया वक्रोक्त्या कुन्तकः काव्यशास्त्रे क्रमशो गौणभावं भजमानमलङ्कारप्रभावं समुन्नयते, समर्थयते च सर्वेषामशेषाणामन्येषां काव्यतत्त्वानाम् अलङ्काररूपताम्। अस्य दृष्टौ केवलं शब्दार्थावलङ्कार्यौ, भङ्गीभणितिरूपा वक्रोक्तिश्च केवलमपूर्वालङ्कृतिः। यथा—

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥[4]

अनया वक्रोक्त्या अभिधाव्यापारोऽपि अभिनवं विस्तारं भजते, यत्र सर्वेऽप्यन्ये लक्षणा-व्यञ्जनात्मकाः शब्दव्यापारा अन्तर्भाव्यन्ते। यथा—अर्थप्रती-

---

१. ए० बी० गजेन्द्र गडकरः 'नोट्स आन काव्यप्रकाश', पृ० ३९७।
२. भाम०, काव्या०, २.८५। ३. व० जी०।
४. व० जी०, प्रथ० उन्मे०, का० ११।

तिकारित्व-सामान्यादुपचारात् तावपि ( द्योतकव्यञ्जकावपि ) वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद् वाच्यत्वमेव।[1]

इत्थं वक्रता विचित्रैवाऽभिधा या द्योतन-प्रत्यायन-प्रतिपादनादिशब्दैर्बोध्यते। अनेनेदं स्पष्टं यत् कुन्तकस्य वक्रोक्तिर्भिन्नैव सर्वेषां प्राचीनार्वाचीनालङ्कारिकाणां वक्रोक्तितः।

पूर्वं कुन्तकस्य वक्रोक्तेः लक्षणोदाहरणादीनि उपन्यस्तानि। अतोऽग्रे भोजस्य वक्रोक्तितः भट्टनायकस्य भावनाव्यापारतो वा अस्याः पार्थक्यं प्रदर्श्यते। इदं तु अनेकत्र यथावसरमुपन्यस्तं यद् भोजो वक्रोक्तितोऽतिरिक्ते स्वभावोक्तिरसोक्ती अपि अङ्गीकुरुते।[2]

किन्तु कुन्तको न स्वीकुरुते स्वभावोक्तिरसोक्त्योरलङ्काररूपताम्, अपि तु अलङ्कार्यतामेव। एवं कुन्तकस्यालङ्काररूपा वक्रोक्तिर्न कथमपि समतामेति भोजस्यालङ्काररूपाया वक्रोक्तेः, तत्र स्वभावोक्तिरसोक्त्योरपि अलङ्कारताया अवच्छेदकत्वेन सत्त्वात्।

सत्यमेतद् यदिमौ उभावपि आलङ्कारिकौ-( भोज-कुन्तकौ ) समकालिकौ, भोजश्च धारादेशीयः कुन्तकश्च काश्मीरदेशीयः। किन्त्वेतयोर्वक्रोक्तेर्विमर्शो न मिथः प्रभावितः, अपितु सर्वथा स्वतन्त्र इति अनयोर्ग्रन्थपरिशीलनेन निर्णीयते। किन्तूभयोरपि वक्रोक्तिविचारो वक्रोक्तेः स्वरूपनिर्णये नितरामुपादेयः। कुन्तकस्य वक्रोक्तिविमर्शस्तु स्थाने स्थान उद्धृतः।

सम्प्रति भोजस्य वक्रोक्तिविषयको विमर्शः समुपन्यस्यते। येन वक्रोक्तेः परिनिष्ठितं स्वभावोक्तिरसोक्तिभ्यामनास्कन्दितं रूपमुन्मीलितं स्यात्, यच्च नितान्तमुपकरोति अलङ्कारप्रस्थानविमर्शमिमम्। यतो न भोजात्पूर्वं न च पश्चाद् वा केनापि आलङ्कारिकेण उक्तीनां त्रैविध्यं विशदं प्रातिस्विकरूपेण विविच्य समुपन्यस्तम्। तदपि अलङ्कारताया अवच्छेदकत्वेन। अतो भोजस्य वक्रताविमर्शः प्रदर्श्यते।

भोजो न कुन्तकवद् वक्रताया लक्षणोदाहरणपूर्वकं व्यापकं विमर्शं क्वापि स्वकृतौ कुरुते। किन्तु तस्योभयोः कृत्योः 'सरस्वतीकण्ठाभरण-शृङ्गारप्रकाशयोः' इतस्ततः विकीर्णानि वक्रतास्वरूपबोधकानि वाक्यान्युद्धृत्य वक्रता-विमर्शो विधीयते। अस्मिन् विमर्शेऽस्य टीकाकारो रत्नेश्वरोऽधिकं साहाय्यं कुरुते। अयं तु भोजस्य गुण-दोष-रीत्यलङ्कारादीनां विचारे निर्दिष्टां वक्रतां यथोपयोगमुन्मील्य प्रकाशयति, समुपन्यस्यति च काव्यजीवितत्वं वक्रतायाः।

अनेन स्पष्टमिदं यद् वक्रतायाः महत्त्वं भोजोऽपि तथैवालङ्कारप्रयोजकतार्थं मनुते यथाऽन्ये भामह-दण्डि-कुन्तकादय आलङ्कारिकाः। सूक्ष्मसमीक्षया त्विदमप्यनु-

---

१. द्रष्टव्यम्-व० जी० १.८, पृ० १५। २. स० क०, ५, ८।

मीयते यदस्याप्यशेषाणि काव्यतत्त्वानि कुन्तकस्येव रस-रीत्यलङ्कार-गुणादीनि वक्रतायामेव निर्भराणि। वक्रता तु काव्यस्यापि व्यावर्तको गुणः। इमां विना न काव्यं काव्यपदवीं प्राप्नोति। अत एव रत्नेश्वरो भोजस्य औदार्यविपर्ययदोषं विवृण्वन् इदं समुपन्यस्यति-'यस्तु रीतेरिति काव्यरूपता प्रयोजकं शब्दार्थयोः वक्रता उदारता। नहि वक्रतामन्तरेण काव्यपदवीप्राप्तिः। तदाह—

यदवक्रं वचः शास्त्रे लोके च वच एव तत्।
वक्रं यदनुरागादौ तत्र काव्यमिति श्रुतिः'॥[1]

तदेतदलङ्कारसामान्यस्याऽभावे निरलङ्कारता भवतीत्याह-अनलङ्कारमिति। प्रकृतोदाहरणे द्वयोः (शब्दार्थयोः) अवक्रत्वं स्फुटयति।[2]

अस्मिन् पूर्वोक्तोद्धरणे रत्नेश्वरो भोजस्येमां वक्रतास्वरूपबोधिकां कारिकामुपन्यस्यति या शृङ्गारप्रकाशे समुपलभ्यते। एषा कारिका भोजस्य वक्रतां स्फुटयति। पूर्वालङ्कारिकवद् भोजोऽपि शब्दस्यार्थस्य च वक्रतां मनुते। शब्दस्य वक्रतायाः समर्थनन्तु सरस्वतीकण्ठाभरणस्य अनलङ्कारदोषविचारे समुपलभ्यते यथा—

यस्तु रीतेरनिर्वाहात् औदार्यस्य विपर्ययः।
वाक्यं तदनलङ्कारमलङ्कारविदो विदुः॥[3]

वृत्तिः—तदिदमपुष्टार्थत्वादनुत्कृष्टविशेषणमनुदारं निरलङ्कारमाचक्षते सोऽयमौदार्यविपर्ययः।

एवमेव भोजो निरलङ्कारमप्येकं वाक्यार्थदोषं मनुते। यथा—वक्रताव्यतिरेकेण अलङ्कारसामान्यमेव न स्यादिति निरलङ्कारमित्युक्तम्। ततो जात्यलङ्कारेण वक्रत्वमाक्षिप्यते। स्वरूपं चमत्कारिकविप्रतिभामात्रप्रकाशनीयं रूपं तदेव अलङ्कारकक्षामधिशेते। कथं तर्हि वक्रताभावरूपो 'दीर्घपुच्छ' इत्यादि शब्द-दोषाद् भिद्यते। शब्दानामेव वक्रताव्यतिरेकेण 'अपवाद' इति शब्द-दूषणम्, इह तु न तथा। किन्तु उक्तमेव स्वरूपं न वक्रमिति वाक्यार्थ एव दुष्टः।[4]

आभ्यामुद्धरणाभ्यां स्पष्टमिदं यद् भोजो द्विविधां शब्दार्थयोर्वक्रतां मनुते। इयं च वक्रता अलङ्कारसामान्यस्य साधिका। अत एव जात्यलङ्कारेऽपि वक्रत्वमाक्षिप्यते, वक्रताभावे जातेः स्वभावोक्तेर्वा अलङ्कारताया असंभवात्, निरलङ्कार-

१. शृ० प्र०।

२. स० क०, पृ० ३० (डा० राघवन् भोजाज शृ० प्र० शोध-प्रबन्ध, भा० २ पृ० १३२-१३३)

३. स० क०, पृ० ३०।

४. स० क०, पृ० ३८।

दोषास्कन्दितत्वाच्च काव्यस्याप्यभावात् । अतो भोजस्य वक्रता न केवलं वक्रोक्त्यलङ्कारस्य आधार-भूता, अपि त्वलङ्कारसामान्यतया स्वभावोक्तिरसोक्त्योरप्यन्तर्वर्तेत एव । अत्र वक्रोक्त्यलङ्कारापेक्षया वक्रतायाः स्पर्शोऽवश्यमेवेषत् स्वभावोक्तौ गुणस्य रसोक्तौ च रसस्यैव वर्तमानत्वात् । अन्यथा वक्रतारहिते स्वभावोक्तिरसोक्ती अपि काव्यव्यपदेशं न लभेते ।

अत एव सरस्वतीकण्ठाभरणे अरीतिमद्दोषविचारप्रसङ्गे रत्नेश्वर इदं स्पष्टं स्वीकुरुते यद् गुणा अपि तदैव वाक्यं काव्यपदवीं प्रापयन्ति यदा ते भवन्ति वक्रतया आस्कन्दिताः । यथा—एतद् (काव्यम्) श्लेषादिनवगुणयोगाद् वक्रतामासाद्य काव्यव्यपदेशं लभते ।[1]

आपाततो गुणे रसे च वक्रोक्तेः स्पर्शत्वस्वीकारे भोजस्य 'उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिरिति वचनमेव विरुद्ध्यते । किन्तु सूक्ष्मसमीक्षायामेष आभासिको विरोधो नोपतिष्ठते, अलङ्कारप्राधान्यकाले गुणालङ्कारयोरैक्येन तयोरलङ्कारत्वेनैवं स्वीकृते विरोधस्यानुदयात् । गुणरसयोः प्राधान्येऽपि वक्रोक्तेरप्राधान्यतया स्वीकाराच्च । भोजकालपर्यन्तं गुणालङ्कारयोस्तु भेदः स्पष्ट एवास्ते । एतयोर्भेदस्तु भोजात्पूर्वमेव वामनेन विहितो यथा—"काव्यशोभाकर्तारो धर्मा गुणाः तदतिशयहेतवस्तु अलङ्कारा" इति । अनेनेदं स्पष्टमेव यद् गुणानां काव्ये नित्यत्वम्, अलङ्काराणां चानित्यत्वम् । एष एव सिद्धान्तः मम्मटभट्टादिभिरप्यालङ्कारिकैः स्वीकृतः । यथा—

> ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
> उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥[2]

एवं यदि गुणापेक्षयाऽलङ्कारे काव्योत्कर्षकताऽतिशयता, वक्रता वा अधिका अपेक्ष्यते, तदा तु गुणप्राधान्यात्मिकायाः स्वभावोक्तेः रसभावप्रधानाया रसोक्तेश्च उपमाद्यलङ्कारप्रधानायां वक्रोक्तौ वक्रताया आधिक्यं स्वभावत एव स्यात् । अत उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिरिति भोजस्य वक्रोक्तिलक्षणं न विरुद्ध्यते स्वभावोक्ति-रसोक्त्योरपि वक्रोक्तेः स्पर्शेऽपि तदपेक्षया वक्रोक्तौ वक्रोक्तेराधिक्यात् ।

एवं भोजो वक्रोक्तिमलङ्कारसामान्यवचनमधितिष्ठन् अलङ्कारविशेषमपि मनुते । अत एवास्य टीकाकारो रत्नेश्वरोऽपीदमेव द्रढयति—वक्रोक्तिशब्दश्च अलङ्कारसामान्यवचनोऽपि इह अलङ्कारविशेषे संज्ञितः । भोजः शब्दार्थोभयभेदेन अलङ्कारं त्रिधा विभजते ।[3] यथा—

---

१. स० क०, पृ० २४ (डा० राघवन् भोजाज शृं० प्र० शोध-प्रबन्ध भा० २. पृ० १३३ तः) । २. का० प्र०, उल्ला० ८, पृ० २८० ।

३. स० क० व्या०, पृ० १७७ ।

शब्दार्थोभयसंज्ञाभिरलङ्कारान् कवीश्वराः ।
बाह्यानाभ्यन्तरान् बाह्याभ्यन्तरांश्चानुशासति ॥[1]

तत्र वक्रोक्त्यलङ्कारं भोजः शब्दालङ्कारे गणयति । किन्तु न स्वतन्त्रालङ्कार-रूपेण,—अपि तु शब्दालङ्कारस्य वाकोवाक्यस्य भेदरूपेण । यथा—

उक्तिप्रत्युक्तिमद् वाक्यं वाकोवाक्यं प्रचक्षते ।
द्वयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि सङ्गमे ॥[2]

इदं च वाकोवाक्यं षोढा विभज्यते—ऋजूक्ति; वक्रोक्ति; व्याजोक्ति; गूढोक्ति; प्रश्नोत्तरोक्ति; चित्रोक्तिश्चेति । ऋजूक्तिः पुनरपि ग्राम्या, उपनागरिका चेति भेदेन द्विधा क्रियते ।

भोजो यद्यपि गुणप्राधान्ये स्वभावोक्तिः, उपमाद्यलङ्कारप्राधान्ये वक्रोक्तिरिति स्वीकृत्य अनयोः स्पष्टं भेदं दर्शयति । अनेन वक्रोक्ति-स्वरूपस्याधिगमे मिलति सुगमता । किन्तु पुनरपि शब्दालङ्कारविचार-प्रसङ्गे वाकोवाक्यं षोढा विभजते । तत्रैव स्वभावोक्तिवक्रोक्ती अपि वाकोवाक्यस्य भेदरूपेणाङ्गीकुरुते । अत्र स्वभावोक्तिः ऋजूक्तिनाम्ना व्यपदिष्टा । ग्राम्या-उपनागरिकाभेदेन सा द्विधा भिन्ना इत्थं स स्वभावोक्तेरपि शब्दालङ्कारतां समर्थयते वक्रोक्तिवत् । एषा अभिनवा दृष्टिः । न केनाप्यालङ्कारिकेण स्वीकृता स्वभावोक्तेः शब्दालङ्कारता । एवं वाकोवाक्यमाध्यमेन स्वभावोक्तिवक्रोक्त्योरभेदोऽपि स्वीक्रियते, यश्च वक्रोक्ते-रादितो भामहादिभिरङ्गीकृतः । एवमस्य वक्रोक्त्यलङ्कारसम्बन्धी विचारो नातीव स्पष्टः । अयं वक्रोक्तिमलङ्कारसामान्यरूपेणाप्यङ्गीकरोति विशेषरूपेणापि च । किन्तु विशेषरूपताऽपि न स्वतन्त्रालङ्कारत्वेन अपि तु वाकोवाक्यस्य भेदरूपेण । एवं भोजकृत्योर्वक्रोक्तेः स्वतन्त्रालङ्कारता न स्पष्टं समुपलभ्यते । फलतो भोजेन स्वीकृतोऽलङ्काराणामुक्तेर्वा त्रिविधो वक्रोक्ति-स्वभावोक्ति-रसोक्त्यात्मको भेदो न समञ्जसतां गाहते । यतो यद्येतासां तिसृणामुक्तीनां भेदो न स्यात् प्रातिस्विकतया स्पष्टस्तदा कथं तन्मूलका अलङ्कारा निरूपयितुं शक्यन्ते । अलङ्काराणां त्रिविधः स्वभाव-वक्र-रसात्मको भेदश्च कथं सम्पत्स्यते ।[3]

प्रथमं भामहेनोद्भाविता वक्रोक्तिरलङ्कारसामान्यरूपत्वेन । अतो वक्रता-भावात् हेतु-सूक्ष्म-लेशादयस्तेन अलङ्कारान्निसारिताः । दण्डिना तूक्तेरलङ्कारस्य स्वभावोक्ति-वक्रोक्तिभेदेन द्वैविध्यमङ्गीकृतं येन बहिष्कृताः सूक्ष्मादयः पुनरप्य-लङ्कारतां प्रापुः । इतः परं भोजः उक्तेस्त्रैविध्यमङ्गीकृत्य रसानप्यलङ्कारेष्व-न्तर्भावितवान् । किन्तु तत्समकालिकेन कुन्तकेन स्वभावोक्तिरसोक्त्योरलङ्कारता

१. स० क० पृ० २९ ।
२. डा० राघवन् शोध प्रब० भोजाज शृ० प्र०, पृ० ३७८ ।
३. व० जी०, पृ० १९५ ।

निषिद्धा, स्थापितं च पुनरपि वक्रोक्तेरेवालङ्कारसामान्यत्वम्। परं न भामहवत्, अनेन तु स्वभावोक्तिरसोक्त्योरपि वक्रोक्तिप्रकारत्वेन स्वीकारात्। यद्यपि भामहः स्वभावोक्तेः रसोक्तेश्चापि समर्थयतेऽलङ्कारताम्; तथापि नालङ्कारस्य स्वतन्त्रभेदरूपेण भोजदण्डिवत्, अपि तु वक्रोक्तेः प्रकारत्वेन।

एतेन स्पष्टमिदं यद् भोज-दण्डिवद् वक्रोक्तेः स्पर्श एव नाभिमता अलङ्कारता स्वभावोक्तिरसोक्त्योर्भामहस्य अपि तु तदपेक्षया वक्रताधिक्ये। अत एव दण्डिभोजाभ्यां स्वीक्रियमाणा अप्यलङ्कारा हेतुसूक्ष्मादयो नाभिमता भामहस्य। प्रकर्षाधिरोहिण्या वक्रोक्तेः पोषकः कुन्तकस्तु तत्र तमीषत्स्पर्शमपि न सहते, स्वभावोक्ति-रसोक्त्योरलङ्कार्यत्वेनाङ्गीकारात्। एवमासां तिसृणामुक्तीनामलङ्कारस्य अवान्तरभेदिकानां विचारोऽतीव विवादपूर्णो येनैतासामाधारेण अलङ्काराणां त्रिविधो भेदस्तु कठिनः।

किन्त्वलङ्कारविकाशस्यादितो विमर्शपथमायात एष त्रिविधो व्यापको भेदोऽवश्यमेव विस्तरेण विचारणीयः। यतोऽलङ्कारविकाशस्य आधारभूतानामासां तिसृणां धाराणां ज्ञानमन्तरा अपारे कविव्यापारपरम्परावाहिनि काव्ये निरन्तरं विकल्प्यमानानामनन्तानामलङ्काराणां व्यावृत्ततया बोधो न स्यात्। अत्र भवेयुर्महत्यः कठिनता याथातथ्येन निर्णयेऽलङ्काराणाम्, किन्त्वनेन हृदयावर्जकानां सततं विकल्प्यमानानामलङ्काराणां भेदावबोधे जायेत सुगमता। यतश्चित्तवृत्तिरेव यथावसरं स्वभावतया, वक्रतया, रसरूपतया च परिणमते परिपाकं वैति। अलङ्काराणां विकाशस्याधारो मनोवैज्ञानिकोऽत्र न स्याद् विरोधः यतो हि 'यावन्तो हृदयावर्जकास्तावन्तोऽलङ्काराः'[1] इत्यालोचकैः स्वीकारात्। अत एतादृशः प्रयासः अलङ्काराणां भेदे मनोवैज्ञानिकतामानयेद् यस्याभावः सचेतसां चेतांसि खेदयति। चित्तवृत्तेः स्वरूपस्य विश्लेषणाभावादलङ्कारप्रस्थानेऽपि वर्तमानानामन्तःस्रोतसां न जायते परिचयः समीक्षकाणाम्। फलतोऽलङ्काराणामनेकभेदानां वैज्ञानिकं वर्गीकरणं न भवति। यदि वक्रोक्तेर्वास्तविकं विश्लेषात्मकं स्वरूपं विज्ञायेत तदा स्वत एवान्ययोः स्वभावोक्तिरसोक्त्योर्विशकलितं रूपं स्पष्टं स्यात्। वक्रोक्तिरेव मूलतः अलङ्कारताया अवच्छेदकरूपेणोद्भाविता भामहेन। तत इयं क्रमशो दण्डि-कुन्तक-भोजादीनामालङ्कारिकाणां दृष्टिं शिश्रिये। एतेषां दृष्टिभेदात् प्रस्थानभेदः इति नयेन वक्रोक्तिस्वरूपेऽप्यवतिष्ठते भेदः। अयं भेदो वक्रोक्तिमूलकेषु विविधेष्वलङ्कारेषु भेदमानयति। किन्त्वेतेषामवान्तरतमानां विशिष्टो विमर्शो नात्राप्रकृततया करिष्यते। केवलं संकेत एव विधास्यते येनालङ्काराणां भेदस्य दिक् स्पष्टा स्यात्।

विस्तृतो विमर्शस्तु वक्रोक्तेर्विकाशस्य कर्तव्यो यस्माच्छनैःशनैरभूदुद्भूतिः स्वभावोक्तिरसोक्त्योः। दण्डिना वक्रोक्तेः स्वभावोक्तिरुद्भाविता भोजेन च रसोक्तिः।

१. नमि साधु० व्याख्या आन रुद्रट, पृ० १४९।

एवमेतानि त्रीण्येवालङ्कारस्यावान्तराणि भेदकानि तत्त्वान्युन्मील्यन्ते । अत एतेष्वेव त्रिषु तत्त्वेषु योग्यतानुसारं लक्षणानुसारं वा सर्वेऽलङ्कारा अन्तर्भाव्यन्ते । सामान्यतो वक्रता तु सर्वत्र भवति, किन्तु स्वभावोक्तिरसोक्त्योः स्थलस्य वक्रता भिन्नैव वक्रोक्तिस्थलतः । तत्र तु न केवलं मात्राया भेदः, अपि तु प्रकारस्यापि । स्वभावोक्तिस्थलस्य वक्रता गुणैः प्रभाविता अलङ्काराणाम् अचलस्थितिं नित्यत्वं वा समर्थयते । इयं च स्थितिः वामनात्पूर्वं गुणालङ्कारयोरैक्य आसीत् । एवमेव रसोक्तिक्षेत्रस्य वक्रता विभावानुभावसञ्चारियोगान्निष्पन्नै रसभावादिभिः प्रभाविता भवतीति । इयमप्यवस्था अलङ्काराणां तां स्थितिं स्मारयति यत्रालङ्काराणां प्राधान्यकाले रसादयोऽप्यलङ्कारत्वेन[1] स्वीकृता आसन् । रसवत्प्रेयउर्जस्विप्रभृतिषु तु रसभावादिर्वाच्यशोभाहेतुत्वेनोक्तः ।

तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया प्रख्यापितमेव । किन्तु आनन्दवर्धनानन्तरं सर्वैवालङ्कारदृष्टिरामूलं परिवर्तनमेति, ध्वनिकारेण अलङ्कारसरणेर्व्यवस्थापनात् । वामनेन कृतो गुणालङ्कारयोर्भेदोऽतीव स्थूलो ध्वन्युद्भावनानन्तरं सूक्ष्मतां प्रतिपद्यते । यतो हि वामनपर्यन्तं कृतो भेदो नैव वास्तविकं पार्थक्यं प्रत्याययति गुणालङ्कारयोः, शोभाकर्तृत्वरूपधर्मस्य समानत्वेन व्यावर्तनार्थे प्रयुक्तस्य अतिशयविशेषणस्यास्पष्टतया अकिञ्चित्करत्वात् । अतो गुणानां काव्यशोभाजनकत्वम्, अलङ्काराणाञ्च शोभातिशयहेतुत्वमिति निर्धार्य निर्णीतो भेदो न स्पष्टः । वस्तुतः अत्र मतद्वयम् । एकं गुणालङ्कारयोरभेदं शंसति, अपरञ्च भेदम् । अभेदस्य समर्थका भामहोद्भटादयः । भेदस्य च वामनाऽऽनन्दवर्धनमम्मटादयः । अत्रापि भेदः । अत एव ध्वनिवादी मम्मटः उद्भटवामनयोर्मतं काव्यप्रकाशे खण्डयति यथा—

"समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः । ओजःप्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेद इत्यभिधानमसत् । यदप्युक्तम् काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्कारा इति । तदपि न युक्तम्" ।[2]

ध्वनिकारो गुणालङ्कारयोर्भेदं करोति । अत्रैव वास्तविकः सूक्ष्मो भेदो गुणालङ्कारयोः । एष एव भेदः प्रायः सर्वैरेव परवर्तिभिरालङ्कारिकैरनुसृतः । एष भेदो ध्वन्यालोकेऽपि दृश्यते । यथा—

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥[3]

---

१. अ० सर्व०, पृ० ६ ।

२. वामनी का० प्र०, पृ० ५७० ।   ३. ध्वन्या० ।

मम्मटाचार्यो गुणालङ्कारयोर्लक्षणं दत्त्वा तयोर्भेदं दर्शयति। तत्र गुणलक्षणं यथा—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥

अलङ्कारलक्षणं यथा—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥[1]

गुणालङ्कारयोरेष विभागः सूक्ष्मः, किन्तु आपाततोऽयमलङ्कारं स्वभावोक्ति-रसोक्त्योः पृथक्करोति रसस्य अङ्गिरूपत्वाद् गुणानां च तद्धर्मत्वात् अलङ्काराणाम् अङ्गधर्मत्वाच्च। तथा सति केवलं वक्रोक्तिमूला उपमाद्यलङ्कारा एव अलङ्कारतां भजेयुः, न स्वभावोक्ति-रसोक्तिमूलाः। एवञ्च गुणादिप्राधान्ये स्वभावोक्तिः विभावानुभावव्यभिचारियोगाद्रसोक्तिः इति भोजमतमपि व्याहतं स्यात्। अत एव कुन्तकोऽपि स्वभावोक्तिरसोक्ती वस्तुवक्रतायामन्तर्भाव्य एतयोरलङ्कारतां प्रत्याचख्यौ यथा—

अपरा सहजाहार्यकविकौशलशालिनी।
निर्मितिर्नूतनोल्लेखलोकातिक्रान्तगोचरा॥[2]

स्वभावोक्ति-रसोक्त्योरलङ्कारतायाः कुन्तककृतं खण्डनन्तु पूर्वं निर्दिष्टमेव। किन्त्वेतयोः अलङ्कारता तु अभिमता ध्वनिकारस्येत्यसकृदावेदितम्। ध्वनिकार एतयोः व्यङ्ग्यप्राधान्ये क्रमशो वस्तुध्वनित्वं रसध्वनित्वं चाभ्युपैति। किन्तु गुणीभूत-व्यङ्ग्यत्वे त्वलङ्कारता निर्बाधा। अत एव मम्मटोऽपि रसवदलङ्कारं गुणीभूत-व्यङ्ग्ये स्थापयति नालङ्कारविचारप्रसंगे। एवं स्वभावोक्तिरसोक्त्योः पृथक् सत्ता प्रतीयते वक्रोक्तेः।

एवं भोजस्य वक्रोक्तिविचारस्यास्पष्टतायां सत्यामपि तस्य महत्त्वमस्ति। एवं वक्रोक्तिविचारः प्राधान्येनात्रावश्यको यदाश्रित्य अस्याः (वक्रोक्तेः) विकासस्त्रिस्रोतसा व्रजन् त्रिविधमाकारमापद्यते। तत्र प्रथमो भामहस्य यत्र स्वभावोक्तिरसोक्ती सर्वथैव वक्रोक्त्या आक्रान्ते, न स्वतन्त्रस्वरूपं धारयतः। यत्र स्वभावानुसारं स्वभावोक्तिरसोक्तिमूलकौ अलङ्कारावन्तर्भावं भजतो वक्रोक्तावेव, तदा स्वभावोक्तिरसोक्त्योरनुन्मीलनात्। प्रकारत्वेन तत्स्वीकारेण स्वतन्त्रधाराया अभावात्। संक्षेपत इदं कथयितुं शक्यते यद् भामहोऽलङ्कारे वक्रतया आधिक्यं समर्थयते। अत एवास्य मते न भजन्ते हेतुसूक्ष्मादयोऽलङ्कारताम्, वाञ्छितायाः वक्रोक्तेरभावात्।

---

१. का० प्र०, ८.६६, ६७: २. व० जी ३.२।

द्वितीयं रूपं वक्रोक्ते र्दण्डिनो मते प्राप्यते यत्र वक्रोक्तेरीषत्स्पर्शोऽप्यलङ्काराय कल्पते। अत एवात्र भामहेन अभीष्टवक्रताभावादलङ्कारान्निःसारिता अपि हेतुसूक्ष्मादयोऽलङ्कारत्वेन गृह्यन्ते, रसवदलङ्काराश्च वक्रताया ईषत्स्पर्शेऽपि अलङ्कारा मन्यन्ते। भवेत् तेषामन्तर्भावो वक्रोक्तौ स्वभावोक्तौ वा। यतो दण्डि-समये स्वभावोक्ति-वक्रोक्तिभेदेन भिन्नाया द्विविधाया एव धारायाः सत्त्वाद् रसोक्तेश्च भोजकाल एव स्फुटत्वात्।

तृतीयं रूपञ्चास्ति भोजस्य वक्रतायाः, यत्र न केवलं स्वभावोक्तिमूलकाः, अपि तु रसोक्तिमूलका अपि अलङ्कारा स्वतन्त्रतां सत्तामश्नुवते। किन्तु भोजस्येदं वक्रोक्तेः स्वरूपं स्वभावोक्तिरसोक्तिभ्यामनालीढं सदपि न तस्य (भोजस्य) द्विसप्तत्यलङ्कारेषु व्यावृत्ततया दर्शितम्। अर्थाद् द्विसप्तत्यलङ्काराणां मध्ये के-ऽलङ्कारा वक्रोक्तिमूलकाः, के स्वभावोक्तिरसोक्तिमूलकाश्चेति निरूपितम्। यद्यपि संकेतस्तु कृतो भोजेनात्र स्वशृङ्गारप्रकाशे, किन्तु न तदाधारेण व्यापकं प्रातिस्विकं वर्गीकरणं कृतम्। किन्तु तिसृणामुक्तीनामस्य निर्देश एव स्तुत्यो येनालङ्काराणां त्रैविध्यमङ्गीकृत्यानेन कुन्तकस्य स्पष्टं विरोधः कृतः।

वास्तविकं तृतीयं रूपन्तु वक्रोक्तेः कुन्तकस्य मतमेव, यत्र न कथमपि स्वीकृताऽलङ्कारता स्वभावोक्तिरसोक्त्योः। एते च कुन्तकाभिमताया प्रकर्षकाष्ठा-धिरोहिण्या[1] वक्रतायाः औचित्यस्य कविप्रतिभानिर्वर्तितत्वस्य च गुणस्य वा वर्तमानत्वेन नालङ्कारकोटौ गण्येते अपि तु अनलंकार्याविव। किन्तु कुन्तकस्येदं मतं स्वभावोक्तिधारानिरूपणे विस्तरेण निराकृतम्। रसोक्तिधाराप्रसंगे च अपाकरिष्यते निःशेषम्। अन्यथा धारायास्त्रिविधत्वमेव न स्यात् स्वभावोक्ति-रसोक्त्योरुच्छेदात्।

आपाततो भामहेन सह साम्यं प्रतीयते कुन्तकस्य, यतोहि भामहवदयमपि वक्रोक्तिमेव अलङ्कारताया व्यवच्छेदकमेकं तत्त्वं मनुते। किन्तु समीक्षाया भेदो दृश्यत एव, भामहेन स्वभावोक्ति रसोक्त्योरलङ्कारत्वेन स्वीकारात्।

वक्रोक्तिस्तु अलङ्कारसामान्यरूपत्वेन विशेषरूपत्वेन च विविधैरालङ्कारिकैः स्वीक्रियते। यथा—

"शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तरेण रूपेणावस्थानम्, इत्ययमेवासौ अलङ्कारस्य अलङ्कारान्तरभावः। लोकोत्तरेण चैवातिशयः तेन अतिशयोक्तिः सर्वालङ्कारसामान्यम्"।[2]

---

१. व० जी०, पृ० १९५।

२. लोचन (ध्वन्या०), पृ० २०८।

"वक्रोक्तिशब्दश्च अलङ्कारसामान्यवचनोऽपि इह अलङ्कारविशेषे संज्ञितः"।[1]

"काकु-वक्रोक्तिर्नाम शब्दालङ्कारोऽयम् इति रुद्रटः"।[2]

उक्तिवक्रत्वे कथञ्चित् सम्भवत्यपि एवंविधलक्षणाभावात् सर्वालङ्कारेभ्यो भिद्यते।[3]

सामान्यरूपत्वे च नेयं सर्वेषामलङ्काराणां मूलम्, अपि तु वक्रोक्त्या अधिकमाक्रान्तानां श्लेषेण सादृश्यात् लक्षणया वा अनुप्राणितानामेव समासोक्ति-श्लेषोपमादीनामलङ्काराणाम्। एतदर्थं दण्डिवामनयोरुक्तयः पूर्वं दत्ता एव। विशेषत्वे चेयं शब्दार्थोभयरूपत्वेन स्वीकृता आलङ्कारिकैः। अनेनेदमपि अनुमीयते यद् यथा सामान्यरूपाया वक्रोक्तेः क्षेत्रं स्वभावोक्ति-रसोक्ती आवृणुतः, एवमेव अस्या विशेषरूपत्वमपि शब्दार्थमयम् आभ्यामावरणीयं भवेत्। अर्थात् केचन शब्दा अर्थाश्चैवंभूता भवेयुर्ये वक्रताया अभावे ईषत्स्पर्शे वा स्वभावतया सुन्दराः सरसाश्च स्युः। अतः स्वभावोक्त्या रसोक्त्या च आस्कन्दितौ शब्दार्थौ विहाय शब्दार्थयोः अङ्गीकार्या विशेषरूपापि वक्रोक्तिः।

यद्यपि स्वभावोक्ति-रसोक्त्योश्चर्चा अर्थालङ्कारत्वेनैव कृता, न कुत्रापि शब्दालङ्काररूपेण, येन पूर्वं कृतमेतदनुमानं सङ्गतं स्यात्। किन्तु वक्रताया विचारे रीतीनां मार्गाणां वा विमर्शं कुर्वता कुन्तकेन त्रिविधः सुकुमार-विचित्र-मध्य-मात्मको भेदो विहितः यथा—

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥[4]

अत्र सुकुमारमार्गे वक्रताया ईषत्स्पर्श एव भवति, तत्र स्वभावतया सुन्दराणां सरसानां च पदपदार्थादीनां विन्यासात्। यथा—

अयत्नविहितस्वल्पमनोहारिविभूषणः।
भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः।
रसादिपरमार्थज्ञमनःसंवादसुन्दरः॥[5]

अत्रैव कुन्तकः स्वभावोक्ति-रसोक्त्योरन्तर्भावं विधत्ते, एतयोरलङ्कार्यत्वेनैव स्वीकारात्। यथा—

अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवतिष्ठते॥[6]

१.–३. (डा० राघवन्: भोजाज् शृङ्गारप्रकाश शो० प्र०, भा० २ पृ० १३५ तः)।

४.– व० जी०, प्रथ० उन्मे०, का० २४।

५. तत्रैव, पृ० ८९।  ६. तत्रैव, प्रथ० उन्मे० का ११।

अलङ्कारो न रसवत् परस्याप्रतिभासनात्।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि ॥[1]

अन्येषाञ्च वक्रोक्तिमूलकानामलङ्काराणां प्रायो विचित्रमार्गे विनिवेशाच्च। किन्त्वत्रापि स्वभावोक्ति-रसोक्त्योर्वक्रता वर्तत एव, वक्रताया भेदत्वेनास्य स्वीकारात्। स्वभावोक्ति-रसोक्त्योरप्यलङ्कारता सिद्धैव। अत एव त्रिविधोऽप्येष स्वभावरसालङ्काराणां भेदो वाक्यवक्रतायामेवान्तर्भावितः। यथा—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥[2]

कुन्तकस्यायं मार्गनिर्देशः स्पष्टमिदं करोति यदलङ्काराणां त्रिविधो मौलिको मार्गात्मको धारात्मको वा भेदो भवितुं शक्नोति। यद्यपि कुन्तक एव नाऽस्यानुमानस्य समर्थकः, विचित्रमार्ग एव अशेषाणामलङ्काराणान्तर्भावात्। स्वभावोक्ति-रसोक्त्योर्नात्र विनिवेशः तयोरलङ्कार्यत्वेन स्वीकारात्। किन्तु स्वभावोक्ति-रसोक्त्योरलङ्कारता तयोः प्रसङ्गे विस्तरेण समर्थिता।

अतस्त्रिविधो विभागः सङ्गत एव प्रतिभाति अलङ्काराणां स्वभावोक्ति-वक्रोक्ति-रसोक्त्यात्मकः। कुन्तकोऽपि यद्यपि न साक्षात् समर्थयत एतान् मार्गात्मकान् धारात्मकान् वाऽलङ्काराणां भेदान्; तथापि अपूर्वं वक्रोक्त्यलङ्कारं स्वीकृत्य परम्परया इमान् पुष्यत्येव। यथा—

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ॥[3]

एतेन स्पष्टमिदं यद् वक्रोक्तिमूलकेष्वलङ्कारेषु त एवालङ्कारा अन्तर्भाव्या ये विचित्रमार्गस्यालङ्करणाय गृहीताः। न कथमपि स्वभावोक्ति-रसोक्तिमूलकाः, यत्र नास्ति कुन्तकाभिमतं वैचित्र्यम्, अपि तु लोकानतिक्रान्तं स्वाभाविकमवैचित्र्यमलङ्कार्यरूपम्। सुकुमारमार्ग एव साम्राज्यं स्वभावोक्ति-रसोक्त्योः। किन्तु कुन्तकस्यैषा मान्यता यथावसरनिराकृतैव, स्वभावोक्ति-रसोक्त्योरपि अलङ्करणार्थमपेक्षितस्य वैचित्र्यस्य सत्त्वात्। यदि च कुन्तकस्यात्रत्यं वैचित्र्यं वक्रताधिक्यं बोधयति, तदा तु तदस्मन्मतमेव पुष्णाति। अतस्त्रिविधो धारात्मको भेदः सङ्गत एव प्रतिभाति। किन्तु वक्रोक्तेः पारमार्थिकं रूपं यावन्निपुणं निरीक्ष्य न निष्पाद्यते, तावदस्मिन् मार्गात्मके विभागे कस्य स्यात् श्रद्धा ? यतः स्वभावोक्ति-रसोक्त्योर्व्यतिरिक्ततायामेव वक्रोक्तौ संभवेदयं त्रिविधः प्रास्थानिको भेदः। अन्यथा

---

१. तत्रैव, उन्मे० ३ का १०। २. तत्रैव उन्मे० ३ पृ० १४७।

३. व० जी०, पृ० २२।

वक्रत्वमेव काव्यानां पराभूषेति भामहः[१] इति भोजराज-वचनात् सर्वत्र अलङ्कारस्याश्रयत्वेन वक्रोक्तेः स्वीकारादेकमेव वक्रोक्त्यात्मकं प्रस्थानमलङ्कारेषु पर्यवस्यति । अन्ये च स्वभावोक्तिरसोक्तिधारे प्रस्थाने वा निराक्रियेताम्, यथा च मन्यते कुन्तकः ।

एतावत्पर्यन्तं वक्रोक्तिपोषकाणां मान्यानामालङ्कारिकाणां वक्रोक्तिविषयकं मतं विस्तरेण विमृश्य वक्रोक्तेः स्वभावोक्तिरसोक्तिभ्यां व्यतिरिक्तं स्वतन्त्रं स्वरूपमुपन्यस्तम्, येनालङ्काराणां त्रिविधं धारात्मकं वर्गीकरणं प्रथेत् । किन्तु वक्रोक्तेः स्फुटीकरणाय आलङ्कारिकैः स्थाने स्थान उपन्यस्तानि अन्यानि विकीर्णानि साधनानि परीक्ष्यन्ते, येन स्वभावोक्तिरसोक्त्योः विशेषतश्च स्वभावोक्तेः स्पष्टं पार्थक्यं सिद्ध्येत् । एतदर्थं रुद्रटस्य अर्थालङ्कारविभागः परीक्ष्यते । रुद्रटेन अर्थालङ्काराः चतुर्धा विभक्ताः—वास्तवौपम्यश्लेषातिशयभेदात् । यथा—

अर्थस्यालङ्कारा वास्तवौपम्यातिशयश्लेषाः ।
एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः ॥[२]

अत्र वास्तवस्य लक्षणम्—

वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत् ।
पुष्टार्थमविपरीतं निरुपममनतिशयमश्लेषम् ॥[३]

अत्र निरुपमम्, अनतिशयम्, अश्लेषं चेति त्रीणि विशेषणान्यतीव स्फुटतया वक्रोक्ति-स्वभावोक्त्योः पार्थक्यं प्रकाशयन्ति । एभिर्विशेषणैः स्पष्टमिदं यद् वास्तवभेदाद् बहिर्भूताः सादृश्यमूलकाः श्लेषमूलकाश्चालङ्काराः । इदञ्च वास्तम स्वभावोक्तिस्वरूपमेव अङ्गीकृतमालङ्कारिकैः । आधुनिका अपि समीक्षकाः समर्थयन्तीदम् । यतः स्वभावोक्ति-प्रवर्तकेन दण्डिना श्लेषस्य वक्रोक्ति-पोषकता स्वीकृतैव—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ॥[४]

भामहेन अतिशयात्मिकैव वा अङ्गीकृता[५] वक्रोक्तिः । वामनेन च 'सादृश्याल्लक्षणा वक्रोक्तिरि'ति उररीकृत्य सादृश्यात्मिकैव समर्थिता । यथा—

---

१. श्टं० प्र०; भा० २ पृ० ३७५ ( डा० राघवन् भोजाज् श्टं० प्र० क्रो० प्र० भा० २ पृ० ९५ तः ) ।

२. रुद्रटः, काव्या० ७. ९ । ३. तत्रैव ८. १० ।

४. दण्डी २. ३६२ । ५. भामहः २. ८१,८५ ।

"सादृश्याल्लक्षणा वक्रोक्तिः।" बहूनि निबन्धनानि लक्षणायाम्।
तत्र सादृश्यात् लक्षणा वक्रोक्तिः, यथा 'उन्मिमील कमलं सरसीनाम्।'[१]

अत्र नेत्रधर्मौ उन्मीलन-निमीलने सादृश्याद् विकाशसंकोचौ लक्षयतः। असादृश्यनिबन्धना तु न वक्रोक्तिः। एवं त्रीण्यपि एतानि विशेषणानि तैस्तैः आलङ्कारिकैर्वक्रोक्तेर्व्यावर्तकतया स्वीकृतान्येव। अतः सादृश्यमूलका अतिशयोक्तिमूलका श्लेषमूलकाश्चालङ्काराः स्वभावोक्तौ नान्तर्भावमर्हन्ति, अपि तु वक्रोक्तावेव। एवं वक्रोक्तिक्षेत्रं विविक्ततां व्रजति। अधुना अधस्तान्निर्दिष्टैः संकेतैर्वक्रोक्तेः प्रातिस्विकस्वरूपावगतौ न स्यात् सन्देहः। एतैः स्वभावोक्ति-रसोक्त्योरप्यस्याः पार्थक्यमपि सुगमं स्यात्, विशेषतया च स्वभावोक्तेः।

इदानीं वक्रोक्तिविषये यथावसरं समुद्गीर्णानां विकीर्णानां परस्परं विरुद्धानां च विविधानां वचनानामेकवाक्यता विधीयते, येन वक्रोक्तेस्तात्त्विकस्वरूपज्ञानं सुकरं भवेत्।

कुन्तको वक्रोक्तिं विचित्रामभिधां[२] मनुते। वामनश्च 'सादृश्याल्लक्षणा वक्रोक्तिरि'ति[३] स्वीकृत्य लक्षणाम्। एवमापाततो भिन्नमप्येतयोर्मतं न तथा विरोधि यथा वृत्तिभेदेन प्रतीयते। यतोऽत्रत्या अभिधा न साक्षात्संकेतितस्यार्थस्य अभिधानपरा अपि तु लक्ष्यव्यङ्ग्यार्थयोर्बोधपरा। यथा—"यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेवेति"[४] रूपेणाङ्गीकारात्। अत एवेयं विचित्रैवाभिधा स्वीकृता कुन्तकेन, न सामान्यरूपेण प्रसिद्धा अभिधावृत्तिः। अतो नास्ति कोऽपि विरोधः पूर्वं निर्दिष्टयोर्विरुद्धमतयोः।

किन्तु सामान्यतया अलङ्कारेष्वभिधैवाङ्गीक्रियत आलङ्कारिकैः। यथा—अभिधाप्रकारविशेषा एवालङ्काराः।[५] सति च त्रिविधे प्रतीयमाने व्यापाररूपा भणितिरेव कविसंरम्भगोचरा इत्यादिभिरनेकैर्वचैनैः समर्थनात्।

स्वतःसिद्धेन भिन्नेन सम्मतेन च धर्मतः।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा॥[६]

अनेन वक्रोक्तौ लक्षात्मिकायां सत्यामलङ्कारतैव भज्येत, अभिधात्वे एव अलङ्कारतायाः स्वीकारात्। किन्तु एतदपि न चारु; वाच्यत्वेन वाच्यलक्ष्ययोरुभयोरपि अङ्गीकारात्, व्यङ्ग्यस्यैव व्यावर्तनाय वाच्यस्य ग्रहणात्। व्यङ्ग्यत्वस्य व्यावर्तनमपि अलङ्कारतायाः कृते नानिवार्यं समासोक्ति-पर्यायोक्तादिषु व्यङ्ग्यत्वेऽपि अलङ्कारतायाः स्वीकारात्।

---

१. वामनः ४. ३,८ वृत्ति।
२. व० जी०, पृ० २२।
३. वामन का०, सू० ४. ३. ८।
४. व० जी, पृ० १५।
५. अ० सर्व० पृ० ७।
६. रस० ग० पृ० १६२।

न चात्र सर्वत्र व्यङ्ग्यं वाच्यपरमिति स्वीकृत्य वाच्यस्यैव प्राधान्येन वक्रोक्तेर्लक्षणात्वकथनं विरुद्धमिति शङ्क्यम्; अलङ्कारतायै त्रिविधायाः अभिधा-लक्षणा-व्यञ्जनात्मिकाया वृत्तेर्ग्राह्यत्वात्। अत एव शब्दश्छन्दोभिधानार्थाः[1] इति शब्दो मुख्योऽमुख्यश्चेति वृत्तिद्वयमुररीकृत्य अमुख्ये एव लक्षणाव्यञ्जनयोरन्तर्भावात्। अत एव प्राङ्निर्दिष्टं मतं न कथमपि मिथो विरुद्धम्, अपि तु आलङ्कारिक-विशेषस्य दृष्टिपरिचायकम्। अन्यथा वक्रोक्तौ तु लक्षणैव सङ्गता। स्वभावोक्तिरसोक्त्योः अभिधाया एव स्वीकारात्। रसोक्तौ तु अभिधामूला व्यञ्जनैव रसभावादीनामर्थानां स्वप्नेऽपि वाच्यत्वाभावात्। किन्तु एताभ्यां भिन्नायां वक्रोक्तौ तु लक्षणात्वस्यैवौचित्यात्। वक्रा लोकातिगा अभिधा भिन्ना वा उक्तिरेवात्र व्युत्पत्तिलभ्या वक्रोक्तिरिति अर्थस्वीकारे लक्षणात्वकथनं सङ्गतमेव। रूपकादिष्वलङ्कारेषु लक्षणायाः स्वीकारात्। अत एव रसगङ्गाधरकारोऽपीदमेव समर्थयते यथा—अहो महदेवेदमन्याय्यं यदलक्षणीयायाः सङ्ग्रहः लक्षणीयायाश्च असङ्ग्रह इति।[2]

प्राचीनानां तु उपमासामान्यं लक्षयतां ध्वन्यमानाया इवास्या अपि सङ्ग्रहो नानुचितः।

इदन्तु अवश्यमेव विचारणीयं यत् केवलं सादृश्याल्लक्षणैव कथं गृह्यते न सामीप्यादिसम्बन्धात् जाता प्रयोजनवती लक्षणापि। वामनः केवलं सादृश्याल्लक्षणां वक्रोक्तिं मनुते, न सामीप्यादिसम्बन्धात् जाताम्। यथा—

> बहूनि हि निबन्धनानि लक्षणायाम्, तत्र सादृश्याल्लक्षणा
> वक्रोक्तिरिति। असादृश्यनिबन्धना लक्षणा तु न वक्रोक्तिः॥[3]

वामनस्येदं वक्रोक्तेर्लक्षणमतीव सङ्कुचितम्, सादृश्यात्मिकायां लक्षणायामेव तस्याः स्वीकारात्। नेदं लक्षणं भामहसम्मतं सर्वत्रैव लक्षणालक्षणादिस्थले तेन वक्रोक्तेः समर्थनात्। न च दण्डिनोऽपि; तेनापि श्लेषानुप्राणितायाः वक्रोक्तेरधिगमात्। अन्येऽपि आलङ्कारिका नेदं मतं समर्थयमानाः प्रतीयन्ते। अनेनेदं स्पष्टं यन्न कथमपि वामनस्य सादृश्यात् लक्षणात्मकं मतं सर्वमान्यतां भजते। इदं मतं भोजोऽपि न मनुते, लक्षणासामान्यायाः वक्रोक्तेर्जीवितत्वेन स्वीकारात्, न केवलं सादृश्यात्मिकायाः। यथा—

> अभिधेयं विनाभूतप्रतीतिर्लक्षणोच्यते।
> सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते॥[4]

अनेन सिद्धमिदं यदत्र वक्रोक्तिविचारे न क्वापि सादृश्याल्लक्षणात्मिका

---

१. भामह १.९। २. रसग०, पृ० १८०।
३. वामनः, काव्या० ४.३.८। ४. शृ० प्र०, भा० १ पृ० ४२९।

श्लेषानुप्राणिता वा विशिष्टा वक्रोक्तिर्ग्राह्या, अपि तु सामान्या यत्र सादृश्या-सादृश्यात्मिका लक्षणाः श्लेषादयोऽपि च सर्वे गृहीताः स्युः।

संक्षेपतो वक्रोक्तिर्लक्षणात्मिकैव श्रेष्ठा, तत्रापि वामनोद्भाविता सादृश्या-लक्षणा तु श्रेष्ठतमा। किन्तु सामान्यसादृश्यासादृश्यनिबन्धना वा लक्षणैव वक्रोक्तिजीवितम् इति मतमेव चारु। इत्थमापाततो भोजो यद्यपि भामहमनुसरति, यतोऽयमपि अलङ्कार-सामान्यस्य अनिवार्यं मूलाधारं वा वक्रतामेव मनुते। यथा—

वक्रत्वमेव काव्यानां परा भूषेति भामहः ॥[1]

एवं भोजेन स्वीकृते स्वभावोक्तिरसोक्ती अपि सङ्गतिं भजेते, तत्र लक्षणाया अभावात्। सामान्यतया स्वभावोक्तौ अभिधायाः रसोक्तौ च व्यञ्जनायाः स्वीकारात्। इत्थं वक्रोक्तेर्विविक्तं रूपमुपन्यस्तम्। यद्यपि एतद्विषये नैके भेदाः, किन्तु सर्वेषां विश्लेषणात्मकमध्ययनं विधाय एकं विश्कलितं स्वतन्त्रं स्वरूप-मुपन्यस्तं यच्च समञ्जसतां गाहेत वाङ्मयस्य त्रिविधासु उक्तिषु वर्तमानाया वक्रोक्तेः।[2]

अत्र भोजमतस्यैव प्राधान्यम्, यतोऽयमेव उक्तं त्रैविध्यमङ्गीकुरुते। इममेव विभागमाश्रित्य बहुकालपर्यन्तमलङ्कारेषु प्रस्थानत्रयं स्वीकृतमासीत्, यच्च रुद्रटानन्तरं प्रायोऽस्तं जगाम, वक्रोक्तेरलङ्कारविशेषत्वेन स्वीकारात्। आनन्दवर्धनकालेऽप्यस्याः क्षीणः संकेत उपलभ्यते, किन्तु तदाऽन्तःप्रस्थानस्य धारेयं स्पष्टा आसीत्। यतो ध्वनिकारेण साहित्यसरणेः स्थापनायामालङ्कारिकैः स्वेच्छया कृतो विभागोऽलङ्काराणाम्। तत्र प्रस्थानस्य वैज्ञानिकी दृष्टिर्नोपलभ्यते, केवलमैच्छिको भेद एव प्रथते।

अत एवालङ्काराणां वर्गीकरणे विभागे वा दृश्यन्ते विविधा दृष्टयः। कश्चन अलङ्कारान् चतुर्धा[3] विभजते, अन्यः षोढा[4] अपरो सप्तधेत्यादीनि[5] मतानि वर्गीकरणे दृष्टिभेदं द्योतयन्ति। वर्गीकरणविधा-प्रसङ्गे सर्वेषामेषां मतानां विचारः कृतः अत्र तु केवलं संकेत एव क्रियते। एवं वक्रोक्तेः स्वरूपं स्पष्टम्। अत्रा-लङ्कारप्रस्थानविमर्शेऽभिमताया वक्रोक्तिधारायाः स्वरूपमुपन्यस्तं येन स्वभावोक्ति-रसोक्त्योर्विविक्तं क्षेत्रं मिलेद् वक्रोक्तेः धारारूपिण्याः। अन्यथा भामहस्य वक्रोक्तौ स्वभावोक्तिरसोक्त्योः अन्तर्भावो निवारयितुमशक्यः स्यात्। न च कुन्तककृतः स्वभावोक्तिरसोक्त्योरलङ्कारताया विरोधो निराकर्तुं शक्यते।

---

१. तत्रैव, पृ० १२२।
२. तत्रैव भा० २ पृ० १९१।
३. रुद्रटः।
४. उद्भटः।
५. रुय्यकः।

अलङ्कारप्रस्थानविमर्शे धारायाः स्वीकारार्थन्तु वक्रोक्तेः प्रातिस्विकस्य स्वरूपस्य निर्णयो अनिवार्य आसीत्। अन्यथा वक्रोक्तिमूलकानामलङ्काराणां स्वतन्त्रं वर्णनमेव व्यर्थतां व्रजेत्। भामहवत् सर्वेषामेवालङ्काराणां वक्रोक्तावेव विनिवेशात्, कुन्तकस्य कतिपयेषामेव विशिष्टानामलङ्काराणां प्रकर्षकाष्ठाधिरोहिण्या वक्रोक्तेः समर्थितत्वेन स्वीकारात् स्वभावोक्तिरसोक्त्योर्वक्रताविरहितत्वेन तन्मूलकानामलङ्काराणामस्वीकाराच्च।

अत एव कुन्तकेन केवलं विंशतिरेवालङ्काराणां स्वीकृता। स्वभावोक्तिरसोक्त्योरलङ्कारताया अस्वीकारेण तन्मूलका सर्व एवालङ्कारास्त्यज्यन्ते, विच्छित्तेरभावाच्च बहवोऽलङ्कारा वक्रोक्तिमूलकेष्वेव कतिपयेषु कुन्तकाभिमतेष्वलङ्कारेषु अन्तर्भाव्यन्ते च। अत एव जयदेवाप्पयदीक्षितादिभिः पश्चाद्भवैरालङ्कारिकैः बाणरविमितां महतीं संख्यां प्रापिता अपि अलङ्काराः केवलां स्वल्पां विंशतिपरिमितां संख्यां प्राप्यन्ते। न केवलं कुन्तक एव, अपि तु अन्यैरपि बहुभिर्हेमचन्द्रन्यायवागीशादिभिरालङ्कारिकैः वर्धमानां संख्यां निरोद्धुं स्वदृष्टिभेदेन कृतः प्रयासः किन्तु न केनापि व्यापकदृष्टिसमर्थिका युक्तयो दत्ताः, येन तैः कृतोऽलङ्काराणां निरोधो न धारात्वं प्रस्थानतां वा प्राप, अपि तु केवलं वैयक्तिकीं दृष्टिं पुपोष। वक्रोक्तिधाराया विमर्शः स्वभावोक्तिरसोक्तिधारापेक्षया अधिकं विस्तारितः। यतोऽलङ्काराणां मूलमियं वक्रोक्तिरेव प्रथमं भामहेन स्वीकृता। अस्यामेव स्वभावोक्तिरसोक्तिधारे अन्तर्भाविते आस्तां प्रकारतया दण्डिभोजपूर्वमिति वक्रोक्तिधारानिरूपणे यथावसरं प्राङ्न्यर्णायि।

इदमप्यत्र निर्धारितं यदत्र वक्रोक्तिधारायां प्रायः सर्वेषां प्रधानानां भामहदण्ड्युद्भट-रुद्रटाऽऽनन्दवर्धन-कुन्तक-मम्मट-विश्वनाथ-जगन्नाथादीनां प्राचीनार्वाचीनानामालङ्कारिकाणां मतानि साक्षात्परम्परया वा संयोजितानि, न केवलं कुन्तकस्यैव मतं यथा एस० के० डे महोदया वक्रोक्तिभूमिकायां[1] निर्णयन्ति। तथात्वे सर्व एव स्वभावोक्तिरसोक्तिमूलका अलङ्कारा अलङ्कारविषयाद् बहिर्भवेयुः आप्नुयुश्चालङ्कार्यताम्, कुन्तकेन स्वभावोक्तिरसोक्त्योरलङ्कारताया निषेधादलङ्कारताया निषेधादलङ्कार्यत्वेनैव तयोरङ्गीकाराच्च। एवञ्चाशेषैव अलङ्कारसरणिर्व्यवस्थिता आनन्दवर्धनादिभिर्भज्येत। फलतश्च केवलमलङ्काराणां विंशतिरेव यथाकथञ्चित् कुन्तकाभिमता गच्छेदलङ्कारताम्, शिष्टाश्च शतोऽप्यधिका अलङ्कारा आलङ्कारिकैः स्वीकृता भवन्ति निःशेषमुच्छेद्याः काष्ठाधिरोहिण्यां वक्रोक्तावन्तर्भावत्वेन तावन्मात्राया वक्रोक्तेरभावान्निरलङ्कारत्वेन वा।

अतो वक्रोक्तिधाराया प्रधानः प्रवर्तको भामहः। अस्यैव वक्रोक्तेः द्वे धारे स्तः, ययोरेका रसोक्तिगर्भया स्वभावोक्त्या प्रभाविता स्वल्पवक्रोक्तिका वा एका,

---

१. व० जी० भूमिका पृ० ४८।

अपरा च काष्ठाधिरोहिण्या[1] वक्रोक्त्या अधिकमास्कन्दिता। एतयोः प्रथमाया रसोक्तिगर्भया स्वभावोक्त्या क्रोडिताया वक्रोक्तिधारायाः पोषकाः दण्डि-रुद्रट-भोज-विश्वनाथाप्पयदीक्षितादयः। द्वितीयस्याश्च काष्ठाधिरोहिण्या वक्रोक्तेः समर्थका उद्भट-वामन-कुन्तक-मम्मट-जगन्नाथादयः प्रतीयन्ते। एवं वक्रोक्तेरनयोर्द्वयोर्धारयोः प्रधानौ पोषकौ द्वौ, भोज-कुन्तकौ। रसोक्ति-गर्भया स्वभावोक्त्या समास्कन्दिताया वक्रोक्तेरुन्नायको भोजः, काष्ठाधिरोहिण्या वक्रोक्तेरुद्भावकश्च कुन्तकः। अनेन क्रमेण एकैव वक्रोक्तिधारा दण्डिना स्वभावोक्तिवक्रोक्तिभेदेन द्विधा विभज्यते, सैव च द्विधा धारा भोजराजेन त्रिधात्वं प्रापय्यते।

अनेनेदं सिद्धं यन्न केवलं कुन्तको वक्रोक्तेः सम्पूर्णाया उन्नायकः, अपि तु एकस्या विशिष्टाया काष्ठाधिरोहिण्या वक्रोक्तिधारायाः। अपरस्या रसोक्तिगर्भया अश्लिष्टया स्वतन्त्रं प्रातिस्विकं रूपं दधत्या स्वभावोक्त्या निःशेषं निगीर्णाया वक्रोक्तेर्द्रष्टा दण्डी, अन्यस्यास्तु स्वभावोक्तिरसोक्तिभ्यामाक्रोडिताया भोजः।

अनेन स्पष्टमिदं यदिमे त्रयो मान्याः समालोचका दृष्टिभेदेन वक्रोक्तिं पुष्यन्ति। एवं स्वभावोक्तिवक्रोक्ति-रसोक्तिव्यपदेशभाग्भिः तिसृभिः स्वतन्त्राभिर्धाराभिः प्रवहन्तीयं व्यापिका वक्रोक्तिरशेषानलङ्कारान् सामान्यतो व्याप्नोति। किन्तु 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन तास्ताः स्वभावोक्ति-वक्रोक्ति-रसोक्त्यात्मिक्य आख्या आप्नुते। यथा एकैव उपमा रूपकापह्नुतिसंदेहोत्प्रेक्षादिष्वलङ्कारेषु सामान्यतो व्याप्ताऽपि प्राधान्यव्यपदेशन्यायेन रूपकापह्नुत्यादिक्यो नैका आख्या लभते, तथैवेयं वक्रोक्तिः। अनेनालङ्कारप्रस्थाने धाराणां त्रिविधत्वमसन्दिग्धं सिध्यति।

परमार्थतस्तु वामनरुद्रटानन्तरं वक्रोक्तेरलङ्कारविशेषरूपत्वे स्वीकृतेऽलङ्कारसामान्यताया अभावे वक्रोक्तेर्धारात्वमपैति। भामहदण्डिभ्यां दर्शिताया वक्रोक्तेः सामान्यवचनताया दर्शनं परवर्तिष्वालङ्कारिकेषु नोपलभ्यते। रुद्रटानन्तरन्तु केवलमस्या शब्दार्थरूपिणी विशेषवचनतैवाधिगम्यते। वामनस्य सादृश्यलक्षणात्मिका वक्रोक्तिरपि आनन्दवर्धनस्य अविवक्षितवाच्यव्यङ्ग्यतां, मम्मटस्य च लक्षणामूलगुणीभूतव्यङ्ग्यतां ध्वनित्वं वा लेभे, न चालङ्कारेषु तस्याः सामान्यवचनतायाः जायतेऽग्रे दर्शनम्। केवलं भामहदर्शिता वक्रोक्तिरेव कुन्तकमधिगत्य प्रस्थानतामवाप्य स्वभावोक्तिरसोक्त्योरलङ्कारतां निषेधति। अतः कुन्तकस्येदं वक्रोक्तेः प्रकर्षकाष्ठाधिरोहात्मकं स्वरूपं पश्चाद्वर्तिष्वालङ्कारिकेषु न पूर्णा मान्यतां लभते। अत एवास्मिन् सत्यपि वर्धन्ते स्वभावोक्तिरसोक्तिमूलका अलङ्काराः। एवं प्राचीनेष्वालङ्कारिकेषु परां प्रतिष्ठामितो वक्रोक्तेरेष सामान्यवचनात्मकः

---

१. तत्रैव, पृ० १९५।

स्वभावोऽग्रे विलुप्यते, केवलं विशेषवचनतैव वर्धते। इत्थमेव एस० के० डे महोदया अपि वक्रोक्तिजीवितस्य भूमिकायां[1] स्वीकुर्वन्ति।

किन्तु सूक्ष्मसमीक्षायां सत्यमिदं प्रतीयते यदग्रेऽपि वक्रोक्तिः स्वभावोक्ति-रसोक्तिभ्यां सह प्रसरति। आलङ्कारिकदृष्टिभेदेन चास्याः सामान्यवचनता विविधैः चारुत्व-विच्छित्ति-शोभा-मनोज्ञत्व-वैचित्र्यादिभिर्व्यपदेशैरात्मानं प्रकाशयति। अन्यथा अशेषाणां तिसृणां धाराणां मूलभूताया वक्रोक्तेः सामान्य-रूपताया अभावे प्रकृतस्यालङ्कारप्रस्थानविमर्शरूपस्यास्य शोध-प्रबन्धस्य प्रयासोऽप्यकिञ्चित्कर एव स्यात्। अतो वक्रोक्तेः सामान्यवचनता तु स्थापनीयैव। अत्रालङ्कारिकाणां वचनान्येव सहायतां विदधति। यथा—'वक्रोक्तिशब्दश्च अलङ्कार सामान्यवचनोऽपि इहालङ्कारविशेषसंज्ञितः'।[2] 'विच्छित्तिवैलक्षण्यस्यैवालङ्कारविभागहेतुत्वात्'।[3] यद्यप्येवंविधानि वचनानि स्वल्पानि, किन्तु सर्वत्रालङ्काराणां विचारे वक्रोक्तिरेषा विविधाभिरन्याभिराख्याभिरुपतिष्ठते। यथा—सौन्दर्य-विच्छित्ति-वैचित्र्य-अतिशय हृद्यत्वादिभिरभिधाभिः।

अतो वक्रोक्तिरेव विविधया संज्ञया अलङ्कारप्रयोजिकात्वमुपैति। यत्र चैतस्या वक्रोक्तेरभावस्तत्र नालङ्कारता। यथा—'गौरिव गवय' इत्यत्र नोपमा, 'गौर्वाहीक' इत्यत्र न रूपकम्। अत एव स्वभावोक्तावपि वक्रोक्तेः सत्ता स्वीकार्या, अन्यथा अलङ्कारतैव न स्यात्। यथा—

दीर्घपुच्छश्चतुष्पादः ककुद्मांल्लम्बकम्बलः।
गोरपत्यं वलीवर्दस्तृणमत्ति मुखेन सः॥[4]

इत्यादौ नायमलङ्कारः, अलङ्कारजीवातोश्चमत्कारस्यासिद्धेः।

अनेन विस्तृतेन विचारेणेदं सिद्धं यद् वक्रोक्तिरेवालङ्काराणां जीवातुः। सा सामान्यवचनापि इहालङ्कारप्रवाहे विशेषरूपमप्यात्मनः समयतः प्रकाशयति। नेयं व्यवस्था केवलं वक्रोक्तावेव, अपि तु अन्यत्राप्यनेकेष्वलङ्कारेषु दृष्टचरा, समर्थिता चाप्यलङ्कारशास्त्रे। यथा-उपमा-विरोधादयः सामान्यवचनतां विशेष-वचनताञ्च सहैव बिभ्रति, तथैवेयं वक्रोक्तिरपि। इयञ्च या सामान्यविशेषरूपा विच्छित्ति-परम्परा अलङ्कारप्रवाहे आलङ्कारिकैः स्वीकृता साप्यादितो वक्रोक्ति-विजृम्भितैव। भामहस्योक्तिरेवात्र प्रमाणम्—"कोऽलङ्कारोऽनया विना"।[5]

अत्र वक्रोक्तिधारायां प्रतिपादितं वक्रोक्तेः स्वरूपमलङ्कारसामान्यमेव, यच्च स्वभावोक्तिरसोक्तिधारानाक्रोडितानशेषान् वक्रोक्तिमूलकानलङ्कारान् व्याप्नोति। यच्च विशेषरूपत्वेनौपम्यातिशयश्लेषमूलकेषु चतुर्ष्वलङ्कारेषु व्याप्तम्। एतद्विषयको

१. व० जी० भूमि०, पृ० २४। २. अ० स०, पृ० १९९।
३. र० ग०, पृ० ३२६। ४. काव्यादर्शः, २. ८ (टी०)।
५. भामह २. ८५।

विमर्शस्तु विस्तरेणाधस्तात् कृतः। अत्र तु उपसंहाररूपेण केवलं संकेत एव विहितः प्राङ्निर्णीतानां वक्रोक्तिधारासमर्पकानां तत्त्वानां येन जायेत सौकर्यं सद्यो वक्रोक्तिधाराकलने।

## वक्रोक्तिमूलका अलङ्काराः

सामान्यतया केऽलङ्कारा वक्रोक्तिमूलकाः के च स्वभावोक्ति-रसोक्तिमूलका इत्यस्य निर्णयो नातितरां सुगमः, सर्वेषामेवालङ्काराणां कोऽलङ्कारोऽनया विना[1] इति, वक्रत्वमेव काव्यानां पराभूषेति भामहः[2] इत्याद्युक्तीनां समर्थनत्वेन वक्रोक्तिमूलकत्वात्। अनेनेदं स्पष्टं यत् सर्व एवालङ्कारा वक्रोक्तिमूलकाः। किन्तु 'दृष्टिभेदात् प्रस्थानभेदः' इति नयेन आलङ्कारिकाणां दृष्टिभेदात् वक्रोक्तिस्वरूपेऽपि समुपलभ्यते महान् भेदः। वक्रोक्तिविमर्शे समुपन्यस्तमेवेदं यद् भामह-दण्डि-भोज-कुन्तकादयो वक्रोक्तेरलङ्कारसामान्यत्वस्य पोषका अपि दृष्टिभेदाद् वक्रोक्तिस्वरूपे विवदन्ते। भामहस्य वक्रोक्तौ स्वभावोक्तिरसोक्ती अपि अन्तर्भूते प्रकारतया वा स्वीकृतेऽलङ्कारतामधिकुरुतः। किन्तु न कथमपि कुन्तकस्य वक्रोक्तौ तयोरलङ्कार्यत्वेन[3] स्वीकृतत्वादलङ्कारताया अभावात्। एवमन्यदपि शिष्टं स्वरूपम् अवसेयम्। एतत्सम्बन्धी विस्तरस्तु वक्रोक्तिविमर्शे द्रष्टव्यः।

आलङ्कारिकाणां विविधानि प्रकीर्णानि मतान्याकलय्य वक्रोक्तिं व्यावर्तयता मया वक्रोक्तिविमर्शे प्रागिदं विनिवेदितं यद् येष्वलङ्कारेषु औपम्यातिशय-श्लेषादीनां दृश्यते वक्रताधिक्यात्मिकी सत्ता, ते एव वक्रोक्तिमूलकाः तदन्ये च स्वभावोक्तिरसोक्तिमूलकाः। अतोऽनया दृष्ट्या वक्रोक्तिमूलकानामलङ्काराणां निर्णयो न भवेत् कठिनः। औपम्यातिशयश्लेषादिमूलकता तु बहूनां स्वभावोक्तिमूलकानामपि अलङ्काराणां भवति एतेषामभावे चारुताया अभावादलङ्कारताया एवोच्छेदसम्भवात्। किन्तु तत्र प्राधान्यं भवति स्वभावोक्तेः। औपम्यादयस्तु तस्याः पुष्ट्यर्थमेव प्रयुज्यन्ते। एवंविधेषु स्थलेषु 'प्राधान्येन व्यपदेशा भवन्तीति' न्यायात् स्वभावोक्तेः प्राधान्यात्तयैव व्यपदेशो न्याय्यः। यथा सहोक्तौ अतिशयस्य दीपके चौपम्यस्य सत्त्वेऽपि न हीयते कथमपि स्वभावोक्तिः, अपि तु पुष्यत एवास्याः सौन्दर्यम् औपम्यातिशयाभ्याम्। अतो यत्र औपम्यातिशयौ वक्रोक्तिमुपकुर्वन्तौ प्राधान्यं भजतस्तत्रैव एतन्मूलका अलङ्कारा वक्रोक्तौ विनिवेश्यन्ते, नान्यथा।

अनेनेदं सिद्धं यत् स्वभावोक्तिवक्रोक्त्योर्मौलिकं प्रातिस्विकं स्वरूपन्तु ज्ञातव्यमेव, येन विशेषरूपबोधकानां विशेषणानां विनियोगे न भवेद् भ्रमः।

---

१. भामह. २.८५। २. भोजः।
३. व० जी० १.११, १२।

यथा औपम्यातिशयौ वक्रोक्तेर्विशेषरूपस्य बोधकौ किन्तु यदेतौ अर्थस्य तादवस्थ्ये पिहितस्य स्वभावस्योन्मेषिकायाः स्वभावोक्तेरुपकारं कुरुतस्तत्र चमत्कृतित्वात् स्वभावोक्तिरेव, न वक्रोक्तिः। यतः 'इह हि अलङ्कारवर्गे यो यत्र सहृदयहृदयचमत्कृतिपथमवतरति, स तत्रालङ्कार'[1] इति निर्विवादम्। एवञ्च रूपके 'मुखं चन्द्रः' इत्यादौ यद्यप्यस्ति विरोधस्तथापि न स तत्र प्रतिपिपादयिषितः, अपि तु चन्द्रनिष्ठाह्लादकत्वादिसकलगुणानां मुखे प्रतिपत्त्यर्थं चन्द्राभेद एवेति स चमत्कारी, न विरोधः। प्रत्युत सन्नपि विरोधो विवक्षितार्थाननुगुणत्वात् दूषित इति नालङ्कारः, विद्यमानताया अकिञ्चित्करत्वात्। एवमेव प्रकृतेऽपि औपम्यातिशयादीनां वक्रोक्तिपोषकाणां विद्यमानता अपि अकिञ्चित्करैवेति। तेषां तत्र स्वभावोक्तेरेवानुगुणत्वात्।

अतः औपम्यातिशयश्लेषानुप्राणिता अलङ्कारा वक्रोक्तौ विनिवेशनीयाः, तेषामेव चमत्कृतित्वे सति वक्रोक्तेः पोषकत्वात्। अन्यथा उपस्कारानुसारं ते तदनुप्राणितानामलङ्काराणां स्वभावोक्तेः पोषकतया तत्रैवान्तर्भाव्याः। एवमेते वक्रोक्तेर्घटका औपम्यातिशयश्लेषमूलका अलङ्कारास्तदैव वक्रोक्तौ विनिवेश्यन्ते समीक्ष्य, यदा ते चमत्कारतया वक्रोक्तिं पुष्यन्ति, अन्यथा तेषां स्वभावोक्तावन्तःपातोऽनिवार्य एव। यतः स्वभावोक्तिवक्रोक्त्योर्न सर्वथा असम्पृक्तं पार्थक्यं येन एतन्मूलकानामलङ्काराणां विचारः सुगमतां गच्छेत्। केवलं रुद्रटदर्शितेन चतुर्विधात्मकेन वास्तवौपम्यातिशय-श्लेषात्मकेन व्रजन् विचारको यथाकथञ्चिन्मार्गं प्रशस्तं करोति।

अर्थस्यालङ्कारा वास्तवौपम्यमतिशयश्लेषाः।
एषामेव विशेषा अन्ये तु सन्ति निःशेषाः॥[2]

यतो रुद्रटस्यैतेषां चतुर्विधानामलङ्काराणां मध्ये वास्तवभेद एव स्वभावोक्तिं स्पष्टतया वक्रोक्तेः पृथक् कारयति।

अतोऽस्य लक्षणमधीत्य केऽलङ्कारा वक्रोक्तिमूलकाः, के च स्वभावोक्तिगर्भिता इति स्पष्टं भवति। अर्थाद् वास्तवमूलाः स्वभावोक्तिगर्भिताः अवशिष्टाश्च त्रय औपम्यातिशयश्लेषभेदका वक्रोक्तिघटका इति। यद्यप्यत्रापि दृश्यते महान् विवादः, यतः रुद्रटः स्वयमेव (९) नव संख्याकान् सहोक्ति-समुच्चय-विषय-हेतूत्तरोत्प्रेक्षापूर्वाधिक-विरोधाख्यान् अलङ्कारान् वर्गद्वये स्थापयति।[3] अनेन रुद्रटस्यायं विभाग आपाततोऽवैज्ञानिकः प्रतिभाति। किन्तु अस्माकमलङ्कारधारादृष्ट्या नैष विरोध उपतिष्ठते। यतो हि वक्रोक्तेरतिशयोक्तेर्वा दृष्टिभेदादेव विरोधः शाम्यति। यो हि अलङ्कारो भामहदृष्ट्या वक्रोक्तौ स्थाप्यते, तमेव कुन्तको

---

१. रस०, पृ० ४३०। २. रुद्रटः ७.९।

३. काणेः सा० द०, पृ० ५२ (भूमिका)

वक्रोक्तिविरहितं मनुते। यथा-परिवृत्त्यलङ्कारः। इमं कुन्तको वक्रताशून्यतया स्वभावोक्तिवदलङ्कार्यकोटावेव स्थापयति। किन्तु भामहस्तमेव वक्रोक्तिसम्पन्नं समुपलभ्य अलङ्कारं मनुते।

यथा भामहः—

परिवृत्तिः—

विशिष्टस्य यदादानमन्यापोहेन वस्तुना।
अर्थान्तरन्यासवती परिवृत्तिरसौ यथा॥

उदाहरणम्—

प्रदाय वित्तमर्थिभ्यः स यशोधनमादितः।
सतां विश्वजनीनानामिदमस्खलितं व्रतम्॥[1]

कुन्तको यथा—"परिवृत्तिरप्यनेन न्यायेन नास्तीति निरूप्यते—

"विनिवर्तनमेकस्य यत् तदन्यस्य वर्तनम्।
न परिवर्तमानत्वादुभयोरत्र पूर्ववत्॥"

तदेवं परिवृत्तेरलङ्करणत्वमयुक्तमित्याह—विनिवर्तनमित्यादि। यदेकस्य पदार्थस्य विनिवर्तनं तद्व्यतिरिक्तस्य परस्य तदुपनिबन्धनं तदलङ्करणं न भवति, उभयोः परिवर्तमानत्वात् मुख्यत्वेनाभिधीयमानत्वादिति"[2]। यतो ह्ययं तु 'कोऽलङ्कारोऽनया विना' इति नयस्य समर्थकः। दण्डी तु तत्रापि अलङ्कारतामङ्गीकुरुते, भामहेन पुनः सा नाङ्गीक्रियते वक्रोक्तिविरहितत्वात्। यथा भामहः—
"हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।"[3]

दण्डी यथा—

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा॥[4]

अलङ्काराणां विविधानां या हानादानपरम्परा अलङ्कारप्रस्थानमारभ्य अन्तं यावत् प्रचलति तत्रेमा एव तिस्रः स्वभावोक्ति-वक्रोक्ति-रसोक्त्याख्या धारा मूलम्। वैचित्र्यभेदात् विच्छित्तिहेतुत्वात्, हृदयावर्जकविशेषात्, चित्तवृत्तिभेदादित्यादयश्चालङ्काराणां भेदोपभेदार्थे ये विधयो व्यपदिश्यन्ते, ते तु आसामेव धाराणां स्थूलाः परिणामाः, यत्र न समीक्षकः समुपैति कमपि निर्देशकं कर्णधारम् अलङ्कारार्णवं मननतरितर्तुकामः। प्रत्युत अनिर्वचनीयां व्यग्रतामेव

१. भामहः ३,४१,४२। २. व० जी० ३,३३।
३. भामहः २.८६। ४. दण्डी २.२३५।

समासादयति। अतो धाराणां माहात्म्यमक्षुण्णम्। एषां वास्तविके ज्ञानेऽलङ्कार-सम्बन्धिनः सर्वे विरोधाः शान्ताः प्रश्नाश्च समाहिताः स्युः।

सम्प्रतीदं स्पष्टं यत् रुद्रटेन अर्थालङ्काराणां यो हि चतुर्विधो विभागो विहितः, तत्र यद्येक एवालङ्कारो वर्गद्वये दृश्यते, तदा न तत्र कश्चन विरोधो दोषो वा रुद्रटस्य, अपि तु पूर्वालङ्कारिकाणां दृष्टिसमन्वयः। अतः कुन्तकः केनाप्येकेनालङ्कारिकेण प्रभावितोऽलङ्कारविशेषं वास्तवविभागेऽन्तर्भावयत्यपरेणाधिवासितोऽतिशये वा। अत एवैतादृशः साधारणो मतकृतो विरोधस्तु सह्य एव। परमेतासां धाराणां कापि व्यवस्थिता दृष्टिस्तु प्रदर्शनीयैव, यस्या आलोके भवेद् विमर्शः प्रथानस्य यदर्थं च शोध-प्रबन्धोऽयं प्राधान्येन प्रयतते। स्थाने स्थाने समुत्पद्यमान आलङ्कारिकाणामलङ्कारविशेषसम्बन्धी विरोधः प्रायो धारायाः (Schools) कारणेनैव। यथा रूपकालङ्कारलक्षणविचारे पण्डितराजो रत्नाकरस्य लक्षणं खण्डयति यो हि न केवलमुपमानोपमेययोः तादात्म्यं रूपकं मनुते अपितु कार्यकारणात्मकं तादात्म्यमपि।[1] यत्तु सादृश्यप्रयुक्तः सम्बन्धान्तरप्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्यनिर्देशः, स सर्वोऽपि रूपकम्। सारोपलक्षणामूलत्वस्य तुल्यत्वेन सादृश्यप्रयुक्तस्य तादात्म्यस्यैव सम्बन्धान्तरप्रयुक्तस्यापि तादात्म्यस्य संग्रहीतुमौचित्यात्। तस्मात् 'दुराग्रह एवायं प्राचाम्, उपमानोपमेययोरभेदो रूपकम्, न तु कार्यकारणयोः' इति रत्नाकरेणोक्तम्। तन्न; अपह्नुत्यादौ भिन्नयोः सामानाधिकरण्यस्य सत्त्वात् तत्रातिव्याप्तेः। किं च सादृश्यमूलकं स्मरणं स्मरणालङ्कारः, न तु चिन्तादिमूलम् इति।

एतच्च पण्डितराजो निजं रूपकलक्षणं—"उपमेयतावच्छेदकपुरस्कारेण उपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकमिति"[2] स्थापयितुमेव। अत्र उपमेये उपमानतादात्म्यं रूपकं, न तु कार्यकारणयोरिति पण्डितराजमते कापि युक्तिर्नास्ति। यतः उभयत्रापि अभेदः समान एव। 'केवलं सादृश्यात्मके अभेदे चारुता न च कार्यकारणात्मके' इति युक्तिरपि न समञ्जसतां गाहते; यतः उभयत्राप्यालङ्कारिकाणां समर्थनस्य समत्वात्। सादृश्यात्मकस्य तादात्म्यस्य समर्थकः पण्डितराजः, रत्नाकरस्तु कार्यकारणात्मकस्येति।

इमे उभेऽपि मतेऽलङ्कारप्रस्थाने प्रच्छन्नरूपेण वहन्तीभ्यां स्वभावोक्तिवक्रोक्तिधाराभ्यां समर्थिते। पण्डितराजमतं वक्रोक्त्या, रत्नाकरस्य च स्वभावोक्त्या। यतो हि भामहदृष्ट्या सामान्या वक्रोक्तिरलङ्काराणामनुप्राणयितृत्वेन स्वीकृता। अत्र वक्रोक्तिस्पृष्टा स्वभावोक्तिरप्यन्तर्भूता, वक्रोक्तेः प्रकारत्वेन वा स्वीकृता। किन्तु दण्डी स्वभावोक्ति-वक्रोक्तिभेदेन वाङ्मयं द्विधा विभजते। भिन्नं द्विधा स्वभावो-

---

१. रस० गं०, पृ० २२५। २. र० गं०, पृ० २२४।

क्तिर्वक्रोक्तिश्चेति वाङ्मयम् ।[1] अतोऽस्य स्वभावोक्तेः वक्रोक्तेश्च दृष्टिर्भिन्नैव भामहात् । एवमन्येषामपि स्वभावोक्ति-वक्रोक्तिदृष्टयो भिन्नाः । अत आभ्यामेव स्वभावोक्तिवक्रोक्तिधाराभ्यां समर्थ्यन्तेऽलङ्काराः यत्कृता चमत्कृतिर्भवति सैव मान्यतां लभते, नान्या ।

यथा अत्रैव विवादे पण्डितराजः स्वपूर्ववर्तिनामालङ्कारिकाणां मतानि दत्त्वा स्वपक्षे निर्णयं ददाति—सादृश्यमूलकमेव रूपकमामनन्ति । तद्रूपकमभेदो य उपमानोपमेययोः । उपमैव तिरोभूतभेदा रूपकमुच्यते ॥[2] एतादृश एव विवादो नैकेषु अभेदमूलकेषु स्मरण-भ्रान्तिमदादिषु अलङ्कारेषु समायाति, किन्तु तत्र सर्वत्रैव सादृश्यात्मकस्यैव तादात्म्यस्य समर्थनात् जायते निर्णयः । अत्र सर्वत्रैव वामनस्य 'सादृश्याल्लक्षणावक्रोक्तिरिति'[3] सिद्धान्तितत्वेन सादृश्यात्मिकैव वक्रोक्तिः समर्थ्यते, न कथमपि कार्यकारणात्मिका । अनेनालङ्कारप्रस्थाने धारायाः सत्ता स्पष्टतया समर्थ्यते ।

अतो रुद्रटानुसारं सादृश्यमूलकाः अतिशयमूलकाः श्लेषमूलकाश्चालङ्काराः वक्रोक्तौ गण्यन्ते । अत्र वक्रोक्तौ प्राचीनानां भामह–दण्डि–वामनादीनां समर्थनमप्यस्ति इति वक्रोक्तिविमर्श एव विनिवेदितम् ।

सम्प्रति रुद्रटदृष्ट्या अर्थालङ्काराणां विस्तृतं वर्गीकरणं प्रस्तूयते । एतदाधारेणैव स्वभावोक्तिवक्रोक्तिधारात्मकोऽलङ्काराणां विभागः सुगमः स्यात् । पूर्वमर्थालङ्काराश्चतुर्धा विभज्यन्ते, ततस्तेनैव क्रमेण विस्तृतं वर्गीकरणम्—

वास्तवमूलाः—सहोक्तिः, समुच्चयः, जातिः, यथासंख्यम् , भावः, पर्यायः, विषमः, अनुमानम्, दीपकम् , परिकरः, परिसंख्या, हेतुः, कारणमाला, व्यतिरेकः, अन्योन्यम् , उत्तरः, सारः, सूक्ष्मः, लेशः, अवसरः, मीलितम् , एकावली, परिवृत्तिः इत्याख्याः ।

औपम्यमूलकाः—उपमा, उत्प्रेक्षा, अपह्नुतिः, संशयः, समासोक्तिः, मतम् , उत्तरः, अन्योक्तिः, प्रतीपम् , अर्थान्तरन्यासः, उभयान्यासः, भ्रान्तिमत् , आक्षेपः, प्रत्यनीकम् , दृष्टान्तः, पूर्वः, सहोक्तिः, समुच्चयः, साम्यम् , स्मरणम् , रूपकम् , इत्याख्याः !

अतिशयमूलाः—पूर्वः, विशेषः, उत्प्रेक्षा, विभावना, तद्गुणः, अधिकः, विरोधः, विषमः, असङ्गतिः, पिहितम् , व्याघातः, अहेतुः इत्याख्याः ।

श्लेषमूलाः—अविशेषः, विरोधः, अधिकः, वक्रः, व्याजम् , उक्तिः, असंभवः,

---

१. दण्डी २.३६२ ।  २. र० ग०, पृ० २२५ ।
३. वामनः ४.३०८ ।

अवयवः, तत्त्वम्, विरोधाभासाख्याः। अत्र द्विविधः श्लेषः शुद्धः संकीर्णश्च। तत्र शुद्धस्येमे दश भेदाः संकीर्णस्यापि द्वौ भेदौ। एवं द्वादशविधः श्लेषः।

अत्रैते औपम्यातिशयश्लेषात्मका अलङ्कारा वास्तवभेदाद् भिद्यन्ते। तस्यां चौपम्यातिशयश्लेषाभावात्। यथा—

वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत्।
पुष्टार्थमविपरीतं निरुपममनतिशयमश्लेषम्॥[1]

अत्र रुद्रटस्य वास्तवं दण्डिनो मम्मटस्य वा स्वभावोक्तिरेव। रुद्रटो वास्तवमूलकेषु अलङ्कारेषु जातिमपि गणयति किन्तु तस्य टीकाकारो नमिसाधुः जातिविचारप्रसङ्गे वास्तवापेक्षया जातौ वैशिष्ट्यं दर्शयति। यथा—

"जातिस्तु अनुभवं जनयति। यत्र परस्थं रूपं वर्ण्यमानमेव अनुभवमिवैतीति स्थितम्।"[2]

यद्यपि नमिसाधुदृष्ट्या एष सूक्ष्मो भेदः प्रदर्श्यते। किन्तु वास्तवमूलकेषु अलङ्कारेषु गणनया नास्त्यस्य विशिष्टं महत्त्वम्। एवञ्च वास्तवस्य घटकरूपेण स्थिताया विशिष्टरूपाया वा जातेर्नानेन सामान्यरूपता वास्तवरूपता वा कथमपि हीयते। अलङ्कारविशेषरूपेण स्वीकृतयोरपि विरोधोपमालङ्कारयोर्विरोधौपम्यगर्भिताऽलङ्कारेषु सामान्यतया अभ्युपगतत्वात्, तथैवेहापि सुवचत्वात्। इदमपि प्रतीयते यत् नमिसाधुरस्ति प्रभावितो भामहेन, रुद्रटश्च दण्डिना येन दृष्टिभेदात् स्वभावोक्तौ जातौ वा भेदो लभ्यते। दण्डिनः स्वभावोक्तौ वक्रोक्तेः ईषदेव स्पर्शः। भामहस्य तु स्वभावोक्तौ पुनः वक्रोक्तेर्मात्रा अधिका, किन्तु तावत्येव यावत्या स्वभावोक्तित्वमपेतं न स्यात् स्वभावोक्तेः वक्रोक्तिप्रकाररूपत्वात्। दृष्टिभेदस्यास्य प्रमाणं हेतुसूक्ष्मादयोऽलङ्काराः, यत्र वक्रोक्त्यभावात् नेष्टाऽलङ्कारता भामहस्य किन्तु दण्डी[3] सर्वानेतानलङ्कारान् उत्तमान् मनुते। अत एव कतिपयेऽलङ्कारा वर्गद्वये पठ्यन्ते। यथा—सहोक्त्युत्तर-विषया वास्तवौपम्यात्मके वर्गद्वये वर्तन्ते।

रुद्रटस्यायम् अर्थालङ्काराणां विभागः सूक्ष्मं वर्गीकरणं वा सर्वथा स्वतन्त्रम्, सर्वेषाञ्च पूर्ववर्तिनामालङ्कारिकाणां मान्यतां गतम्। नायं दण्डिवद्[4] वामनवद्[5] वा अलङ्कारजातमुपमाप्रपञ्चत्वेन अभ्युपगच्छति। अत्रानेन वर्गीकरणेन विभागेन वा अलङ्कारप्रस्थाने आदित एव प्रवहन्त्योरुभयोः स्वभावोक्तिवक्रोक्तिधारयोः समन्वयं विधत्ते। अत एव एस० के० डे० महोदयः स्वग्रन्थे[6] रुद्रटमुभयधारा-(Common Schools) समर्थकं सर्वधारापोषकं वा मनुते। रुद्रटस्य

---

१. एस० के० डे० संस्कृत 'पोयटिक्स', भा० २, पृ० ७९।
२. रुद्रट ८.१०। ३. तत्रैव ७.३०, ३१ (टीका न० सा०)।
४. भामह २.८६। ५. दण्डी २.२३५।
६. 'संस्कृत पोयटिक्स', भा० २, पृ० ८३।

आलङ्कारिकी दृष्टिः सर्वथा मौलिकी। अनेन प्राचीनानां दृष्टिमाकलय्य पश्चाद्-भवानामालङ्कारिकाणां कृते नूतना धारा निर्दिष्टा। इमाश्च धारा रुद्रटात् पूर्वमलङ्कार-प्रस्थाने उन्मज्जन्त्योऽपि निःशेषं निमग्ना एवानुभूयन्ते। यदा कदा कस्मिंश्चिद् आलङ्कारिके उद्बुद्धप्रवाहाऽपि परस्परमसंभिन्ना विलीयन्ते। परं रुद्रटोऽलङ्कार-प्रस्थानेऽन्तर्विलीना एता धाराः निभाल्य निश्चिनुते, निर्दिशति च।

अत एव अलङ्कारसर्वस्वकार उपोद्घात एव स्वीकुरुते यद् रुद्रटो ध्वने-स्त्रैविध्यं निर्दिशति स्वालङ्कारैरेव। यथा—रुद्रटेनापि भावालङ्कारो द्विधैवोक्तः।[1] रूपकदीपकाऽपह्नुतितुल्ययोगितादौ च उपमालङ्कारो वाच्योपकारित्वेनोक्तः। रसवत्-प्रेय-उर्जस्विप्रभृतौ तु रसभावादिर्वाच्यशोभाहेतुत्वेन निर्दिष्टः। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। तदित्थ त्रिविधमपि प्रतीयमानमलङ्कारतया प्रसिद्धमेव। इदं समर्थयते एस० के० डे महोदयोऽपि।[2]

एतेन इदमसन्दिग्धं सिद्धं यत् तिस्रो वस्त्वलङ्काररसरूपिण्यो धाराः कालेन ध्वन्युद्भावनायां सत्यां वस्त्वलङ्काररसध्वनिनामभिर्व्यपदिश्यन्ते। भोजश्च इत एव प्रेरणामासाद्य तिस्र उक्तयः समुद्भावयाञ्चकार। कुन्तकश्चावसरमधिगत्य आसु स्वभावोक्तिरसोक्त्याख्ययोर्द्वयोर्धारयोरलङ्कार्यतां संसाध्य अलङ्कारतां न्यषेधत्।

अत्रास्य विस्तृतस्य प्रसङ्गतो नावश्यकप्रायस्याऽऽकूतमिदं यद् रुद्रटकृतस्य अलङ्कारविवेचनस्य महन्महत्त्वमलङ्कारप्रस्थाने। विशेषतश्च तदीये धारा-(Schools) निरूपणप्रसङ्गे। यतो ह्यत्र धारासिध्यर्थमपेक्षिता अशेषा उपलब्धय एकत्र संकलिताः।

इदं सत्यं यद् रुद्रटो वक्रोक्तिमलङ्कारं शब्दालङ्कारत्वेन वर्णयन् अलङ्कार-विशेषमेव मनुते, नालङ्काराणामनुप्राणयितृरूपेण बहूनामलङ्काराणाम्। अस्यैव समर्थनं काव्यमीमांसाकारो राजशेखरोऽपि कुरुते—'काकुर्नाम वक्रोक्तिरिति रुद्रटः।' परन्तु वक्रोक्तेः काकुश्लेषभेदेन द्विविधत्वं श्लेषस्यास्या अङ्गभूतस्यापि सामान्यरूपतामभ्युपगत्यायं स्वयमेव परम्परया वक्रोक्तेरलङ्कारसामान्यवचनता-मुररीकरोति। अलङ्कारसर्वस्वकारोऽपीदमेव समर्थयते। यथा—वक्रोक्ति-शब्दश्चालङ्कारसामान्यवचनोऽपि इहालङ्कारविशेषसंज्ञितः।[3]

अतः वास्तवाद् भिन्नैव वक्रोक्तिः, वास्तवस्य स्वभावोक्तिरूपत्वात् वाङ्मयस्य च स्वभावोक्तिवक्रोक्तिभेदेन भेदाच्च स्वभावोक्तितो भिन्नैव वक्रोक्तिः। अतस्त एवालङ्कारा वक्रोक्तिमूलकाः, ये किल औपम्यमूलकाः अतिशयमूलकाः श्लेषमूलकाश्च स्युः।

---

१. अ० स० पृ० ६, ७। २. तत्रैव पृ० ७२।
३. अ० स०, पृ० १९९।

रुद्रटस्येदं वक्रोक्तिविषयकं मतं वास्तवस्य औपम्याऽतिशय-श्लेषरहितत्वात् मान्यतां भजते। किन्तु वास्तवेऽपि सर्वथा नैतेषामभाव इष्ट आलङ्कारिकाणाम्। अन्यथा विच्छित्तेरभावात्तस्य अलङ्कारतैव न स्यात्। अत एतेषां स्पर्शस्तु स्तुत्य एव, तथात्वे वास्तवेऽपि अलङ्कारतायाः स्फुटत्वात्। वास्तवस्य लौकिकत्वेऽपि एतेषां साहाय्येन कविप्रतिभामात्रनिर्वर्तितत्वेन चमत्काराधायकत्वम्। किन्तु एतेषामङ्गतैव, प्राधान्यं तु कार्यकारणात्मकस्य। स्वभावोक्तेर्द्योतकस्यान्यस्यापि सम्बन्धस्य। न तु कथञ्चिदौपम्यातिशयादीनाम्, तेषां तु वक्रोक्तेः समर्थकत्वात्। अत्र न केवलं रुद्रटसदृशाः प्राचीना आलङ्कारिका एव प्रमाणम्, अपि तु मम्मटजगन्नाथसदृशा मूर्धन्या नव्या आलङ्कारिका अपि। मम्मटस्य अतिशयोक्तेः चतुर्थः—कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः[1] प्रकारस्तु स्वभावोक्तिगतस्य अतिशयस्य बोधकः। शिष्टाश्च त्रयः प्रकाराः वक्रोक्तेः। एवमेव पण्डितराजोऽपि प्रायः श्रृङ्खलागर्भाणामलङ्काराणां सादृश्याभावात् स्वभावोक्तित्वं स्वीकरोति।

अतो रुद्रटेन उक्ताः सर्वेऽपि औपम्यमूलकाः अलङ्कारा वक्रोक्तावेव अन्तर्भाव्याः। यतो हि एतेषु सर्वेष्वेव औपम्यं क्वचिद् वाच्यं सत् भेदाभेदप्रधानरूपेण, यथा-उपमास्मरणयोः; क्वचिच्च अभेदप्रधानरूपेण। तच्च आरोपाध्यवसानाभ्यां द्विधा। तत्र आरोपमूलका अलङ्कारा यथा—रूपका-ऽपह्नुति-संशय-भ्रान्तिमदादयः। अध्यवसानमूलकौ द्वौ अलङ्कारौ उत्प्रेक्षाऽतिशयोक्ती। क्वचन एतद् औपम्यंगम्यमप्यस्ति।

पुनरपि तत् पदार्थगतम्, वाक्यार्थगतम्, भेदप्रधानञ्चेति त्रिधा। अत्र पदार्थगतो नास्ति कोऽपि अलङ्कारः। वाक्यार्थगतश्चैको दृष्टान्त एव। भेदप्रधानेऽपि न कोऽप्यलङ्कारः। अवशिष्टेषु समासोक्ति-प्रतीपा-ऽर्थान्तरन्यासाऽऽक्षेपादिषु च भेदप्रधानं गम्यमौपम्यम्। एवमौपम्यगर्भतया सर्वेष्वलङ्कारेषु वर्त्तमानमेतेषां वक्रोक्तिधाराक्रोडनं द्रढयति।

अत्र साम्य-मत-पूर्वोभयान्यासाख्याः अलङ्कारा न कैरपि पश्चाद्भवैरालङ्कारिकैर्लक्षिताः। एतेषु केचन अन्यैर्लक्षितेषु अलङ्कारेष्वन्तर्भवन्ति। यथा—'अवसरो' मम्मटस्य द्वितीये उदात्ते अन्तर्भाव्यते, मम्मटस्य चतुर्थी कार्यकारणात्मिका अतिशयोक्तिरेव 'पूर्व' नाम्ना व्यपदिश्यते।

अत्र केचन अलङ्कारास्तु वास्तवौपम्योभयवर्गयोः भवन्ति। यथा-सहोक्त्युत्तर-विषम-समुच्चयाः। एतेषां वास्तवविभाग एव अन्तर्भाव उचितो न गम्यौपम्यस्य संस्पर्शमात्राद् वक्रोक्तौ। यदि रुद्रटस्य निर्देशादाग्रहश्चेत् दण्डिनो वक्रोक्तावेव यत्र स्वल्पोऽपि औपम्यातिशयादीनां संस्पर्शो वक्रोक्तिं पुष्यति, न कथमपि भामह-

१. वा० का० प्र०, पृ० ६२८।

कुन्तकयोः, यत्र वास्तवस्य स्पर्शो नेष्टो वक्रोक्तौ। यथा हेतु-लेश-स्वभावोक्त्या-दीनाम्। एवं वक्रोक्तिस्वभावोक्त्योर्विभागोऽतीव कठिनः। अत एवालङ्काराणां वास्तविके वैज्ञानिके वर्गीकरणे विभागेऽपि च न सौविध्यं भवति। यथा अत्रैव।

अतिशयविभागे गणिता अलङ्कारास्तु प्रायः सर्व एव अतिशयसम्पन्नाः। केवलं विषमालङ्कार एवास्ति विवादो यस्य गणना वास्तवेऽपि कृता। अत्र आपाततो विरोधः प्रतीयते, किन्तु अवान्तरधारायां स्वीकृतायां न तदवसरः, स्वभावोक्तिवक्रोक्तिभ्यां तयोः समन्वयेन वा तत्समाधानात्। भामहदृष्ट्या वक्रोक्त्या ईषत्स्पर्शोऽपि स्वभावोक्तौ गणितः, दण्डिदृष्ट्या चैतेषां वक्रोक्तेरधिकात् स्पर्शात् वक्रोक्तौ। एवं वक्रोक्तिरूपस्य सर्वालङ्कारिकैरलङ्काराणाम् अनुप्राणयितृत्वेनाभिमतस्य अतिशयस्य मात्राभेदेन स्वरूपभेदेन च भिद्यन्तेऽलङ्काराः।

अत्र प्रसंगतः पुनरपि विचार्यतेऽतिशयो वक्रोक्तेः प्रयोजकत्वात्। वक्रोक्तिनिरूपणप्रकरणे कृतविचारोऽप्ययं पुनरपि आवर्ज्यते वक्रोक्तिविवेकस्य दृढतार्थमस्यानिवार्यत्वात्।

प्रथममतिशयो भामहस्य काव्यालङ्कारे सर्वालङ्काराणामनुप्राणयितृत्वेन समुपलभ्यते। यथा—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यतेऽतिशयोक्तिं तामलङ्कारतया बुधाः।
इत्येवमादिरुदिता गुणातिशययोगतः।
सर्वैवातिशयोक्तिस्तु तर्कयेत् तां यथागमम्॥
सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[1]

अत्रातिशयो वक्रोक्तेः पर्यायवाचकोऽपि दृश्यते। वक्रोक्तेर्घटकत्वेन स्वीकृतयोः औपम्यश्लेषयोरपि अतिशयगर्भत्वेनैव गतार्थता। एवं गतार्थत्वेऽपि रुद्रटः पूर्ववर्तिनां भामह-दण्डि-वामनादीनां वक्रोक्तिविषयकानि मतानि समन्वेतुमेवाध्यवस्यति। तत्र दण्डी वक्रोक्तौ श्लेषातिशययोर्घटकतामभ्युपगच्छति। यथा—'श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियमि'त्यादि कथनात्।[2] वामनश्च—'सादृश्यलक्षणा वक्रोक्तिरिति।[3] एवं सादृश्यश्लेषातिशया वक्रोक्तेर्घटकतयाङ्गीक्रियन्ते। एषामेव समन्वयात्मको निर्देशो वक्रोक्तेर्व्यावर्तनाय विहितो रुद्रटेन। एवं वक्रोक्तिधारायाः समर्थनं श्लेषातिशयौपम्यगर्भेष्वलङ्कारेषु स्वभावोक्तेश्च पोषणं वास्तवमूलकेषु च। फलतो धारायाः ( School ) पोषणमभ्युपगम्यतेऽलङ्कारविस्तरभिया नातिशयस्याधिकं विवेचनमत्र विस्तरस्तु वक्रोक्तिधारानिरूपणे द्रष्टव्यः।

---

१. भामह २.८१, ८४, ८५,। २. दण्डी २.३६३।

३. वामनः ४.३.८।

'अलङ्कारप्रस्थाने सन्ति तिस्रोऽन्तर्धाराः' इत्यस्य सिद्ध्यर्थं सन्ति प्रचुराणि साधनानि रुद्रटस्य अलङ्कारविभागे। अस्यालङ्कारविभागो वैज्ञानिकतां बिभर्ति। परमेकस्यैव अलङ्कारस्य वर्गद्वयेऽन्तर्भावो धारायाः प्राधान्याप्राधान्यजन्य एव, न कथमप्यवैज्ञानिकः। अलङ्कारप्रस्थाने आदितः प्रवहन्तीनां धाराणां समन्वयोऽपि रुद्रटस्य वर्गीकरणे विद्यते। अतो विरोधोऽधिकोऽनुभूयते। फलतो धारामजानाना आलोचका अत्र अवैज्ञानिकतामपि उद्भावयन्ति, परं नैतत्-सङ्गतम्, धाराचमत्कृत्याधारेऽन्तर्भावस्य व्यवस्थितौ विरोधस्यानुत्पत्तेः।

रुद्रटेन त्रयोऽलङ्कारा अनुमानहेत्वहेतुनामानः स्वीकृताः। एषामाद्यौ द्वौ अनुमानहेतू वास्तवविभागे गणितौ, परश्च अहेतुरलङ्कारोऽतिशयविभागे। अत्र एषु त्रिष्वप्यलङ्कारेषु अतिशयानुप्राणकता अनिवार्यतोऽङ्गीकार्या तदभावेऽलङ्कारताया अनुपपत्तेः। किन्तु मात्राभेदेनैतेऽलङ्कारा भिन्नयोर्विभागयोर्भिन्नैश्च नामभिर्व्यपदिश्यन्ते। अनुमानहेत्वोः अतिशयस्य स्पर्श एव, अतस्तयोर्वास्तवे गणना। अहेतौ चाधिकोऽतिशयः, अतस्तस्यातिशयविभागे वक्रोक्तौ वा। यद्यपि अहेतुनामको न कोऽप्यलङ्कारोऽन्यैः कैरपि पूर्वैः परवर्तिभिर्वा आलङ्कारिकैर्लक्षितः। किन्तु इदमनुमीयते यदेष काव्यलिङ्गमेव भवेत् यस्य चर्चा प्रायो रुद्रटं विहाय सर्वैरालङ्कारिकैस्तत्परवर्तिभिः कृता। एवं कार्यकारणात्मकं सम्बन्धमाश्रित्य उद्भावितेषु बहुष्वलङ्कारेषु मध्ये एते त्रयोऽलङ्कारा अतीव विवादग्रस्ताः। विवादस्य चर्चा तु वास्तवविभागविचारावसरे स्वभावोक्ति-मूलकानामलङ्काराणां विचारप्रसङ्गे वा विस्तरेण कृता। अत्र तु सङ्केत एव क्रियते। अनेन स्पष्टमिदं यत् रुद्रटस्य विभागे बाह्यतो दृश्यमानो विरोधो भामह-दण्डिनोः प्रभावेण वक्रोक्तिस्वभावोक्तिकृत एव, न कथमपि ऐच्छिकतया अवैज्ञानिकः।

अतिशयोक्तिमूलका येऽलङ्काराः पूर्वं दर्शितास्तेषु वर्तते स्पष्टतयेति प्रतिपादितम्। किन्तु भामहादारभ्य पण्डितराजं यावदुपस्थापितेषु अतिशयोक्ति-लक्षणेषु वर्तते भेदो येनातिशयोक्तिदृष्टौ स्वतः प्रतीयते भेदः। यद्यपि एतानि सर्वाण्येव लक्षणानि प्राधान्येनालङ्कारविशेषस्यैव बोधकानि, किन्तु तत्र प्रतिपादितानि लक्षणस्याधारभूतानि तत्त्वानि अतिशयोक्तेः सामान्यस्वरूपमपि सूचयन्ति। यत्र तत्र तु लक्षणस्य पङ्क्तौ सामान्यरूपस्यापि स्पष्टः सङ्केतो मिलति। साधारणतस्तु सर्वासु कृतिष्वतिशयोक्तेरलङ्कारविशेषत्वेनैव विहितो विचारः। यथा—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलङ्कारतया बुधाः॥[1]

---

१. भामहः, २.८१।

विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा ॥[१]

एतयोरुभयोर्लक्षणयोः अतिशयोक्तेः रूपं न स्पष्टम्। अर्थादिदं विशेषापेक्षया सामान्यात्मकमधिकं प्रतीयते। यतो निमित्ततो लोकातिक्रान्तगोचराऽतिशयोक्तिः, विशेषस्य च लोकसीमातिवर्तिनी विवक्षारूपाऽतिशयोक्तिर्वा स्वभावोक्तिं विहाय बहुषु उपमारूपक-समासोक्त्यादिष्वलङ्कारेषु वर्तते। इदमेव समर्थयते काव्यालङ्कार-सूत्रे वामनोऽपि। यथा—तदतिशयहेतवस्त्वलङ्कारा[२] इति।

अनेन पूर्वदर्शितेन अतिशयोक्तिलक्षणेन स्पष्टमिदं यन्निमित्तेन यद् वचो न लोकातिक्रान्तगोचरं तत् स्वभावोक्तिः। किन्त्वेषा लोकानतिक्रान्तगोचरता कान्त्यादिगुणे नातिव्याप्नुयात्, एतदर्थमलङ्कारेऽतिशयविशेषणं देयम्। अतः स्वभावोक्त्यलङ्कारेऽप्यतिशयस्य स्पर्शः स्वीकार्य एव। किन्तु वक्रोक्तावतिशयस्य मात्राऽधिकतरेति। अतो रुद्रटस्यातिशयमूलका अलङ्कारा अतिशयाधिक्याद् वक्रोक्तिगर्भाः। पूर्वं रुद्रटस्यालङ्काराणां स्वभावोक्ति-वक्रोक्तिमूलको विभागो दर्शितः। तत्र स्वभावोक्तिमूलका अलङ्कारास्तु स्वभावोक्तिधारानिरूपणानन्तरं तन्मूलकालङ्कारप्रकरणे विस्तरेण विचारिताः। वक्रोक्तिमूलानां त्वस्मिन् वक्रोक्ति-मूलालङ्कारप्रकरणे।

एवं रुद्रटालङ्काराणां स्वभावोक्ति-वक्रोक्तिनिबन्धनं विभागं प्रदर्श्य सम्प्रति मम्मटालङ्काराणामपि तद्विभागो विधीयते। तत्रास्य स्वभावोक्तिमूलकास्तु प्रायः पूर्वं स्वभावोक्तिमूलकालङ्कारप्रकरणे विचारिता विज्ञेयाः। अवशिष्टाश्च कतिपये विवादग्रस्ता वक्रोक्तिमूलका अलङ्कारविचारेण सहावसरतोऽत्र निर्दिश्यन्ते। परं प्रस्तुतत्वात् विमर्शस्तु प्राधान्येन वक्रोक्तिमूलकालङ्काराणामेव विधास्यते।

मम्मटोऽपि भामहवद् वक्रोक्तिमतिशयोक्तेः पर्यायवाचिकां मनुते। यथा—'अतिशयोक्तिसामान्यलक्षणेऽतिशयोक्तिपदं योगरूपम्, अत्र तु यौगिकमेवेति नास्या अलङ्कारत्वम्, अपितु सर्वालङ्कारबीजभूतत्वमेव'।[३] अत एव विशेषस्या-लङ्कारत्वं समर्थयद्भिः मम्मटभट्टैरुक्तम्—"सर्वत्र एवंविधे विषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते, तां विना प्रायेणालङ्कारत्वायोगात्। अत एवोक्तम् "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना"। इति।

अतो मम्मटस्याप्यभिमता वक्रोक्तेः सर्वालङ्कारबीजभूततेति तदलङ्कारेऽपि तन्मूलको विभागः प्रदर्श्यते। दण्डि-भामह-वामनादीनां मतानि सङ्गृह्य श्लेषा-तिशय-सादृश्यमूलकानामलङ्काराणां वक्रोक्तिगर्भत्वमिति प्राङ् निरूपितम्।

१. दण्डी, २. २१४। २. वामनः ३. १. २।
३. का० प्र०, वामनी टीका, पृ० ७४४।

वक्रोक्तिं विना तत्राप्यलङ्कारताया अभावात्। अत एव काव्यप्रकाशटीकाकारो वामनोऽपि स्वटिप्पणे—"प्रस्तुतोत्कर्षरूपाया अस्या एव वैचित्र्यरूपत्वात् सर्वत्राव्यभिचारित्वाच्च अलङ्काराणामुपजीव्यत्वम्। एतदभावे च वैचित्र्याभावेन विद्यमानानामप्युपमादीनां नालङ्कारत्वम्, यथा गौरिव गवय इत्यादौ। तदुक्तम्-सैषा सर्वत्र वक्रोक्तिः-इति।[1] अन्यच्च कस्याप्यतिशयोक्तिरित्यन्वर्थविचारणात्। प्रायेणामी अलङ्कारा नातिशयोक्तितः इति। एवं सर्वत्रातिशयोक्तेः सद्भावेऽपि वैचित्र्यान्तरेणालङ्कारान्तरव्यपदेशः वैचित्र्यान्तराभावे त्वतिशयोक्तिव्यपदेश इति बोध्यमिति तद्व्याख्यातारः।"[2] एवञ्च मम्मटस्य वक्रोक्तिमूला अलङ्काराः इमे वक्तुं शक्यन्ते—

१. उपमा, २. अनन्वयः, ३. उपमेयोपमा, ४. उत्प्रेक्षा ५. ससन्देहः, ६. रूपकम्, ७. अपह्नुतिः, ८. श्लेषः, ९. समासोक्तिः, १० निदर्शना, ११. अप्रस्तुतप्रशंसा, १२. अतिशयोक्तिः, १३. प्रतिवस्तूपमा, १४. दृष्टान्तः, १५. दीपकम्, १६. तुल्ययोगिता, १७. व्यतिरेकः, १८. आक्षेपः, १९. विभावना, २०. अर्थान्तरन्यासः, २१. विरोधाभासः, २२, व्याजस्तुतिः, २३, सहोक्तिः, २४. काव्यलिङ्गम्, २५. पर्यायोक्तम्, २६. व्याजोक्तिः, २७. उत्तरम्, २८. असङ्गतिः, २९. समः, ३०. विषमः ३१. अधिकः ३२. प्रत्यनीकम्, ३३. स्मृतिः, ३४. भ्रान्तिमान्, ३५. प्रतीपम्, ३६. सामान्यम्, ३७. विशेषः, ३८. तद्गुणः, ३९. व्याघातः, ४०. संसृष्टिः, ४१. समुच्चयः ४२ अतद्गुणः ४३. सङ्करश्च।

अत्र कतिपयेषामलङ्काराणां वक्रोक्तित्वं सन्दिग्धं स्वभावोक्ति-वक्रोक्तिनिबन्धनस्य विवादस्य तत्र वर्तमानत्वात्। यथा—दीपकम्, सहोक्तिः, व्यतिरेकः, व्याजोक्तिः, उत्तरः, विषमः, सङ्करः, समुच्चयः अतद्गुणश्च।

अत्र दीपकादिषु केचन स्वभावोक्तेः, अपरे च वक्रोक्तेः प्राधान्यं स्वीकृत्य तन्मूलकं व्यपदेशं विदधति। अन्ये चोभयत्र विनिवेशं समर्थयन्ते। तत्र दीपक-सहोक्ति-व्यतिरेक-विषम-समुच्चयानां स्वभावोक्तिमूलकालङ्कारविचारे विहितो विस्तरेण विमर्शः। व्याजोक्त्युत्तर-सङ्कराऽतद्गुणेष्वपि स एव विधिरनुसर्तव्यः। विस्तरभिया अनावश्यकत्वाच्च नात्र विधीयते विमर्शप्रसरः। केवलं सङ्केत एव करिष्यते स्वभावोक्तिविषयकविवादस्य, येन स्यादलङ्कारप्रस्थानविमर्शे सारल्यम्।

व्याजोक्तिः—'व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनमिति' लक्षणकरणाद् वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते, सा व्याजोक्तिः। साम्यमूलकत्वादपह्नुतिः वक्रोक्तावन्तर्भाविता, व्याजोक्तिस्तु

१. का० प्र० वामनी (मूले) पृ० ७४४।

२. तत्रैव, ( टिप्पणम् ) पृ० ७४५।

साम्याभावान्नौपम्यमूलकं वक्रोक्तित्वमर्हति। लिङ्गेन स्वभावतयैव प्रभिन्नस्य वस्तुरूपस्य निगूहनात् स्वभावोक्तावेव तदन्तर्भाव उचितः प्रतीयते। अतिशयात्मिकया वक्रोक्तेस्तु निवारणं न सुशकम्। किन्तु मम्मटस्य प्रदीपकारस्य च सम्मत्या साम्याभावादस्याः स्वभावोक्तावन्तर्भावः सङ्गतः। यथा "न चैषाऽपह्नुतिः; प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहाभावात् [1], उक्तं च प्रदीपे- "न चेयमपह्नुतिः प्रकृताप्रकृतसाम्ययोः तत्स्वीकारात्। अत्र तु तदभावात्। [2] अतो व्याजोक्तिरन्वर्थतया स्वभावोक्तिविरोधिनी प्रतीयमानापि स्वभावोक्तावन्तर्भाव्यते।

उत्तरम्—यथा साध्यसाधननिर्देशात्मकोऽनुमानालङ्कारः स्वभावोक्तावन्तर्भावितः, तथैवास्यापि अनुमानपरत्वेन स्वभावोक्तावेवान्तर्भावः सङ्गतः। यथा अनुमानपरत्वेऽपि काव्यलिङ्गः वक्रोक्तावन्तर्भाव्यते, तथैवेदमपि इति तु न शङ्क्यम्, तत्र साध्यसाधनयोर्वचनाभावेन अनुमानस्यावसरः। अत्र (उत्तरालङ्कारे) तु वर्तते साध्यसाधनयोर्वचनतेति। किन्तु उत्तरे साध्यवचनस्याभावात् लोकाप्रसिद्धार्थस्य प्रकाश्यमानत्वाद् वक्रोक्तावपि तदन्तर्भावः सङ्गत एव। अतो रुद्रट उभयत्र (स्वभावोक्तिवक्रोक्त्योः) अन्तर्भावयति उत्तरालङ्कारम्।

अतद्गुणः—एवमतद्गुणोऽपि तद्गुणविरोधरूपः स्वभावोक्तावन्तर्भाव्यः। तद्गुणो रुद्रटेन वक्रोक्तावन्तर्भावितः। अतोऽतद्गुणः स्वभावोक्तावेव अन्तर्भावमर्हति।

विशेषोक्तिः—इयञ्च वक्रोक्तिविरहितत्वादलङ्कार्यरूपत्वाद् वा नाङ्गीकृता कुन्तकेनालङ्कारत्वेन। अतः स्वभावोक्तिमूलेयमत्र न काचन विप्रपत्तिरिति।

संसृष्टिः—संसृष्टिरलङ्कारोऽपि कुन्तकेन वक्रोक्तिगर्भतया वक्रोक्तौ विनिवेशितो न सङ्करालङ्कारः। अतः स्वभावोक्तौ विनिवेशमर्हति सङ्करालङ्कार इत्यनुमीयते। वस्तुतस्तु तिलतण्डुलन्यायेन संसृष्टिः, नीरक्षीरन्यायेन सङ्कर इति सिद्धान्तितत्वेन यत्र स्वभावोक्तिमूलकालङ्कारसङ्करस्तत्रैव स्वभावोक्तौ, वक्रोक्तिमूलकालङ्कारसङ्करे तु वक्रोक्तावेव तदन्तर्भावः कर्तव्यः।

अवशिष्टाश्चान्येऽलङ्काराः प्राधान्येन स्वभावोक्तिगर्भत्वात् स्वभावोक्तौ अन्तर्भाविता एव। सर्वेषामेषां स्वभावोक्तिमूलकालङ्कारनिरूपणप्रकरणे विस्तरेण विचारो विहितः शिष्टेष्वपि स एव विधिर्ज्ञेयः।

इत्थमतीव संक्षेपेण काव्यप्रकाशालङ्काराणां स्वभावोक्ति-वक्रोक्तिनिबन्धनो विहितो विभागः।

---

१. का० प्र० वामनी, पृ० ७०१। २. तत्रैव, पृ० ७०१।

# चतुर्थोऽध्यायः

# रसोक्ति-धारा

रसोक्तिरपि अलङ्कार-प्रस्थानस्य अवान्तरप्रस्थानत्वेन स्वीकृता। यतो हि अस्याः सत्ता प्राचीनैरर्वाचीनैश्चालङ्कारिकैः विहितैव। किन्तु एषामालङ्कारिकाणां विचारे विद्यन्ते विशेषा विप्रतिपत्तयः। यावदेतासां विमतीनां न क्रियेत पारमार्थिको विमर्शः खण्डनमण्डनात्मकविधिना, तावत्कथं जायेत विश्वासो रसोक्तेरलङ्कारतायामपि, अवान्तर-प्रस्थानतायाः कथा तु दूरे तिष्ठतु, अन्या अपि विप्रतिपत्तयोऽत्र जायेरन्, यासां निराकरणमपि नितान्तमावश्यकम्। एवमस्या रसोक्तेरलङ्कारताया विचारः प्राधान्येन प्रस्तूयते आलङ्कारिकाणां मतेन।

रसोक्तिः कदा कथं च स्वभावोक्तेर्वक्रोक्तेर्वा तन्मूलकेभ्यः अलङ्कारेभ्यो वा अत्यरिच्यत इत्यस्य प्रश्नस्य निर्णयो दुष्करः। किन्तु अलङ्काराणामालङ्कारिकाणां च विकासक्रमस्य पर्यालोचनेन किञ्चिदत्र विवरीतुं शक्यते। एतदर्थं न केवलमालङ्कारिकाणां कृतयः, अपि तु तैः स्वीकृता अलङ्कारा अपि अशेषतोऽनुशीलनीया रसोक्तेरलङ्कारतायाः स्थापनाय। यद्यपि प्राचीनार्वाचीनयोरालङ्कारिकयोः अलङ्कारदृष्टौ वर्तते द्यावापृथिव्योरिव महदन्तरम्, किन्तु विचारस्तु करणीय एव स्वरूपस्याधिगमाय येन रसस्यालङ्कारता भवेदधिगता, यदर्थं च प्रायोऽन्ये अलङ्कारा आयोज्यन्ते।

अस्या रसोक्तिविषये रसवदलङ्कारविषये वा प्रायो विविधा दृष्टयः सामान्यतया प्राचीनेषु नवीनेषु वा उपलभ्यन्ते यासां चर्चाया विशदविचाराः स्वमतस्थापनायाः पूर्वपक्षत्वेन कृता विश्वनाथमहोदयैः साहित्यदर्पणस्य दशमे परिच्छेदे रसवदलङ्कारनिरूपणप्रसङ्गे। यथा—

> "इह केचिदाहुः वाच्यवाचकरूपालङ्कारमुखेन रसाद्युपकारका एवाऽलङ्काराः। रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलङ्कारता भवितुं युक्ता इति। अन्ये तु रसाद्युपकारमात्रेणेह अलङ्कृतिव्यपदेशो भाक्तः; चिरन्तनप्रसिद्ध्याऽङ्गीकार्य एवेति। अपरे च रसाद्युपकारमात्रेणालङ्कारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधायकम् अजागलस्तनन्यायेन इति"।[1]

---

1. सा० द०, पृष्ठ ९४१।

अत्रत्यस्त्रिविधोऽप्ययं पक्षः पूर्वपक्षरूपेणैवोद्धृतः अतीव महत्त्वपूर्णो न केवल रसवदलङ्कारस्य निरूपणदृष्ट्या, अपि तु अलङ्काराणां सामान्यस्वरूपस्थापनभावनयाऽपि। यतो हि सर्व एव एते पक्षाः स्वाभिमतालङ्कारदृष्टिमुपस्थापयन्ति।

एतेषां त्रयाणां विमर्शेन अलङ्कारदृष्टीनामापाततः परिचयः प्राप्स्यते, यश्चालङ्कारिकेषु कालान्तरेण मान्यतां गतः। किन्तु पारमार्थिकतादृष्टेरग्रे प्रदर्शयिष्यते, यया रसोक्तेरपि साधयिष्यते आलङ्कारिकाणामभिमता अलङ्कारता। प्रथमतस्तु एषां त्रयाणां स्थापनमलङ्कारदृष्टेर्विशकलनाय नितान्तमावश्यकम्। यदि एतेषां पक्षाणामन्तर्गतो भावो निरूपितः स्यात्, तदा तु रसोक्तेरलङ्कारतायामुद्भविष्यन्तीनां निःशेषाणामेवापत्तीनां निराकरणं सरलं स्यात्। अतः प्रत्येकस्य पक्षस्य वर्तुलार्थः प्रकाश्यते।

अत्र 'केचिदाहुरि'त्युदीर्य उत्थापिते प्रथमपक्षे केवलं शब्दार्थवृत्तिविच्छित्तिरूपा अलङ्कारतया ग्राह्या। यतो हि—'अलङ्क्रियतेऽनेने'ति करणव्युत्पत्त्या त एव रसादीनामलङ्कार्याणामुपकारकाः, न कथमपि रसादयः। रस-भाव-रसाभास-भावाभास-भावप्रशमादयो हि वाच्य-वाचकाभ्याम् अर्थेन शब्देन च ते चमत्कार्याः उपस्कार्या वा। अनन स्पष्टमिदं यन्न कथमपि रसोक्तेरलङ्कारता दृष्टा, तस्या अलङ्कार्यत्वेनैवाधिगमात्। अयं पक्षोऽलङ्काराणां क्षेत्रं शब्दार्थपरिमितिमेव मन्वानो भावाधिकृतानां रसवदादीनामलङ्काराणां सत्तां न सहेत। किन्तु एषा दृष्टिर्न कथमपि प्राचीनैर्न वा नव्यैरपि स्वीकृता। यदि कवीनां शब्दार्थौ तेषां भावनामलङ्करणे शक्तौ, तदा कथं न भावा येषां स्वीकारोऽपि कविना स्वाभिप्रेतस्य विशिष्टस्य भावस्य बोधनाय क्रियते। कवीनां रससिद्धानां काव्यानि निभाल्यकोऽपि सहृदयः सुखेनेदं जानाति यत् तैरेव श्रृङ्गारादिभावैः कश्चन कविः करुणरसं पोषयति, अपरो वीरम्, अन्यश्च शान्तमेव। अत्रोदाहरणम्—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥[1]

एतद् भूरिश्रवसः समर-भुवि पतितं हस्तमालोक्य तद्वधूरभिदधति। अत्र पूर्वावस्थास्मरणं श्रृङ्गाराङ्गमपि करुणं पोषयतीति सिद्धमेव रसस्याङ्गरूपेण अन्येषां प्रधानानां पोषणम्। यद्यपि एष श्लोको रसदोषविचार-प्रसङ्गे उद्धृतः, तथापि एतादृशे स्थले अस्ति ध्वनिवादिनामपि रसोक्तिरभिमतेति विचार्य अत्रोद्धृतः। एवं काव्यानां समीक्षणं विदधतां सहृदयानामनुभवो यदि जागर्ति अविच्छिन्नतया तदा कस्तं प्रतीपयितुं पारयेत्। अतोऽस्य मतस्य सदोषता न कथमपि अपाकर्तुं शक्या। एवञ्च पक्षेणानेन न कथमपि शक्यो विरोधो रसोक्तेरलङ्कारतायाः।

---

१. का० प्र० ७।३३६ श्लो०।

द्वितीयः पक्षस्तु 'अन्ये तु' इति प्रारभ्य पूर्वपक्षस्यैव प्रायोंऽशतः कुरुते पोषम्। यतोऽयमपि केवलं चिरन्तनानामालङ्कारिकाणां सरणिमनुरुन्धानो भाक्तमेवालङ्कारतां समर्थयते रसादीनां मुख्यामालङ्कारिकैर्विविधैः सामान्यतया स्वीकृताम्। अस्य पक्षस्य समर्थका रसाद्युपकारकमात्रेण शब्दार्थगत-विच्छित्तिधर्मानेव अलङ्कारत्वेनामनन्ति, न कथमपि रसभावादीन्, ये च न कदापि पोषकतां प्राप्नुवन्ति, प्रत्युत सर्वदैव पोष्या उपस्कार्या एव वा भवन्ति। एवं स्थिते यथा दुग्धदानाभावेऽपि अजाया गलस्तनः स्तन एव भण्यते भक्त्या, तथैव एते रसभावादयोऽपि अलङ्कारतां विनापि अलङ्कारा कथ्यन्ते। अतो भाक्तमेतेषामलङ्कारत्वं न मुख्यम्। एवं शब्दार्थान्यतरनिष्ठचमत्कारविशेषस्यैव मुख्यालङ्कारता रसवदादीनामङ्गिभूतानां यथा कथञ्चित् परिपोषापादनात् प्राचीनमतानुरोधाच्च न वास्तविकमलङ्कारत्वममीषाम्, अपितु गौणालङ्कारत्वमेवेति एषामभिप्रायः।

अस्य मतस्य गवेषणयेदं लभ्यते यत् रसवदादीनामलङ्कारत्वे नास्ति कापि युक्तिः, अपितु प्राचीनपरम्परानुशरणमात्रम्। यतो 'अलङ्क्रियत अनेनेति' व्युत्पत्त्या अलङ्करणकारिका या वृत्तिः सामान्येन स्वीक्रियते, सर्वेषु प्रसिद्धेषु अलङ्कारेषु तां कथमपि न बिभ्रति रसवदादयोऽलङ्काराः, एषां विभावानुभावसञ्चारियोगात् निष्पन्नत्वेन व्यङ्ग्यतया अलङ्कार्यत्वात्। अत एषां या हि अलङ्कारतायाः प्रसिद्धिः, सा लक्षणबहिर्भूतत्वेन कथमलङ्कारप्रस्थाने अवान्तर-प्रस्थानतां प्राप्नुयात्। प्रस्थानार्थं हि न केवलं लाक्षणिकानां लक्षणानां लक्षण-सङ्गम एव पर्याप्तः, अपितु अलङ्कारदृष्ट्या चिरकालपर्यन्तं कविपरम्परया निर्वाहोऽपि। अतोऽवान्तरप्रस्थानार्थं न केवलं प्राचीनानामनुरोध एव भविष्यति पर्याप्तो रसवदादीनां अलङ्कारतायाः कृते, अपि तु एषामलङ्करणत्वसमर्थिका अशेषाः कविसम्प्रदायसमर्थिता युक्तयोऽपि प्रदर्शनीयाः, याः किल रसोक्त्य-लङ्कारसमर्थनावसरे विवेचयिष्यन्ते। अत्र तु रसोक्तिसम्बन्धिनः पक्षा एव प्रस्तूयन्ते।

अन्तिमस्तृतीयः पक्षस्तु "अपरे" इति व्याहृत्य प्रवर्तते। अयं केवलं रसवदाद्यलङ्कारानेव वास्तविकान् अलङ्कारान् मनुते। यतो हि त एव साक्षाद् रसादीनामुपकारकाः रसाद्युपकारमात्रेणैवालङ्कृतिव्यपदेशस्य न्याय्यत्वात्। रूपकादीनां तु गौणा अलङ्कारता। तेषां तु शब्दार्थगतविच्छित्तिद्वारैव साध्यतेऽलङ्कारता, न साक्षात्, अजागलस्तनन्यायात्। यथा दुग्धदानाभावेऽपि अजागलस्तनः केवलमुपधानसामर्थ्यमात्रेण स्तनत्वाकारेण वा स्तन इति उदीर्यते, एवमेव साक्षाद्-रसाद्युपकारकत्वाभावेऽपि रूपकसन्देहादयो रसस्याभिव्यक्तिसाधनयोः शब्दार्थयोः तथात्वेन गौणायाः अलङ्कारतायाः स्वीकारात्।

एवं पक्षेऽस्मिन् लभ्यते सुन्दर समर्थनमलङ्कारताया रसवदादीनाम्। किन्तु रूपकादीनामलङ्कारता तु नात्र मुख्या समर्थ्यते, या चेष्टाऽस्माकं प्राधान्येन प्रस्थानपोषणाय। अतोऽस्मिन् पक्षे न लभ्यते पारमार्थिकी अलङ्कारदृष्टिः, अपि तु आभासिकी एव। किन्तु प्रथमत एषु पक्षेषु एवालङ्कारदृष्टिरन्वेष्टव्या, यस्यां अलङ्कारप्रस्थानस्य अवान्तरभेदभूतानां तिसृणां धाराणाम् उपप्रस्थानानां त्रयाणां वा विनिवेशः। अतोऽत्र काप्येतादृशी अन्वेष्टव्या अलङ्कारदृष्टिर्या त्रिविधानेवालङ्कारान् स्वभावमूलकान् वक्रोक्तिमूलकान् रसोक्तिमूलकांश्च व्याप्नुयात्। यतो एत एव अलङ्कारप्रस्थानस्य अवान्तरप्रस्थानत्वेनाङ्गीकृता अलङ्काराणां मुख्या भेदाः।

रसोक्त्यलङ्कारविषये पूर्वपक्षत्वेन उत्थापितोऽयं प्रश्नो यद्यपि यथाकथञ्चिदेति शान्तिम्, समर्थयते च सत्तां रसवदलङ्कारस्य। किन्तु या प्रक्रिया रसवदलङ्कारस्याङ्गीकारे परिगृहीता, तया तु अन्येशामुपमादीनामप्यलङ्कारता मुख्या न स्यात्, यतस्तेषामङ्गद्वारेणैव अलङ्कारता स्वीक्रियते रसादीनामुपकारकतया, न साक्षाद् रसवदादीनामिव साक्षात् रसाद्युपकारता। अत एष विषयो विस्तरेण विचारार्हो येन जायेत स्पष्टतया रसवदादीनामधिगमः।

अत्रेदं तथ्यं यत् प्राचीनार्वाचीनयोरालङ्कारिकदृष्टौ द्यावापृथिव्योरिव महदन्तरम्। प्राचीना भामह-दण्ड्युद्भटादयोऽलङ्कारातिरिक्तं काव्यशोभाधायकं जीवितं वा अन्यद् वस्तु न मन्वते। रसभावादयोऽपि एभिरलङ्कारेष्वेव अन्तर्भाव्यन्ते, अलङ्काराणामेव प्राधान्यात् सर्वेषां काव्यतत्त्वानां तत्रैव पर्यवसानात्। अतः प्राचीनालङ्कारिकमतेन सर्व एव रसभावादयो रसवदलङ्कारा एव। अत एतेषां मते रसवदलङ्कार-रसध्वन्योश्च नूनमभेदः। रसस्य प्राधान्ये गुणीभूतव्यङ्गतायां वा सर्वत्रैव एभिरलङ्कारतायाः स्वीकारात्। नवीनालङ्कारिकवत् नैतेषां नये रसध्वनिरन्यो रसवदाद्यलङ्काराश्चान्ये। अतः प्राचीनानां नये तु रसोक्तेरलङ्कारतायां न कोऽपि विवादः। किन्तु एषां नये चत्वार एव रसवदाद्यलङ्काराः, नान्ये अवशिष्टा रसभावादिसम्बन्धिनो भावशान्ति-भावोदय-भावसन्धि-भावशबलताः। अलङ्कारसर्वस्वकारो रुय्यकोऽप्येतत् समर्थयते। अतो न सर्वथा प्राचीननयोऽपि सर्वानेव रसोक्तिमूलकालङ्कारानैकमत्येन समर्थयते। अपि तु भावशान्तिर्भावोदयो भावसन्धिर्भावशबलता चेति चत्वारोऽलङ्काराः पृथगेव मन्तव्याः रसवदादिभ्यः, एतेषां प्रचीनैरनिर्दिष्टत्वाद् रसवदलङ्कारविचारप्रकरणे। किन्तु येन नयेन व्यङ्ग्या भावादयोऽपि रसवदलङ्कारव्यपदेशं भजन्ते तेनैव नयेन व्यङ्ग्या भावादयोऽपि रसवदलङ्कार एवान्तर्भाव्याः, उभयत्र नयस्य तुल्यत्वात्। अत एव अनयैव रीत्या प्रदीपकारो गोविन्दठक्कुरोऽपि विदधतेऽस्य समर्थनम्।

इत्थं प्राचीननये रसोक्तेः सर्वेषामेव रसभावादीनामन्तर्भावेऽपि नव्यनये अस्या अलङ्कारता केवलमन्यरसस्याङ्गतायामेव अधिगता न सर्वत्रैव रसस्याङ्गितायामपि। अस्यां स्थितौ रसवदलङ्कारस्य क्षेत्रं व्यावर्तनीयमेव, अन्यथा दोषस्यापत्तेः। यतो नव्यानां ध्वनिकारमतानुयायिनामालङ्कारिकाणां नये तु केवलमङ्गतायामेव रसवदलङ्कारोऽङ्गीक्रियते, नाङ्गितायाम्। अतोऽङ्गिरसं विहाय केवलमङ्गभूतानां रसादीनामलङ्कारता अधिगन्तव्या न सर्वत्र। किन्त्वस्माकं प्रबन्धस्तु केवलमलङ्कारप्रस्थानस्यैव धाराणाम् अवान्तरप्रस्थानानां वा अन्वेषणाय यतते। यदि प्राचीनानां मतेन सर्वाण्येव काव्यतत्त्वानि अलङ्कारतयैवाङ्गीक्रियन्ते तदापि तदवस्थैव रसादीनामलङ्कारता भवेन्नामेयं विस्तृता सर्वस्यैवाङ्गभूतस्य अङ्गिभूतस्य वा रसस्यालङ्कारतयैवाधिगमात्। किन्तु नव्या ध्वनिकारानुवर्तिनश्च मन्यन्त एव रसवदलङ्कारं रसस्याङ्गतायाम्। अतोऽलङ्कारत्वं तु रसादीनामुभयत्रास्त्येव। भवतु विस्तृतं "प्राचीनानां नये" नव्यानान्तु सीमितत्वेन। यद्यप्यङ्गीकृतो रसोऽलङ्कारे तदा तस्य प्रस्थानतापि भिन्नैव स्यादन्येभ्यः समासोक्ति-पर्यायोक्तादिभ्यो वक्रोक्तिप्रधानेभ्योऽलङ्कारेभ्यस्तैरलङ्कृतस्य वाच्यार्थस्य वाक्यार्थीभूतत्वाद् व्यङ्ग्यस्य वस्तुनस्तस्य समर्थकत्वेन पोषकत्वेन वा स्थितत्वात्।

एवमेव स्वभावोक्तिमूलकेषु सहोक्ति-सूक्ष्मानुमानादिष्वलङ्कारेष्वपि एतैरलङ्कृतं वस्तु स्वभावत एव वाक्यार्थीभूतामलङ्कारतां भजते तत्रत्यं व्यङ्ग्यं सहायकमेव सर्वथा भवति वाक्यार्थीभूतस्य वस्तुनः, न कथमपि प्रधानम्। रसवदलङ्कारस्तु केवलमन्यरसापेक्षयैव अङ्गतां भजते, न सामान्यस्य वाक्यार्थीभावस्य। एवंस्थितेऽलङ्कारप्रस्थाने त्रिविधोऽवान्तरधारारूपः प्रस्थानरूपो वा भेदः स्वीकार्य एव। ध्वनिकारो ध्वनेः सत्तां समर्थयन् स्थापयति तस्य व्यतिरिक्ततां वस्तुमूलकेभ्योऽलङ्कारेभ्यो वस्तुध्वनेर्वक्रोक्तिमूलकेभ्यश्च समासोक्ति-पर्यायोक्तादिभ्योऽलङ्कारेभ्योऽलङ्कारध्वनिरूपस्य वस्तुनः। एवमेव रसवदलङ्काराद् रसध्वनेर्व्यतिरिक्त एव विषय इत्यपि दर्शयति रसध्वनिरूपेण। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः[1]॥

अत्र ध्वनिकारः काव्यावयवभूतेभ्यः प्रसिद्धतत्त्वेभ्यः रसध्वनेः पार्थक्यं प्राधान्यं च साधयन् स्वीकुरुते रसवदलङ्कारं रसस्याङ्गतायामेव, न कथमपि अङ्गितायां यथा प्राक्तना आलङ्कारिका मन्यन्ते। एवं रसध्वनेः पृथक् सिद्ध्यति रसोक्तिः।

ध्वनिकारस्य प्रसिद्धावयवेभ्योऽलङ्कारेभ्यो वा पृथक् संकेतयति इयं ध्वनेः त्रिविधा स्थापनैव यत् त्रिविधमेवावान्तरप्रस्थानं धारा वा स्याद् अलङ्कारप्रस्थाने। यतोऽलङ्कारप्राधान्यकाले प्राचीनानां नये सर्वोऽपि ध्वनिप्रपञ्चोऽन्तर्भूत एव

१. ध्वन्या०, उ० २।

तिष्ठति ध्वनिकारात् पूर्वम्। ध्वनिप्रस्थाननिरूपणावसरे ध्वनिकारो ध्वनेः वस्त्वलङ्काररसात्मकं त्रिविधं रूपम् अलङ्कारप्रस्थानादुद्धरति। एष उद्धारस्तु क्रमशस्त्रिधा विभज्य क्रियते। वस्तुव्यङ्ग्यप्राधान्ये स्वीक्रियते वस्तुध्वनिः, तत्र स्वभावोक्तिमूलका वस्तुनोऽप्राधान्यसमर्थका अलङ्कारा अङ्गतामापद्यन्ते, न कथमप्यङ्गितायामिति प्रतीयते। यतः प्राधान्यस्य व्यङ्ग्यस्य वस्तुनो ध्वनित्वेनैवाधिगमात्। एवमेव अन्यावपि अलङ्काररसध्वनी अलङ्कारप्रस्थानादेव विनिर्गताविति वक्रोक्तिरसोक्त्योरङ्गतां बोधयत इति सुधीभिरूह्यम्। अनेन सिद्धं त्रिविधमवान्तरप्रस्थानं धारा ( schools ) वा अलङ्कारप्रस्थाने।

ध्वनिकारसंकेतितस्यास्य अनुमानस्याधारो नातीव सङ्गतः प्रतिभाति। यतो हि ध्वनिकारः केवलमेकस्यैव अलङ्कारनाम्नो ध्वनेः विदधाति व्यपदेशं न वस्तुरसध्वनिस्थले। अत एकैव धारा स्वीकर्तव्या, नेतरे स्वभावोक्ति–वक्रोक्ती, तयोस्तत्र असङ्केतितत्वात्। किन्तु सन्देहोऽप्येषो न कथमपि सङ्गतिं भजते, यतो रसोक्तेरलङ्कारतामङ्गीकुरुते एवान्यत्र ध्वनिकारो 'मे मतिः' इत्युदीर्य। यद्यपि स्वभावोक्तेरलङ्कारतायाश्चर्चा न कुत्रापि स्वभावोक्तेर्ध्वनित्वमुररीकृत्य विहिता, किन्तु वस्तुध्वनेर्व्यापकं समर्थनमेव विदधाति स्पष्टतां स्वभावोक्तेरलङ्कारताया अपि, यथा अलङ्काररसयोर्द्विविधं व्यङ्ग्यं गौणं प्रधानञ्च। गौणतायामलङ्कारता, प्राधान्ये च ध्वनिः। एवमेव वस्तुध्वनिस्थलेऽपि द्विविधं व्यङ्ग्यं गुण-प्रधानभेदेन। अत्रापि प्राधान्य एव वस्तुध्वनिः, गौणतायां तु अलङ्कार एव। अतो ध्वनिकारपथानुसारी कोऽपि सहृदयः सुखेन अलङ्कारप्रस्थाने त्रिविधस्य अवान्तरप्रस्थानस्य धाराया वा साधनां कर्तुं पारयते। ध्वनिकाररीत्यालङ्कारप्रस्थानस्य आलोडनं यथा काव्यसरणेः स्थापनां समीचीनां विधत्ते, तथैव अलङ्कारप्रस्थानेऽपि अवान्तरप्रस्थानानां सम्भावनां द्रढयति। किन्तु ध्वनिकारस्यायं ध्वनिस्थापनाविधिर्न रोचते बहुभ्य आलङ्कारिकेभ्यः कुन्तक-धनिक-महिमभट्टादिभ्यो अलङ्कारप्रस्थानस्य व्यापकतासमर्थकेभ्यो ये न कथमपि ध्वनेस्तत्त्वं व्यञ्जनया प्रतिपाद्यं मन्वते, अपितु वक्रतया, तात्पर्याख्यवृत्त्या, अनुमित्या वा समर्थयितुं समुत्सहन्ते, अभिधयैव विशिष्टाभिः समर्थतया गतार्थत्वात्। एते सर्वे ध्वनिविरोधिन आलङ्कारिका अभिधायाः समर्थनविधया प्रकारान्तरेण अलङ्कारप्रस्थानस्यैव प्राधान्यं समर्थयन्तः प्रतीयन्ते। भवतु एतेषु आंशिको दृष्टिभेदो वक्रतामूलकस्तात्पर्यवृत्त्याख्याधारकोऽनुमेयनिमित्तको वा। किन्तु सर्वमेव प्रसरति अभिधैवाऽन्तःप्रवाहरूपा। अतो ध्वनिस्थापना तु निर्दिशत्येवालङ्कारप्रस्थानान्तरप्रस्थानानां अन्तर्धाराणां वा सम्भावनां व्यापके अलङ्कारप्रस्थाने इत्यत्र न जायेत केषाञ्चिदपि विमतिर्विवेचकानामिति। यतो हि ध्वनेर्विरोधो न प्राप्तः सफलतां पश्चाद्भवेषु आलङ्कारिकेषु, अपि तु उत्तरोत्तरं प्रौढिमेव परां गतो मान्यतां

च्चाधिगतवान् अशेषेऽप्यलङ्कारशास्त्रे । मम्मटादिभिस्तु विस्तरेण समर्थितः पोषितश्चायं ध्वनिमार्गो नितान्तं दार्ढ्यमवाप । अतोऽस्य विरोधः केवलमलङ्काराणां वपुरेव पुपोष, न किञ्चिच्छिन्नं ध्वनेः प्रत्युतास्य स्थापना साफल्यमापेदेऽधिकम् ।

कुन्तकस्य वक्रतादृष्टेर्विस्तारस्य आधारो ध्वनेः स्थापनैव । ध्वनेः सूक्ष्मा दृष्टिरत्र ददाति अधिकं बलमित्यत्र न कापि संशीतिः । किन्तु इदमपि निःसन्दिग्धं सत्यम्, यत् कुन्तकस्य प्रशस्ता प्रतिभा प्रथत एवात्र बाहुल्येन । यतः कुन्तकस्य प्रतिभा सहृदयोचितां पद्धतिमनुसरन्ती काव्यसम्पदं सङ्गृह्णीते अभिदर्शयति च । किन्तु ध्वनेर्दृष्टिः प्रतिभापेक्षया प्रज्ञया समधिकमाक्रान्ता । अतस्तत्र सहृदयदृष्ट्या दार्शनिकता निर्भरमाबध्नीते पदम् । अत एव कुन्तकस्य वक्रताश्रिता समालोचना सचेतसां चेतश्चमत्कारमधिकं तनुते इत्यपि कतिपये मन्यन्ते । ध्वनिकारस्य अलङ्काराणां या व्यतिरिक्ता दृष्टिरलङ्कार्यस्यापि वस्तुनः समर्थनं कुरुते, तस्यापि अन्तर्भावोऽयं वक्रतायामेव करोति । न केवलमिदमेव । अपितु ध्वनिकारेण तदनुवर्तिभिर्वा स्वीकृतस्य स्वभावोक्त्यलङ्कारस्य रसोक्तेर्वा न स्वीकुरुते अलङ्कारताम् अपि तु अलङ्कार्यतामेव, तेन प्रतीयते यत् अलङ्कारप्रस्थानपोषकोऽप्ययम् अलङ्काराणां मान्यतां न मनुते, अपि तु प्रकारान्तरेण समर्थयते ध्वनिं केवलं वक्रतानामभेदेन । यतो हि ध्वनिकारोऽपि ध्वनि-तले एव सर्वाणि काव्यतत्त्वानि वस्त्वलङ्कार-रसभेदेनान्तर्भावयति ।

यद्यपि रसोक्तेरङ्गितायामलङ्कार्यता अङ्गीकृता ध्वनिकारेण, किन्तु अयन्तु तामपि न स्वीकुरुते । प्रत्युत सर्वदैव रसस्यालङ्कार्यतामेव समर्थयते । अतो ध्वनिकारस्यांशिकं रसोक्तेरलङ्कारतायाः समर्थनं कुन्तकः सर्वात्मना खण्डयति, येन अस्माकं प्रबन्धस्य रसोक्तिमूलकोऽवान्तरप्रस्थानपोषको विचारो विवर्णतामेति । अत एव यथा स्वभावोक्तिविचारावसरे कुन्तकमतस्यालोचना विस्तरेण विहिता, स्थापिता च सत्ता स्वभावोक्तेः विधाय खण्डनं कुन्तकमतस्य, तथैवात्र रसोक्तेः स्थापनार्थमप्यपेक्ष्यते प्रचुरो विचारः । तस्मात् विश्लेषात्मकविचारपुरस्सर कुन्तकमतमपाक्रियते, विधीयते च मण्डनं रसोक्तेरलङ्कारतायाः ।

ध्वनिकारो रसस्य द्विविधां स्थितिं मनुते । रसस्य प्राधान्ये एव रसत्वम्, गुणीभूतत्वेऽङ्गतायां वा अन्यरसस्य रसवदलङ्कारत्वम् । अतो ध्वनिकारनयेनापि अलङ्कारप्रस्थाने अवान्तरप्रस्थानरूपेण रसोक्तेः सत्ता असन्दिग्धैव । एवमेव ध्वनिकारानुवर्तिनः सर्वं एव मम्मटादयोऽस्याः समर्थका एव । प्राचीनास्तु सर्वानेव रसान् अलङ्कारप्रस्थान एव सङ्गमयन्ति । अतस्तेषां नास्ति कापि विप्रतिपत्ती रसोक्तौ । केवलं कुन्तक एव नैति अनुकूलतां रसोक्तेरलङ्कारतायाः, रसानां चालङ्कार्यत्वेन वाऽधिगमात् । अतोऽस्य वक्रता–विचारोऽप्येतदर्थे पूर्णतया परिशीलनीयो येन सिद्धयेद् रसोक्तेरलङ्कारता ।

इदं तु स्पष्टमेव यत् कुन्तको वक्रतायामेव सर्वाण्येव काव्यतत्त्वानि गुणालङ्कार-रसादीनि अन्तर्भावयितुं व्यवस्यति। तत्रालङ्काराणां सर्वेषां वाक्यवक्रतायामेव अन्तर्भावो विहितः।

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥[1]

रसादयोऽपि प्रकरण–प्रबन्धकतायां विलापिताः। किन्तु एकत्र वाक्यात्मिका वक्रता सामान्येनालङ्कारान् अलङ्कार्यांश्च व्याप्नोति। यतः सर्वथा विभिन्नेऽलङ्कारालङ्कार्यतत्त्वे केन सामान्येन धर्मेण सामानाधिकरण्येन वाङ्गीकृते विहाय वक्रताम्। इयं च वक्रता कुन्तकेन प्रसिद्धप्रस्थानातिरेकिणी विचित्रैवाभिधेति व्याहृता। एतच्च अभिधायां वैचित्र्यं त्रिविधं भवितुं शक्नोति १. अलङ्कारजम् २. स्वभावजं ३. रसजं वा। अलङ्कारजं वैचित्र्यं तु कुन्तको वाक्यवक्रतया समर्थयते, किन्तु अवशिष्टे द्वे वैचित्र्ये नालङ्कारनिबन्धने, अपि तु अलङ्कार्यनिष्ठे। किन्तु नेदमुचितं प्रतिभाति, यतः 'वैचित्र्यमेवालङ्कारः' इति आलङ्कारिकैरसकृत् समुदीरणात्। न केवलं करणव्युत्पत्त्यैव अपि तु भावव्युत्पत्त्यापि सिद्धस्यालङ्कारशब्दस्यालङ्कारिकैः परिगृहीतत्वात्।

कुन्तकः केवलं करणव्युत्पत्त्या 'अलङ्क्रियते अनेनेति' निष्पन्नमलङ्कारशब्दमेव अलङ्कारत्वेन स्वीकरोति। अतो रसो वस्तुस्वभाववर्णनं वा न कथमपि अनेनालङ्कारमध्ये गण्यते, एतयोश्च अलङ्कार्यत्वेन संप्रतिपन्नत्वात्। नेदं सहृदयहृदयसम्मतम्, वैचित्र्ये सति च वस्तुस्वभावो रसो वा अलङ्कारतयैव गृह्यते आलङ्कारिकैः। किन्तु कुन्तको नात्र श्रद्धधाति। अयं तु विधत्ते अस्य मीमांसाम्, समर्थयते च स्वीयमभिप्रायम्। यथा—

अलङ्कारो न रसवत् परस्याप्रतिभासनात्।
स्वरूपादतिरिक्तस्य शब्दार्थासंगतेरपि ॥[2]

अस्य तात्पर्यमिदं यत् यत्रालङ्काराणां चर्चा भवति तत्र किमत्रालङ्कार्यं किञ्चात्रालङ्करणमिति अपोद्धारबुद्ध्या विहितो विभागः प्रायः सचेतसां चेतसि स्फुरति। किन्तु रसवदलङ्कारस्थले नैष विभागो बोधभूमिं स्पृशति। यतो यदि शृङ्गारादिरेव अप्राधान्येन वर्ण्यमानोऽलङ्कारस्तदा तदन्येन केनचिदलङ्कार्येण भवितव्यम्। यदि च तत्स्वरूपमेव तद्विदाह्लादकत्वाद् अलङ्करणमित्युच्यते, तथापि तद्व्यतिरिक्तं किञ्चिदलङ्कार्यतया प्रकाशनीयम्। तदेवंविधे बोधे न कश्चिदपि विवेकश्चिरन्तनालङ्काराभिमते रसवदलङ्कारलक्षणोदाहरणमार्गे मनागपि विभाव्यते। अतो रसवदलङ्कारो न कथमपि अलङ्काराणां मध्ये गणयितुं शक्यते।

---

१. व० जी०, पृ० १४७। २. हि० व० जी०, पृ० ३३८।

शब्दार्थासङ्गतेरपि न संभाव्यते रसवदलङ्कारः। अस्यायमभिप्रायो यत् शब्दार्थयोरभिधानाभिधेययोः असमन्वयाच्च रसवदलङ्कारोपपत्तिर्नास्ति। अत्र च रसो विद्यते तिष्ठति यस्येति मतुप्रत्यये विहिते तस्यालङ्कार इति षष्ठी-समासः क्रियते रसवांश्चासौ अलङ्कारश्चेति विशेषणसमासो वा ? तत्र पूर्वस्मिन् पक्षे रसव्यतिरिक्तं पदार्थान्तरं न विद्यते यस्यासौ अलङ्कारः काव्यमेवेति चेत्, तत्रापि तद्व्यतिरिक्तः कोऽसौ पदार्थो यत्र रसवदलङ्कारव्यपदेशः सावकाशतां प्रतिपद्यते। विशेषातिरिक्तपदार्थो न कश्चिद् परिदृश्यते यस्तवालङ्कार इति व्यवस्थितिमासादयेदिति। तदेवमुक्तलक्षणे रसवदलङ्कारस्य शब्दार्थसङ्गतिर्न काचिदस्ति।

यदि वा चेतनपदार्थगोचरतया रसवदलङ्कारस्य निश्चेतनवस्तुविषयत्वेन चोपमादीनां विषयविभागो व्यवस्थाप्यते, तदपि न विद्वज्जनावर्जनं विदधाति। यस्मादचेतनानामपि रसोद्दीपनसामर्थ्येन समुचितसत्कविसमुल्लिखितसौकु-मार्यरसत्वाद् उपमादीनां प्रविरलविषयता निर्विषयता वा स्यादिति शृङ्गारादि-निष्पन्दसुन्दरस्य सत्कविप्रवाहस्य च नीरसत्वं प्रसज्येत, इति प्रतिपादितं पूर्व-सूरिभिरपि। एवमुपमादीनां रसवदलङ्कारस्य च विषयविभागोऽपि न जायते। अतो न कथमपीष्टा अलङ्कारता रसवतोऽपि त्वलङ्कार्यतैव इति कुन्तकाभिप्रायः।

अत्रैव ध्वनिकारसिद्धान्तमप्यालोचयति रसवदलङ्कारविषयकम्। यथा—यदि वा वैचित्र्यान्तरमनोहारितया रसवदलङ्कारः प्रतिपाद्यते, यथाऽभियुक्तैस्तै-रेवाभ्यधायि—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः[1]॥

यत्रान्यो वाक्यार्थः प्राधान्यादलङ्कार्यतया व्यवस्थितः, तस्मिन्न तदङ्गतया विनिबध्यमानः शृङ्गारादिरलङ्कारतां प्रतिपद्यते। यस्माद् गुणप्रधानभावाभिव्यक्ति-पूर्वमेवंविधे विषये विभूष्यते भूषणविवेकव्यक्तिरुज्जृम्भते।

कुन्तकस्य अत्रत्यो रसवदलङ्कारविरोधो न कथमपि सङ्गतः प्रतिभाति। यतो हि रसवदलङ्कारे स्वीकृतेऽपि कुन्तकेनोद्भाविताः सर्वा अनुपपत्तयः सरलतयैव निराकर्तुं शक्यन्ते। प्रथमाऽनुपपत्तिस्तु कुन्तकस्य मनसि अस्ति रसस्यालङ्का-रतायाः। अलङ्कार्यो रसः, अलङ्कारत्वं च अलङ्कार्यं विना कथं सम्भवेत्। परमेषा शङ्का निराधारा एव, रसस्थलेऽपि अलङ्कारालङ्कार्ययोः पार्थक्येनाव-स्थानात्। केवलं रसस्य प्राधान्येऽलङ्कार्यत्वमन्यत्र अङ्गतायां वान्यस्य प्राधान्यस्य रसादीनामलङ्कारता निर्बाधैव। अतो रसवदलङ्कारस्वीकारे नास्ति कोऽपि

१. ध्वन्या० २/५।

विरोधः। द्वितीयाऽप्यनुपपत्तिर्न सबला। यत उपमादीनां क्षेत्रं रसवदलङ्कारात् विविक्तम्। उपमादयोऽलङ्काराः शब्दार्थरूपाङ्गद्वारा रसमुपकुर्वन्ति रसवदलङ्कारश्च साक्षादित्येव विषयविभागः। अत एव केचनात्र अलङ्कारलक्षणस्य शब्दार्थयोरङ्गभावेन रसोपकारस्यासङ्घटनात् नात्र रसालङ्कारतां मन्वते अपि तु गुणीभूतव्यङ्ग्यतामेव। केचन चास्य भाक्तामलङ्कारतामङ्गीकुर्वन्ति। अन्ये चालङ्कारलक्षणे शब्दार्थयोः समावेशं व्यर्थं मत्वा रसस्य साक्षादुपकारत्वमेव अलङ्कारत्वमित्युररीकृत्य रसवदलङ्कारस्य मुख्यतां मन्यन्ते।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥[1]

इत्यलङ्कारलक्षणे अलङ्कारविशिष्टशब्दार्थज्ञानत्वेन चमत्कारत्वेन च कार्यकारणभावं स्वीकृत्य एतेऽलङ्कारलक्षणमित्थं परिष्कुर्वन्ति—

"समवायसम्बन्धावच्छिन्नचमत्कृतित्वावच्छिन्न-जन्यतानिरूपितसमवायसम्बन्धावच्छिन्न-ज्ञानत्वावच्छिन्न-जनकतानिरूपितविषयत्वसम्बन्धावच्छिन्न-शब्दार्थान्यतरनिष्ठावच्छेदकतानिरूपितावच्छेदकतात्वमलङ्कारत्वम्"[2]।

व्यङ्ग्यविशिष्टशब्दार्थज्ञानत्वेन चमत्कारत्वेन कार्यकारणभावाभ्युपगमात् व्यङ्ग्यभिन्नेत्यपि लक्षणे निवेशयन्ति। चमत्कारत्वावच्छिन्नं प्रति रसविशिष्टशब्दार्थज्ञानत्वेन कार्यकारणभावाभ्युपगमे प्रमाणाभावात् रसज्ञानत्वेनैव च तत्स्वीकारात् व्यङ्ग्ये रसभिन्नत्वविशेषणदानं नात्युचितम्। काव्यप्रकाशे पञ्चमोल्लासे 'कश्चिद्-ब्रूयादि'-त्येवमुक्त्या रसादीनामलङ्कारत्वे स्वानभिसन्धिः सुस्पष्टमुदीरितः। सुधासागरमनीषाकारैः पण्डितभीमसेननरसिंहठक्कुरादिभिश्च तत्रत्यो ग्रन्थ इत्थमेव व्याख्यातः। गुणीभूतरसस्थले तादृशरसविशिष्टशब्दार्थज्ञानत्वेन चमत्कारत्वेन कार्यकारणभावोऽस्ति प्रधानीभूतरसस्थले च तादृशरसविशिष्टशब्दार्थज्ञानत्वेन चमत्कारं प्रत्यसौ नास्तीति निर्युक्तिकं कः श्रद्दधीत[3]। रसोपकारकत्वमात्रेण अलङ्कारत्वव्यवहारो गुणेष्वपि अतिव्याप्नुवन् कथङ्कारं निराकार्य इति गुणीभूतरसादीनां गुणीभूतव्यङ्ग्यत्वमेव, नालङ्कारत्वमिति काव्यप्रकाशादिप्रामाणिकनिबन्धरहस्यमप्यत्रानुसन्धेयम्।

एवमत्रोपमादीनां रसवदलङ्कारस्य च विषयविभागे कृतेऽपि गुणीभूतरसवदलङ्कारयोर्विषयविभागोऽपि करणीयः। अनयोरैक्यस्य समर्थकाः केवलं द्विविधमेव ध्वनिगुणीभूतात्मकं तत्त्वं मन्यते, न एतयोरन्यत् रसवदलङ्कारनामकं तत्त्वम्। किन्तु यदा ध्वनिकारेण स्वीकृतो रसवदलङ्कारस्तदाऽस्य गुणीभूताद् व्यतिरिक्त-

१. का० प्र० ८।६१। २. ध्वन्या० पृ० १९५सरो०।
३. सटीक लो० ध्वन्या०, पृ० १९५।

ताऽपि साधयितुं शक्यत एव। यत्र प्रधानो वाक्यार्थो रसादिर्भवति रसभावादयश्च केवलमङ्गभूतास्तत्रैव रसवदलङ्कारः। यत्र तु प्राधान्यं वस्त्वलङ्कारयोरङ्गता च रसभावादीनाम्, तत्रैव गुणीभूतता इत्येवमुपपन्नो विषयविभागो गुणीभूतस्य रसवदलङ्कारस्य च।

तस्मात् रसवदलङ्कारस्य सत्ता निर्बाधा। कुन्तककृतोऽस्य विरोधो निराकृतः। अन्येऽपि रसवदलङ्कारविषयका प्रश्नाः समाहिताः यथावसरम्। साम्प्रतं रसवदलङ्कारे एक एव प्रश्नो विस्तरेण विचारमपेक्षते। सो हि नवीनप्राचीनयोर्विचारविषयकः। नवीनाः कतिपये आलङ्कारिकाः रसादीनामन्यरसस्याङ्गतायामेव मन्यन्ते रसवदलङ्कारताम्। प्राचीनास्तु अलङ्कारस्य प्राधान्यं मन्वाना सर्वत्र रसस्य प्राधान्येऽप्राधान्ये वा समर्थयन्तेऽलङ्कारतां रसस्य। नव्यानां नये केवलमङ्गभूत एव रसोऽन्येषां प्रधानानां रसादीनां रसवदलङ्कारः। प्राचीनानां च मते प्रधानोऽप्रधानो वा सर्वोऽपि रसः रसवदलङ्कार इति। एवमनयोः सर्वथाविरुद्धयोर्मतयोः कस्य सङ्गतता असङ्गतता वेति निर्णयो नातीव सरलः। यत उभावप्येतौ पक्षौ तुल्यबलौ न समन्वयं सहेते। अतो विचार आवश्यकः।

प्रस्थानानां निरूपणप्रसङ्गे पूर्वमेव विशदं विचारितं यदलङ्कारप्रस्थानादेव निःसृतानि शेषाणि रस-रीति-वक्रोक्त्यादीनि प्रस्थानानि। तत्रैव इदमपि दर्शितं यत् अलङ्काराद् बहिर्भूतान्यपि रस-रीति-वक्रोक्त्यादीनि प्रस्थानानि सर्वथा व्यतिरिक्तेषु स्वरूपेषु न कथमपि अलङ्कारसंस्कारं विजहति। अर्थाद् रसेऽपि सारश्चमत्कार इति न्यायेन रसेऽपि अलङ्कारतायाः संस्पर्शोऽनिवार्यः। अलङ्कारता च काव्यशरीरभूतयोः शब्दार्थयोः सुन्दरं साहित्यमेव। तदन्तरा न किमपि प्रस्थानं प्रतिष्ठां प्राप्नुयात्। सर्वाण्येव प्रस्थानानि शब्दार्थयोः साहित्यस्य माध्यमेनैव प्रतिष्ठां लभन्ते साहित्यञ्चालङ्कारेण। इदमेव शब्दार्थयोः साहित्यं काव्यस्य व्यावर्तको गुणः। अतः शब्दार्थयोराश्रयेण जीवन्ती अलङ्कारता सर्वप्रस्थानानि व्याप्नोति। अस्मादेव सर्वालङ्कारिकाः स्वकृतौ अलङ्काराणां विस्तरेण वर्णनं चक्रुः। सम्पूर्ण-संस्कृतसमालोचनाशास्त्रम् अलङ्कारनाम्नैव व्यपदेशमभजत्। अलङ्कारग्रन्था अपि अलङ्कारनाम्नैव प्रसिद्धिं गताः। एवं स्थितौ प्राचीनानां नये यद्यपि आसीत्सर्वेषां रसादीनां रसवदलङ्कारता किन्तु ध्वनिकारादनन्तरं जायमानो विमर्शः अलङ्कारक्षेत्रं संकुचितमकरोद् येनालङ्काराणामप्राधान्यमपैति, आगच्छति च प्राधान्यं रस-रीति-वक्रोक्त्यादीनाम्।

आलङ्कारिकेषु केवलं कुन्तक एवेदृशो दृश्यते यो न स्वीकरोति स्वभावोक्तेरसोक्तेर्वाऽलङ्कारताम्। किन्त्वस्य ग्रन्थस्य मीमांसयेदमायाति यदयमपि अङ्गीकुरुतेऽलङ्कारतामनयोः परम्परया न साक्षात्। यतोऽयं वक्रतामेव कमप्यपूर्वमलङ्कारं मनुते। तस्या एव भेदरूपेण स्वीकुरुते स्वभावोक्ति-रसोक्ती।

कुन्तकः स्वयमेव स्वीकुरुते कोऽप्यपूर्वोऽलङ्कारो विधीयते। अनेन स्पष्टमिदं यत् कुन्तकमतमपि रसोक्तेरलङ्कारताया न विरोधि, अपि तु प्रकारान्तरेण पोषकमेव।

यथा नव्याः कतिपये आनन्दवर्धनोत्तरभाविन आलङ्कारिका रसोक्तेरलङ्कार्यताम् अलङ्कारतां चोभयरूपत्वं विशेषस्थितौ अङ्गीकुर्वन्ति तथैव कुन्तकोऽस्याः रसोक्तेः अलङ्कार्यतामङ्गीकुर्वन्नपि वक्रताया अङ्गरूपेण अलङ्कारतां स्वीकुरुत एव। नव्यानां ध्वनिसमर्थकानामालङ्कारिकाणां मतानि निरस्य स्वतन्त्रतया वक्रोक्तिप्रस्थानस्य स्वीकारः कुन्तकस्य अलङ्कारनिबन्धन एव। तेन अलङ्काराणां दृष्टिर्न केवलं स्पष्टतां लभते, अपि तु प्रसरत्यपि। एवमेवालङ्कारदृष्टेः स्पष्टीकरणाय प्रसाराय च जायते विस्तरो विविधानां प्रस्थानानाम्। सर्वाण्येत्र प्रस्थानानि अलङ्काराणां विविधान् पक्षान् प्रस्तुवन्ति स्वदृष्टिभेदात्। प्रस्थानानामारम्भत एवात्र दृष्टिः। प्रस्थानानां विमर्शनिरूपणावसरे दर्शितमेतद् विस्तरेण। अत्र तु केवलं सङ्केतः क्रियते। इदं तु दर्शितं पूर्वं यत् प्रथमं समीक्षाशास्त्रे जातः श्रीगणेशो रसानामेव भरतमुनेः नाट्यशास्त्रे। किन्तु एते रसाः केवलं दृश्ये नाट्य एव वा साक्षात्कृताः, अदृश्ये काव्येऽपि द्रष्टव्या इति भावनया अलङ्कारविधया व्याक्रियन्त। पर्यवसाने च रस एव अभूद् विश्रामः। प्रश्नोऽयमवश्यं विचारणीयो यत् कथं व्यङ्ग्या रसोक्तिः अलङ्कारतां भजते, वाच्यतायामेव आलङ्कारिकैरलङ्कारतायाः स्वीकारात्, रसोक्तेश्च वाच्यताया अभावात्। यदि च व्यङ्ग्यत्वालङ्कारत्वयोरस्ति विरोधः तदा तु न कदापि रसोक्तेः संभाव्या अलङ्कारता। तथा च सति कथं सा अलङ्कारप्रस्थानस्य अवान्तरप्रस्थानतां गच्छेत्। अतोऽस्याः समस्यायाः समाधानं नितरामावश्यकम्।

आलङ्कारिकाः सामान्यतयेदं मन्यन्ते यद् व्यङ्ग्यता अलङ्कारतायाः प्रतिपन्थिनी। यतोऽलङ्कारताया आधारश्चारुता, सा च वाच्यतायामेव। व्यङ्ग्यता त्वलङ्कारतां निषेधति गूढतया। अलङ्कारास्तु गूढतां न सहन्ते। अत एव सर्वे अलङ्कारा प्रकाश-स्थान एव स्थाप्यन्ते येन तेषां साक्षात्कारः सर्वेषां सरलतया संभवेत्। गूढतायां तु कथं तेऽलङ्करणतां भजिष्यन्ति। यदपि 'अगूढं व्यङ्ग्यमि'त्युच्यते; तदपि नोचितम्, तत्र तु गुणीभूतव्यङ्ग्यस्यैव स्वीकारात्, अलङ्कारतायाश्च ततो भिन्नतयाऽधिगमाच्च। अतो न व्यङ्ग्यं कथमपि अलङ्कारतायाः साधकम्।

अत एवालङ्कारिकैः स्वालङ्कारलक्षणेऽव्यङ्ग्यमिति विशेषणं विनिवेशितम्। यथा अप्पयदीक्षितैः चित्रमीमांसायामुपमाया लक्षणे उक्तम्–'उपमितिक्रियानिष्पत्तिमत्-सादृश्यमदुष्टमव्यङ्ग्यमुपमालङ्कारः।' विद्यानाथोऽपि तथैवाह–

स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकगोपमा ॥[1]

अत्र वाच्यमिति विशेषणं व्यङ्ग्यव्यावर्तनाय। मम्मटभट्टैरपि अवरकाव्यलक्षणे चित्रकाव्येऽलङ्कारप्रधानकाव्ये वा अव्यङ्ग्यविशेषणं दत्तम्। यद्यप्यत्र व्यङ्ग्याभावे काव्यस्यैवाभावात् अव्यङ्ग्यस्य स्फुटप्रतीयमानार्थरहितमिति अभिप्रायोऽपि दर्शितः, किन्तु व्यङ्ग्यं भवति विरोधि अलङ्कारताया इति संस्कारस्तु समुज्जृम्भत एव। तस्मात् सिद्धं यदलङ्कारता न सहेत व्यङ्ग्यताम्, वाच्यतायामेव तस्याधिगमात्।

अलङ्काराणां वाच्यता तदैव पर्यवसीयते, यदा सर्वेऽपि वस्त्वलङ्काररसाख्या अलङ्कार्या व्यङ्ग्या एव मन्यन्ते। उभयोरलङ्कारालङ्कार्ययोर्व्यङ्ग्यत्वे कथमेषा संभवेत् व्यवस्था। अतो अलङ्काराणां वाच्यता अलङ्कार्याणां च व्यङ्ग्यता स्वीकार्यैव। तथा सति रसोक्तिः कथमलङ्कारेष्वन्तर्भविष्यतीति प्रश्नो विस्तरेण समाधेयः।

रसोक्तेरलङ्कारत्वे नास्ति विरोधः। प्राचीनानां नये सर्वमेव शोभाधायकतत्त्वमलङ्कार एव नव्यानां नयेऽपि रसोक्तेः अन्यरसानामङ्गत्वे निर्बाधैवालङ्कारता,

"प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥"

इति ध्वन्यालोककारैरपि स्वीकारात्। जयदेव-विश्वनाथाऽप्पय्यदीक्षितादिभिरतस्यानुमोदनाच्च। रसादीनां न कदापि वाच्यता। एते सदैव व्यङ्ग्याः। एषां वाच्यता तु दोषावहा। किन्तु नैषा एतेषामलङ्कारतां निरोद्धुमर्हा, अन्यरसानामङ्गतायाम्। यतः प्राधान्य एवैषां ध्वनित्वम्, अङ्गतायां तु अलङ्कारता अङ्गीक्रियते विशिष्टोपमादिस्थले विशेषणादुपमानां वाच्यसिद्ध्यङ्गतया गुणीभूतव्यङ्ग्यत्वमेव, सिद्धार्थस्य उपस्करणाभावात्तु नालङ्कारत्वम्। किन्तु रसादीनां व्यङ्ग्यत्वेऽन्यस्योपस्करणतायामङ्गत्वे वा अस्त्येवालङ्कारता। न व्यङ्ग्यत्वालङ्कारत्वयोरस्ति कश्चिद् विरोधः प्राधान्येन व्यङ्ग्यतायां तु प्रधानत्वालङ्कारत्वयोर्विरोधात् अलङ्कारलक्षणं तत्र मातिप्रसांक्षीदिति उपस्कारत्वेन पुनर्विशेषणीयं न त्वव्यङ्ग्यत्वेन। तथा सति व्यङ्ग्ये उपस्कारकेऽलङ्कारे चाव्याप्तेः। यथा—

अद्वितीयं रुचात्मानं मत्वा किं चन्द्र हृष्यसि।
भूमण्डलमिदं मूढ केन वा विनिभालितम्॥[2]

अत्र व्यङ्ग्यापि उपमालङ्कार एव। कस्यचिद् विदेशस्थितस्य किरणैरात्मानं सन्तापयन्तं चन्द्रं प्रत्येष उक्तिः। अत्र चास्ति मम प्रियायाः कदापि वहि-

१. रसग०, पृ० १६२।
२. काव्यमा० र० ग०, पृ० १७९।

र्ननिर्गतायाः अत एव त्वयाप्यदृष्टाया आननं त्वत्सदृशमिति प्रतीयमाना उपमा मूढपदेन ध्वन्यमानायां चन्द्रविषयायां वक्तृगतायामसूयायामलङ्कारः। एवमन्यत्रापि रसादीनां व्यङ्ग्यानाम् अङ्गतायामलङ्कारत्वं निर्बाधम्। अतः सिद्धमेव रसोक्तेरलङ्कारत्वमुभयोरेव प्राचीनार्वाचीनयोरालङ्कारिकयोर्मतेन।

गुणीभूतव्यङ्ग्यतोऽपि अस्य पार्थक्यं साधितम्। यत आभासतो व्यङ्ग्यत्वेन अङ्गानां रसादीनां गुणादीनां गुणीभूतत्वमप्यायाति। किन्तु उपस्कारकत्वेन विशेषिते सिद्ध्यत्येव पृथक्ता अलङ्काररूपायाः रसोक्तेः गुणीभूताद् रसात्। एवमेव उपस्कारकं विशेषणं उपस्कार्यात् प्रधानाद् वा रसाद् भिनत्ति। अतः साधितमेव रसोक्तेरलङ्कारत्वं विरोधिनः पक्षान् विधूय।

अधुना रसोक्तिमूलकाः सप्त अलङ्कारा विचार्यन्ते। यद्यपि रसभावादयः प्राधान्येन व्यङ्ग्याः सन्त एव रस-भावादिनाम्ना अभिधीयन्ते, किन्तु गौणतायामपि नैते स्वाभिख्यां विजहति। तदा ते गुणीभूतव्यङ्ग्या अलङ्कारपदभाजो वा भवन्ति। प्राचीनास्तु सर्वानेव रसादीन् प्रधानान् अप्रधानान् वा अलङ्कारानेव मन्यन्ते। एषां नये चत्वार एव रसवदाद्यलङ्काराः—रसवद्-भाव-प्रेय-उर्जस्विन्नामकाः। गुणीभूतो रसो रसवद् , भावस्तु प्रेयः, रसाभासभावाभासौ उर्जस्वि, भावशान्तिः समाहितमित्येषामेव पूर्वोषामलङ्कारव्यपदेशः। अतो रसादिचतुष्टयस्यैव रसवदाद्यलङ्कारत्वं युक्तं न भावोदयादीनां प्राचीनैरनुक्तत्वादिति न वाच्यम्, परोत्कर्षत्वस्य अलङ्कारबीजस्य गुणीभूतरसादाविव भावो दयादावपि सत्त्वात्, विनिगमनाविरहेण भावोदयादीनामप्यलङ्कारत्वे बाधाभावात्। तस्मात् सप्तैव रसवदाद्यलङ्कारा रसोक्तिमूलकाः स्वीक्रियन्ते। यतः "प्राधान्ये रसादीनां ध्वनित्वम् गुणीभावे तु रसालङ्कारत्वम्। केचितु प्राधान्य एवैषां रसत्वम्, अन्यथा तु अलङ्कारत्वमेव। रसवदलङ्कारव्यपदेशस्तु अलङ्कारध्वनिव्यपदेशवत् ब्राह्मणश्रमणन्यायात्।[1]

एवं सिद्ध्यति रसोक्तेरलङ्कारता। अतोऽलङ्काराणां त्रिविधः प्रास्थानिको धारात्मको वा विभाग उपपन्नः। सम्प्रति अलङ्काराणां वास्तविकस्य विभागस्याधारः सुदृढो भविष्यति ! यतो हृदयावर्जकाः चमत्कृत्याधायकाः सौन्दर्यसाधका वा अलङ्काराः स्वीक्रियन्त आलङ्कारिकैः। परोत्कर्षत्वमेवैषां बीजम्। एतच्च क्वचित् पदानाम् अर्थानां च स्वभावतो रमणीयविन्यासेन क्वचिच्च प्रस्थानातिरेकिणा वक्रविन्यासेन क्वचन च रसभावादिपोषितेन रसभावाद्यर्थानां विवेचनात्मकेन विनिवेशेन च। एतच्च त्रिविधं परोत्कर्षत्वरूपमलङ्करणबीजं सर्वत्र अलङ्कारेऽनुस्यूतमिति अलङ्कारे त्रिविधमवान्तरप्रस्थानं धारा वानिर्बाधा।

१. का० मा० रस०, पृ० ४५।

अधुना पूर्वदर्शितानां रसवदाद्यलङ्काराणामालङ्कारिकक्रमेण समथनमपि समुपन्यस्यते। इदन्तु पूर्वमेव दर्शितं यद् अलङ्कारप्राधान्ययुगे प्रतीयमानस्यार्थस्य प्रतिपादकाः रसादयो रसवदाद्यलङ्कारतया स्वीकृताः। रसप्राधान्ययुगे च रसवदादीनां शब्दार्थनिष्ठोपकारजननद्वारा रसोपकारत्वाभावान्न वास्तविकयलङ्कारता, किन्तु गौणस्तत्रालङ्कारप्रयोगः। अत एव प्रकाशादौ गुणीभूतव्यङ्ग्यान्तर्गताः। सम्प्रति आलङ्कारिकक्रमेण एषां समर्थनं प्रस्तूयते। यथा भामहस्य काव्यालङ्कारे—

प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम्।
द्विप्रकारमुदात्तं च भेदैः श्लिष्टमपि त्रिभिः॥
रसवद् दर्शितस्पष्टश्रृङ्गारादिरसं यथा।[1]
रसवद् दर्शितस्पष्टश्रृङ्गारादि रसोदयम्।[2]

दण्डिनः काव्यादर्शे—

प्रेयः प्रियतराख्यानं रसवद्रसपेशलम्।
तेजस्वि रूढालङ्कारयुक्तोत्कर्षं च तत्त्रयम्॥[3]

एत एव अलङ्कारा उद्भटीयकाव्यालङ्कारस्य चतुर्थवर्गेऽपि स्वीकृताः। ध्वन्यालोके च 'यत्र प्राधान्येनार्थान्तरस्य वाक्यार्थीभावे रसादिभिश्चारुत्वनिष्पत्तिः क्रियते स रसादेरलङ्कारताया विषयः' इत्युक्तम्। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥

रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्॥[4]

एतेन ध्वनिकारमते रसादिष्वलङ्कारप्रयोगो न भाक्त इति सिद्ध्यति। काव्यप्रकाशे तु—

अन्यत्र प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेय-उर्जस्वि-समाहितादयोऽलङ्काराः। इत्यभिधायैव भावोदय-भावसन्धि-भावशबलतादीनां च गुणीभूतव्यङ्ग्येऽन्तर्भावः स्वीकृतः।

रुय्यकेण अलङ्कारसर्वस्वे 'रसवदादिचतुरलङ्कारेभ्यः पार्थक्येन भावोदयः भावसन्धिर्भावशबलता च पृथगलङ्कार इत्यादिना त्रयोऽलङ्कारा अधिकाः स्वीकृताः तत्परवर्तिभिश्चन्द्रालोक-साहित्यदर्पण-कुवलयानन्दकारैश्चैते सप्ताप्यलङ्कारा वर्णिताः। रस-रसाभास-भाव-भासाभास-भावोदय-भावसन्धि-भावशबलता चेति सप्त अलङ्कारा रसवदादिनाम्ना व्यपदिश्यन्ते। एते भोजमते रसोक्तौ विनिवेश्यन्ते।

---

१. भामहः, काव्या० ३.१,६। २. उद्भटः ४.४।
३. दण्डी २.२७५। ४. ध्वन्या० २.५.६।

इदन्तु स्वभावोक्तेर्विस्तृते विचारे दर्शितम् यद् दण्डी वाङ्मयं स्वभावोक्ति-वक्रोक्तिभेदेन द्विधा विभजते। भोजस्तु स्वभावोक्ति-वक्रोक्ति-रसोक्तिभेदेन त्रिधा। अत्र रसोक्तिर्दण्डिनः समये स्वभावोक्तावेव समाविष्टा आसीदित्यनुमीयते, उभयत्रापि वस्तुनः स्वभावस्यैव वर्णनात्। किन्तु दण्डिनः पश्चात् काव्यदृष्टेः सूक्ष्मतायां वस्तुवर्णनेऽपि प्राप्यते द्वैविध्यं वस्तुसंवादात्मकं हृदय-संवादात्मकञ्चेति भेदात्। एतयोर्वस्तुसंवादकः स्वभावोक्तेर्विषयः, हृदयसंवादात्मकश्च रसोक्तेरिति प्राक् प्रतिपादितम्। अतो दण्डिनो दृष्ट्या स्वभावोक्तिरसोक्त्योरैक्यमेवासीत् यत्र भोजकाले जातो द्विधा विभागः। अस्य समर्थनं कुन्तककृतं रसोक्तेरलङ्कारतायाः खण्डनमपि करोति। यतोऽयं कुन्तको रसमलङ्कार्यमेव मनुते, न कथमप्यलङ्कारम्, स्वभावोक्तिवदत्रापि हृदयसंवादात्मकस्य वस्तुवर्णनस्यैव अलङ्कार्यस्य सत्त्वात्। हृदयसंवादात्मकस्यापि वर्णनस्य वर्ण्यमानत्वेन अलङ्कार्यकोटावेव स्थापनाया औचित्यात्। अतः सिद्धमेव दण्डिदृष्ट्या स्वभावोक्तिरसोक्त्योरैक्यम्। परमेते स्वभावोक्तिधारायामन्तर्भाविताः प्रतीयन्ते तदानीम्। अनन्तरं भोजेनोद्भावितायाः स्वभावोक्त्यतिरिक्ताया रसोक्तिधाराया अभावात् वस्तुचित्तवृत्तिगतत्वेन द्विविधस्य हृदयसंवादस्य स्वभावोक्तावेव स्वीकाराच्च। परं भोजकाले वस्तुसंवादात्मिकायाः स्वभावोक्तेः भिद्यते स्म चित्तवृत्ति-समाधिरूपात्मिका रसोक्तिः। अतो भोजानन्तरं रसोक्तिमूलकानां रसवदाद्यलङ्काराणां रसोक्तावेव विनिवेशः स्वीकार्यः। यद्यपि भोजात्पूर्वमपि ध्वन्यालोककारेण रसभावादीनामङ्गत्वे रसादीनामलङ्कारता स्वीकृता, परं तदा न बभूव स्पष्टोऽलङ्काराणां धारात्मको विभागः, ध्वनेः स्थापनाया एवाग्रहात्।

उक्तपूर्वं यद् रसोक्तिप्रस्थाने केवलं सप्त एवालङ्काराः रसवन्नाम्ना व्यपदिष्टा परिगण्यन्ते। एतेषां स्वरूपे नास्ति विशेषो विवादः, स्याच्चेत् तत्समाधानं रसोक्तिमूलकालङ्काराणां विचार-प्रसङ्गे विधास्यते। केवलमेतेषामलङ्कारालङ्कार्यविषयक एवासीद् विवादो विशेषकठिनो यस्य विस्तरेण कृता मीमांसा। प्राचीननवीनालङ्कारिकयोर्मतेन निरूपितं पारमार्थिकं स्वरूपं रसोक्तेः। अस्याः स्वभावोक्तेः पार्थक्यमपि प्रदर्शितं सूक्ष्मतः। वक्रोक्तेर्भेदस्तु स्पष्ट एव, अतस्तदर्थं प्रयासो न कृतः। काकुश्लेषः—अतिशय-सादृश्यालक्षणा चेति इमान्येव प्रायो वक्रोक्तेराधार-भूतानि व्यावर्तकानि तत्त्वानि, येषां रसोक्तेः प्रायो न भवति अभेदः। तथात्वे रसोक्तेरेव विघातसंभवात्।

किन्तु डा० राघवेन्द्रमहोदयैः भोजकृतस्य शृङ्गार-प्रकाशस्य शोध-प्रबन्धे स्वीकृतमिदं यद् वक्रोक्तेरेवोद्धृता भवेत् रसोक्तिः कालान्तरेऽलङ्काराणां प्रस्थान-विकाशक्रमेण। अन्येऽपि बहव आधुनिका आलोचकाः प्रायः अस्यैव समर्थनं विदधति। किन्तु विचारतो नेदं सङ्गतं प्रतिभाति। सामान्यतो भामहसमये वक्रोक्तेरेव केवलं प्रस्थानत्वमङ्गीचक्रुरालङ्कारिकाः। अत एव भामहो जगाद—

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥[1]

तदनन्तरं दण्डिसमये स्वभावोक्तिरपि प्रस्थानतां प्राप। अत एव दण्डी वक्रोक्त्या सह स्वभावोक्तेरपि प्रस्थानतामङ्गीचक्रे। यथा—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
द्विधा भिन्नं स्वभावोक्ति-र्वक्रोक्तिश्चेति वाङ्मयम् ॥[2]

एवं, क्रमशो विकाशं व्रजत्यलङ्कारप्रस्थाने यथासमयं रसोक्तिमपि धारात्वेन अलङ्कारकुक्षौ प्रवेशयामासुरालङ्कारिकाः। अत एव भोजोऽलङ्कारे त्रिविधामुक्तिं स्वीचक्रे। यथा—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं परिचक्षते ॥[3]

एतास्तिस्रः उक्तयो विकाश-क्रमेण अलङ्कार-प्रस्थाने प्रकाशमापुरिति नास्ति तिरोहितं काव्यशास्त्रेतिवृत्तविदाम्। विकाशक्रममाकलयतामिदमपि प्रत्यक्षं यत् वक्रोक्तेरनन्तरं निर्जगाम स्वभावोक्तिः, ततो जनिं लेभे रसोक्तिः। एष एव क्रमो विकाशविद्भिरैतिहासिकैः समर्थितः।

पूर्वं दर्शिते विकाशक्रमे मनोवैज्ञानिकताऽप्युपलभ्यते। यतोऽलङ्काराणां स्थूलपर्यालोचनाकाल आलङ्कारिकाः झटिति वक्रोक्तिमेवालङ्काराणां प्रस्थानत्वेन मेनिरे तयैवाशेषालङ्काराणां व्यापनात् 'कोऽलङ्कारोऽनया विना' इति असकृदा-वेदनाच्च। एषोऽस्ति आरम्भकालो विकाशस्यालङ्काराणां यत्र भामहस्य विचारः 'कोऽलङ्कारोऽनया विना' इति प्राधान्यं प्राप। ततः परं क्रमशो गाम्भीर्यं सौक्ष्म्यं च गच्छन्त्यामलङ्कारगवेषणायामुदियाय स्वभावोक्तिरपि प्रस्थानरूपिणी। इमां च प्रथमं दण्डी साक्षाच्चक्रे—"स्वभावोक्तिश्च वक्रोक्तिश्चेति वाङ्मयं द्विधेति" वचनात्। एवं क्रमशः पर्यालोच्यमानायां स्वभावोक्तौ स्वत एव द्विविधो वस्तु-चित्त-वृत्त्यात्मकः स्वभावो ज्ञातः। तत्र वस्तुवृत्त्यात्मकः स्वभावो बभूव विषयः स्वभावोक्तेः चित्तवृत्त्यात्मकश्च रसोक्तेरिति। यथा—

"हृदयसंवादो हि वस्तुचित्तवृत्तित्वेन द्विविधः। तत्र स्वभावोक्तौ वस्तुसंवादः प्रदर्शितः।"

एतद्विषयको विशिष्टो विमर्शस्तु स्वभावोक्तिविवेचने विशदीकृत इति तत एवावसेयः। एतेन स्पष्टमिदं यत् स्वभावोक्तेरेव बभूवोदभूति रसोक्तेः, न वक्रोक्तेः, यथा डा० राघवेन्द्रमहोदयैरन्यैर्वाऽभ्यधायि।

---

१. भामहः, काव्या० २. ८५। २. काव्यादर्शः, २. ३६२।
३. सर० क० ५.८।

यथा च रसवन्नाम सर्वालङ्कारजीवितम् ।
काव्यैकसारतां याति तथेदानीं विवेच्यते ॥[1]
रसेन वर्तते तुल्यं रसवत्त्वविधानतः ।
योऽलङ्कारः स रसवत् तद्विदाह्लादनिर्मिते ॥

अनयोः कारिकयोरयमभिप्रायो यद् येन प्रकारेण एष रसवन्नामा अलङ्कारः काव्यैकसर्वस्वतां प्रतिपद्यते, येन च रूपेण सर्वेषामुपमादीनामलङ्काराणां स्फुटीभूतं जीवितं सम्पद्यते तेन रूपेणाधुना लक्षणोदाहरणभेदेन वितन्यते । रसेन शृङ्गारादिना तुल्यं वर्तते स रसवदलङ्कारः। एष चालङ्कारः काव्यस्य रसवत्तां तद्विदाह्लादकारित्वं विदधाति । एवमुपमादिरप्युभयं निष्पादयन् भिन्नो रसवदलङ्कारः सम्पद्यते । यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम् ॥

अत्र स्वावसरसमुचितसुकुमारः स्वरूपयोर्निशाशशिनोः वर्णनायां रूपकालङ्कारः, समारोपितकान्तवृत्तान्तः कविनोपनिबद्धः । स च श्लेषच्छायामनोज्ञविशेषवक्रभावात् विशिष्टलिङ्गसामर्थ्याच्च काव्यस्य सरसतामुल्लासयंस्तद्विदाह्लादमादधानः स्वयमेव रसमासादयत् । अनन्तरं स स्वदृष्टिसमर्थनाय अनेकानि उदाहरणानि ददाति, तेषु कतिपयान्येवात्र समुपन्यस्यन्ते । यथा—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ॥
करौ व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं[1]
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥

अत्र प्रधानवृत्तेः शृङ्गारस्य भ्रमरसमारोपितकान्तवृत्तान्तो रसवदलङ्कारः शोभातिशयमाप्तवान् । 'क्षिप्तो हस्तावलग्नः' इत्यत्र रसवदलङ्कारप्रत्याख्यानमयुक्तम् । सत्यमेतत्, किन्तु विप्रलम्भशृङ्गारता तत्र निवार्यते । शेषस्य पुनस्तुल्यवृत्ताङ्गतया रसवदलङ्कारत्वमनिवार्यमेव । न चालङ्कारान्तरे सति रसवदपेक्षानिबन्धनः संसृष्टि-संकरव्यपदेशप्रसंगः प्रत्याख्येयतां प्रतिपद्यते । यथा—

"अङ्गुलीभिरिव केशसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः ।
कुण्डलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥"

अत्र रसवदलङ्कारस्य रूपकादीनां च सन्निपातः सुतरां न समुद्भासते, तस्य "चुम्बतीव रजनीमुखं शशी" इति उत्प्रेक्षालक्षणस्य रसवदलङ्कारस्य प्राधान्येन निबन्धनम् । तद्गतत्वेन उपमादीनां केवलस्य प्रस्तुतपरिपोषाय परिनिष्पन्नवृत्तेः । यथा—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद् दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरप्यधिकं चकार॥

प्रसादयन्ती रवेरप्यधिकं तापं शरच्चकार इति समयसम्भवः पदार्थस्वभावस्तद्वाचक-वारिद्शब्दं विना प्रतीयमानोत्प्रेक्षालक्षणेन रसवदलङ्कारेण कविना कामपि कमनीयतामधिरोपितः प्रतीत्यन्तरमनोहारिणां सकलङ्कादीनां वाचकानामुपनिबन्धनात् पाण्डुपयोधरेणार्द्रनखक्षताभमैन्द्रं धनुर्दधान इति श्लेषोपमयोश्च तदानुगुण्येन विनिवेशात्। एवं 'सकलङ्कमपि प्रसादयन्ती शरत् परस्याभ्यधिकं तापं चकार' इति रूपकालङ्कारनिबन्धनः प्रकटाङ्गनावृत्तान्तसमारोपः सुतरां समन्वयं सादितवान्। अत्रापि प्रतीयमानवृत्ते रसवदलङ्कारस्य प्राधान्यम्। तदङ्गत्वमुपमादीनामिति पूर्ववदेव[1] सङ्गतिः। एवं रसवदलङ्कारविषये कुन्तकस्य सर्वथा नवीनमेतत् मतं यच्च कैरपि प्राचीनैरर्वाचीनैर्वा न समर्थितम्। अतः कुन्तकस्यास्य मतस्यापि मीमांसा अनिवार्या, येन न जायेत रसोक्तिविषये भ्रमः। अत्र तु केवलं रसोक्तिमूलकेष्वलङ्कारेषु केवलं रसवदलङ्कारस्यैव उदाहरणानि दत्त्वा विचारो विधीयते। अन्ये रसोक्तिमूलका प्रेय-उर्जस्वि-समाहितादयोऽपि रसोक्तिमूलकालङ्कारविचारप्रकरणे विचारयिष्यन्ते, यत्र कुन्तकस्य एतत्सम्बन्धि मतमपाक्रियेत। यथा—

'उपोढरागेण विलोलतारकमि'त्युपरिष्टाद् दर्शिते श्लोके कुन्तको रसवदलङ्कारं मनुते, समुपन्यस्यति चात्र यत् 'श्लोकेऽस्मिन् स्वावसरसमुचितसुकुमारस्वरूपयोः निशाशशिनोर्वर्णनायां रूपकालङ्कारः समारोपितकान्तवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञविशेषवक्रभावाद् विशिष्टलिङ्गसामर्थ्याच्च काव्यस्य सरसतामुल्लासयंस्तद्विदाह्लादमादधानः स्वयमेव रसवदलङ्कारतां समासादयत्।'

कुन्तकस्यैतद् रसवदलङ्कारसम्बन्धि मतं न कैश्चिदपि प्राचीनैरर्वाचीनैर्वा प्रतिपादितं समर्थितं वा। आलङ्कारिकैः स्वीकृतयाऽपि युक्त्या नास्य समर्थनं सम्भवम्। स्वीकृते चास्मिन् सर्वैव अलङ्कारसरणिर्विनश्येत्। अत एव न क्वापि अलङ्कारग्रन्थेषु पूर्वपक्षत्वेनापि मतस्यास्य चर्चा दृश्यते। अत्र तु रसोक्तिविचारे प्रसङ्गतोऽस्य चर्चा क्रियते।

उपोढरागेण विलोलतारकमित्येष श्लोको बहुचर्चितः। अस्य चर्चा बहुभिः प्राचीनैरर्वाचीनैर्वा आलङ्कारिकैः कृता। प्रायः सर्व एवालङ्कारिका अत्र समासोक्त्यलङ्कारं स्वीकुर्वन्ति, न रूपकम्। भामहकालादेव समासोक्तिः रूपकाद् भिन्नैव स्वीकृता स्वतन्त्रा अलङ्कृतिः। भरतसमये तु नासीत्, भरतनाट्यशास्त्रे पठितानां चतुर्णामलङ्काराणां मध्ये केवलं रूपकस्यैवाधिगमात्, न समासोक्तेः। किन्तु भामहानन्तरमेतयोः स्वतन्त्रालङ्कारता अलङ्कारविचारस्यान्तं यावदविच्छिन्नं

१. व० जी०, पृ० १७४–१७७ ( रिज्यूम ३ )

चलति। केवलं कुन्तक एव न स्वीकुरुते समासोक्तेः स्वतन्त्रामलङ्कारतां विच्छित्त्यन्तरं केवलं रूपकेनैव तस्या अपि गतार्थत्वात्। अत एवैतत्प्रसङ्ग एवायं भामहस्य समासोक्त्युदाहरणस्य खण्डनमपि करोति। यथा—

स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः।
जातस्तरुरयं चोच्चैः पातितश्च नभस्वता॥[1]

अत्र तरोर्महापुरुषस्य च द्वयोरपि मुख्यत्वे महापुरुषपक्षे विशेषणानि सन्तीति विशेष्यविधायकं पदान्तरमभिधातव्यम्। यदि वा विशेषणेऽन्वयानुपपत्त्या प्रतीयमानतया विशेष्यः कल्प्यते, तदेवंविधस्य कल्पनस्य स्फुरितं न किञ्चिदस्तीति स्फुटमेव शोभाशून्यता। एवमेव भामहेन समासोक्त्युदाहरणत्वेन प्रस्तुतस्य—

अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।[2]
अहो दैवगतिः चित्रा तथापि न समागमः॥

इति श्लोकस्यापि विचारं विधाय समासोक्तिरस्वीकृता अङ्गीकृता च रसोक्तिः। किन्तु अनयोः श्लोकयोर्न केनाप्यालङ्कारिकेण रसवदलङ्कारः स्वीकृतः, अपितु समासोक्तिराक्षेपो वा। यथा ध्वन्यालोके[3]—

"समासोक्तौ तावत्—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥

इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन प्रतीयते समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात्।

आक्षेपेऽपि व्यङ्ग्यविशेषाक्षेपिणोऽपि वाच्यस्यैव चारुत्वं प्राधान्येन वाक्यार्थ आक्षेपोक्तिसामर्थ्यादेव ज्ञायते। यथा—

अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।
अहो दैवगतिः कीदृक् तथापि न समागमः॥"

लोचनेऽप्यस्यैव समर्थनं कुर्वन्ति अभिनवगुप्तपादाः। यथा—"वामनाभिप्रायेणायमाक्षेपः भामहाभिप्रायेण तु समासोक्तिरित्यमुमाशयं हृदये गृहीत्वा समासोक्त्याक्षेपयोः युक्त्यैकमुदाहरणं व्यतरद् ग्रन्थकृत्।"

अतः कुन्तकस्यैतद् रसवदलङ्कारसम्बन्धि मतं न सङ्गतमालङ्कारिकसम्प्रदायविरुद्धत्वाद् युक्तिराहित्याच्च।

---

१. तत्रैव उ० २, पृ० २१०।

२. व० जी०। ३. ध्वन्या० पृ० १०९–११५ (सटीक लोच०)।

इदन्तु सत्यं यदेवम्भूता व्यङ्ग्यसमर्थका अलङ्कारा गुणीभूतव्यङ्ग्य एव स्थापिता ध्वनिवादिभिरालङ्कारिकैः किन्तु गुणीभूतव्यङ्ग्ये स्वीकृतेऽपि व्यङ्ग्योपहिताः समासोक्ति-विशेषोक्ति-पर्यायोक्त्यादयोऽलङ्कारा रसवदादिभ्यो रसोक्तिमूलकेभ्योऽलङ्कारेभ्यो भिन्ना एव, समासोक्त्यादिषु प्रतीयमानानामप्रस्तुतानां नायकनायिकादिव्यवहाराणां प्रस्तुतार्थापोषकत्वेन वाच्याद् विभाविताद् शृङ्गारादिरसानां निष्पन्दस्य प्रतीतेः रसोक्तिमूलकेषु अलङ्कारेषु च विभावानुभावसञ्चारियोगात् प्रतीयमानानामन्यरसभावादीनामङ्गभूतानां रसभावादीनां न वाच्याद् विभावितात्, अपि तु व्यङ्ग्यादेव सञ्चारिरूपात् रसनिष्यन्दो रसभावादीनां वाच्यत्वाभावेन व्यङ्ग्यतायाः स्वीकारात् ।

एषोऽभिप्रायो-ध्वनिकारदर्शितनयेन प्रदर्शितः। अस्यैव समर्थनं प्रायोऽन्ये प्राचीना नवीना वा आलङ्कारिकाः कुर्वन्ति। अतो हि सर्वैरेव व्यङ्ग्योपेतानां समासोक्तिविशेषोक्तिपर्यायोक्तादीनामलङ्काराणामप्रस्तुतानामर्थानां व्यङ्ग्यत्वेनैक्येऽपि व्यङ्ग्या रसोक्तिमूलका अलङ्कारा भिन्नतयैव वर्णिताः, नैक्यरूपेण, यथा कुन्तकः समासोक्तिस्थले व्यङ्ग्यरूपकादिषु वा रसवदलङ्कारं मनुते। एते सूक्ष्मशेमुषीभाज आलङ्कारिकाः समासोक्ति-पर्यायोक्त्यादिभ्योऽलङ्कारेभ्यो रसोक्तिमूलकानामलङ्काराणां भेदं जानन्ति स्म। यतः समासोक्त्यादिषु प्रतीयमानमप्रस्तुतरूपं व्यङ्ग्यं भवति भिन्नं रसोक्तौ प्रतीयमानाद् व्यङ्ग्यात्। समासोक्त्यादिषु वर्तमानं व्यङ्ग्यं वाच्यतामेव पुष्यति रसोक्तेश्च व्यङ्ग्यमन्यस्य व्यङ्ग्यस्यैव व्यञ्जकमिति भेदः। अन्यच्च समासोक्त्या रसवदलङ्कारस्य तुल्यता न कथमपि संभाव्या, समासोक्तौ नायकनायिकाव्यवहारस्य प्रतीतत्वेन आस्वादस्याभावात्। रसोक्तौ च विभावानुभावसंचारियोगात् रसनिष्पत्तिरिति सिद्धान्तितत्वेन समासोक्ते रसोक्तेश्च भेदस्य स्पष्टतया प्रतीतेः।

कुन्तकस्यैतद् रसवदलङ्कारसम्बन्धि मतमालङ्कारिकसम्प्रदायविरुद्धत्वाद् युक्तिविरोधाच्च नालङ्कारिकाणां मान्यतां प्राप किन्तु अनेनेदं नितान्तं स्पष्टमभूद् यदलङ्कारप्रस्थाने आसन् बह्व्यो धाराः ( Schools ) याभिरन्तः सिक्तो ववृधे भेदोपभेदात्मको व्यापकोऽलङ्कारवृक्षः। प्रारम्भ एता धारा आसन्नतीव स्पष्टाः, अतस्तदास्कन्दितानामलङ्काराणां स्वरूपमपि बभूव प्रातिस्विकं विविक्तं वा। किन्तु कालेन धारासु वर्धमानासु अलङ्कारेषु एतासां दर्शनमभूत् कठिनम्। फलतोऽलङ्कारेषु जायमानो विभागो वर्गीकरणं वा नैतासां धाराणां स्पष्टरूपं बिभर्ति येन वर्गीकरणे भेदोपभेदविचारे च जातं स्वातन्त्र्यमालङ्कारिकाणाम्। अतो मुख्यानां धाराणां ज्ञानेऽपि काठिन्यमभवत्। फलतो धाराणां ( Schools ) परम्परैव प्रायो लुलोप, ववृधे चालङ्कारेषु स्वातन्त्र्यमलङ्काराणां विभागे वर्गीकरणे भेदोपभेदनिर्णये च। अङ्कारविशेषाणां

हानादानयोरपि न कोऽपि निर्धारित आसीत् स्थायी नियमो येन भवेत् परिचयस्तटस्थानाम्। केवलमलङ्कारविशेषस्य समर्थकाः विच्छित्तेरभावात् वक्रोक्त्यभावात् सौन्दर्यविरहाद् वा नालङ्कारता इतीममेव सामान्यं हेतुमुपन्यस्य स्वपक्षं समर्थयामासुः, अन्ये च विरोधिनो नास्त्यत्र विच्छित्तिर्वक्रोक्तिः सौन्दर्यं वेत्युदीर्य तस्य खण्डनमकार्षुः। यथा—हेतु-सूक्ष्म-लेशादीनां वक्रोक्तेरभावं प्रदर्श्य भामहो न स्वीचक्रेऽलङ्कारताम्, किन्तु दण्डी एषां परमं भूषणत्वमङ्गीचकार। एषैव समस्या रसोक्तिमूलकेषु अलङ्कारेष्वपि जागर्ति यस्याः समाधानं विस्तरेण प्रकरणेऽस्मिन् विहितम्। अतोऽलङ्काराणां विश्लेषणार्थपेक्ष्यतेऽनिवार्यतया अलङ्कारप्रस्थानेऽपि धाराणां विमर्शः। धाराविमर्शोऽलङ्कारविचारे प्रौढिमानेष्यति। यतोऽलङ्काराणां विकाशो मूलत एतासां पूर्वदर्शितानां तिसृणां धाराणामाश्रयेणैवाभूत्। विकाशे च न भवति स्पष्टतया आसामधिगम इति।

रसोक्तिविषये आलङ्कारिकेषु जाग्रति चत्वारः पक्षाः, ये किल विस्तरशः प्रकरणेऽस्मिन् प्रदर्शिताः। तत्र केचिदिमान् सप्त रसोक्तिमूलकान् अलङ्कारान् मन्वते। यथा-भामह-दण्ड्युद् भट-रुय्यकाप्पयदीक्षितादयः। अन्ये च एतान् गुणे गुणीभूतव्यङ्ग्य एवान्तर्भूतानङ्गीकुर्वन्ति। यथा—वामन-मम्मटादयः। वामनः कान्तिगुणे रसस्य सत्तां स्वीकुर्वन् न रसान् स्वतन्त्रत्वेन स्वकाव्यालङ्कारसूत्रे वर्णयति। अत एवालङ्कारप्रसङ्गेऽपि तत्र न रसोक्त्यलङ्कारस्य चर्चा समुपलभ्यते। किन्तु गुण एवान्तर्भावो रसोक्तेरित्यनुमीयते। यद्यपि कान्तिगुणप्रसङ्गे नास्या कापि चर्चा समुपलभ्यते, किन्तु कान्तिगुणस्य लक्षणमेवेदं प्रकटयतीति कतिपयेऽनुभिन्वन्ति।

एवं मम्मटोऽपि रसोक्त्यलङ्कारं गुणीभूते व्यङ्ग्य एवान्तर्भावयति। वामनवन्नात्रानुमानमपेक्षते, अपि त्वयं स्पष्टं स्वीकुरुते—

'अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूता.रसादयस्तत्र गुणीभूतव्यङ्ग्य रसवत्प्रेय ऊर्जस्विसमाहितादयोऽलङ्काराः।'[1]

रसोक्तेरन्तर्भावत्वेन मम्मटस्यात्र असहमतिं तर्कयन्ति, परं तन्नोचितं मम्मटस्य ध्वनिकारानुयायित्वात्, ध्वनिकारेण चास्य रसोक्तेः—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।

इति स्पष्टं स्वीकारात्। केचन चेमानलङ्कारान् वर्णयन्तोऽपि न तत्र स्वाभिमत्यं न वा विरोधं विदधति, अपितु 'केचिदाहुर्मनीषिणः' इत्युपसंहृत्य स्वताटस्थ्यमेवात्र प्रकटयन्ति। यद्यप्यत्र न तैर्विरोधो नाभिमत्यं वा स्पष्टं प्रद-

१. का० प्र० उ० ५।

र्श्यते, किन्तु मौनभावादांशिकी पूर्णा वा स्वीकृतिरनुमीयते । यथा चन्द्रालोके जयदेवः **अलङ्कारानिमान् सप्त केचिदाहुर्मनीषिणः ।**

अपरे चतुर्थाश्च ते सन्ति ये नाङ्गीकुर्वन्ति रसोक्तेः अलङ्कारताम्, अपितु शब्दार्थद्वारान्योपकारकत्वाभावादलङ्कार्यतामेव । अत्र मुख्याः सन्ति वक्रोक्ति-जीवितकाराः । एतैर्वक्रोक्तिजीवितस्य तृतीयोन्मेषे विस्तरेण रसोक्तेरलङ्कारतायाः खण्डनमकारि, रसोक्त्यलङ्कारतायाः खण्डने स्वकीयं नवीनं मतमपि दर्शितञ्च ।

एवमेते चत्वारः पक्षाः प्रायो रसोक्त्यलङ्कारविषये प्राप्यन्ते, येषां सर्वेषा-मवसरतश्चर्चा विहिता । अत्र विरोधिनां विस्तरेण खण्डनं समर्थकानां च प्रसङ्गतः स्थापनं कृत्वा विरुद्धैरविरुद्धैर्वा भावैरविच्छिद्यमानाया रसोक्तेरलङ्कारता साधिता । एतेन प्राचीनार्वाचीनयोरालङ्कारिकयोरलङ्कारदृष्टिः प्रसारं प्रभाव-मविरोधं वाधिगच्छेत् । इत्थमेषां त्रयाणाम् अवान्तरप्रस्थानानां धाराणां वा स्वीकारेण अलङ्कारप्रस्थानमभिनवां प्रतिष्ठां प्राप्स्यते । अस्य च सर्वाः समस्याः मुखेन निराकरिष्यन्ते । एषु च रसोक्तेस्तु महत्ता न कस्याप्यविदिता ।

**कामं सर्वोऽप्यलङ्कारः रसमर्थे निषिञ्चिति ।**
**सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥**

इति च अनेकशो विनिवेदनात् । अतो रसोक्तेरलङ्कारता असन्दिग्धं सिद्धा ।

## रसोक्तिमूलका अलङ्काराः

अलङ्कारप्रस्थाने स्वभावोक्ति-वक्रोक्ति-भेदेन त्रिविधा धारा अवान्तरप्रस्थानानि -वा साधितानि । तदाधारेण अलङ्काराणां त्रिविधो विभागोऽपि विधेय इति निर्दिष्टम् । स्वभावोक्ति-वक्रोक्तिमूलकानामलङ्काराणां विचारः प्रागुपन्यस्तः अधुना रसोक्तिमूलका अलङ्काराः प्रसङ्गतो विचार्यन्ते ।

एते रसोक्तिप्रस्थानपरिगणिता अलङ्कारा आलङ्कारिकैः रसवत् नाम्ना-उदाह्रियन्ते । किन्तु अस्माभिस्तु भोजराजमतानुसारम् उक्तेस्त्रैविध्यमुररीकृत्य रसोक्तिनाम्नैव व्यवह्रियन्ते । अत्र रसवत्पदेन सर्वेऽपि रसभावादय सप्त ग्राह्याः । अतो रसवन्नाम्ना रसोक्त्या वा सप्त रसवत्-प्रेय-उर्जस्वि-समाहित-भावोदय-भावसन्धि-भावशबलताख्या अलङ्कारा अभ्युपगम्यन्ते । रसो यत्र रसस्य भावस्य वा अङ्गं भवति, रसान्तरादीनामुत्कर्षाधायकत्वेन न्यग्भूत-चमत्कारित्वं वा प्रपद्यते, तत्र रसवन्नामालङ्कारः । रसस्य भावस्य वा प्राधान्ये तु ध्वनित्वमेव । एवमेव यत्रैको भाव इतरस्य भावस्य रसादेर्वा अङ्गतां गच्छेत् तत्र प्रेयः यत्र रसाभासो भावाभासो वा रसस्य भावादेर्वा अङ्गत्वं प्रतिपद्यते तत्र समाहितमिति । एते चत्वारो मुख्या रसवदलङ्कारा अङ्गीक्रियन्ते, चिरन्तनैः

एषामेव स्वीकारात्। शिष्टाश्च त्रयोऽमुख्याः, चिरन्तनानां निर्देशाभावेऽपि परोत्कर्षत्वस्य वर्तमानत्वेन विनिगमनाविरहाद् रसवदलङ्कारे विनिवेश्यन्ते। एवं भावोदयस्य भावाङ्गत्वे भावोदयः, भावसन्धेर्भावाङ्गत्वे भावसन्धिः, भावशवलतायाश्च भावाङ्गत्वे भावशबलत्वमिति एते त्रयः अलङ्कारास्तत्रैव परिगण्यन्ते। एते सर्वे सप्त रसवदलङ्कारनाम्नैव आलङ्कारिकैर्व्यवह्रियन्ते, रसपदस्य रसभावादीनामुपलक्षणत्वात्।

अत्रत्यो रसवच्छब्दो रसोऽस्यास्ति विग्रहे

भूमनिन्दा-प्रशंसायां नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुवादयः॥

इति प्राशस्त्ये मतुप्-प्रत्ययेन सिद्ध्यति। प्राशस्त्यञ्चात्र रसस्य अन्यरसापेक्षया पौष्कल्यापादनम्। रसश्चात्र रस-भावादीनामुपलक्षणमिति पूर्वमुक्तमेव। अत्र रसवदलङ्कारविचारे रसोक्तिविमर्शे वा प्राशस्त्ये मतुबेवेष्टो न तु कुन्तकेन समर्थिता तुल्यार्थे वतिः। यथा—

रसेन वर्तते तुल्यं रसवत्त्वविधानतः।
योऽलङ्कारः स रसवत् तद्विदाह्लादनिर्मितेः॥[1]

योऽलङ्कारः स रसवत्, इत्यन्वयः। यः किल एवं रूपो रूपकादिः रसवदभिधीयते। किं स्वभावेन रसेन वर्तते तुल्यम्। रसेन श्रृङ्गारादिना च तुल्यं वर्तते। यथा ब्राह्मणवत् क्षत्रियस्तथैव। स रसवदलङ्कारः। कस्मात्? रसवत्त्वविधानतः। रसोऽस्यास्तीति रसवत् काव्यम्, तस्य भावस्तत्त्वम्। ततो रसवत्त्वसम्पादनात् तद्विदाह्लादनिर्मितेश्च तत्काव्यं विदन्तीति तद्विदस्तज्ज्ञाः, तेषामाह्लादनिर्मितेः आनन्दनिष्पादनात्। तथा रसः काव्यस्य रसवत्तां तद्विदाह्लादं विदधाति एवमुपमादिरप्युपमां निष्पादयन् भिन्नो रसवदलङ्कारः सम्पद्यते। यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्॥
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥

अत्र स्वावसरसमुचित–सुकुमारस्वरूपयोर्निशाशशिनोर्वर्णनायां रूपकालङ्कारसमारोपितकान्तवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञविशेषणवक्रभावाद् विशिष्टलिङ्गं सामर्थ्यञ्च काव्यस्य सरसतामुल्लासयन् तद्विदाह्लादमादधानः स्वयमेव रसवदलङ्कारतां समासादितवान्।[2]

एवमेवायं बहून्यन्यान्यपि उदाहरणानि समुपन्यस्य साधयति स्वाभिमतं रसवदलङ्कारस्वरूपम्। किन्तु न तत् संगतम्; युक्तिराहित्यात् अलङ्कारसम्प्रदाय-

१. व० जी० पृ० १७५–१७६ रिज्यूम उन्मे० ३।

२. व० जी० पृ० १७६। रिज्यूम, उन्मे० ३।

विरोधाच्च। यतो हि एवं भूतेषु उदाहरणेषु आलङ्कारिकाः समासोक्त्यलङ्कारमेव मन्वते। प्रस्तुते निशाशशिनोर्व्यवहारे अप्रस्तुतस्य नायक-नायिकाव्यवहारस्य समारोपात् न कथमपि रूपकालङ्कारस्य संभवस्तत्र केवलं प्रस्तुते स्वरूपे प्रस्तुतस्वरूपस्यैवारोपस्यालङ्कारिकैः स्वीकाराच्च। अर्थात् रूपके स्वरूपारोपः, समासोक्तौ च व्यवहारारोपः। अत एव 'एवं च समासोक्तौ प्रकृतव्यवहारारोपः, रूपके तु विशेष्ये प्रकृते प्रकृतरूपारोप'[१] इति उद्योतकारस्य कथनं संगच्छते। अतः कुन्तकाभिमता तुल्यार्थिका वतिर्नात्र मान्या, तथात्वेऽलङ्काराणां व्याकुलीभावप्रसंगात्। सर्वथा अत्र रसवदलङ्कारे प्राशस्त्यार्थको मतुवेवेष्टः, तदैव रसवदलङ्कारस्य स्वतन्त्रस्थापनया सह अन्येषां पर्यायोक्तसमासोक्त्यादीनां व्यङ्ग्योपेतानामलङ्काराणां स्वातन्त्र्यं स्यादक्षुण्णम् अन्यथा न सिद्ध्येद् रसभावादीनां गुणीभूतत्वेऽपि अलङ्कारता, भवेच्च विषयापहारः सर्वेषां तेषां व्यङ्ग्योपेतानां समासोक्ति-विशेषोक्ति-पर्यायोक्तादीनामलङ्काराणां परस्परभिन्नतया सर्वेषामालङ्कारिकाणां स्वतन्त्रालङ्कारताभिमता। अन्यच्च, न केवलमेतेषामेव, अपि तु सर्वेषामेव तेषामलङ्काराणां येषु व्यङ्ग्यं भवति वाच्ये गुणीभूतम्।

एतेन गुणीभूतव्यङ्ग्यस्य भेदभूतेषु अपराङ्गव्यङ्ग्य-वाच्यसिद्ध्यङ्गव्यङ्ग्याऽस्फुटव्यङ्ग्येषु येषामलङ्काराणामन्तर्भावः स्वीक्रियते, तेषां सर्वेषामेव विषयापहारः प्रसज्येत। केषाञ्चन निरलङ्कारता भवेत्, केषाञ्चिच्च केवलं रसवदलङ्कारता यथा कुन्तको मनुते, न कथमपि स्वतन्त्राऽलङ्कारता यथा अलङ्कारसम्प्रदायसिद्धा।

सम्प्रति केऽलङ्कारा अपराङ्गव्यङ्ग्ये के वाच्यसिद्ध्यङ्गव्यङ्ग्ये के चास्फुटव्यङ्ग्येऽन्तर्भाव्यन्ते ध्वनिसम्प्रदायसमर्थकैरालङ्कारिकैरिति प्रदर्शयितुं श्रीमतामभिनवगुप्तपादानां लोचनस्योदारहणान्येव समुपन्यस्यन्ते येन गुणीभूतालङ्कारा अनायासेन ज्ञायेरन्—

अतिरस्कृतवाच्येभ्योऽपि शब्देभ्यः प्रतीयमानस्य व्यङ्ग्यस्य कदाचिद् वाच्यप्राधान्येन सह काव्यचारुत्वापेक्षया गुणीभावे सति गुणीभूतव्यङ्ग्यता। यथोदाहृतम्-'अनुरागवती सन्ध्या' इत्येवमादि तस्यैव स्वयमुक्त्या प्रकाशीकृतत्वेन गुणीभावः, यथोदाहृतम्-संकेतकालमनसम् इत्यादि। रसादिरूपव्यङ्ग्यस्य गुणीभावो रसवदलङ्कारे दर्शितः। तत्र च तेषामाधिकारिकवाच्यापेक्षया गुणीभावो विवहनप्रवृत्त-भृत्यानुयायिराजवत्। व्यङ्ग्यालङ्कारस्य गुणीभावे दीपकादिर्विषयः। अत्र गुणीभूतस्य दीपकस्य रसभावादेर्वा नालङ्कारता कुन्तकस्याभिमता, अपि त्वलङ्कार्यतैव, वर्ण्यमानत्वेन अलङ्कारत्वात्। एवमेतयोः अलङ्कारतैव उच्छिद्यते। वाच्यसिद्ध्यङ्गव्यङ्ग्यार्थं यथा—

---

१. का० प्र०, प्रदी० उद्यो० पृ० ४७७।

येषु चालङ्कारेषु सादृश्यमुखेन तत्त्वप्रतिलम्भः, यथा रूपकोपमातुल्ययोगिता-निदर्शनादिषु तेषु गम्यमानधर्ममुखेनैव यत्सादृश्यं तदेव शोभातिशालि भवतीति सर्वेऽपि चारुत्वातिशययोगिनः सन्तो गुणीभूतव्यङ्ग्यस्यैव विषयाः ।'[1]

उपमा हि यथा 'गौस्तथा गवय' इति, रूपकं 'खलेवाली यूपः' इति, दीपकं 'गामश्वमिति', सन्देहः 'स्थाणुर्वा स्यादिति', अपह्नुतिः 'नेदं रजतमिति', तुल्ययोगिता 'स्थाघ्वोरिच' इति, अतिशयोक्तिः 'समुद्रकुण्डिका' इति एवमन्यत् । न चैवमादि काव्योपयोगीति गुणीभूतव्यङ्ग्यतैवात्र अलङ्काराणां मर्मभूता ।''[2]

एते दर्शिताः सर्वेऽप्यलङ्काराः कुन्तकनयेन रसवदलङ्कारेऽन्तर्भावयितुं शक्यन्ते । एवमेव अस्फुटव्यङ्ग्य-सन्दिग्धाप्राधान्यव्यङ्ग्यतुल्यप्राधान्यव्यङ्ग्येषु गुणीभूतव्यङ्ग्येष्वप्यन्तर्भूता गुणीभूतव्यङ्ग्या अलङ्कारा अप्युच्छिद्येरन् । अतो न कथमपीदं कुन्तकमते सङ्गतमिति ।

अस्य मतस्य निराकरणं तु विस्तरेण रसोक्तिस्थापनावसरे सम्पादितम्, विस्तरभिया नेह प्रतन्यते । केवलं रसवदलङ्कारस्य अतिव्याप्तिमव्याप्तिं वा निराकर्तुमेव एतदुक्तमिति ।

अधुना रसोक्तिमूलकानां सतामपि अलङ्काराणां विशदविवेचनात् प्राक् तेषां रसभावादीनां स्वरूपमपि प्रसङ्गोपात्ततया रससिद्धान्तपद्धत्या दिङ्मात्रं प्रदर्श्यते, येन रसभावादीनामाकलने स्यात् सौकर्यम् ।

प्रथमं स्थायिभावा निरूप्यन्ते, ये विभावानुभावव्यभिचारिभिः काव्ये श्लोकानुसन्धानप्रतीतैः, नाट्ये च अभ्यासपाटवनिर्वर्तितवाचिकाङ्गिकाद्यभिनयैश्च अभिव्यञ्जिताः सामाजिकनिष्ठाः रत्यादिस्थायिभावतां गता रसतामापद्यन्ते । यथा—

"रतिः शोकश्च निर्वेदक्रोधोत्साहाश्च विस्मयः ।
हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ॥

एत एव नव स्थायिभावाः । तत्र आप्रबन्धं स्थिरत्वादमीषां भावानां स्थायित्वम् । न च चित्तवृत्तिरूपाणामेषामाशुविनाशित्वेन स्थिरत्वं दुर्लभम्, वासनारूपतया स्थिरत्वं तु व्यभिचारिष्वतिप्रसक्तमिति वाच्यम्; वासनारूपाणाममीषां मुहुर्मुहुरभिव्यक्तेरेव स्थिरपदार्थत्वात् । व्यभिचारिणां तु नैव तदभिव्यक्तैर्विद्योतप्रायत्वात् । यदाहुः—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्याशु स स्थायी लवणाकरः ॥

---

१. ध्वन्या० लोच०, ३.३६, पृ० ४७० ।

२. तत्रैव, ३.३६, पृ० ४७२ ।

चिरं चित्तेऽवतिष्ठन्ते सम्बद्ध्यन्तेऽनुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ॥

अत्र चिरमिति व्यभिचारिवारणाय । तथा—

सजातीयैर्विजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायीभाव उदाहृतः ॥

केचित्तु रत्याद्यन्यतमत्वं स्थायित्वमाहुः । तन्न; रत्यादीनामेकस्मिन् प्ररूढेऽन्यस्याप्ररूढस्य व्यभिचारित्वोपगमात् । प्ररूढत्वाप्ररूढत्वे बह्वल्पविभावजत्वे । तदुक्तं रत्नाकरे—

रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः ।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ॥"[1]
विरुद्धा अविरुद्धा वा यैस्तिरोधातुमक्षमाः ।
आनन्दाङ्कुरकन्दोऽसौ भावः स्थायिपदास्पदम् ॥[2]

एवं भरतमुनिना विरुद्धाविरुद्ध-सजातीय-विजातीयभावान्तराऽतिरस्कृताऽनन्द-सूक्ष्मावस्थावत्त्वेन लक्षिताः स्थायिनो नाम भावाः । तेषां चेतोवृत्तिविशेषाणां कारण-कार्य-सहकारिणो विभावानुभाव-व्यभिचारिशब्दैः काव्ये नाट्ये च प्रतिपाद्यन्ते । तद्यथा—रतिर्नाम स्थायिभावः, तस्याः कारणानि लोकसिद्धानि तरुणनायकरहोदेशावस्थान-कोकिलालाप-माकन्द-मन्दमारुत-चन्द्रोदय-मधुकर-लतागृह-वापी-जलदस्तनितादीनि । तत्कार्याणि च दर्शन-स्पर्शनोपगूहन-चुम्बन-भुजवेल्लनादीनि । सहकारिणो निर्वेदादिभेदैस्त्रयस्त्रिंशत् । यथा—

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च ॥
सुप्तिर्विबोधो हर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव विकल्पश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥[3]

एते यथासम्भवं नवानामपि स्थायिनां सहकारिणः । प्रकृते रतिरूपश्शृङ्गारस्थायिनः औत्सुक्य-विस्मय-हर्षादयो व्यभिचारिणः । अनयैव दिशा रसान्तराणामपि

---

१. रसगं० पृ० ३ -३१ । २. सा० द० (लक्ष्मी-टीका) ३ परि० पृ० १८१ ।
३. का० प्र०, ४ उल्ला०, कारि० ३१—३४ ।

विभावादयो दशरूपक-रसार्णवसुधाकर-भरतनाट्यशास्त्रादि-प्रबन्धानुसारेण उन्नीयाः। यतो 'विभावानुभावसञ्चारियोगाद् रसनिष्पत्तिरि'ति भरतसूत्रं रसनिष्पत्त्यथ विभावादीनां योगमनिवार्यं मनुते। रसस्य शरीरं ( Physiology ) चर्वणा ( Psychology ) आनन्द-रूपता ( Philosophy ) चेतीदं सर्वं स्वतन्त्रस्य शोधप्रबन्धस्य विषय इति नेह विस्तरेणोपन्यस्तम्। रसवदलङ्कारस्य वर्णनं रस-निष्पत्तिं विना न संभवेदतः संक्षेपतो रसनिष्पत्तेः साधनान्येवात्र दर्शितानि। यतो विभावादिभिर्निष्पन्नाः रसभावादय एव अन्यरसभावादीनामङ्गत्वे रसवदलङ्कारत्वं प्रपद्यन्ते। एतद् विषये विचारस्तु रसोक्तिप्रकरणे विस्तरेण प्रागुपन्यस्तः।

सम्प्रति रसोक्तिमूलकाः सप्त रसवदाद्यलङ्काराः सलक्षणमुदाह्रियन्ते, येन रसोक्तिधारा स्पष्टतामधिगच्छेत्।

तत्र रसवल्लक्षणं यथा—

रसे रसाङ्गे भावाङ्गेऽयेष्वाहू रसवद् बुधाः।[1]

अस्य उदाहरणम्—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥[2]

अत्र भूरिश्रवसश्छिन्नं हस्तं विलोक्य तद्वधूनां विलाप इति करुणो रसः। पीनस्तनविमर्दनत्वादिस्मरणोद्दीपितेन विप्रलम्भशृङ्गारः करुणास्याङ्गम्। तेन चात्र रसवदलङ्कारः। यथा वा—

सज्यधनुर्गुणनिर्गतशरधारापातधूतया तु दवम्।
रघुतनयमुपजुगूहे पुलकिततनुरवनिजा जनस्थाने॥[3]

अत्र सीतायाः श्रीरघुनन्दनविषयकसम्भोगशृङ्गारस्य तद्गतवीररसोऽङ्गम्। एवमन्यरसानामङ्गत्वे रसान्तराणि समुन्नीय रसवदलङ्कारोदाहरणान्युप-बृंहणीयानि।

भावो नाम विभावानुभावाभिव्यञ्जितो निर्वेदादिरूपस्त्रयस्त्रिंशद्भेदः। एष च पूर्वं दर्शित एव। देवता-गुरु-शिष्य-द्विज-पुत्र-नृपादौ अभिव्यज्यमाना रतिश्चापि भाव एव। एवं चतुस्त्रिंशद् भावाः। एतेन वात्सल्याख्यं पुत्रालम्बनं रसान्तरमिति परास्तम्।

रसस्य भावाङ्गत्वं यथा—

अन्योन्याश्लिष्टाङ्कमन्योन्यविलासविनशिताऽन्योन्यम्।
वृषगिरि-कुटुम्बमिथुनं विहरतु नः स्वान्तनाम्नि शुद्धान्ते[4]॥

१. अलं० मणि०, भा० ४, पृ० ३। २. महा भा० स्त्री० प० २४।१९।
३. अलं० मणि०, भा० ४ पृ० ३। ४. तत्रैव, भा० ४, पृ० ४।

अत्र कविगत-दिव्यदम्पतीविषयकरतिभावस्य तद्गतश्रृङ्गाररसोऽङ्गम् । यद्यप्यत्र रसभावमापन्नस्य अखण्डब्रह्मानन्दसहोदरस्य विभावादिपरामर्शजीविताबधेरङ्गता न सङ्गता प्रतिभाति; तथापि रसस्थायिभावस्याङ्गतया रसाङ्गत्वोपचार इत्याहुः । यथा वा—

भवता शमिते समितौ दशवदने देवकृतजगत्कदने ।
दुन्दुभिरतिवेलाद्भुतकोलाहलशबलितोऽनदन् मरुताम् ॥[1]

अत्र रघुनन्दनविषयकस्य त्रिदशगतरतिभावस्य तद्गतवीररसोऽङ्गम् ।

प्रेयोऽलङ्कारो यथा—

यदि भावरसाङ्गत्वे भावस्य प्रेय इष्यते ।[2]

तदुदाहरणम्—

सा मनसि सन्निधत्तां तामरसनिकेतना रुचां विततिः ।
प्रत्यष्ठापि ययैव हि नित्यं श्रीवेङ्कटेश्वरैश्वर्यम् ॥[3]

अत्र श्रीविषयकरतिभावस्य श्रीनिवासविषयकरति भावोऽङ्गम् ।
भावस्य रसाङ्गत्वं यथा—

वाणीपतिसनकादिमवाङ्मनसां विषयभूम्नि शुभधाम्नि ।
व्योम्नि परमे रमेश्वर वर्तसयिष्ये कदाब्जम् ॥[4]

अत्र कविगतशान्तरसस्य कदेति सूचितश्चिन्ताख्यो व्यभिचारिभावोऽङ्गम् ।
उर्जस्विनामालङ्कारो यथा—

भावाङ्गतां रसाभासो भावाभासोऽथवाऽश्नुते ।
यदा तदेयमूर्जस्वि नामालङ्कृतिरुच्यते ॥[5]

अत्र रसाभासो नाम रत्यादेरनौचित्येन प्रवृत्तिः ।

अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ॥

इति लक्षणात् । तदुदाहरणम्—

वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः ।
त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम् ॥[6]

---

१. अ० म० हा०, भा० ४ पृ० ५ । २. तत्रैव पृ० ६ ।
३. तत्रैव; पृ० ७ । ४. तत्रैव पृ० ७ ।
५. अ० मणि०, भा० ४, पृ० ८ ।
६. सा० द० लक्ष्मी टीका १० परि, पृ० ८३१ ।

अत्र शृङ्गाराभासो राजविषयकरतिभावस्याङ्गम्। एवं भावाभासोऽपि। समाहितं पुनः भावशान्तेर्भावाङ्गत्वेऽलङ्कारः। तदुक्तम्—

समाहितं भावशान्तेर्भावाङ्गत्वे त्वलङ्कृतिः।[1]

तदुदाहरणम्—

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणेक्षणात्॥

अत्र मदाख्यभावस्य प्रशमो राजविषयकरतिभावस्याङ्गम्।

एवमेते चत्वारो रसवदलङ्काराः चिरन्तनैः स्वीकृताः सोदाहरणा निरूपिताः। अवशिष्टाश्च त्रयो रुय्यक-जयदेव-विश्वनाथाऽप्पयदीक्षितादीनामभिमता इति अत्रैवोदाह्रियन्ते—

भावानामुदय उद्गमावस्था भावोदयः। द्वयोर्विरुद्धयोर्भावयोः सन्धिः परस्परस्पर्धा भावसन्धिः। 'भावसन्धिस्तु तुल्यानां भावानां व्यङ्ग्यता यदि' इति तल्लक्षणात्। भावानां पूर्वपूर्वोपमर्देन प्रवृत्तिः भावशबलता, 'पूर्वपूर्वोपमर्देन तेषां शबलता मता' इति तल्लक्षणात्। एवं भावोदय-भावसन्धि-भावशबलतानां त्रयाणामलङ्काराणां पराङ्गत्वे तदाख्या एवालङ्काराः। भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः[2] इति लक्षणात्। क्रमेणोदाहरणम्—

मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः।
श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विषमां दशाम्॥

अत्र त्रासोदयो राजविषयकरतिभावस्याङ्गम्।

जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सुका।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा॥

अत्रौत्सुक्य-लज्जयोश्च सन्धिर्देवताविषयकस्य रतिभावस्याङ्गम्।

पश्येत् कश्चिच्चल चपल रे का त्वराऽहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या काचित्फलकिसलयान्याददानाऽभिधत्ते॥

अत्र शङ्काऽसूया-धृति-स्मृति-दैन्य-विबोधौत्सुक्यानां शबलता राजविषयक रतिभावस्याङ्गम्।

एवमेते सप्तापि रसोक्तिमूलका रसवदादयोऽलङ्काराः सोदाहरणं निरूपिताः। अत्र रसादिरलङ्कार्यो भवति, न त्वलङ्कारः, तस्य व्यङ्ग्यभूतस्य रसादेः शब्दार्थ-

१. अ० म०, भा० ४ पृ० ९। २. सा० द०, १० परि०, पृ० ८३८।

द्वारान्योपकारकत्वासम्भवान्नालङ्कारता युक्ता इति तु न वाच्यम्; प्राचीनाचार्यैरेवंभूते स्थलेऽप्यलङ्कारतायाः स्वीकारात्। ध्वनिकारमते तु रसादीनां गुणीभूतत्वे रसालङ्कारः स्वीकृत एव। यथा—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥[1]

एवमत्र रसोपकारकत्वमलङ्कारत्वमिति यथा कथञ्चिल्लक्षणं स्वीकृत्य रसवदादिष्वपि लक्षणसमन्वयः कार्यः। यद्यप्येतल्लक्षणं गुणेऽतिव्याप्तम्, तथापि गुण भिन्नत्वं निवेश्यं रसवदलङ्कारस्वीकारात्।

एवमियं रसोक्तिधारा सर्वासु स्वभावोक्ति-वक्रोक्ति-रसोक्तिधारासु ग्राहिणी स्वीक्रियते। अत एव भोजः—

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं परिचक्षते॥[2]

एवमियं रसवदलङ्कारता रसोक्तिर्वा रसभावादीनामङ्गतायामेव अङ्गीक्रियत आलङ्कारिकैः, न कथमपि रसादीनां प्राधान्ये। तथात्वे तु ध्वनेरेवाङ्गीकारात्। यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥[3]

अत्र विप्रलम्भशृङ्गारस्य प्राधान्यान्नालङ्कारता। अत एव मम्मटोक्तिरपि- "रसस्य प्राधान्यान्नालङ्कारता" इति सङ्गच्छते।

न चात्र कथनमेतदसङ्गतम्, मम्मटभट्टैः रसालङ्काराणामलङ्कारविचारप्रसङ्गे दशमोल्लासे अवर्णनादिति शङ्क्यम्। 'एते रसवदाद्यलङ्काराः'[4] इति तैरेव पञ्चमोल्लासे गुणीभूतव्यङ्ग्यनिरूपणप्रसङ्गे स्वीकारात्।

यत्र चैतेषामङ्गता, तत्रालङ्कारता तु स्वीकार्यैव। यथा—

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः॥

---

१. ध्वन्या०, २.५। २. भोजः, स० क०, ५.८।
३. का० प्र० (वाम०) उल्ला० १, पृ० १७।
४. तत्रैव, का० प्र०, उल्ला० ५, पृ० २०१।

नन्वत्र बाहुमात्रसाहाय्यात् रक्षःक्षयकरणरूपेण अनुभावेनाभिव्यक्तस्य उत्साहस्यैव चमत्कारित्वाद् वीररसः शङ्क्यः, उत्साहेनोत्कर्षितेन रामेण अरण्यस्येवोत्कर्षकारित्वाद् वीररसस्यात्र अङ्गतैव न प्रधानता। अतो रसवदलङ्कारः।

केचन अलङ्कारसर्वस्वकारादयो नैवंविधे वस्तुनो रसादीनामङ्गत्वे रसवदलङ्कारमुररीकुर्वन्ति। रसादीनां रसभावादीनामेवाङ्गत्वे एव रसवदलङ्कारस्वीकारात्। अतो रसादीनां वस्तुनोऽङ्गत्वे द्वितीयमुदात्तालङ्कारमङ्गीकुर्वन्ति। परं चिरन्तना भामहदण्डयुद्भटादयस्तु उभयत्रैव प्राधान्याप्राधान्ययो रसादीनामलङ्कारतामेव संगिरन्ते सर्वेषां काव्यतत्त्वानामेभिरलङ्कारप्राधान्यमङ्गीकुर्वाणैरलङ्कारतयैव व्यपदेशात्।

एवं प्राचीनार्वाचीनोभयविधालङ्कारिकाणां दृष्टिभेदेनाभ्युपगता रसवदादीनामलङ्कारता। रसवदादीनां केवलमलङ्कार्यत्वमेवाङ्गीकुर्वाणः कुन्तको नैषां रसभावादीनामुररीकरोति कथमपि अलङ्कारताम्। अस्यैतन्मतं विस्तरेण रसोक्तिधाराप्रकरण एव प्राङ्निराकृतम्। अत्र तु रसोक्त्यलङ्कारनिरूपणप्रसङ्गे रसालङ्कारदृष्टेः स्पष्टतार्थमेव पुनरपि तत् सङ्केतो विहितः।

इत्थमलङ्कारप्रस्थाने प्रमाणपुरस्सरं समुपन्यस्तासु तिसृषु प्रधानधारासु यथायथं सङ्कलिता अलङ्काराः सोदाहरणं सोपपत्तिकञ्च प्रदर्शिताः। तेषामलङ्काराणां रसवदलङ्कारा मुख्याः, येषामुपस्कारार्थमेव अवशिष्टस्वभावोक्तिवक्रोक्त्योः परिगणिता अलङ्कारा विनियुक्ता भावादीनां सौकर्येण सौष्ठवेन च बोधार्थं विभावनार्थं वा प्रधानान् रसान्तरान् अलङ्काराणामुपयोगात्। अत एव यदा रसभावादयोऽपि विभावयन्ति, सुखेन सहृदयहृदयपथं प्रापयन्ति, तदैतेऽपि अलङ्कारपदवीं प्रपद्यन्ते। इत्थं स्वभावोक्ति-वक्रोक्ति-रसोक्तिधारासु परिगणितानामलङ्काराणां तद्धारानुप्राणितं प्रातिस्विकं विविक्तं वा स्वरूपं धाराणां विकासक्रमेण समुपन्यस्तम्। अर्थात् स्वभावोक्तिधाराया विकासं विस्तरतः सन्निरूप्य तदनन्तरं तन्निबन्धनतया स्वभावोक्तिमूला त्रिंशदलङ्काराः खण्डनमण्डनात्मकविधिना सविस्तरं विविच्य स्वभावोक्तिधारामूलकालङ्कारविचारे समुपन्यस्ताः। एवमन्यत्रापि वक्रोक्तिरसोक्तिधारयोः सङ्कलिता अलङ्कारास्तदपेक्षया संक्षेपेण सङ्कीर्तिताः। यत एतयोः संस्कृतसमालोचनाया बाहुल्येन स्पष्टतया च प्रचाराधिक्यात्। स्वभावोक्तिधाराप्रवाहिणोऽलङ्काराश्चातीव विवादग्रस्ताः अतस्तेऽत्यादरेण विशदं विचारिताः। प्रायस्तत्र तत्र प्रत्येकस्यालङ्कारस्य विमर्शेन सह तदनुप्राणयितृत्वेन तन्निष्ठं स्वभावोक्तिमूलकत्वमपि प्रसाधितम्। तथा च प्रसङ्गतो वक्रोक्तिमूलकालङ्कारैः सह यथापेक्षितं तेषां तुलनात्मकमध्ययनमपि समुपन्यासि, येन स्वभावोक्तितत्त्वं तन्मूलकेषु सर्वेष्वपि अलङ्कारेषु समनुस्यूतं समुन्मीलितं स्यात्। फलतश्च तत्प्रातिस्विकं स्वरूपमपि वक्रोक्तिरसोक्तिभ्यां व्यावृत्तं भवेत्।

यद्यपि सर्वथा वक्रोक्ति-रसोक्त्यनास्पृष्टं स्वभावोक्तेर्विविक्तं स्वरूपं दुर्लभम्। एवमेव वक्रोक्तिरसोक्त्योरपि स्वभावोक्तितो मिथो वाऽनास्कन्दितं प्रातिस्विकं रूपं व्यावर्तयितुमशक्यम्, कोऽलङ्कारोऽनया विना इति भामहोक्त्या सर्वेषामेवालङ्काराणां वक्रोक्तिगर्भत्वात्। तथापि 'प्राधान्येन व्यपदेशा भवन्ती'ति न्यायमनुरुन्धानैः संस्कृतसमीक्षकैः समुद्भावितानां त्रिधाराणामाधारभूतानामासां तिसृणां स्वभावोक्ति-वक्रोक्ति-रसोक्त्यभिधानामुक्तानां साक्षात् परम्परया वातिसूक्ष्मतया पृथक् विवेचनं व्यधायि। तस्यैवोपबृंहणमेतस्य शोधप्रबन्धस्य मौलिकता। यल्लाभार्थं वाग्विभवशून्येनापि प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामन इति रीत्या प्राचीनाचार्याणां पन्थानमनुसरता मयाऽपि साहसः कृतः।

अनेनालङ्कारदृष्टिरपि सुबोधतामवगाहेत। अन्यथा अलङ्कारप्रस्थानगर्भेऽव्यक्तरूपेण अलङ्काराणामादित एव प्रवहन्तीनामासां तिसृणां वर्तमानानां धाराणां परिज्ञानप्रयासोऽपि व्यर्थतां व्रजेत्। यत एतास्तिस्रो धारा इत्थं परस्परमविनाभावेन प्रवहन्ति यदासां पार्थक्यप्रतीतौ स्वभावतयैवापेक्ष्यते विशेष आयासः। एतासां प्रातिस्विकं स्वरूपं व्यष्टिभावो वा क्वचिदलङ्कारसामान्यस्वरूपे वक्रोक्तौ अतिशयोक्तौ वा वारिधौ कल्लोला इवोन्मग्नमुपलभ्यते क्वचिच्च निमग्नम्। यथा यथासंख्याऽनुमानहेत्वादिष्वलङ्कारेषु स्वभावोक्तिर्यथात्मानं प्रकाशयति, न तथा दीपक-सहोक्ति-काव्यलिङ्गादिषु। ईदृशेषु स्थलेषु कुत्रचिद् वक्रोक्तिः स्वभावोक्तिमधिकमास्कन्दति, कुत्रचिच्च अल्पम्। अत्र प्राधान्येन व्यपदेशा भवन्तीति विधिमनुसृत्य स्वभावोक्तिवक्रोक्त्योर्विषयविभागो विधेयः। एतदेव प्राग् विनिर्दिष्टं काठिन्यं स्वभावोक्तिरसोक्त्योरपि विषयविभागे प्रायः प्राप्यते। अतस्तत्रापि पूर्वप्रदर्शित एव पन्था अनुसर्तव्यः। किन्त्वदोऽलङ्कारेषु प्रायः प्राप्यमाणं काठिन्यं स्वभावोक्ति-रसोक्तिविषयविभागापेक्षया वक्रोक्तिस्वभावोक्ति-विषयविभागेऽधिकमुद्वेजयति समालोचकम्। अतः सुमेधसोऽपि समीक्षका अत्र संशेरते।

# तृतीयो भागः

१. अलङ्कारस्य नवीनप्रस्थानानि

तद्भित्तयश्च

२. अलङ्कारे प्रस्थानत्रैविध्यस्थापनम्

## प्रथमोऽध्यायः

# अलङ्कारस्य-नवीनानि प्रस्थानानि तदाधारभूता भित्तयश्च

अलङ्काराणां विकासवर्गीकरणप्रकरणे प्राचीन-मध्य-नव्यभेदेन अलङ्कारस्य कालविभागो दर्शितः। तत्र दर्पणकारविश्वनाथपर्यन्तं मध्यकाल-परम्परा प्रवहतीत्यपि प्रदर्शितम्। अतः प्राधान्येनास्यानुयायिनो विद्याधर-रूपगोस्वामि-अप्पयदीक्षित-प्रभृतयोऽपि मध्यकालान्तःपातिन एव विज्ञेयाः। मध्यकालोऽयं ध्वन्यालोककारमारभ्य अभिनवगुप्त-मम्मट-विश्वनाथादिद्वारेण अप्पयदीक्षितपर्यन्तमायतते। अस्मिन् काले ध्वनेरेव प्राधान्यम्। अस्य विरोधिनः कुन्तक-महिमभट्ट-धनिकादयोऽपि न ध्वनितत्त्वं प्रत्याख्यान्ति, अपितु तस्य व्यङ्ग्यताम्। केचन अभिधया (कुन्तकादयः) परे च अनुमानेन (महिमभट्टाः), अन्ये च भोगाख्यव्यापारेण (धनिकादयः) ध्वनेः प्रतिपत्तिं समर्थयन्ति। एते ध्वनिमङ्गीकुर्वन्तोऽपि तत्प्रकाशनप्रकारे भिद्यन्ते। तत्र कुन्तकोऽलङ्कृतिरूपायां वक्रतायां ध्वनिमन्तर्भाव्य अलङ्कारस्य प्राधान्यं शंसति, महिमभट्ट-भट्टनायक-धनिकादयस्तु रसस्यैव प्राधान्यमभ्युपगच्छन्ति। एवं ध्वनित्वेन रसालङ्कारयोस्तुल्यप्राधान्यं नैतेभ्यो रोचते। अतोऽभीष्टेऽपि ध्वनौ पर्यवसाने न तेषामैकमत्यम्। अत्र कुन्तकस्यालङ्कारातिशयत्वमभिप्रेतं ध्वनेर्वक्रतायामन्तर्भाव्यत्वात्, वक्रताया श्चालङ्कृतिरूपत्वात्। शिष्टानां महिमभट्टादीनां तु रसस्यैव प्राधान्यमभीष्टम्। प्राधान्यमूलक एव मतभेदः। इत्थं रसालङ्कारयोः प्राधान्याप्राधान्यविवेक एवाशेषस्य प्रस्थानविमर्शस्य हृदयम्। इदमेवालङ्काराणामवान्तरप्रस्थानेष्वपि व्यावर्तकरूपेण प्रतिफलति।

ध्वनिकृता तु प्रतीयमानार्थमुद्भाव्य तस्यैव च सामान्यतया प्राधान्यमङ्गीकृत्यैष विवाद उपसंहृतः, स्थापिता चालङ्कारसरणौ सुदृढा व्यवस्था। व्यङ्ग्यप्राधान्यरूपेण उभयोरपि रसालङ्कारयोः प्राधान्यस्य स्वीकारादगङ्गत्वे चोभयोरलङ्कारताया अङ्गीकाराच्च। एवं ध्वनेरन्तःपातितया विजृम्भमाण एष रसालङ्कारविवेकोऽलङ्कारशास्त्रे नव्यैरालङ्कारिकैरात्मसात्कृतः। अनेनैव हेतुना सदैव प्रस्थानभेदोऽपि ववृधे। प्राचीनकालेऽलङ्काराणां प्राधान्येऽपि रसालङ्कारोऽन्यालङ्कारापेक्षया आसीत् प्रधानो भवेदलङ्कारत्वेन तस्य समता। एवं मध्यकाले ध्वनित्वेन तुल्यप्राधान्येऽपि

वस्त्वलङ्कारध्वन्यपेक्षया रसध्वनेः प्राधान्यं स्वीकृतम्। यथा—अलङ्कार-प्राधान्यवादी दण्डी

कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति।

इति स्वीकृत्य अलङ्कारापेक्षया रसस्य प्राधान्यं स्वीचकार। एवमेव ध्वनि-प्राधान्यसमयेऽभिनवगुप्तोऽपि वस्त्वलङ्कारध्वन्यपेक्षया रसध्वनेरेव प्राधान्यमभ्युपजगाम।

अस्य प्रभावो नानुकूलोऽभवत् पश्चाद्भवेषु कतिपयेषु ध्वनिसमर्थकेष्वालङ्कारिकेषु। यतोऽनेनालङ्कारं प्रति व्यर्थमेव उपेक्षाभावो जजागार। अतो मम्मट-सदृशा प्राचीनार्वाचीनदृष्टयः समन्वयत्वसाधकाः स्वकाव्यलक्षणं अलङ्कृतिं पुनः क्वापि इत्यभ्युपजग्मुः। दर्पणकारो विश्वनाथस्तु "रसात्मकं वाक्यं काव्यम्" इति लक्षणं विधाय केवलं रसस्यैव काव्यात्मत्वमङ्गीचकार, निराचकार चानिवार्यता-मलङ्कारस्य काव्ये। रसावेशाविष्टोऽयं स्वोपजीव्यस्य ध्वनेरपि काव्यात्मत्वं प्रत्याचख्यौ। किन्तु नव्यकालस्य आलङ्कारिका नैवं मोहं गताः। ते तु ध्वनि-दर्शितदिशा रसालङ्कारयोः प्राधान्याप्राधान्यविवेकमनुपालयन्तो नैजं प्रस्थान-मुपस्थापयामासुः। अर्थादस्य सम्प्रदायस्य रसालङ्कारयोरासीत् समानादरः।

अत एव पण्डितराजजगन्नाथो दर्पणकारस्यैव "रसात्मकं वाक्यं काव्यमिति" लक्षणं खण्डयति रसगङ्गाधरे स्वकाव्यलक्षणप्रसङ्गे न ध्वन्यालोककार-वक्रोक्ति-जीवितकारयोर्लक्षणे काव्यस्यात्मा ध्वनिः, वक्रोक्तिः काव्यजीवितमिति च। काव्यलक्षणविचारप्रकरणेऽस्य विस्तरो द्रष्टव्यः। अनेनेदमवसीयते यन्नव्य-कालस्य दृष्टिः सर्वथा भिन्ना द्वाभ्यां पूर्वकालाभ्याम्। तत्र प्राचीनकालेऽलङ्कारस्यैव प्राधान्यं मध्यकाले च ध्वनिव्याजेन रसस्यैव। केवलं नव्यकाल एवानयोः सौन्दर्यानुप्राणितः समन्वयो राजते। अत एव पण्डितराजस्य काव्यलक्षणमपि सङ्गच्छते। यथा—

रमणीयार्थप्रतिपादकः शब्दः काव्यम्। रमणीयता च
लोकोत्तराह्लादजनकज्ञानगोचरता॥[1]

अत्र लक्षणे रमणीयत्वेनालङ्काराणां लोकोत्तराह्लादजनकत्वेन च रसस्याभ्यु-पगमः स्पष्ट एव। एतदेवाभिप्रेत्य गोविन्दठक्कुर आह—

"नीरसे स्फुटालङ्कारविरहिणि न काव्यत्वम्। यतो रसादिरलङ्कारश्च द्वयं चमत्कारहेतुः। तथा च यत्र रसादीनामवस्थानं न तत्र स्फुटालङ्कारापेक्षा।"[2] रसतात्पर्यविरहेऽपि केवलमलङ्कारप्रधानस्य चित्रकाव्यस्य यदस्याङ्गीकरणम्, तदपि ध्वनिकारसम्मतमेव। यथा—

१. र० ग, पृ० ४। २. गो० वि०, काव्य० प्रदी० १, पृ० ८।

रसभावादिविषयविवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ॥

अतः सिद्धमिदं यन्नव्यकालस्यालङ्कारिका ध्वनिमनुसरन्तोऽपि नालङ्कारमुपेक्षन्ते ।

नवीनप्रस्थानानामुपस्थापकः पण्डितराजः । अनेन नव्यन्यायदृष्ट्या ध्वनिं निरीक्ष्य अलङ्कारस्य रमणीयताञ्च परीक्ष्य रसालङ्कारयो रामणीयकः समन्वयः साधितो यश्च समस्तस्य नवीनप्रस्थानस्य आधारभित्तिः । अत एवानेन मध्यकालापेक्षया दश अलङ्काराः अधिकं स्वीकृताः । ते च यथा—

(१) प्रोढोक्तिः, (२) ललितम्, (३) प्रहर्षणम्, (४) विषादनम्, (५) उल्लासः, (६) अवज्ञा, (७) अनुज्ञा, (८) तिरस्कारः, (९) लेशः, (१०) असमश्च ।

इतोऽन्यत् सर्वेषामलङ्काराणां वास्तविकं न्यायपद्धत्या इतरथावृत्तं परिष्कृतं च लक्षणमपि समुपन्यस्तम् । अनेन प्रायः सर्वेषामेव ध्वनिसमर्थकानां मध्यकालान्तःपातिनामालङ्कारिकाणां स्थाने-स्थाने स्वीये रसगङ्गाधरे समुल्लेखः कृतो यथावसरं च तेषामलङ्कारलक्षणानि खण्डितानि । अनेन नवीनप्रस्थानं भिद्यते पूर्वप्रस्थानादिति बोधयति । अत्रैवायं पूर्वालङ्कारिकाणामुल्लेखेन सह 'नव्याः' इति पदमपि प्रयुङ्क्ते । यथा—

अलङ्कारसर्वस्वकारस्तु,[१] यत्तावदप्पयदीक्षितै[२]र्विद्याधरोक्तं ध्वन्युदाहरणमनूद्य दूषितम्, नव्यास्तु[३] काव्ये नाट्ये च कविना नाट्ये च प्रकाशितेषु । नव्यास्तु[४] मुखचन्द्रः, वाहीको गौः इत्यादौ । यदपि 'सदृशानुभवाद् वस्त्वन्तरस्मृतिः स्मरणम्' इत्यलङ्कारसर्वस्वकाररत्नाकरयोः स्मरणालङ्कारलक्षणमुक्तम्, तदपि न । एतेन द्रव्यस्य हेतुत्वेनोत्प्रेक्षणं नास्तीति प्राचां प्रवादो निरस्तः ।[५] एभिर्निर्देशैरस्य नवीनप्रस्थानपोषकता स्फुटं प्रतीयते ।

सम्प्रति नवीनप्रस्थानानि तदाधारभूता भित्तयश्च निरूप्यन्ते । अस्मिन् प्रस्थाने कवेश्चित्तवृत्तिरेव प्राधान्येन प्रथते, अलङ्काराणां चित्तवृत्तिरूपत्वात्, भङ्गिभणिति रूपत्वात्, शब्दार्थयोः विच्छित्तिरूपत्वाच्च । अत्र भङ्गिभणितिः शब्दार्थयोर्विच्छित्तिर्वा कवेश्चित्तवृत्तिसाध्या । अतोऽलङ्कारप्रस्थानं कवेश्चित्तवृत्तौ प्रतिष्ठितम् । सा च वस्तुप्रतिपादनार्थं सादृश्येन विरोधेन शृङ्खलया चेति त्रिधा प्राधान्येन प्रवर्तते । एते एव मुख्या मनोविकारा ये बाह्यवस्तुजातवीक्षणे बालेऽपि समुत्पद्यन्ते । चमत्कृतौ वैचित्र्याभिभूतो प्रतिभया प्रेरितो वा बालो विनोदभावेन

१. र० ग०, पृ० २५१ ।
२. तत्रैव, पृ० २५४ ।
३. तत्रैव, पृ० २५ ।
४. तत्रैव, पृ० १४९ ।
५. र० ग० पृ० २२१ ।

स्वेच्छया चात्र प्रवृत्तः व्युत्पद्यते। अत इदमेव चमत्कृतित्वं वैचित्र्यं प्रतिभा-प्रवर्तितत्वं वा अलङ्काराणां बीजम्। इदमेव वैचित्र्यबीजं सूक्ष्मशेमुषीजुषां कवीनां लोकातिक्रान्तगोचरं वचो निमित्ततः प्रवर्तयति। एभिर्वचोभिः कवेर्भावाः सुखेन विभाव्यन्ते, सहृदयहृदयमवतीर्णाश्चैते चेतश्चमत्कारमुल्लासयन्ति।

अत्र यानि निमित्तानि, तान्येव शब्दव्यापाररूपत्वादलौकिकानि सन्त्यलङ्कारपदभाञ्जि भवन्ति काव्यशास्त्रे। अत एव भामहोऽपि सङ्गच्छते। यथा—

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यतेऽतिशयोक्तिं तामलङ्कारतया तथा॥
सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[1]

वेनमहोदया अपीदं समर्थयन्ते—

"ए फिगर आफ स्पीच इज ए डेभियेशन फ्राम दि प्लेन एण्ड आर्डिनरी मोड आफ स्पीकिङ्ग फार दी सेक ग्रेटर इफेक्ट, इटिज एन अनुजुअल फार्म आफ स्पीच।"[2]

एवमेतानि त्रीणि सादृश्य-विरोध-शृङ्खलाख्यानि नूतनान्यलङ्कारप्रस्थानानि पण्डितराजनिरूपितानि। एष्वेव प्रतिष्ठितोऽशेषो अलङ्कारवर्गः।

प्राचीनप्रस्थानस्थापनप्रसङ्गे प्रस्थानवैशिष्ट्यं प्रागुल्लिखितम्, तदत्रापि सङ्गच्छत इति सुसम्पन्नमस्यापि प्रस्थानत्वम्।

## सादृश्य-प्रस्थानम्

इदं भेदप्रधानम् अभेदप्रधानञ्चेति मुख्यतो द्विविधम्। अन्येऽपि बहवोऽवान्तरभेदा विस्तरभिया नेह प्रतन्यन्ते। सादृश्यप्रस्थानं भेदप्रधानेषु उपमा-दृष्टान्त-प्रतिवस्तूपमा-दीपक-तुल्ययोगितादिषु चमत्कारिषु तत्तन्निष्पादकतया तत्तदलङ्कारतां भजते। न चात्र भेदौपम्यरूपसामान्यलक्षणत्वाद् बहूनामलङ्काराणामुपमादिकतिपयालङ्कारगर्भे विनिवेशापत्तिः शङ्क्या; चमत्कारविच्छित्तीनां प्रत्यलङ्कारभिन्नत्वेन चमत्कृत्याधारे प्रतिष्ठितस्य सकलालङ्कारिकसिद्धान्तस्य भङ्गप्रसङ्गात्, प्राचीनविभागस्य शैथिल्यपाताच्च।

एषैव चाभेदप्रधानेष्वपि रूपकाऽपह्नुति-परिणाम-भ्रान्तिमदुल्लेखादिषु सादृश्य-प्रस्थानस्य सरणिः।

## विरोध-प्रस्थानम्

इदमपि प्रस्थानं विरोधमूलकेषु विभावना-विशेषोक्त्यसंगत्यादिषु चमत्कारिषु (विद्युत्प्रभावादापाततः) प्रतिभासमानं चमत्कारबीजं तत्तदलङ्कारतामुपैति।

---

१. भामह, २.८१,८५। २. 'रेटेरिक एण्ड कम्पोजीशन' १।

अत्र भासमान एव विरोधो ग्राह्यो नात्यन्तिकस्तथात्वेऽचारुत्वादनलङ्कारतापत्तेः। न च यद्यत्र भासमानो विरोध एव प्रस्थानस्य बीजमभ्युपेयते, तदा तु सादृश्यं वाच्यम् चमत्कृतिप्रयोजकतया सादृश्यस्यैव आलङ्कारिकैरलङ्कारतायाः तस्य चाभेदस्य चमत्कृतित्वाभावात्। यथोक्तम्—

"इह हि अलङ्कारवर्गे यो यत्र सहृदयचमत्कृतिमवतरति स एव तत्रालङ्कार इति निर्विवादम्। एवञ्च 'मुखं चन्द्र' इत्यादौ यद्यप्यस्ति विरोधस्तथापि न स तत्र प्रतिपिपादयिषितः। अपि तु चन्द्रनिष्ठाह्लादकत्वादिसकलगुणानां मुखे प्रतिपत्त्यर्थं चन्द्रभेद एवेति स चमत्कारी, न विरोधः। प्रत्युत सन्नपि विरोधो विवक्षितार्थाननुगुणत्वात् दूषित इति नालङ्कारः।"[1] अतो न विरोधसादृश्यप्रस्थानयोः साङ्कर्यम् उभयक्षेत्रयोरितरानन्तःपातित्वात्। अपि तु विरोधाभासमारभ्य व्याघातालङ्कारपर्यन्तविरोधस्य क्षेत्रम्। नानारूपं वैचित्र्यं भजन्त एत अलङ्कारा विरोधस्यैवान्तरभेद रूपाः न तु ततोऽतिरिक्ताः।

## शृङ्खला-प्रस्थानम्

इदञ्च कार्यकारणता-विशेषण-विशेष्यतादिनानारूपम्। इदमपि कारणमाला-एकावली-सार-काव्यलिङ्गादिषु चमत्कारिषु तत्तन्निष्पादकतया स्थितं चमत्कारित्वेन तत्तदलङ्कारतां भजते। अस्मिन् प्रस्थाने पूर्वं प्राचीननवीनालङ्कारप्रस्थानापेक्षया वैशिष्टयम्, यतो नेदं प्रस्थानं स्वरूपतोऽलङ्कारविशेषतामुपैति। अन्ये च स्वभावोक्ति-वक्रोक्तिप्रस्थाने स्वरूपतः स्वभावोक्तिवक्रोक्तिरूपमलङ्कारविशेषत्वमुपेतः। नवीने च विरोधप्रस्थाने विरोधो विशेषालङ्कारवपुः। परं नैतद्दूषणम्, अपि तु भूषणमेव यतः सामान्यरूपं प्रस्थानं विशेषरूपञ्चालङ्कारवपुः अतो विशेषनिर्मुक्तस्य सामान्यस्याभावात् नालङ्कारविशेषव्यपदेशः सामान्यरूपस्य प्रस्थानस्य सङ्गत इति। अतः शृङ्खलाप्रस्थानस्य पृथक्तया नान्यप्रस्थानवदलङ्कारविशेषरूपत्वम्। अत्रापि सहृदयहृदयचमत्कारः प्रस्थानस्य विशेषालङ्काररूपतां निर्वाहयति। परं नात्र शृङ्खलायां प्रस्थानरूपिण्याम्, कार्यकारणतादिरूपाणां विशेषालङ्कारवपुषां विरहे केवलं शृङ्खलायाश्चमत्कारजनकतावच्छेदकतानवच्छिन्नत्वात्।

एवं त्रिविधमिदं पण्डितराजाभिमतं नवीनं प्रस्थानम्। एतदाश्रित्य अलङ्कारा अपि त्रिधा विभक्ताः रसगङ्गाधरे। तद्यथा—पण्डितराजेन नवीनप्रस्थानदृष्टया सादृश्य-विरोधशृङ्खलाभेदेन अलङ्कारास्त्रिधाविभक्ताः।

तत्र सादृश्यप्रस्थानमूलका अलङ्कारा उपमा, उपमेयोपमा, अनन्वयः, असमः, उदाहरणम्, स्मरणम्, रूपकम्, परिणामः, ससन्देहः, भ्रान्तिमान्, उल्लेखः, अपह्नुतिः, उत्प्रेक्षा, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः,

1. रस ग० पृ० ४३०।

निदर्शना, व्यतिरेकः, सहोक्तिः, विनोक्तिः, समासोक्तिः, परिकरः, श्लेषः, अप्रस्तुतप्रशंसा, पर्यायोक्तम्, व्याजस्तुतिः, आक्षेपः—इत्याख्याः एकोनत्रिंशदलङ्काराः।

विरोधप्रस्थानमूलकाः—विरोधः, विभावना, विशेषोक्तिः, असङ्गतिः, विषमः, समः, विचित्रम्, अधिकः, अन्योन्यः, विशेषः, व्याघातः-इत्यभिधाः एकादशालङ्काराः।

अवशिष्टाश्च कारणमाला-एकावली-सारादयस्त्रिंशदलङ्काराः शृङ्खलाप्रस्थानमूलकाः।

ए० वी० गजेन्द्रगड़करमहोदयैरपि काव्यप्रकाशस्य आङ्ग्लभाषीयानुवादटिप्पण्यादिसमलङ्कृतप्रकाशनस्य भूमिकायामलङ्काराणां वर्गीकरणप्रकरणे सूचितं नवीनं मनोवैज्ञानिकं नवीनप्रस्थानं विभाजनम्। एतेषां नये चित्तवृत्तिरूपाणामलङ्काराणां प्रस्थानेनापि तथैव मनोवैज्ञानिकेन भाव्यम्। अत्र पूर्वोपन्यस्ता दृष्टयोऽवधातव्याः। विस्तरभिया नेह पुनः प्रतन्यते। परमिदं तु विशेषतो ज्ञेयं यन्न सर्वथा मनोवैज्ञानिकता काव्यशास्त्रे स्तुत्या शब्दार्थजन्मनः शब्दव्यापारस्यालौकिकत्वेन मनोविज्ञानपद्धतिविरुद्धत्वात्। अत्र व्यवहृतानामीक्षणविश्लेषणनिगमनादीनां व्यापाराणां कार्यकारणपरत्वेन सर्वथा लौकिकत्वात्। आग्रहश्चेद् रसादीनामलङ्काराणां व्यङ्ग्यता विपत्तेः अनिश्चीयमान-हेतुत्वेन चोत्प्रेक्षादीनामलङ्कारताप्रसक्तेश्च। अतो नालङ्कारशास्त्रे श्रेयसी सर्वथा साधारणमनोवैज्ञानिकता। आंशिक्यायास्तु व्यपोहो नोचित इत्यलं विस्तरेण।

अतो गजेन्द्रगडकरमतेन विरोधसादृश्यानुरूप्यविविधात्मकानि चत्वारि मनोवैज्ञानिकानि नवीनान्यलङ्कारप्रस्थानानि। तत्र विविधात्मकं प्रस्थानं तु न सर्वथा स्वतन्त्रम्, अन्येषां विरोधादीनां त्रयाणां प्रस्थानानां वैशिष्ट्यस्यात्रोपलम्भात्। प्राधान्येन आनुरूप्यस्यैव विशिष्टगुणस्यात्र अभ्युपगमत्वात् तत्रैवास्य विविधात्मकस्यान्तर्भाव उचित इति त्रिविधमेव अलङ्कारप्रस्थानमभिमतं गजेन्द्रगडकरमहोदयानाम्।

अधुना प्रस्थानत्रयमाश्रित्यालङ्काराणां विभागोऽपि प्रदर्श्यते। अत्र विविधात्मकेऽपि विभागे विनिवेशिता अलङ्काराः, किन्तु स वैशिष्ट्यवशात् त्रिषूक्तेषु तत्तत्प्रस्थानेष्वन्तर्भाविता विज्ञेयाः। सम्प्रति स्वकृतप्रस्थानमाश्रित्य अलङ्कारविभागः प्रस्तूयते।

सादृश्य ( Similarity ) प्रस्थानमूलका अलङ्काराः—

अत्र सादृश्यमूलकानामलङ्काराणां संख्या विंशतिः ( २० )। एतेऽपि सादृश्यस्य भिन्नत्वात् त्रिषु वर्गेषु विभक्ताः। तत्र प्रथमवर्गे सन्ति उपमा-उपमेयोपमा-अनन्वयश्चेति त्रयः। अत्र भेदात्मकं सादृश्यम्।

द्वितीय वर्गे—सन्देहः ( द्विकोटिकं ज्ञानम् ), उत्प्रेक्षा (उत्कटकोटिकम्) रूपकम् ( अभेदः ), अपह्नुतिः ( अपह्नवपूर्वकोऽभेदः ), अतिशयोक्तिः ( अध्यवसानम् ), भ्रान्तिमान् ( अनार्याभेदज्ञानम् ) इत्याख्या अलङ्काराः। अत्राभेदात्मकं सादृश्यमेव नानारूपं परिणमति।

तृतीय वर्गे—अवशिष्टाः प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, दीपकम्, तुल्ययोगिता, समासोक्तिः, अप्रस्तुतप्रशंसा ( पञ्चमी ), सामान्यम्, मीलितम्, प्रतीपम्, व्यतिरेकः इत्यभिधा अलङ्काराः। एवमेते सादृश्यप्रस्थानमूलकाः विंशत्यलङ्काराः।

विरोधप्रस्थानमूलका अलङ्काराः—

अत्रापि विरोधस्य आभ्यन्तरबाह्यभेदेन द्विविधा भेदमूलका अलङ्काराः। तत्र आभ्यन्तरभेदमूलकाः—विषमः ( प्रथमः प्रकारः ), विशेषः, अधिकः, व्याघात इत्यभिधाः।

बाह्यविरोधमूलकाः—अतिशयोक्तिः, (चतुर्थो भेदः), विभावना, विशेषोक्तिः, असंङ्गतिः अतद्गुणम् इत्याख्याः।

आनुरूप्य ( Contiquity ) प्रस्थानमूलका अलङ्काराः—अप्रस्तुतप्रशंसा ( प्रथमं प्रकारमारभ्य चतुर्थे यावत् ) सूक्ष्मः, स्मरणम् इत्यभिधास्त्रयः। एतदानुरूप्यमतिशयोक्तेः प्रथमप्रकारमारभ्य तृतीयं यावदप्रस्तुतप्रशंसायाः पञ्चमप्रकारे समासोक्तौ चाधिगम्यते। किन्त्वेते अलङ्काराः पूर्वे सादृश्यप्रस्थानमूलका अपि वर्णिताः। एवमेकत्रिंशदलङ्कारास्त्रिषु मुख्येषु सादृश्यविरोधानुरूप्येषु स्थापिता विज्ञेयाः।

अवशिष्टानां चैकत्रिंशदलङ्काराणां मध्ये चत्वारो मालादीपक-कारणमाला-सार-एकावली-इत्याख्याः शृङ्खलामूलाः। शिष्टाश्च पञ्च काव्यलिङ्गम्, अर्थान्तरन्यासः, अनुमानम्, उत्तरः ( प्रथमः प्रकारः ) इत्याख्यास्तर्कन्यायमूलकाः।

एवमलङ्काराणां द्वाविंशतिरेवावशिष्यते। एते चालङ्कारा विविधात्मके ( Miscellaneous ) प्रस्थाने विनिवेश्यन्ते। एष्वानुरूप्यप्रस्थानस्य वैशिष्ट्यं वर्तते। अतस्तत्रैव द्वाविंशदलङ्काराणां विनिवेश उचितः। तत्रापि श्लेष-यथासंख्य-स्वभावोक्ति-परिवृत्ति-पर्यायाख्या अलङ्काराः प्रायो न कस्मिन्नपि प्रस्थाने स्थाप्यन्ते, तत्तत्प्रस्थानेषु स्वीकृतस्य वैशिष्टस्यात्रानुपलम्भात्।

एवं मनोवैज्ञानिकं नवीनप्रस्थानमाश्रित्य अलङ्काराणां विभागो विहितो गजेन्द्रगडकर महोदयैः। एषोऽपि विभागोऽन्यविभागवन्न सर्वथा व्यावृत्तं विभागं प्रस्तौति अलङ्काराणाम्, अपि तु संश्लिष्टमर्थादेक एवालङ्कारो वर्गद्वये प्राप्यते। अयं क्रमः प्राचीननवीनप्रस्थानयोरलङ्कारविभागे समानः। यत एक एवालङ्कारो

रुद्रटादिभिर्भिन्ने वर्गे स्थापितः। यथा—सहोक्ति-विषम-हेतूत्तरोत्प्रेक्षादयो नव अलङ्कारा वर्गद्वये विनिवेशिताः। नैष दोषः, दृष्टिभेदेनास्य समर्थनात्। अस्य विस्तृतो विचारो रुद्रटस्य अलङ्कारविभागविवेचने वक्रोक्तिधारानिरूपणप्रसङ्गे-कृतः। अतोऽलङ्कारविभागे कवेर्दृष्टिभेदः प्रथत इत्यवधेयम्।

अत्र नवीनानि प्रस्थानानि तदाश्रितानलङ्कारविभागांश्च समीक्ष्येदं प्रतीयते यद् यावन्तो वर्गीकरणप्रकारा मम्मटानन्तरमालङ्कारिकैस्तत्र तत्रोपन्यस्ताः, सर्वेऽपि नवीनप्रस्थानत्वेन अभ्युपगन्तव्याः। यतो मम्मटानन्तरं प्राचीनानि प्रस्थानानि न स्पष्टं दृष्टिगोचरतामुपयान्ति। मम्मटात्पूर्वमपि रुद्रटादयोऽलङ्कारविभागे न प्राचीनानि प्रस्थानानि सुव्यक्तं विन्यसन्ति, यद्यप्यन्तर्गर्भतया भवत्येव प्राचीन-प्रस्थानपरिष्वङ्गः। एतद् रुद्रटालङ्कारविभागव्याख्याप्रसङ्गे वक्रोक्तिधारानिरूपणे विस्तरतो विचारितम्। तत्रैवेदमभ्युपगतं यद् सर्वत्रैवालङ्कारविभागे साक्षात्पर-म्परया वा प्राचीनप्रस्थानान्यनुस्यूतानि प्रतीयन्ते। अत एव काव्यप्रकाशस्या-लङ्कारविभागे प्राचीनप्रस्थानविभाजनमाश्रितम्। वस्तुतो नवीनप्रस्थानानां पथैव विभागे सरलता। अतोऽन्यान्यपि नवीनप्रस्थानानि निर्दिश्य अयमलङ्कार-प्रस्थानविमर्शोऽत्रोपसंह्रियते।

अलङ्काराणां विकाशवर्गीकरणप्रकरणे प्रायः सर्वाण्येव प्रधानानि वर्गीकरणानि समुपन्यस्तानि। अत्र नवीनप्रस्थाने तान्यपि गणनीयानि, यतस्तेष्वपि प्रस्थानत्वं प्रतीयते। प्राचीनप्रस्थानेभ्यस्तेषां भेदः सुस्पष्ट एव। न कस्मिन्नपि नवीनप्रस्थाने प्राचीनप्रस्थानानां स्पष्टः संकेतो दृश्यते। किन्तु सूक्ष्मसमीक्षायां प्राचीननवीन-प्रस्थानयोर्वर्तते घनिष्ठः सम्बन्ध इति स्फुटं स्यात्। एतद्विनाऽलङ्कारबीजज्ञानेन भवेत्सुगमता। केवलं वैचित्र्यं सौन्दर्य-चमत्कृति-विच्छित्ति-हृद्यत्वादिशब्दैः प्रति-पादितमलङ्कारबीजत्वं नाभिमतमलङ्कारत्वं व्यवस्थापयति। आलङ्कारिकाणां दृष्टिभेदेन कविप्रतिभानिर्वर्तितत्वे प्रतिष्ठितानां वैचित्र्यसौन्दर्यादीनां भेदस्य सम्भवात्। अत एव हेतुसूक्ष्मलेशादीनामलङ्कारत्वे वर्धते विवाद आलङ्कारिकेषु। अलङ्कारस्य प्राचीननवीनप्रस्थानयोः सहभावेन निष्पन्नायामलङ्कारदृष्टौ सर्वेऽल-ङ्कारविवादा विरताः स्युः सम्प्रवर्तेत च संस्कृतसमीक्षासम्मता दृष्टिरलङ्काराणामिति।

## द्वितीयोऽध्यायः

# अलङ्कारे प्रस्थान-त्रैविध्यस्थापनम्

इत्थं पूर्वप्रकरणेषु तेभ्यस्तेभ्यः काव्यतत्त्वेभ्यः साधनानि सङ्गृह्य सोपपत्तिकाभिर्युक्तिभिः सम्यक् परीक्ष्य प्राचीननवीनप्रस्थानप्रदर्शनपुरस्यसरमलङ्कारस्य प्रस्थानस्य अवान्तरप्रस्थानानां धाराणां वा विमर्शो विहितः तत्रालङ्कारस्य स्वभावोक्ति-वक्रोक्तिरसोक्त्याख्यानि त्रीणि प्राचीनानि सादृश्य-विरोध-शृङ्खलाभिधानि त्रीणि नवीनानि च प्रस्थानानि निर्धारितानि। तत्रेदमपि स्वीकृतं यद् वर्गीकरणप्रकरणे यावन्ति प्रधानान्यलङ्काराणां वर्गीकरणानि दर्शितानि तान्यपि नवीनप्रस्थानत्वेन अङ्गीकार्याणि। एवं प्राधान्यतः प्राचीननवीनभेदेन द्विविधोऽलङ्कारस्य प्रस्थान-विमर्शो विहितः। अत्र प्राचीनानि विस्तरेण विचारितानि। प्रायः शोध-प्रबन्धस्याधिकोंऽश एभ्य एवार्पितः। यत एतानि त्रीणि अलङ्कारस्योभयोरपि प्राचीननवीनप्रस्थानयोर्मूलम्। अत एतेषां प्रत्येकं धारारूपेण विस्तृतः प्रातिस्विको विचारः कृतः। तत्र तत्र च तन्मूलका अलङ्कारा अपि विस्तरेण समीक्ष्य दर्शिताः। यथा स्वभावोक्तिधारानिरूपणानन्तरं तन्मूलका अलङ्कारा अपि तत्रैव प्रदर्शिताः। एष एव क्रमः प्रायः शिष्टेष्वन्यप्रस्थानेष्वपि स्वीकृतः। एवमलङ्कारस्यावान्तरप्रस्थानानां पूर्वकृतो विमर्शोऽयमतीव संक्षेपेणात्र दर्शितः।

अत्रालङ्कारो रसरीतिध्वनि-वक्रोक्त्यौचित्याख्येभ्यः प्रसिद्धप्रस्थानरूपेभ्यः काव्यतत्त्वेभ्यो भिन्न एव ग्राह्यः। अर्थात् ध्वन्यालोककारस्य अलङ्कारसरणि-व्यवस्थैवानुसर्तव्या। न च प्राचां मतं यत्र सर्वाण्येव काव्यतत्त्वान्यलङ्कार-त्वेनैवाभिमतानि। न च प्रसिद्धप्रस्थानातिरेकिणी वक्रोक्तिरलङ्कृतिरूपा, तथात्वे स्वभावोक्तिरसोक्तिमूलकानामलङ्काराणामनलङ्कारतापत्तेः। अतो ध्वनिकृता व्यव-स्थिता अलङ्कारसरणिरेव श्रेयसे प्रकृतशोधप्रबन्धस्य "अलङ्कारप्रस्थान-विमर्शस्य" चेति सैवात्र सामान्येन स्वीकार्या। अतो ध्वनिमतानुसारि-मम्मटस्य अलङ्कार-लक्षणमत्राभ्युपेयम्। यथा—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥[1]

एवं च मम्मटमतेन 'रसोपकारकत्वे सति तदवृत्तित्वम्, तथात्वे सति रसा-नियतस्थितिकत्वम्, अनियमेन रसोपकारकत्वमिति लक्षणत्रितयं फलितम्।

---

१. का० प्र०, ८।

अलङ्कारलक्षणं तु परिष्कृत्य अलङ्कारलक्षणविचारे प्रसङ्गतो रसोक्तिधारा-निरूपणे च दत्तम्। अत्र तु उपसंहारेऽलङ्कारक्षेत्रनिर्धारणार्थं तस्य सङ्केतः कृतः।

अलङ्कारस्येदं प्रस्थानात्मकं लक्षणं सर्वाणि रीतिध्वनिवक्रोक्त्यौचित्याख्यानि प्रस्थानानि परिहायावशिष्यते। अलङ्कारप्राधान्यकाले सर्वाण्येवैतानि प्रस्थानानि तत्रैवान्तर्भावितान्यासन्। क्रमशः पूर्वोक्तेष्वेषु प्रस्थानेषु बहिर्भूतेष्वलङ्कार-क्षेत्रं स्वभावतया सीमानमभजत्। परमेषामन्तर्धारा अलङ्कारेऽवशिष्टाः पुष्यन्ति कान्तं वपुरलङ्कारस्याधिकम्। एता अलङ्कारस्य अवान्तरप्रस्थानतां प्रख्यापयन्ति। अत्र प्रमाणमस्ति ध्वनिकर्तुः ध्वनेर्व्यङ्ग्यप्राधान्येऽअलङ्कारादुद्धृतं त्रिविधं रूपम्। इदं स्पष्टमलङ्कारेऽवान्तरप्रस्थानत्रैविध्यं निर्दिशति। कुन्तकस्य स्वभावोक्तिरसो-क्त्योरलङ्कारताया निराकरणमपि निषेधमुखेनालङ्कारे प्रस्थानत्रैविध्यं स्फुटीकरोति। पी० वी० काणे, एस० के० डे प्रभृतीनामाधुनिकानामालोचकानां सम्मति-रप्यत्रेति प्राङ् निरूपितम्। अस्य विस्तरः प्रस्थानसमर्थनप्रकरणे कृतः।

एष एवालङ्कारप्रस्थानविमर्शः अस्माकं शोधप्रबन्धस्य विषयः। अत्रालङ्का-रस्य अवान्तरप्रस्थानानामेव विमर्शो विहितो अप्रकृततयाऽलङ्कारविशेषविचार-स्तु त्यक्तः। केवलमलङ्काराणां विकाशवर्गीकरणयोरध्ययनं तत्प्रकरणेऽलङ्कारप्र-स्थानपरिज्ञानार्थं स्वीकृतम्। संक्षेपतः सर्व एवात्रायासा अलङ्कारप्रस्थानपरिस्था-पनार्थमेव विहिताः।

एतदर्थं काव्योपयोगित्वं प्रयोजनं वा प्रथमं परीक्षितम्। अत्र काव्ये ग्राह्य-त्वमलङ्कारादेवेत्यर्थं "काव्यं[२] ग्राह्यमलङ्कारात्" इति वामनस्य सम्मतिरपि दर्शिता। अत्रैव क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरिति मम्मटमतं चन्द्रा-लोकदर्शितदृष्ट्या परीक्ष्याऽलङ्कारस्य रसप्राधान्येऽपि काव्येऽनिवार्यत्वमङ्गीकृत-मलङ्कारस्य काव्यार्थविभावनार्थमभ्युपगतत्वात्। अतः परं काव्यलक्षणविचारे प्रायोऽशेषाणि प्रधानानि काव्यलक्षणानि दर्शितानि अत्रापि कतिपयानि प्रस्थानपरिशीलनार्थं सूक्ष्मतया समीक्षितानि। यतः काव्यलक्षणे प्रायो लाक्ष-णिकाः प्रस्थानदृष्टिं प्रक्षिपन्ति। अत एव काव्यलक्षणे घटकतया स्थितानि प्रस्थानान्यपि स्वतन्त्रतया निरूपितानि। समुद्रबन्धस्य समर्थनमप्यत्र दत्तम्।

एवं प्रस्थानमीमांसाप्रकरणे प्रसिद्धानां रसरीतिध्वन्यादीनां प्रस्थानाना-मलङ्कारस्य अवान्तरप्रस्थानप्रतिपत्त्यर्थं मीमांसा कृता। प्रस्थानसमर्थनप्रकरणे तु अलङ्कारस्यावान्तरप्रस्थानानां समर्थनार्थं सोपपत्तिका अनेका युक्तयो दत्तास्तत्रैवाधुनिकानामालोचकानां सम्मतयोऽपि निर्दिष्टाः अनेन विधिना अलङ्कारस्य त्रीणि प्रस्थानानि निःसन्दिग्धं निरूपितानि।

---

२. वामनः, का० सू०।

अनेनालङ्काराणां विकाशवर्गीकरणभेदोपभेददर्शनविषयविभाजनाद्यनेके प्रश्नाः सुसमाहिताः स्युः अलङ्कारस्यावान्तरप्रस्थानपरिज्ञानाभावे न केऽप्यलङ्कारसम्बन्धिनो विवादाः सुविज्ञेयाः स्युः। यथा—

हेतुः सूक्ष्मोऽथ लेशश्च नालङ्कारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥[1]

अत्र वक्रोक्तेरभावाद् भामहो न समर्थयतेऽलङ्कारतां हेतुसूक्ष्मलेशानाम्। किन्तु दण्डी इमान् उत्तमभूषणत्वेनाङ्गीकुरुते। यथा—

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्।[2]

एवंविधानि परस्परविरुद्धानि वचनानि अलङ्कारप्रस्थानविमर्शं विना न समाधेयानि। अत्र वक्रोक्तेः पोषको भामहो हेतुसूक्ष्मादीनामलङ्कारतां वक्रोक्त्यभावान्निषेधति। स्वभावोक्तिवक्रोक्त्योरुभयोः स्वतन्त्रत्वेन समर्थको दण्डी स्वभावोक्तित्वेनैतान् उत्तमभूषणरूपान् मनुते। अत्र स्वभावोक्तिवक्रोक्तिविषयको दृष्टिभेद एव दण्डिभामहयोः हेतुसूक्ष्मलेशादीनां विषयेऽलङ्कारानलङ्काररूपं मतवैभिन्न्यं प्रदर्शयति। उभावपि आलङ्कारिकौ स्वभावोक्ति-समर्थकौ। परमत्र दृष्टिभेदात् प्रस्थानभेद इति नयेन वर्तते महान् भेदोऽनयोः स्वभावोक्ति-वक्रोक्त्योः। यतो भामहस्य स्वभावोक्तिर्वक्रोक्तेः प्रकाररूपा अतो वक्रोक्त्याधिकमास्कन्दिता। परं न तथा दण्डिनः स्वभावोक्तिस्तस्या वक्रोक्तेः स्वतन्त्रतयावस्थितत्वात्। अतो भामहदृष्ट्या अभीष्टाया वक्रोक्तेरभावात् स्वभावोक्तिमूलका हेतुसूक्ष्मादयो नालङ्कारतामर्हन्ति। किन्तु दण्डिमते तु एषामलङ्कारता निर्दिष्टा।

अतोऽलङ्कारस्यावान्तरप्रस्थानानां ज्ञानमलङ्कारप्रश्नानां निर्णयार्थं नितरामावश्यकम्। एवमन्येऽपि बहवो व्याजोक्तिपरिवृत्त्यादयोऽलङ्कारा उपस्थापयितुं शक्यन्ते, यत्रालङ्कारप्रस्थानपरिज्ञानं नितान्तमपेक्ष्यते। स्वभावोक्ति-मूलकानामलङ्काराणां विचारे तु प्रायः सर्वत्रैव अलङ्कारप्रस्थानानां सङ्केतः कृतः।

यद्यप्यलङ्कारे प्रस्थानत्रैविध्यं निरूप्य तत्प्रातिस्विकतया तन्मूलका अलङ्कारा अपि विभज्य दर्शितास्तथापि अलङ्कारस्य त्रिविधानामेषां प्रस्थानानां तात्त्विको गणितानुमोदितो वा विभागो ( Mathematical divisions ) न सुकरो न च स्तुत्यः। तथा सति प्राचामलङ्कारसरणेरेव कुलीभावप्रसङ्गात्। यतोऽलङ्कारयोजनायां तिस्रोऽप्येता उक्तयः सहैवापतन्ति। आसामेकस्या अप्यभावेऽशेषैवालङ्कारकलना वैकल्यमापद्येत। अलङ्कारो हि वैचित्र्यात्मा विच्छित्तिविशेषः, स हि जन्यतासंसर्गेण कविप्रतिभाविशेषः।[3] एष च कदाचित् वक्रोक्ति-

1. भामहः २. ८६। 2. दण्डी २. २३५।
3. रसगं०।

रसोक्तिभ्यामालिङ्गिततया स्वभावोक्त्या प्रवर्तते, कदाचिच्च स्वभावोक्तिरसोक्तिगर्भया वक्रोत्या। एवं रसोक्त्यापि प्रवर्तमानः प्रतिभाविशेषो न विजहाति स्वभावोक्ति-वक्रोक्ती। निर्गलितार्थोऽयं यदेतास्तिस्रोऽप्युक्तयोऽलङ्कारार्थमनिवार्याः। आसामेकस्या अपि विरहोऽलङ्कारं विकुर्यात्। यथा वक्रोक्त्या विरहितः शुद्धो हेतुहेतुमद्भावो नालङ्कारतायाः प्रयोजकः वस्तुसिद्धत्वेन कविप्रतिभानिर्वर्त्यत्वायोगात्। न चायमिष्ट इति शङ्क्यम् लोकातिक्रान्तगोचरस्यैव वचस आलङ्कारिकैरलङ्कारतायाः स्वीकारात्। एवं वक्रोक्तिरसोक्त्योः स्थलेऽपि स्वभावोक्तेः परिष्वङ्गोऽपरिहार्यः।

एवमासां तिसृणां धाराणां सहभावः स्वाभाविकः। यथा मर्दोपमर्दभावेन स्थितानां सत्त्वरजस्तमसां प्राधान्येन व्यपदेशा भवन्तीति न्यायादेकस्य प्राधान्येऽन्यौ द्वौ गुणौ गुणभावं भजेते, एवमेवालङ्कारस्य अवान्तरप्रस्थानस्थलेऽपि एकस्या उक्तेः प्राधान्ये शिष्टयोरपरयोर्गुणभावः सम्पद्यत एव। अतोऽवान्तरप्रस्थानात्मको विभागोऽलङ्कारस्य न सर्वथा प्रातिस्विको अपि तु प्राधान्या-प्राधान्य कृत एव।

एवं यथामति यथाशास्त्रं समुपन्यस्तोऽयमलङ्कारप्रस्थानविमर्शोऽलङ्कारदृष्टिं सुदृढां विदध्यात्। फलतोऽलङ्कारे वर्तमानं कुन्तकस्याधिकं प्रभावं तनुतां नयेत् दण्डिनो मतमपि समुचितं स्थानं प्रापयेत्। अनेन विमर्शेन सर्वे स्वभावोक्तिमूला अलङ्कारा अलङ्कारत्वं प्राप्नुयुः। अत एव प्रमाणालङ्काराणामप्यलङ्कारत्वं स्यात्। स्वभावोक्तिक्षेत्रं पर्याप्तं विकसेत्। तत्र उद्भट-भामह-कुन्तकादिभिरापातितोऽनावश्यको वक्रोक्तेरस्वाभाविकः प्रभावोऽपाक्रियेत। एवं त्रिविधात्मकविमर्शेन सम्पन्नो रसोक्तिवक्रोक्त्योः परिष्वङ्गः स्वभावोक्तेः वस्तुसामान्यवर्णने वार्तामात्रात्मके वस्तुसङ्कीर्तने वा अतिव्याप्तिं निरस्येत्। अत एव "उपमानोपमेययोरभेदो रूपकं नतु कार्यकारणयोः" इति, "सादृश्यमूलं स्मरणं स्मरणालङ्कारो न तु चिन्तादिमूलम्" इति च बहूनि प्राचां मतानि सङ्गच्छेरन्। अन्यथा चिन्तादिमूले स्मरणं स्मरणस्य कार्यकारणयोरभेदे रूपकस्य च स्वभावोक्तेः सत्त्वादलङ्कारतापत्तिर्दुर्निवारा। एषैव सरणिः स्वभावोक्तिरसोक्त्योर्वक्रोक्तिगर्भतायामपि ज्ञेया। अन्यथा प्रकर्षकाष्ठाधिरोहिणी कुन्तकस्य वक्रोक्तिः स्वभावोक्ति-रसोक्तिमूलकालङ्कारपरिहाणेन प्राचामलङ्कारसरणिमेव विकुर्यात्। अतोऽलङ्कारस्य अवान्तरप्रस्थानविमर्शो नितरामुपादेयः।

अनेनालङ्कारस्य प्रतिष्ठा विषयता प्रभावश्च व्यावृत्ततया वर्द्धेत। रसालङ्कारयोः प्राधान्याप्राधान्यविवादकृतोऽलङ्काराणामुपेक्षाभावोऽपि सहृदयहृदयादपसरेत्, यतोऽलङ्काररूपिण्यां वक्रतायां रसभावादीनन्तर्भाव्यालङ्कारप्राधान्यसमर्थकः कुन्तकः पर्यवसाने स्वभावोक्तिरसोक्त्योरलङ्कारतां निषिध्य प्राचामभिमतलङ्कार-क्षेत्रं सङ्कोचयति। अलङ्कारापेक्षया वक्रोक्तेः स्वतन्त्रं प्रस्थानत्वं निर्णीय रसस्य

व्यापकतां कर्तितवान् प्राधान्यञ्च ध्वनिप्रस्थानायार्पयत्। फलतो रसालङ्कारयोर्मिलनभूमिं स्वभावोक्तिं विहाय कुन्तकोऽलङ्कारस्याधारं केवलं प्रकर्षकाष्ठाधिरोहिणीं वक्रोक्तिमेव स्वीकृत्य अलङ्कारप्राधान्यं पोषयितुं प्रयतते। रसवादी च स्वभावोक्तिप्रतिष्ठितं निजं प्राधान्यं स्वभावोक्त्यास्कन्दितया वक्रोक्त्याऽपि समर्थयितुमीहते। एवमेष एव रसालङ्कारयोर्विवादः प्रायः सर्वेषामेवालङ्कारान्तरोद्भाविनां प्रस्थानानां मूलम्। भाग्याद् ध्वनिकारेण स्वभावोक्तिरसोक्त्योरपि अङ्गतायामलङ्कारतामङ्गीकृत्य सर्वे विवादा उपसंह्रियन्ते। एवमेष ध्वनिकारेण दर्शितोऽलङ्कारस्य-त्रिविधप्रस्थानात्मको विभागः सुदृढालङ्कारप्रस्थानस्य मूलम्।

एषोऽलङ्कारस्यावान्तरप्रस्थानविमर्शो न केवलमलङ्कारसम्बन्धिनां प्रश्नानां समाधानार्थमपेक्षते अपि तु सर्वेषां प्रस्थानानां विवादोपसंहारायास्योपयोगो नितरामित्यत्र न भवेद् विसम्वादः।

अन्ते चोपसंहाररूपेणेदं सप्रश्रयं कामं विनिवेदयामः सहृदयेभ्यः समालोचकेभ्यो यदलङ्कार एवाधारशिला अशेषाणां संस्कृतसमीक्षाप्रस्थानानाम्। अवान्तरप्रस्थानविमर्शेन सुदृढेऽलङ्कारे स्वत एव दार्ढ्यमुपैति न केवलमलङ्कारप्रस्थानम् अपि तु शिष्टं प्रस्थानकलापम्। विशेषतश्च ध्वनिप्रस्थानं यस्याङ्के व्यवस्थामाससादालङ्कारसरणिः। यतोऽलङ्कारं विना न केवलो ध्वनिः काव्यात्मत्वमीशे—गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य सति ध्वननाख्यात्मनि काव्यरूपताव्यवहारः।[1]

एवं यथामति यथाशास्त्रमलङ्कारस्य प्रस्थानानि प्रदर्श्य अलङ्कारप्रस्थानविमर्शमिममुपसंहर्तुकामो विमर्शरूपिणीं परां प्रतिभां वन्दमानेन मयाऽन्ते चाचार्यदण्डिनः श्लोकमुद्धृत्य विरम्यते—

यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां वन्दे तां प्रतिभां पराम्॥[2]
पन्थाः स एष विवृतः परिमाणवृत्त्या,
संहृत्य विस्तरमनन्तमलङ्क्रियाणाम्।
वाचामतीत्य विषयं परिवर्तमाना-
नभ्यास एव विवरीतुमलं विशेषान्॥[3]

इति शिवं भूयात्

---

१. ध्वन्या०, बाल बो० टी०, पृ० ५९, २. अभिनवगुप्तः।
३. दण्डी, काव्या० २०।१९८।

SRI AUROBINDO LIBRARY PONDICHERRY (India)